Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 775 OLD ಂ೮೭

FOLIO 314

TITLE
अमरकोशव्याख्या।
[illegible]

क ४२८-६ 15-3

अथअमरकोशसटीकप्रथमकांडप्रारंभः॥

श्रीगणेशायनमः ॥ ॥कोशस्येवमहीपानांकोशास्यनिदुषामपि॥ उपयोगोमहान्यस्मात्कोशस्तेनविनाभवेत्॥१॥गोमांतकप्रांतजु
षाश्रीमहेश्वरशर्मणा॥ कृताटीकाऽमरेकोशेसंक्षिप्तार्थासुबोधिनी॥२॥ सामर्थ्यापूरिताकोशांतरशब्दाभिपूरणात्॥ भाषापर्यायशब्दै
श्चकचिल्लिंगादिभेदतः॥३॥ त्रिकांडशेषोहेमश्चविश्वकोशोऽथमेदिनी॥ एवमादिषुयेशब्दालिखितास्तेकचित्कचित्॥४॥उदाह-
रणमप्यत्रबालानांबोधहेतवे॥ केषुचिल्लिखितंनूत्नंशब्देषुप्राक्तंकचित्॥५॥कचित्तदानामर्थोपिदुर्बोधानांप्रदर्शितः॥ नामूलंकिं
चिदप्यत्रपदादिलिखितंमया॥६॥ग्रंथांतरज्ञापनाय="-"चेत्थंसंज्ञाप्रकल्पिता॥क्षेपकाःप्रायशःश्लोकास्तथाऽत्रलिखिता
मया॥७॥ शास्त्रेषुकाव्येषुकृतश्रमायैस्तैःक्षम्यतामत्रखिलंयदस्ति॥ बालोपकृत्यैविहितंमयेतत्प्रायेणमुह्यंतिहियेलिखंति॥८॥
पाठशालाधिपेक्याम्नन्याऽऽसाहेबसंज्ञिते॥ तत्संदिष्टेनविदुषातदनुज्ञया॥९॥तच्छेकरोपाभिधेनरघुनाथेनशोधिता॥
व्याख्याऽमरविवेकाख्याबर्हिताव्याप्तापुनः॥१०॥ कृत्वाद्रिसमेंदुमितेशाकेपुण्याख्यवत्सरे॥ यत्नतःपाठशालायामंकिनेयंशिला
क्षरैः॥११॥ ॥इतिप्रस्तावना॥ ॥अस्याकनस्यंयंपंचमाश्वस्तिः॥ ॥ ४ ७ ४

श्रीगणेशायनमः॥ वंदेतंपरमानंदंवामाद्दैनोमयायुतं॥रज्जोभुजंगवद्यत्रविवरीत्यतेजगत्॥ इहखलुश्रीमदमरसिंहश्चिकीर्षितस्यनाम लिंगानुशासनस्यनिर्विघ्नपरिसमाप्त्यर्थंकृतंमंगलंग्रंथादौशिष्याभिधेयार्थंनिबध्नाति॥ यस्येति। भोधीराः अगाधस्यातिगंभीरस्यज्ञानकरुणयोः समुद्रस्य यस्य अनघानिर्मलागुणाः क्षांत्यादयः संतिसोऽक्षयः श्रियेसंपन्नयेअमृतायमोक्षार्थंच भवद्भिःसेव्यतामाराध्यतां॥१॥ चिकीर्षितं प्रतिजानीते॥ समाहृत्येति। अन्येषांतंत्राणि शास्त्रांतराणि "नामलिंगानुशासनानि" समाहृत्य एकत्रकृत्वा संक्षिप्तैः अल्पविस्त

यस्यज्ञानदयासिंधोरगाधस्यानघागुणाः॥ सेव्यतामक्षयोधीराःसश्रियेचामृतायच॥१॥
समाहृत्यान्यतंत्राणिसंक्षिप्तैः प्रतिसंस्कृतैः॥ संपूर्णमुच्यतेवर्गैर्नामलिंगानुशासनं॥२॥

रवद्भिर्थैः प्रतिसंस्कृतैः प्रतिपदंप्रकृतिप्रत्ययविचारणकृतसंस्कारैः वर्गैः सजातीयसमूहैः संपूर्णंसांगोपांगं नाम्नांस्वरित्यादीनांलिंगानांचस्त्रीपुन्नपुंसकाख्यानांअनुशासनंव्युत्पादकं शास्त्रमुच्यते मयेतिशेषः॥ २॥ अथवक्ष्यमाणशास्त्रस्यनावत्परिभाषामाह त्रिभिःश्लोकैः॥ प्रायशइति॥अत्रप्रायशःबाहुल्येनरूपभेदेनआकारविशेषेणस्त्रीपुन्नपुंसकंज्ञेयं॥ यथा॥ लक्ष्मीःपद्मालयापद्मा। पिनाकोजगवंधनुः।

तथाकुत्रचित्साहचर्याच्छब्दांतरसान्निध्यालिंगंज्ञेयं। यथाअश्वयुगश्विनौ। ब्रह्मात्मभूःस्वरज्येष्ठः। वियद्विष्णुपदं। अत्रसंदिग्धानि। अश्वयुग्ब्रह्मविर्यति। आश्विन्यात्मभूविष्णुपदसाहचर्यात्स्त्रीपुन्नपुंसकलिंगानि। तथाक्वचित्तद्विशेषविधेःलिंगविशेषोक्तेः। यथा भेरीस्त्रीदुंदुभिःपुमान्। क्लीबेत्विविष्टपं॥३॥ भेदेति। अत्रास्मिन्ग्रंथेऽनुक्तानामव्युत्पादितानां भिन्नलिंगानामसमानलिंगानांनाम्नां भेदाख्यानायलिंगभेदंसमाख्यातुंहृदोनकृतः। यथा। कुलिशंभिदुरंपविः। ननुकुलिशाभिदुरपवयइति। तथैकशेषोपिनकृतः। शिष्यमा-

प्रायशोरूपभेदेनसाहचर्याच्चकुत्रचित्॥स्त्रीपुन्नपुंसकंज्ञेयंतद्विशेषविधेःक्वचित्॥३॥
भेदाख्यानायनहृद्योनैकशेषोनसंकरः॥कृतोऽत्रभिन्नलिंगानामनुक्तानांक्रमादते॥४॥

णलिंगस्यैवप्रतीतेः। यथा। नभःखंश्रावणोनभाः। ननुखश्रावणोनुनभसीइति। तथाक्रमादतेक्रमंविनासंकरोपिभिन्नलिंगानांमिश्रीभावोपिनकृतः। साहचर्येणलिंगनिश्चयाभावप्रसंगात्। किंतुस्त्रीपुन्नपुंसकानिक्रमेणपठितानि। यथा। स्तवःस्तोत्रंस्तुतिर्नुतिः। ननुस्तुतिःस्तोत्रंस्तवोनुतिरिति। अत्रप्रायशोरूपभेदेनेत्याद्युक्तरीत्यायेषांलिंगंव्युत्पादितंतेषांतुभिन्नलिंगानामपिस्थलांतरेहृद्यादयःकृताः। यथा। अप्सरोयक्षरक्षोगंधर्वकिन्नराः। मातापितरौपितरौ॥४॥

त्रिलिंग्यामिति। त्रिलिंग्यांलिंगत्रयसमाहारेत्रिष्विति पदमुक्तं। यथा। त्रिषुस्फुलिंगोऽग्निकणः। स्फुलिंगशब्दोलिंगत्रयेपिवर्ततइत्यर्थः।। तथामिथुनेस्त्रीपुंसयोर्द्वयोरिति पदं। यथा। वन्हेर्द्वयोर्ज्वालकीलौ। तथानिषिद्धलिंगंशेषार्थं ।यत्रलिंगंनिषिद्धं तत्र तदवशिष्टंलिंगंज्ञेयं।यथा व्योमयानंविमानोऽस्त्रीत्यत्रस्त्रीलिंगेनिषिद्धेविमानस्यपुन्नपुंसकविधिः। तथातुशब्दःअंतोयस्यतत्वंतं।अथशब्दःआदिर्यस्यतदथादि। इदंद्वयंपूर्वभाकूनभवतिपूर्वेणनसंबध्यते। यथापुलोमजाशचींद्राणीनगरीत्वमरावतीत्यत्रनगरीतिर्त्वंतपदंइद्राण्यानसंबध्यते।

त्रिलिंग्यांत्रिष्विति पदंमिथुनेतुद्वयोरिति।। निषिद्धलिंगंशेषार्थंत्वतथादिनपूर्वभाकू॥५॥

स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालयाः।। सुरलोकोद्यौर्दिवोद्वेस्त्रियांक्लीबेत्रिविष्टपं॥६॥

किंत्वमरावत्यासंबद्धं। तथानित्यानवरताजस्रमव्यथातिशयोभरइत्यथादिपदंनपूर्वभाकू। किंतुभरस्यपर्यायः॥५॥ स्वरिति। स्वः। स्वर्गः। नाकः।त्रिदिवः।त्रिदशालयः।सुरलोकः। द्यौः।द्यौः।त्रिविष्टपं। इतिनवनामानिस्वर्गस्य। तत्रस्वरित्यव्ययंलिंगसंख्याकारकाभाववदित्यर्थः। द्यादिवौद्वेस्त्रीलिंगे। द्यौर्गोवद्वाद्यः।द्यौः दिवौ दिवः। द्युभ्यामित्याद्यपरः। "त्रिविष्टपंक्लीबेनपुंसकेएव। त्रिदशालयादयः सुरसुदनादिशब्दोपलक्षकाः। एवमुत्तरत्रापि अर्थसाम्येनपर्यायांतराणिस्वयमूह्यानि॥६॥

अमराः। निर्जराः। देवाः। त्रिदशाः। विबुधाः। सुराः। सुपर्वाणः। सुमनसः। त्रिदिवेशाः। दिवौकसः॥ "दिवौकसः।"॥७॥ आदितेयाः। दिविषदः। लेखाः। अदितिनंदनाः। आदित्याः। ऋभवः। अस्वप्नाः। अमर्त्याः। अमृतांधसः॥८॥ बर्हिर्मुखाः। क्रतुभुजः। गीर्वाणाः। "गीर्वाणाः"। दानवारयः। इंदारकाः। देवतानि। देवताः। इति षड्विंशति नामानि देवानां। व्यक्तिबाहुल्यात् बहुवचनप्रयोगः। विकल्पेन देवतशब्दः पुंसि। यथा देवत

अमरानिर्जरादेवास्त्रिदशाविबुधाःसुराः॥ सुपर्वाणःसुमनसस्त्रिदिवेशादिवौकसः॥७॥ आदितेयादिविषदोलेखाअदितिनंदनाः॥ आदित्याऋभवोःस्वप्नाअमर्त्याअमृतांधसः॥८॥ बर्हिर्मुखाःक्रतुभुजोगीर्वाणादानवारयः॥ इंदारकादेवतानि पुंसिवादेवताःस्त्रियां॥९॥ आदित्यविश्ववसवस्तुषिताभास्वरानिलाः॥ महाराजिकसाध्याश्चरुद्राश्चगणदेवताः॥१०॥

मिदं देवतायमिति। देव एव देवता स्वार्थेतल्॥९॥ अथसंघचारिणआह॥ आदित्येति। आदित्याद्वादशा। विश्वेत्रयोदशा। वसवोष्टौ। तुषिताः षड्विंशतु। आभास्वराः चतुःषष्टिः। अनिलाएकोनपंचाशत्। महाराजिकाः विंशत्यधिकशतद्वयं। साध्याद्वादशा। रुद्राएकादशा। एतागणदेवताः। अत्र तुषिता द्या गणा बौद्धपांतंजलादौ द्रष्टव्याः॥१०॥

देवयोनीनाह॥ विद्येति। विद्याधराजीमूतवाहनादयः। अप्सरसोदेवांगनाः। यक्षाःकुबेरादयः। रक्षांसिमायाविनोलंकादिवासिनः। गंधर्वास्तुंबुरुप्रभृतयोदेवगायनाः। किन्नराअश्ववादिमुखानराकृतयः। पिशाचाःपिशिताशाभूतविशेषाः। गुह्यकाःमणिभद्रादयः। "निधिरक्षंतियेरक्षास्तेस्युर्गुह्यकसंज्ञकाः।" सिद्धाःविश्वावसुप्रभृतयः। भूताःबालग्रहादयोरुद्रानुचराश्च। जातावेकवचनानि। एतेदेवयोनिसंज्ञकाइत्यर्थः। विद्याधराप्सरोयक्षरक्षोगंधर्वकिन्नराः॥ पिशाचोगुह्यकःसिद्धोभूतोमी देवयोनयः॥११॥
असुरादैत्यदैतेयदनुजेंद्रारिदानवाः॥ रुक्रशिष्यादितिसूनाःपूर्वदेवाःसुरद्विषः॥१२॥
सर्वज्ञःसुगतोबुद्धोधर्मराजस्तथागतः॥ समंतभद्रोभगवान्मारजिल्लोकजिज्जिनः॥१३॥

॥ विद्याधरेत्यप्सरइतिपाठःभिन्नलिंगत्वादयेऽनभिधानादसमासइतिरामाश्रम्यां॥११॥ असुराः। "आसुराः।" दैत्याः। दैतेयाः। दनुजाः। इंद्रादयः। दानवाः। रुक्रशिष्याः। दितिसूनाः। पूर्वदेवाः। सुरद्विषः। इतिदानवानामन्यसुराणां॥१२॥ सर्वज्ञः। सुगतः। बुद्धः। धर्मराजः। तथागतः। समंतभद्रः। भगवान्। मारजित्। लोकजित्। जिनः॥१३॥

षडभिज्ञः। दशबलः। अद्वयवादी। विनायकः। मुनींद्रः। श्रीघनः। शास्ता। मुनिः। इत्यष्टादशबुद्धस्य॥ शाक्यमुनिः॥१४॥ शाक्यसिंहः। सर्वार्थसिद्धः। शौद्धोदनिः। गौतमः। अर्कबंधुः। मायादेवीसुतः। इतिसप्तनामानिबुद्धावांतरभेदस्यशाक्यमुनेः॥१५॥ ब्रह्मा। आत्मभूः। सुरज्येष्ठः। परमेष्ठी। पितामहः। हिरण्यगर्भः। लोकेशः। स्वयंभूः। चतुराननः॥१६॥ धाता। अजयोनिः। द्रुहिणः। "द्रुषणः"।

षडभिज्ञोदशबलोऽद्वयवादीविनायकः॥ मुनींद्रःश्रीघनःशास्तामुनिःशाक्यमुनिस्तुयः॥१४॥
सशाक्यसिंहःसर्वार्थसिद्धःशौद्धोदनिश्चसः।गौतमश्चार्कबंधुश्चमायादेवीसुतश्चसः॥ १५॥
ब्रह्मात्मभूःसुरज्येष्ठःपरमेष्ठीपितामहः॥हिरण्यगर्भोलोकेशःस्वयंभूश्चतुराननः॥ १६॥
धाताऽजयोनिर्द्रुहिणोविरिंचिःकमलासनः॥स्रष्टाप्रजापतिर्वेधाविधाताविश्वसृड्विधिः॥ १७॥
"नाभिजन्मांडजःपूर्वोनिधनःकमलोद्भवः॥ सदानंदोरजोमूर्तिःसत्यकोहंसवाहनः॥" १॥
विष्णुर्नारायणःकृष्णोवैकुंठोविष्टरश्रवाः॥ दमोदरोहृषीकेशःकेशवोमाधवःस्वभूः॥ १८॥

विरिंचिः। "विरिंचः।" कमलासनः। स्रष्टा। प्रजापतिः। वेधाः। विधाता। विश्वसृट्। विधिः। इतिविंशतिब्रह्मणः॥१७॥ विष्णुः। नारायणः

"नारायणः"। कृष्णः। वैकुंठः। विष्टरश्रवाः। दामोदरः। हृषीकेशः। केशवः। माधवः। स्वभूः॥१७॥ दैत्यारिः। पुंडरीकाक्षः। गोविंदः। गरुडध्वजः। पीतांबरः। अच्युतः। शार्ङ्गी। विष्वक्सेनः। "विश्वक्सेनः" जनार्दनः॥१९॥ उपेंद्रः। इंद्रावरजः। चक्रपाणिः। चतुर्भुजः। पद्मनाभः। मधुरिपुः। वासुदेवः। त्रिविक्रमः॥२०॥ देवकीनंदनः। शौरिः। "सौरिः" श्रीपतिः। पुरुषोत्तमः। वनमाली। बलिध्वंसी। कंसारातिः। अधो

दैत्यारिःपुंडरीकाक्षोगोविंदोगरुडध्वजः॥ पीतांबरोऽच्युतःशार्ङ्गीविष्वक्सेनोजनार्दनः॥१९॥ उपेंद्रइंद्रावरज
श्चक्रपाणिश्चतुर्भुजः॥ पद्मनाभोमधुरिपुर्वासुदेवस्त्रिविक्रमः॥ २०॥ देवकीनंदनःशौरिःश्रीपतिःपुरुषोत्तमः॥
वनमालीबलिध्वंसीकंसारातिरधोक्षजः॥ २१॥ विश्वंभरःकेटभजिद्विधुःश्रीवत्सलांछनः॥ पुराणपुरुषोयज्ञ
पुरुषोनरकांतकः॥ २२॥ जलशायीविश्वरूपोमुकुंदोमुरमर्दनः॥ वसुदेवोऽस्यजनकःसएवानकदुंदुभिः॥२३॥

क्षजः॥२१॥ विश्वंभरः। कैटभजित्। विधुः। श्रीवत्सलांछनः। पुराणपुरुषः। यज्ञपुरुषः। नरकांतकः॥२२॥ जलशायी। विश्वरूपः। मुकुंदः। मुरमर्दनः। इतिषट्चत्वारिंशद्विष्णोः। अस्यकृष्णस्यजनकः। पिताचवसुदेवः। वसुदेवएवआनकदुंदुभिः। हे कृष्ण पितुः॥२३॥ ४

बलभद्रः। प्रलंबघ्नः। बलदेवः। अच्युताग्रजः। रेवतीरमणः। रामः। कामपालः। हलायुधः॥ २४॥ नीलांबरः। रौहिणेयः। तालांकः। मुसली। "मुषली" हली। संकर्षणः। सीरपाणिः। कालिंदीभेदनः। बलः। इतिसमदशबलरामस्य॥ २५॥ मदनः। मन्मथः। मारः। प्रद्युम्नः। मीनकेतनः। कंदर्पः दर्पकः। अनंगः। कामः। पंचबाणः। स्मरः॥ २६॥ शंबरारिः। "संबरारिः"। मनसिजः। कुसुमेषुः। अनन्यजः। पुष्पधन्वा। रतिपतिः। मकरध्व

बलभद्रः प्रलंबघ्नो बलदेवोऽच्युताग्रजः॥ रेवतीरमणो रामः कामपालो हलायुधः॥ २४॥
नीलांबरो रौहिणेयस्तालांको मुसली हली॥ संकर्षणः सीरपाणिः कालिंदीभेदनो बलः॥ २५॥
मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः॥ कंदर्पो दर्पको ऽनंगः कामः पंचबाणः स्मरः॥ २६॥
शंबरारिर्मनसिजः कुसुमेषुरनन्यजः॥ पुष्पधन्वा रतिपतिर्मकरध्वजआत्मभूः॥ २७॥

जः। आत्मभूः॥ इत्येकोनविंशतिर्मदनस्यनामानि॥ २७॥ "अरविंदमशोकंचचूतंचनवमल्लिका॥ नीलोत्पलंचपंचैतेपंचबाणस्यसायकाः॥ १॥ उन्मादनस्तापनश्चशोषणः स्तंभनस्तथा॥ संमोहनश्चकामस्यपंचबाणाः प्रकीर्तिताः॥ १॥"

ब्रह्मसूः। ऋभ्यकेतुः। "ऋभ्यकेतुः। विश्वकेतुः।" अनिरुद्धः। उषापतिः। इतिचत्वारिप्रद्युम्नसूनोः। लक्ष्मीः। पद्मालया। पद्मा। कमला। श्रीः। हरिप्रिया॥ २८॥ इंदिरा। लोकमाता। मा। क्षीरोदतनया। रमा। इत्येकादशलक्ष्म्याः। लक्ष्मीपतेर्विष्णोः शार्ङ्गं धनुः। पांचजन्यः। तस्य चक्रं सुदर्शननामकं। "सुदर्शनः"॥२९॥ तस्य गदा कौमोदकी। "कौमोदकी"। तस्य खड्गः नंदकः। तस्य मणिः कौस्तुभः। तस्य चापः शार्ङ्गं। अस्यो

ब्रह्मसूर्ऋभ्यकेतुःस्यादनिरुद्धउषापतिः॥लक्ष्मीःपद्मालयापद्माकमलाश्रीर्हरिप्रिया॥२८॥इंदिरालोकमा
तामाक्षीरोदननयारमा॥ शार्ङ्गंवैलक्ष्मीपतेःपांचजन्य श्चक्रंसुदर्शनं॥२९॥कौमोदकीगदाखड्गोनंदकः
कौस्तुभोमणिः॥चापःशार्ङ्गंमुरारेस्तुश्रीवत्सोलांछनंस्मृत॥३०॥"अश्वाश्वशैव्यसुग्रीवमेघपुष्पबलाहकाः॥सारथिर्दारुकोमंत्रीह्युद्धवोवनजोगजः॥१॥" गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयःखगेश्वरः॥नागांतको विष्णुरथः सुपर्णःपन्नगाशनः॥३१॥शंभुरीशःपशुपतिःशिवःशूली महेश्वरः॥

रस्थलांछनंश्रीवत्सःएकैकं॥

॥३०॥गरुत्मान्। गरुडः। तार्क्ष्यः। वैनतेयः। खगेश्वरः। नागांतकः। विष्णुरथः। सुपर्णः। पन्नगाशनः। इतिनवनामानिगरुडस्य॥३१॥ शंभुः। ईशः। पशुपतिः। शिवः। शूली। महेश्वरः॥

ईश्वरः।शर्वः।"सर्वः"।ईशानः।शंकरः।चंद्रशेखरः॥३२॥भूतेशः।खंडपरशुः।गिरीशः।गिरिशः।मृडः।मृत्युंजयः।कृत्तिवासाः।पिनाकी।प्रमथाधिपः॥३३॥उग्रः।कपर्दी।श्रीकंठः।शितिकंठः।कपालभृत्।वामदेवः।महादेवः।विरूपाक्षः।त्रिलोचनः॥३४॥कृशानुरेताः।सर्वज्ञः।धूर्जटिः।नीललोहितः।हरः।"हरः"स्मरहरः।भर्गः।"भर्ग्यः"त्र्यंबकः।त्रिपुरांतकः॥३५॥गंगाधरः।अंधकरिपुः।क्रतुध्वंसी।

ईश्वरःशर्वईशानःशंकरश्चंद्रशेखरः॥३२॥भूतेशःखंडपरशुर्गिरीशोगिरिशोमृडः॥मृत्युंजयःकृत्तिवासाःपिनाकीप्रमथाधिपः॥३३॥उग्रःकपर्दीश्रीकंठःशितिकंठःकपालभृत्॥वामदेवोमहादेवोविरूपाक्षस्त्रिलोचनः॥३४॥कृशानुरेताःसर्वज्ञोधूर्जटिर्नीललोहितः॥हरस्मरहरोभर्गस्त्र्यंबकस्त्रिपुरांतकः॥३५॥गंगाधरोंऽधकरिपुःक्रतुध्वंसीवृषध्वजः॥व्योमकेशोभवोभीमःस्थाणूरुद्रउमापतिः॥३६॥"अहिर्बुध्न्योऽष्टमूर्तिश्वगजारिश्चमहानटः॥"कपर्दोऽस्यजटाजूटःपिनाकोऽजगवंधनुः॥

वृषध्वजः।व्योमकेशः।भवः।भीमः।स्थाणुः।रुद्रः।उमापतिः।इत्यष्टचत्वारिंशन्नामानिशिवस्य।ईशितुंशीलमस्येश्वरः।ईष्टेतच्छीलईशानः॥३६॥अस्यवांभोःजटाजूटःकपर्दनामा।अस्यधनुःअजगवं।"अजकवं"तदेवपिनाकइत्यपि॥

अस्यपारिषदाःपरिषदिसाधवः।"पारिषद्याः"प्रमथाःब्राह्मीत्याद्याः।"ब्रह्माण्याद्याः"मातरःयथाहुःब्राह्मीमाहेश्वरीचैवकौमारीवैष्ण
वीतथा॥वाराहीचतथेंद्राणीचामुंडाःसप्तमातरइति॥३७॥विभूतिः।भूतिः।ऐश्वर्यं।इतित्रीणिऐश्वर्यस्य।नन्वणिमामहिमेत्यादिभेदैरष्टवि
धं॥"नैवाष्टौभेदाःयथा।अणिमामहिमाचैवगरिमालघिमातथा॥प्राप्तिःप्राकाम्यमीशित्वंवशित्वंचाष्टसिद्धयः॥अणोर्भावः।महतोर्भावःये
नब्रह्माण्डेनमानि।गुरोर्भावः।लघोर्भावः।प्राप्तिरंगुल्यग्रेणचंद्रादेः।प्रकामस्यभावइच्छानभिघातः।ईशितोभावःप्रभुत्वंयेनस्थावराअ

प्रमथाःस्युःपारिषदाब्राह्मीत्याद्यास्तुमातरः॥३७॥विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा॥उमाकात्यायनी
गौरीकालीहैमवतीश्वरी॥३८॥शिवाभवानीरुद्राणीशर्वाणीसर्वमंगला॥अपर्णापार्वतीदुर्गामृडानीचंडिकांबिका॥३९॥आर्यादाक्षायणीचैवगिरिजामेनकात्मजा॥

प्याज्ञाकारिणः।वशितोभावः।येनभूमावपिउन्मज्ज
ननिमज्जने॥"उमा।कात्यायनी।गौरी।काली।"काला"हैमवती।ईश्वरी।"ईश्वरा"॥३८॥शिवा।"शिवी"भवानी।रुद्राणी।शर्वाणी।सर्वमं
गला।अपर्णा।पार्वती।दुर्गा।मृडानी।चंडिका।अंबिका॥३९॥आर्या।दाक्षायणी।गिरिजा।मेनकात्मजा।इत्येकविंशतिःपार्वत्याः॥ ७॥

विनायकः विघ्नराजः द्वैमातुरः गणाधिपः ॥४०॥ एकदंतः हेरंबः लंबोदरः गजाननः इत्यष्टौ गणेशस्य । कार्तिकेयः महासेनः शरजन्मा षडाननः ॥४१॥ पार्वतीनंदनः स्कंदः सेनानीः अग्निभूः गुहः बाहुलेयः तारकजित् विशाखः शिखिवाहनः ॥४२॥ षाण्मातुरः शक्तिधरः कुमारः

विनायकोविघ्नराजद्वैमातुरगणाधिपाः ॥४०॥ अथैकदंतहेरबलंबोदरगजाननाः ॥ कार्तिकेयोमहासेनः शरजन्माषडाननः ॥४१॥ पार्वतीनंदनःस्कंदःसेनानीरग्निभूर्गुहः ॥ बाहुलेयस्तारकजिद्विशाखःशिखिवाहनः ॥४२॥ षाण्मातुरः शक्तिधरःकुमारःक्रौंचदारणः ॥ भृंगी भृंगरिटिस्तुंडी नंदिकोनंदिकेश्वरः ॥४३॥ ''कर्ममोटीतुचामुंडाचर्मगुंडातुचर्चिका ॥'' इंद्रोमरुत्वान्मघवाबिडोजाःपाकशासनः ॥ वृद्धश्रवाःशुनासीरःपुरुहूतःपुरंदरः ॥४४॥ जिष्णुर्लेखर्षभः शक्रःशतमन्युर्दिवस्पतिः ॥

क्रौंचदारणः । ''क्रौंचदारणः'' इतिसप्तदशस्कंदस्य । भृंगी । भृंगी । रिटिः । तुंडी । नंदिकः नंदिकेश्वरः । इतिषण्णामानिनंदिनः ॥४३॥ इंद्रः मरुत्वान् । मघवा । ''मघवान्'' बिडोजाः । पाकशासनः । वृद्धश्रवाः । शुनासीरः । ''द्विनालभ्यः । द्विर्दित्यश्च'' । पुरुहूतः । पुरंदरः ॥४४॥ जिष्णुः । लेखर्षभः । शक्रः । शतमन्युः । दिवस्पतिः ॥

क्रत्वामा।"सूत्वामा"गोत्रभिद्वज्री।वासवः।वृत्रहा।वृषा॥४५॥वास्तोष्पतिः।क्ररपतिः।बलारातिः।शचीपतिः।जंभभेदी।हरिहयः।स्वाराट्।नमुचिसूदनः॥४६॥संकंदनः।दुश्च्यवनः।तुराषाट्।मेघवाहनः।आखंडलः।सहस्राक्षः।इतिपंचविंशादिंद्रस्य।तत्रस्वाराट्जकारांतः।तुराषाट्हांतः।ऋभुक्षानांतः।पथिवत्।तस्येंद्रस्यप्रियातुपुलोमजेत्युत्तरेणसंबंधः॥४७॥पुलोमजा।शची।"दंत्या

क्रत्वामागोत्रभिद्वज्रीवासवोवृत्रहावृषा॥४५॥वास्तोष्पतिःक्ररपतिर्बलारातिःशचीपतिः॥जंभभेदीहरिहयःस्वाराण्नमुचिसूदनः॥४६॥संकंदनोदुश्च्यवनस्तुराषाण्मेघवाहनः॥आखंडलःसहस्राक्षऋभुक्षास्तस्यतुप्रिया॥४७॥पुलोमजाशचींद्राणीनगरीत्वमरावती॥हयउच्चैःश्रवाःसूतोमातलिर्नंदनंवनं॥४८॥स्यात्प्रासादोवैजयंतोजयंतःपाकशासनिः॥ऐरावतोऽभ्रमातंगैरावणाभ्रमुवल्लभाः॥४९॥ ५

दिरपि"इंद्राणी।इतित्रयमिंद्रप्रियायाः।इंद्रस्यनगरीत्वमरावती।तस्यअश्वउच्चैःश्रवाः।तस्यसारथिर्मातलिः।तस्योपवनंनंदनं॥४८॥इंद्रस्यप्रासादोगृहविशेषःवैजयंतनामा।जयंतः।पाकशासनिः।हेइंद्रपुत्रस्य।ऐरावतः।अभ्रमातंगः।ऐरावणः।अभ्रमुवल्लभः।इतिचत्वारिऐरावतस्य॥४९॥

ह्लादिनी। वज्रं। कुलिशं। भिदुरं। "भिदिरं"। पविः। द्वातकौटिः। स्वरुः। "सांतोपि" शंबः। "संबः। शंवः। नालव्या अपि दंत्याश्वसंवसूकरपांसवइत्यूभविवकः।" दंभोलिः। अशनिः। इति दशकं वज्रस्य। तत्र ह्लादिनी स्त्री। वज्रमस्त्री पुन्नपुंसकलिंगं। पव्यादयः पुंसि। अशनिर्द्वयोः स्त्रीपुंसयोः॥५०॥ व्योमयानं। विमानः। द्वे विमानस्य। तत्र विमानः पुंसि क्लीबे च। नारददेवलाद्याः सुरर्षयः। एकं। सुधर्मा। देवसभा। इति द्वे देवसभायाः। पीयूषं। "पेयूषं"

ह्लादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः॥ द्वातकौटिः स्वरुः शंबो दंभोलिरशनिर्द्वयोः॥५०॥ व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः॥ स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा॥५१॥ मंदाकिनी वियद्गंगा स्वर्णदी सुरदीर्घिका॥ मेरुः सुमेरुर्हेमाद्रीरत्नसानुः सुरालयः॥५२॥ पंचैते देवतरवो मंदारः पारिजातकः॥ संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनं॥५३॥ सनत्कुमारो वैधात्रः सर्वेद्या वह्निनासुतौ॥ ७,

अमृतं। सुधा। त्रीण्यमृतस्य॥५१॥ मंदाकिनी। वियद्गंगा। स्वर्णदी। सुरदीर्घिका। चत्वारि मंदाकिन्याः। मेरुः। सुमेरुः। हेमाद्रिः। रत्नसानुः। सुरालयः। पंचकं कनकाचलस्य॥५२॥ मंदारः। पारिजातकः। संतानः। कल्पवृक्षः। हरिचंदनं। पंचैते देवतरवः। तत्र हरिचंदनं क्लीबे पुंसोः॥५३॥ सनत्कुमारः। "सनात्कुमारः" वैधात्रः। हे सनत्कादेः। स्वर्दयोः। अग्निनासुतौ॥ ७, ७

नासत्यौ। अश्विनौ। दस्रौ। आश्विनेयौ। इतिषट्अश्विनीकुमारयोः। तावुभौ यमलौ अतएवद्विवचनं॥५४॥उर्वशीपुरवाःउर्वशीमेनकारंभे त्याद्याः अप्सरसः। स्वर्वेश्या इतिचोच्यंते। हे। घृताचीमेनकारंभाउर्वशीचतिलोत्तमा। रुकेशीमंजुघोषाद्याः कथ्यंतेऽप्सरसांबुधैः॥ अत्र अप्सरसःशब्दएकस्यामपिव्यक्तौबहुवचनांतःस्त्रीलिंगः। अप्सरा इत्यपिप्रयोगदर्शनात्प्रायेणबहुलं। हाहाः। हूहूः। एवमाद्योयेषांतेन

नासत्यावश्विनौदस्रावाश्विनेयौचतावुभौ॥५४॥स्त्रियांबहुष्वप्सरसःस्वर्वेश्याउर्वशीपुरवाः॥हाहाहूहूश्चैवमाद्यागंधर्वास्त्रिदिवौकसां॥५५॥अग्निर्वैश्वानरोवह्निर्वीतिहोत्रोधनंजयः॥रुपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्॥५६॥

था। दिवौकसांदेवानांगंधर्वाः गायनाः। एकैकं। आद्यशब्दात्तुंबुरुविश्वावसुचित्ररथ प्रभृतयः। हाहाशब्दस्यरूपंतु। हाहाः। हाहौ। हाहाः। हाहां। हाहौ। हाहान्। हाहाभ्यामित्यादि। "हाहाःसांतोपि। गंधर्वौहाहाभिधौचक इति रत्नकोशात्। हूहूशब्दस्यद्वितीयैकवचनंहूहूमित्यादिद्रष्टव्यं। "हाहाइत्यादिह्रस्वः हुहुइत्यभयह्रस्वश्च। गीतमाधुर्यसंपन्नोविख्यातो चहहाहुहूइतिव्यासोक्तेः"॥५५॥ अग्निः। वैश्वानरः। वह्निः। वीतिहोत्रः। धनंजयः। रुपीटयोनिः। ज्वलनः। जातवेदाः। तनूनपात्॥५६॥ ४

बर्हिः।ऋष्मा। कृष्णवर्त्मा।शोचिष्केशः।उषर्बुधः।आश्रयाशः।"आशयाशः"।बृहद्भानुः।रुशानुः।पावकः।अनलः॥५७॥रोहिताश्वः।"लादिरपि"।वायुसखः।शिखावान्। आशुक्षणिः।हिरण्यरेताः। हुतभुक्। दहनः। हव्यवाहनः॥५८॥समार्चिः।"कालीकरालीमनोजवा। सुलोहिता। सधूम्रवर्णा स्फुलिंगिनी विश्वदासाख्याःसप्तजिह्वाः"दमुनाः।"दमूनाः"।ऋक्वः।विश्वभानुः।विभावसुः।ऋविः।अग्नित्रं। इतिचतुस्त्रिंशदग्निनामानि। बर्हिःऋष्मेतिसंघातोविगृहीतंचनाम।"ऋक्वोवैश्वानरोबर्हिःबर्हिःऋष्माननून्पादितिशब्दार्णवात्।" बर्हतेव

बर्हिः ऋष्मा कृष्णवर्त्मा शोचिष्केशउषर्बुधः॥ आश्रयाशोबृहद्भानुः रुशानुः पावकोऽनलः॥५७॥रोहिताश्ववावायुसखः शिखावानाशुऋक्षणिः॥ हिरण्यरेताहुतभुग् दहनोहव्यवाहनः॥५८॥समार्चिर्दमुनाः ऋक्वश्चित्रभानुर्विभावसुः॥ शुचिरग्निश्चमोर्वस्तुवाडवोवडवानलः॥५९॥वह्नेर्ज्वालकीलावर्चिर्हेतिः शिखास्त्रियां॥स्फुलिंगोऽग्निकणः संतापः संज्वरःसमौ॥६०॥ ५

ऊर्दन इतिबर्हिः। "इदंनःसांनोपे"। ऋष्यत्यनेनऋष्मा।"नांनःअदंतोपि"।और्वः"ऊर्वः। बहुत्वेऊर्वाः।" वाडवः।वडवानलः। त्रयंवाडवाग्नेः॥५९॥ज्वालः।कीलः।अर्चिः।"इदंतोपि"हेतिः।शिखापंचकंवह्नेरर्चिषि।तत्रज्वालकीलोस्त्रीपुंसयोः।अर्चिःस्त्रीनपुंसकयोः।हेतिशिखेस्त्रियां।स्फुलिंगः।अग्निकणः।हेअग्नेःकणिकायां।त्रिषुलिंगत्रये। संतापः।संज्वरः। हेअग्नेः संतापे॥६०॥ ५

८

धर्मराजः। पितृपतिः। समवर्ती। परेतराट्। कृतांतः। यमुनाभ्राता। श्रमनः। यमराट्। यमः॥ ६१॥ कालः। दंडधरः। श्राद्धदेवः। वैवस्वतः। अंतकः। इतिचतुर्दशनामानि यमस्य। राक्षसः। कौणपः। "कौणपः" क्रव्यात्। क्रव्यादः। अस्रपः। "असृपः"। आशारः। "आशृणातिहि न स्ती त्याशारः। आशिरः"॥ ६२॥ रात्रिंचरः। रात्रिचरः। कर्बुरः। "कर्बरः"। निकषात्मजः। यातुधानः "जातुधानः" पुण्यजनः। नैर्ऋतः।

"उल्कास्यान्निर्गतज्वालाभूतिर्भसितभस्मनि॥क्षारोरक्षाचदावस्तुदवोवनहुताशनः॥१॥" धर्मराजःपितृपतिः समवर्ती परेतराट्॥कृतांतोयमुनाभ्राताश्रमनोयमराडयमः॥ ६१॥ कालोदंडधरःश्राद्धदेवोवैवस्वतोंऽतकः॥ राक्षसःकौणपःक्रव्यात्क्रव्यादोऽस्रपआशारः॥ ६२॥ रात्रिंचरोरात्रिचरःकर्बुरोनिकषात्मजः॥यातुधानःपुण्यजनो नैर्ऋतोयातुरक्षसी॥ ६३॥ प्रचेतावरुणःपाशीयादसांपतिरप्पतिः॥श्वसनःस्पर्शनोवायुर्मातरिश्वासदागतिः॥६४॥

यातु। रक्षः। पंचदशराक्षसस्य। नत्रयातुरक्षसीनपुंसके॥ ६३॥ प्रचेताः। वरुणः। "वरणः" पाशी। यादसांपतिः। अप्पतिः। पंचकं वरुणस्य। श्वसनः। स्पर्शनः। वायुः। मातरिश्वा। सदागतिः॥ ६४॥

वृषदश्वः।गंधवहः।गंधवाहः। अनिलः।आशुगः।समीरः।मारुतः।मरुत्।जगत्प्राणः।"जगत्प्राणइतिपदद्वयमपि।"समीरणः॥६५॥नभस्वान्।वातः।"वातिः"पवनः।पवमानः।प्रभंजनः।विंशतिर्नामानिवायोः।प्रकंपनः।महावातः।द्वयंमहावायोः।स एवसदृष्टिकः झंझावातइत्युच्यते।६६॥ प्राणः।अपानः। समानः।उदानः।व्यानः। इमेपंचशरीरस्थावायुभेदाः। तथाचोक्तं।हृदिप्राणोगुदेऽपानःसमानोनाभिमंडले॥ उदानःकंठदेशेस्याद्व्यानःसर्वशरीरग इति। अन्नप्रवेशनंभूम्याद्युत्सर्गोन्मादिवाचनं।भाषणादिनिमेषाश्चतद्व्यापाराःक्रमादमीइत्य

वृषदश्वोगंधवहोगंधवाहानिलाशुगाः॥समीरमारुतमरुज्जगत्प्राणसमीरणाः॥६५॥नभस्वद्वातेपवनपवमान प्रभंजनाः॥प्रकंपनोमहावातोझंझावातःसदृष्टिकः॥६६॥प्राणोऽपानःसमानश्चोदानव्यानौचवायवः॥शरीरस्था इमे रंहःस्तरसीत्वरयःस्यदः॥६७॥जवोऽथशीघ्रंत्वरितंलघुक्षिप्रमरंद्रुतं॥सत्वरंचपलंतूर्णमविलंबितमाशुच॥६८॥

पि।एकैकं। रंहः।तरः।रयः।स्यदः॥६७॥जवः।पंचकंवेगस्य। शीघ्रं।त्वरितं। लघु।क्षिप्रं। अरं।द्रुतं।सत्वरं। चपलं।तूर्णं।अविलंबितं।आशु।एकादशत्वरितस्य।"रंहःआदयःसवेगगतिवचनाः।शीघ्रादयस्तुधर्मवचनाएव।अतएवशीघ्रंपचतीतिप्रयोगोनतुजवंपचतीति।वस्तुतस्तुवेगारव्यगुणपरारंहःप्रभृतयः।शीघ्रादयस्त्वकालात्वपराइति।"॥६८॥

सततं। अनारतं। अश्रांतं। संततं। अविरतं। अनिशं। नित्यं। अनवरतं। अजस्रं। इतिनवकं नित्यस्य। "सततंक्रियांतरैरव्यधानं। अतिशायस्त्रयोनःपुन्यंइतिभेदः।" अतिशायः। भरः॥ ६९॥ अतिवेलं। भृशं। अत्यर्थं। अतिमात्रं। उद्गाढं। निर्भरं। तीव्रं। एकांतं। नितांतं। गाढं। बाढं। दृढं। इतिचतुर्दशातिशायस्य। शीघ्रादिशीघ्रंत्वरितमित्यारभ्यदृढशब्दपर्यंतंक्लीबेनपुंसकलिंगेयदुक्तंतत्तुअसत्वेद्रव्यवृत्तित्वाभावेएवज्ञेयं। यथाशीघ्रंकृतवान्। भृशंमूर्खः। भृशंयाति॥ ७०॥ एषांशीघ्रादीनांमध्येयत्सत्वगामिद्रव्यवृत्तितत्त्रिषुतस्यद्रव्यस्ययल्लिंगंतदेवा

सततेऽनारताश्रांतसंततताविरतानिशं॥ नित्यानवरताजस्रमप्यथातिशयोभरः॥ ६९॥ अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं॥ तीव्रैकांतनितांतानिगाढबाढदृढानिच॥ ७०॥ क्लीबेशीघ्राद्यसत्वेस्यात्त्रिषेषांसत्वगामियत्॥ कुबेररूक्ष्यबकसखोयक्षराड्गुह्यकेश्वरः॥ ७१॥ मनुष्यधर्माधनदोराजराजोधनाधिपः॥ किन्नरेशोवैश्रवणःपौलस्त्योनरवाहनः॥ ७२॥

स्येत्यर्थः। यथाशीघ्रोधेनुः। शीघ्रोवृषः। शीघ्रंगमनं। भरादिशब्दयोःसत्वगामित्वंनास्ति। नित्यंपुंस्त्वं। "क्वचित्त्रिषुद्रव्यगामीतिपाठस्तस्यविशेष्यगामीत्यर्थः।" कुबेरः। त्र्यंबकसखः। यक्षराट्। गुह्यकेश्वरः॥ ७१॥ मनुष्यधर्मा। धनदः। राजराजः। धनाधिपः। किन्नरेशः। वैश्रवणः। पौलस्त्यः। नरवाहनः॥ ७२॥

यक्षः। एकपिंगः। ऐलविलः। "ऐडविलः। ऐडविडः।" श्रीदः। पुण्यजनेश्वरः। स सदशकुबेरस्य। अस्येति मत्येकसंबध्यते। अस्यकुबेरस्यो द्यानंचैत्ररथं। अस्य पुत्रोनलकूबरः। अस्यस्थानंकैलासः। अस्यपूर्नगरंअलका। अस्यविमानंपुष्पकं। "पुष्पकः।" इत्येकेकं। किन्नरः। किं-पुरुषः। तुरंगवदनः। मयुः। चत्वारिकिन्नरमात्रस्य॥७४॥ निधिः। शेवधिः। द्वे सामान्यनिधेः। नापुल्लिंगः। काकाक्षिवदुभयत्रास्यसंबंधः। पद्मः

यक्षैकपिंगैलविलश्रीदपुण्यजनेश्वराः॥ अस्योद्यानंचैत्ररथंपुत्रस्तुनलकूबरः॥७३॥ कैलासस्थानमलकापूर्विमानंतुपु
ष्पकं॥ स्यात्किन्नरःकिंपुरुषस्तुरंगवदनोमयुः॥७४॥ निधिर्नाशेवधिर्भेदाःपद्मशंखादयोनिधेः॥ ॥ इतिस्वर्गवर्गः॥
द्यौरिवोद्वेस्त्रियामभ्रंव्योमपुष्करमंबरं॥ नभोंतरिक्षंगगनमनंतंसुरवर्त्मखं॥१॥ वियद्विष्णुपदंवातुपुंस्याकाशविहायसी॥

शंखः। इत्यादयोनिधेर्भेदाः। आदिशब्दात्मकरकच्छपादयः। "महापद्मश्चपद्मश्चशंखोमकरकच्छपौ॥ मुकुंदकुंदनीलाश्चखर्वश्चनिध-
योनव" एकेकं॥ ७॥ इतिस्वर्गवर्गः॥ ॥ द्यौः। द्यौः। अभ्रं। व्योम। पुष्करं। अंबरं। नभः। अंतरिक्षं। "अंतरीक्षं" गगनं। अनंतं। सुरवर्त्म। खं॥१॥ वियत्। विष्णुपदं। आकाशं। विहायः॥ ७॥ ७॥ ७॥

विहायसः। नाकः। द्युः। इत्येकोनविंशतिराकाशस्य। तत्र द्योदिवौस्त्रीलिंगे। आकाशविहायसीक्लीबपुंसोः। विहायसनाकौपुंसि। द्युरव्ययं। अलिंगमित्यर्थः। द्वेषंक्लीबे॥ ॥इतिव्योमवर्गः॥ ७ ॥दिशः। ककुभः। काष्ठाः। आशाः। हरितः। पंचकंदिशां। ताःपूर्वदक्षिणपश्चिमाः क-

विहायसोपिनाकोपिद्युरपिस्यात्तदव्ययं॥ २॥"तारापथोंऽतरिक्षंचमेघाध्वाचमहाबिलं" ॥ ७ इतिव्योमवर्गः॥ ७॥ दिशस्तुककुभःकाष्ठाआशाश्चहरितश्चताः॥प्राच्यवाचीप्रतीच्यस्ताःपूर्वदक्षिणपश्चिमाः॥१॥उत्तरादिगुदीचीस्याद्दिश्यंतुत्रिषुदिग्भवे॥"अवाग्भवमवाचीनमुदीचीनमुदग्भवं॥प्रत्यग्भवंप्रतीचीनंप्राचीनंप्राग्भवंत्रिषु"॥१॥इंद्रोवन्हिःपितृपतिर्नैर्ऋतोवरुणोमरुत्॥२॥कुबेरईशःपतयःपूर्वादीनांदिशांक्रमात्॥"रविःशुक्रोमहीसूनुःस्वर्भानुर्भानुजोविधुः॥ बुधोबृहस्पतिश्चैतेदिशांचैव तथाग्रहाः॥१॥"

मेणप्राच्यवाचीप्रतीच्यःस्युः। यथापूर्वादिक्प्राचीं। दक्षिणादिगवाची। "अपाची"। पश्चिमादिक्प्रतीची। एकैकं॥१॥ याउत्तरादिक्सोदीची। एकं। दिश्यमित्येकंदिग्भवे। दिगादिभ्यइतियत्प्रत्ययः। तत्त्रिषुवाच्यलिंगं। यथादिश्योहस्ती। दिश्याहस्तिनीत्यादि। इंद्रादयोष्टौक्रमात्पूर्वादीनांदिशांपतयः एकैकं॥२॥

ऐरावतइत्यष्टौकमाद्दिग्गजाःपूर्वादिदिशांधारकागजाइत्यर्थः॥३॥अभ्रमुःकपिलापिंगला।अनुपमा॥४॥ताम्रकर्णीऋभ्रदंती।"ऋभदंती"अंगना।अंजनावती।एताअष्टौकरिण्यःकमाद्दिग्गजानांस्त्रियइत्यर्थः।एकैकं।अपदिशं।विदिक्कु।इतिद्वयंदिशोर्मध्येदिग्द्वयमध्यभागेतत्राऽपदिशं क्लीबाव्ययं।नपुंसकंअव्ययंचेत्यर्थः।विदिक्स्त्रियां॥५॥अभ्यंतरं।अंतरालं।द्वेअंतरवकाशस्य।चक्रवालं।मंडलं।द्वेमंडलस्य।अभ्रं।मेघः।वारि

ऐरावतःपुंडरीकोवामनःकुमुदोंऽजनः॥२॥पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः॥करिण्योऽभ्रमुःकपिला
पिंगलानुपमाःकमात्॥४॥ताम्रकर्णीऋभ्रदंतीचांगनाचांजनावती॥क्लीबाव्ययंत्वपदिशंदिशोर्मध्येविदिक्स्त्रियां॥५॥
अभ्यंतरंत्वंतरालंचक्रवालंतुमंडलं॥अभ्रंमेघोवारिवाहस्तनयित्नुर्बलाहकः॥६॥धाराधरोजलधरस्तडित्वा
न्वारिदोंबुभृत्॥घनजीमूतमुदिरजलमुग्धूमयोनयः॥७॥कादंबिनीमेघमालाद्विषुमेघभवेऽभ्रियं॥ ७

वाहः।स्तनयित्नुः।बलाहकः॥६॥धाराधरः।जलधरः।तडित्वान्।वारिदः।अंबुभृत्।घनः।जीमूतः।मुदिरः।जलमुक्।धूमयोनिः।इतिपंचदशमेघस्य॥७॥कादंबिनी।मेघमाला।द्वेमेघवृंदस्य।अभ्रियमित्येकंमेघभवे।तद्भिषु।यथाऽभ्रियाआपः।आभ्रियआसारः।अभ्रियंजलं॥ ७

स्तनितं। गर्जितं। रसितं। आदिशब्दात्ध्वनितादि। त्रयंमेघनिर्घोषे॥८॥ शंपा। शतह्रदा। ह्रादिनी। ऐरावती। क्षणप्रभा। तडित्। सौदामनी। "सौदामिनी"। विद्युत्। चंचला। चपला। दशकं विद्युल्लतायाः॥९॥ स्फूर्जथुः। वज्रनिर्घोषः। "वज्रनिर्घोषः।" द्वयमशनिनिर्घोषस्य। मेघज्योतिः। इरंमदः। द्वे मेघज्योतिषः। "बीज इति प्रसिद्धस्य।" इंद्रायुधं। शक्रधनुः। ऋजुरोहितं। इतित्रीणिमेघप्रतिफलितारविरश्मयोधनुराकारेणभांति तस्य

स्तनितंगर्जितंमेघनिर्घोषेरसितादिच॥८॥ शंपाशतह्रदाह्रादिन्यरावत्यःक्षणप्रभा॥तडित्सौदामनीविद्युच्चंचला चपलाअपि॥९॥ स्फूर्जथुर्वज्रनिर्घोषोमेघज्योतिरिरंमदः॥ इंद्रायुधंशक्रधनुस्तदेवऋजुरोहितं॥१०॥ वृष्टिर्वर्षंतद्घातेऽवग्रहावग्रहौसमौ॥ धारासंपातआसारःशीकरोंबुकणाःस्मृताः॥११॥ वर्षापलस्तुकरकोमेघच्छन्नेन्हिदुर्दिनं॥ अंतर्धाव्यवधापुंसित्वंतर्द्विरपवारणं॥१२॥

धनुषः॥१०॥ वृष्टिः। वर्षं। द्वयं मेघवर्षणस्य। अवग्राहः। अवग्रहः। द्वयंतद्घातेवर्षनिरोधे। धारासंपातः। आसारः। द्वयंमेघधारणांनिरंतरपतनस्य। शीकरइत्येकंअंबुकणानां। "दंत्यादिरस्यर्स"॥११॥ वर्षापलः। करका। द्वेयत्स्थूलमृष्टोमेघोदकं कठिनंसदुपलवत्पतति तस्य। दुर्दिनमित्येकंमेघच्छन्नेदिने। "रात्रेरप्युपलक्षणं।" अंतर्धा। व्यवधा। अंतर्द्विः। अपवारणं॥१२॥ ९,

अपिधानं। तिरोधानं।पिधानं।आच्छादनं।अष्टकमाच्छादनस्य।तत्रअंतर्धिव्यवधेस्त्रियां। अंतर्द्धिःपुंसि।हिमांशुः।चंद्रमाः।चंद्रः।इंदुः।कुमुद बांधवः॥१३॥विधुः।रुधांशुः।शुभ्रांशुः।ओषधीशः।निशापतिः। अब्जः।जैवातृकः।सोमः।"सोमा"ग्लोः। मृगांकः।कलानिधिः॥१४॥द्विज राजः।शशधरः। नक्षत्रेशः।क्षपाकरः। इतिचंद्रनामानिचंद्रस्य। चंद्रमंडलस्यषोडशोभागःकलासंज्ञः।एकं।बिंबः।मंडलं।द्वे बिंबस्य॥१५॥

अपिधानतिरोधानपिधानाच्छादनानिच॥हिमांशुश्चंद्रमाश्चंद्र इंदुःकुमुदबांधवः॥१३॥
विधुःरुधांशुःशुभ्रांशुरोषधीशोनिशापतिः॥अब्जोजैवातृकःसोमोग्लोर्मृगांकःकलानिधिः॥१४॥
द्विजराजःशशधरोनक्षत्रेशःक्षपाकरः॥ कलातुषोडशोभागोबिंबोऽस्त्रीमंडलंत्रिषु॥१५॥
भित्तंशकलखंडेवापुंस्यर्द्धोऽर्द्धंसमेंशके॥ चंद्रिकाकौमुदीज्योत्स्नाप्रसादस्तुप्रसन्नता॥१६॥

भित्तादिचतुष्कंशकलस्य।तत्रभित्तंनपुंसकं।शकलखंडेक्लीबपुंसोः।अर्धःपुंस्येव।यथाकंबलस्यार्धःखंडइत्यर्थः।वाच्यलिंगोपि।यथाअर्धशाटी। अर्धःपटः।अर्धंवस्त्रं।अर्धमित्येकंसमेविभागे।तन्नपुंसकमेव।चंद्रिका।कौमुदी।ज्योत्स्ना।त्रयंचंद्रप्रभायां।प्रसादःप्रसन्नता।द्वयंनैर्मल्यस्य॥१६॥

कलंकः।अंकः।लांछनं।चिन्हं। लक्ष्म।लक्षणं। षट्वं चिन्हस्य।रूपमेत्येकं परमायाःशोभायाः।शोभा।कांतिः।द्युतिः।छविः।चत्वारिशोभामानस्य।।
।।१७।।अवश्यायः।नीहारः।तुषारः।तुहिनं।हिमं।प्रालेयं।मिहिका।"महिका"सप्तकंहिमस्य।हिमानी।हिमसंहतिः।द्वे महतोहिमस्य। एवमुक्तलिंगाअव
श्याद्यः।।१८।।नपुंसकलिंगःशीतशब्दश्चगुणे।"स्पर्शविद्वेषे।" एव।नतुगुणिनि।रूक्षीमः।"सुषिमः।रूक्षीमः"।शिशिरः।जडः।तुषारः।

कलंकांकौ लांछनंचचिन्हंलक्ष्मचलक्षणं।।रूपमापरमाशोभा शोभाकांतिर्द्युतिश्छविः।।१७।।अवश्यायस्तुनीहार
स्तुषारस्तुहिनंहिमं।।प्रालेयंमिहिकाचाथहिमानीहिमसंहतिः।।१८।।शीतंगुणेतद्वदर्थाःसुषीमःशिशिरोजडः।।तुषारः
शीतलःशीतोहिमःसप्तान्यलिंगकाः।।१९।।ध्रुवऔत्तानपादिःस्यादगस्त्यःकुंभसंभवः।।मैत्रावरुणिरस्येवलोपामुद्रासधर्मिणी
।।२०।।

शीतलः।शीतः।हिमः।एतेसप्ततद्वदर्थाः।तद्वान्शीतगुणवानर्थोयेषांतेतथातेचान्यलिंगकाःविशेष्यनिघ्नाः। तुषारहिमशीतशब्दानिरूढलक्षण
यागुणिन्यपिवर्तंतइत्युभयत्रपठिताः।।१९।। ध्रुवः।औत्तानपादिः।द्वेउत्तानपादपुत्रस्य।अगस्त्यः।कुंभसंभवः।मैत्रावरुणिः।"मैत्रावरुणः।और्वशे
यागस्त्यमैत्रावरुणास्त्वाग्निमारुताःइतिनामनिधानात्।" त्रयमगस्त्यस्य।अगस्तिरित्यपि।अस्यागस्त्यस्यसधर्मिणीपत्नीलोपामुद्रा। एकं।।२०।।

नक्षत्रं। ऋक्षं। भं। तारा। तारका। उडु। इतिषट्कं नक्षत्रमात्रस्य। उडुस्त्रीनपुंसकयोः। अपिशब्दात्तारकापितथा। नक्षत्रेचाक्षिमध्येचतारकंतारका पिचेतिशाश्वतः। अश्विनीत्यादितारा:। अश्विन्यादिसप्तविंशतिनक्षत्राणिदाक्षायणीसंज्ञकानि। एकं। अश्वयुक्। अश्विनी। द्वे अश्विन्याः॥२१॥ राधा। विशाखा। द्वे विशाखायाः। पुष्यः। सिध्यः। तिष्यः। त्रयंपुष्ये। श्रविष्ठा। धनिष्ठा। द्वे धनिष्ठायाः। श्रविष्ठयासमाश्रविष्ठातुल्येत्यर्थः। प्रोष्ठपदाः। भाद्र

नक्षत्रमृक्षं भंतारातारकाप्युडुवास्त्रियां॥ दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी॥ २१॥ राधाविशाखेपुष्येतु सिध्यतिष्ये श्रविष्ठया॥ समाधनिष्ठाःस्युःप्रोष्ठपदाभाद्रपदाःस्त्रियः॥ २२॥ मृगशीर्षंमृगशिरस्तस्मिन्नेवाग्रहायणी॥ इत्वेलास्तच्छिरोदेशेतारकानिवसंतियाः॥ २३॥ बृहस्पतिःसुराचार्योगीष्पतिर्धिषणोगुरुः॥ जीवआंगिरसोवाचस्पतिश्चित्र शिखंडिजः॥ २४॥

पदाः। द्वयंपूर्वाभाद्रपदोत्तराभाद्रपदाश्च। पूर्वप्रोष्ठपदेद्वेउत्तरेचद्वे एवंचतुःसंख्यांकत्वाद्बहुवचनं। स्त्रियःस्त्रीलिंगाःस्युः॥ २२॥ मृगशीर्षं। मृगशिरः। आग्रहायणी। त्रयंमृगशीर्षस्य। तस्यमृगशीर्षस्यशिरोदेशेयाःपंचतारानिवसंतिताइत्वलाः। "इत्वकाः" एकं॥ २३॥ बृहस्पतिः। सुराचार्यः। गीष्पतिः। धिषणः। गुरुः। जीवः। आंगिरसः। वाचस्पतिः। चित्रशिखंडिजः। नवकंबृहस्पतेः। चित्रशिखंडी। अंगिराः। तज्जः॥ २४॥

शुक्रः। दैत्यगुरुः। काव्यः। उशना। भार्गवः। कविः। षट्कं शुक्रस्य। उशनेतिसांतं। क्रदुशनेस्यनडुत्। अंगारकः। कुजः। भौमः। लोहितांगः। महासुतः। पंचकं मंगलस्य॥२५॥ रौहिणेयः। बुधः। सौम्यः। त्रयं बुधस्य। सौरिः। "सौरः" शनैश्चरः। द्वे शनेः। तमः। राहुः। स्वर्भानुः। सैंहिकेयः। विधुंतुदः। पंच राहोः। तमः सांतं क्लीबे। पुंसि च क्वचित्। "अदंतः। स्वर्भानुस्तमोराहुरिति पुंस्कांडे रत्नकोशामरमालयोर्द्वयोरपि॥" २६॥ मरीच्यत्रि मु-

शुक्रोदैत्यगुरुःकाव्यउशनाभार्गवःकविः॥अंगारकःकुजोभौमोलोहितांगोमहासुतः॥२५॥रौहिणेयोबुधः सौम्यःसमौसौरिःशनैश्चरौ॥तमस्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदः॥२६॥सप्तर्षयोमरीच्यत्रि मुखाश्चित्रशिखंडिनः॥राशीनामुदयोलग्नंतेतुमेषवृषादयः॥२७॥

खाःसप्तर्षयश्चित्रशिखंडिसंज्ञाः। एकं। मुखाद्वात्पुलह पुलस्त्यादयःसप्तर्षयः। "तेयथा। मरीचिरंगिराअत्रिःपुलस्त्यःपुलहःक्रतुः॥ वसिष्ठश्चेतिसप्तैते ज्ञेयाश्चित्रशिखंडिनः।" राशीनामुद योलग्नमित्युच्यते। एकं। मेषवृषादयोराशयःस्युः। एकं। आदिनामिथुनकर्कादयः। "मेषोवृषोथमिथुनंकर्कटःसिंहकन्यके॥ तुला-न्वृश्चिकोधन्वीमकरःकुंभमीनकौ॥" २७॥

सूरः।"सूरः।"सूर्यः। अर्यमा। आदित्यः। द्वादशात्मा। दिवाकरः। भास्करः। अहस्करः। ब्रध्नः। प्रभाकरः। विभाकरः॥२८॥ भास्वान्। विवस्वान्। सप्ताश्वः। हरिदश्वः। उष्णरश्मिः। विकर्तनः। अर्कः। मार्तंडः।"मार्तंडः।"मिहिरः।"महिरः।" अरुणः। पूषा॥२९॥ द्युमणिः। तरणिः। मित्रः।

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः॥ भास्कराहस्करब्रध्नप्रभाकरविभाकराः॥२८॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः॥ विकर्तनार्कमार्तंडमिहिरारुणपूषणः॥२९॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः॥ विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः॥३०॥
भानुर्हंसःसहस्रांशुस्तपनःसवितारविः॥"कर्मसाक्षीजगच्चक्षुर्लोकबंधुस्त्रयीतनुः॥प्र-
द्योतनोदिनमणिःरवयोतोलोकबांधवः॥१॥ इनोभागोधामनिधिश्चांशुमाल्यब्जिनीपतिः॥"

चित्रभानुः। विरोचनः। विभावसुः। ग्रहपतिः। त्विषांपतिः। अहर्पतिः॥३०॥ भानुः। हंसः। सहस्रांशुः। तपनः।"तापनः"। सविता। रविः। इति सप्तभिर्नाम्नात्सूर्यस्य।"चंडांशुरपि। चंडांशोः पारिपार्श्वका इति वक्ष्यमाणत्वात्॥"

माठरः। पिंगलः। दंडः। इति चंडांशोः पारिपार्श्वकाः। परितः पार्श्वे विद्यमानाः। यतउक्तं सौरतंत्रे। शक्रोस्य वामपार्श्वे तु दंडाख्यो दंडनायकः। वह्निस्तु दक्षिणे पार्श्वे पिंगलो वामभागतः॥ यमोपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञयेति। एकैकं॥ २१॥ सूरसूतः। अरुणः। अनूरुः। काश्यपिः। गरुडाग्रजः। पंचकं अरुणस्य। परिवेषः। "तालव्यांतोपि" परिधिः। उपसूर्यकं। मंडलं। चत्वारि परिवेषस्य सूर्यमितः कदाचिद्दृश्यमानस्य कुंडलाकारतेजोवि-

माठरः पिंगलो दंडश्चंडांशोः पारिपार्श्वकाः॥ २१॥ सूरसूतोरुणोऽनूरुः काश्यपिर्गरुडाग्रजः॥ परिवेषस्तु परिधिरुपसूर्यकमंडले॥ २२॥ किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः॥ भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियां॥ २३॥

शेषस्य। परिवेषसाहचर्यात्परिधिः पुंसिज्ञेयः। मंडलंपरिवेषश्च परिधिश्चोपसूर्यकमिति भागुरिः॥ २२॥ किरणः। अस्रः। मयूखः। अंशुः। गभस्तिः। घृणिः। रश्मिः। "धृष्णिः। वृष्णिः। वृश्निः।" भानुः। करः। मरीचिः। दीधितिः। एकादशकिरणस्य। मरीचिः स्त्रीपुंसयोः। द्वयोर्मरीचिः किरणो भानुरस्रः करः पदमिति शब्दार्णवः। मरीचिर्मुनिभेदेनागभस्तावनपुंसकमितिभेदिनीच। दीधितिः स्त्रियां स्त्रियामित्यस्य काकाक्षिगोलकन्यायेनोत्तरश्लोकेप्यन्वयः॥ ४

प्रभा। रुक्। रुचिः। त्विट्। भा। भाः। छविः। द्युतिः। दीप्तिः। रोचिः। शोचिः। इत्येकादश प्रभामात्रस्य। तत्रदीप्त्यर्थानि स्त्रियांस्युः। रोचिः। शोचिः सांते क्लीबे। द्विवचनंतु रोचिषी शोचिषी। भाः सांतः। प्रकाशः। द्योतः। आतपः। इति त्रयं सूर्यप्रभायाः। प्रभामात्रस्येत्येके॥ २४॥ कोष्णं। कवोष्णं। मंदोष्णं। कदुष्णं। चतुष्टयमीषदुष्णे। इंदंधर्ममात्रे रूपभेदात्क्लीबे। तद्धृति धर्मिणि त्रिषु। वाच्यलिंगमित्यर्थः। तिग्मं। तीक्ष्णं। खरं। त्रयमत्युष्णस्य

स्युःप्रभारुग्रुचिस्त्विट्भाभाश्छविर्द्युतिर्दीप्तयः॥रोचिःशोचिरुभेक्लीबे प्रकाशोद्योतआतपः॥२४॥कोष्णंकवोष्णं मंदोष्णंकदुष्णंत्रिषुतद्धृति।तिग्मंतीक्ष्णंखरंतद्वन्मृगतृष्णामरीचिका॥२५॥ छ इतिदिग्वर्गः॥ छ कालो दिष्टोऽनेह्नापिसमयोऽथपक्षतिः॥प्रतिपद्इमेस्त्रीत्वेतदाद्यास्तिथयोद्वयोः॥१॥

तद्वत्कोष्णवत्। धर्मेक्लीबं धर्मिणित्रिषु। मृगतृष्णा। मरीचिका। द्वयंमृगजलस्य। मरुदेशादौसिकतासुप्रतिच्छुरिताःसूर्यकिरणाःजलाकारेणभांतितस्यजलाभासस्येत्यर्थः॥२५॥ इति दिग्वर्गः॥ छ॥ कालः। दिष्टः। अनेह्ना। समयः। चत्वारिकालस्य। अनेह्नाःसांतः। कदुष्णेत्यनडुत्। पक्षतिः। प्रतिपत्। इमेद्वेअथप्रतिथेः। तदाद्याःप्रतिपदाद्यास्तिथय इत्युच्यंते। एकं। तिथिशब्दःद्वयोःस्त्रीपुंसयोः। तथाचयोगः। सकलेनिशि पूर्णिमा। तिथीनुपतस्थे। तिथिरेकिका तिथिरिति॥१॥

घस्रः। दिनं। अहः। दिवसः। वासरः। पंचकं दिवसस्य। तत्र दिवसवासरौ क्लीवपुंसोः। प्रत्यूषः। अहर्मुखं। कल्यं "कल्यं" उषः। "उषः। उषा। उषा प्रभातं गोसर्ग इति त्रिकांडशेषः।" प्रत्युषः "प्रत्यूषः। उषः प्रत्युषसि क्लीबं पितृप्रस्वांचयोषिति।" प्रभातं। षट्कं प्रभातस्य। तत्राद्यः प्रत्यूषोऽदंतः पुंसि क्लीबे च। "प्रत्यूषोऽहर्मुखे वसाविति मेदिनी।" कल्यं तालव्यांतं॥२॥ दिनांतः। सायं। "सायः"। संध्या। "संध्या। संध्या पितृप्रसूः संध्येति शब्दार्णवः।"

घस्रोदिनाहनीवातु क्लीबे दिवसवासरौ॥ प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसीअपि॥२॥ "व्युष्टं विभातं हे क्लीबे पुंसि गोसर्ग इष्यते॥" प्रभातं च दिनांते तु सायं संध्या पितृप्रसूः॥ प्राह्णापराह्णमध्यान्हास्त्रि संध्यं मथ शार्वरी॥३॥ निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा॥

वः।" पितृप्रसूः। त्वा-रिदिनांते। तत्र सायमित्यव्ययं नपुंसकलिंगं वा। "सायः कांडेदिनांते चेति मेदिन्यादिषु सायइत्युक्त्वा सायमिति मांताव्ययस्याव्ययवर्गे वक्ष्यमाणत्वादत्र सायो दंतः पुंस्येव"। प्राह्णादयः समाहृताः त्रिसंध्यं ज्ञेयं। "आबंतो चेति पाक्षिकी क्लीबता। पक्षे त्रिसंध्यी" एकं। तत्र प्राह्णः पूर्वाह्णः। शार्वरी। "शार्वरी।"॥३॥ निशा। निशीथिनी। रात्रिः। "रात्री। रात्रौ रात्रिस्तमस्विनीति शब्दार्णवः" त्रियामा। क्षणदा। क्षपा॥ ७

विभावरी। तमस्विनी। रजनी "रजनिरपि"। यामिनी। तमी। "तमा। तमिः" द्वादशनिशायाः॥४॥यातामसी तमोयुक्तारात्रिःसातमिस्रा। एकं या चंद्रिकयाचंद्रप्रकाशेनान्विताभुक्तारात्रिःसाज्योत्स्नी। एकं। ज्योत्स्नीज्योतिष्मतीरात्रिर्ज्योत्स्नाचंद्रमसःप्रभेतिशाश्वतः। पूर्वापरादिनाभ्यां युक्तायांरात्रौ पक्षिणीतिनामैकं॥५॥ बह्व्योनिशाःगणरात्रंस्यात्। एकंरात्रिसमुदायस्य। प्रदोषः। रजनीमुखं। द्वेरात्रेःपूर्वभागस्य। अर्धरात्रःनिशीथइतिद्वेरात्रिमध्यसमयस्य। यामः। प्रहरः। द्वेअहोरात्राष्टमांशस्य॥६॥प्रतिपत्पंचदश्योर्यदंतरंससंधिःपर्वेत्यन्वयः। यद्वा

विभावरीतमस्विन्यौरजनीयामिनीतमी॥४॥तमिस्रातामसीरात्रिर्ज्योत्स्नीचंद्रिकयान्विता॥आगामिवर्तमाना
हर्युक्तायांनिशिपक्षिणी॥५॥गणरात्रंनिशाबह्व्यःप्रदोषोरजनीमुखं॥अर्धरात्रनिशीथौद्वौद्वौयामप्रहरौसमौ॥६॥
सपर्वसंधिःप्रतिपत्पंचदश्योर्यदंतरं॥पक्षांतौपंचदश्यौद्वेपौर्णमासीतुपूर्णिमा॥७॥कलाहीनेसानुमतिःपूर्णेराका
निशाकरे॥ ७ ॥ ७ हरुद्रः। दर्शप्रतिपदोःसंधौग्रंथिष्वस्तावयोरपि॥पर्वक्लीबेविजानीयाद्विषुवत्प्रभृतिष्वपि। पर्वसंधिरितिचतुरक्षरंवा। एकं। द्वे। अमापूर्णिमे पक्षांतौ। पंचदश्योः। द्वयंपक्षांततिथ्योः। द्वित्वाद्विवचनं। नतुनित्यं। पौर्णमासी पूर्णिमा। द्वेशुक्लकृष्णपक्षांत्यतिथी॥७॥सापूर्णिमाकलाहीनेचंद्रेसति अनुमतिरित्युच्यते। एकं। सैवपूर्णिमापूर्णेनिशाकरेसतिराका। एकं॥ ७

यापूर्वापौर्णमासीसानुमतिर्योत्तरासाकेतिश्रुतिः। अमावास्या। अमावस्या।"अमावसी। अमावासी। अमामासी। अमामसी। अप्यमावस्यमावासी
त्वामामास्यप्यमामसीति शब्दार्णवः। नामैकदेशेनामग्रहणादमापि।" दर्शः सूर्येंदुसंगमः। चत्वारिकृष्णपक्षांत्यातिथेः॥८॥ सामावास्यादृष्टेंदुश्चेत्दृ
ष्टंदुर्यस्यांसासिनीवाली। एकं। सेवनष्टेंदुकलानष्टेंदुकलायस्यांसाकुहूः।"कुहुः।" एकं। यापूर्वामावास्यासिनीवाली योत्तरासाकुहूरितिश्रुतिः।
अयमर्थः। चतुर्दश्याअंतिमप्रहरः अमावास्यायाअष्टौप्रहराश्चेतिनवप्रहरात्मकश्चंद्रक्षयकालः शास्त्रसिद्धः। तत्राद्यप्रहरद्वयेचंद्रस्यसूक्ष्मता। अं

अमावास्यात्वमावस्यादर्शःसूर्येंदुसंगमः॥८॥सादृष्टेंदुःसिनीवालीसानष्टेंदुकलाकुहूः॥
उपरागग्रहोराहुग्रस्तेत्विंदौचपूर्णिच॥ ९॥सोपप्लवोपरक्तोह्यवग्न्युत्सातउपाहितः॥ ७॥

तिमप्रहरद्वयेकलक्षयः। अतोमावास्यायाआद्यप्रहरःसिनीवालीसंज्ञः। अंत्यप्रहरद्वयंकुहूसंज्ञं। मध्यमप्रहरपंचकंदर्शसंज्ञमिति। राहुणाचंद्रे
सूर्येचग्रस्तेसतितस्यग्रासस्योपरागःग्रहइतिनामद्वयं॥९॥ सोपप्लवः। उपरक्तः। इतिद्वेराहुग्रस्तस्येंदोःसूर्यस्यवा। अग्न्युत्सातः। उपाहितः। इति
द्वेवह्निकृतोपसर्गस्य। ग्रहणेसतिकदाचिदाग्नेयमंडलादुत्पन्नोभवतितस्येत्येके। धूमकेत्वाख्यस्योत्सातस्येत्यपरे॥ ७, ७,

एकयोक्त्याः पृथग्वचनेन पुष्पवंतावित्यर्थः। सूर्याचंद्रमसौ इत्येकयोक्त्या द्यावापृथिव्यौ उच्येते। पुष्पवंतशब्दो मतुबंतोऽकारांतश्च। धरणिधरशिखरास्थितपुष्पवंताभ्यामित्यादिप्रयोगदर्शनात्॥ ॥१०॥ निमेषोऽक्ष्णिस्पंदकालः। अष्टादशनिमेषामिलित्वा एकाकाष्ठाभवति। त्रिंशत्काष्ठाः मिलित्वा एकाकलाताः कलास्त्रिंशन्मिलित्वाएकः क्षणः। तेक्षणाः द्वादशमिलित्वा एको मुहूर्तः क्लीबपुंसोः॥११॥ तेत्रिंशन्मुहूर्ताएकोऽहोरात्रः। अन्हासहितारात्रिरहोरात्रः॥ "अत्रअहश्चरात्रिश्चतयोः

एकयोक्त्यापुष्पवंतौदिवाकरनिशाकरौ॥१०॥अष्टादशनिमेषास्तुकाष्ठास्त्रिंशत्तुताःकलाः॥ तास्तुत्रिंशत्क्षणस्तेतु मुहूर्तोद्वादशास्त्रियां॥११॥तेतुत्रिंशदहोरात्रःपक्षस्तेदशपंचच॥ पक्षौपूर्वापरौशुक्लकृष्णौमासस्तुतावुभौ ॥

समाहारइतिविग्रहःसाधुः।अन्यथाअजभावप्रसंगात्। अहःपूर्वारात्रिशब्दाद्वंदएवा।ज्येधानात्।" तेहोरात्राःपंचदशसंख्याकाएकःपक्षः पक्षोद्विविधः। शुक्लःकृष्णश्चेति। तत्रमासस्यपूर्वःशुक्लःकृष्णस्त्वपरः।यतः शुक्लादिकमेणप्रायशोमासप्रवृत्तिः। तावुभौपक्षावेकोमासः। चांद्रेणमानेनेदमुक्तं॥१२॥

मार्गादी द्वौद्वौमासौऋतुरेकः।सचहेमंतादिसंज्ञः।माघादयुपक्रमस्तु अयनारंभदशाज्ञेयः।तैर्ऋतुभिस्त्रिभिरेकमयनं।तद्द्वयासूर्यगतिभेदात्। अर्कस्योदग्गतिःउत्तरायणं। दक्षिणागतिस्तु दक्षिणायनं। एवंद्वेअयनेएकोवत्सरः॥१२॥विषुवत्।विषुवं।"विषुपं।विषुणः।विषुवः।विषुवाल्पमरात्रिवासराइतिपुस्कांडेबोपालितः।" द्वयंसमंरात्रिंदिवंयस्मिन्मिन्काले। तुलासंक्रांतौमेषसंक्रांतौचदिनरात्रीसमेभवतः।तस्यकाल-

द्वौद्वौमार्गादिमासौस्याद्दतुस्तैरयनंत्रिभिः॥अयनेद्वेगतिरुदग्दक्षिणार्कस्यवत्सरः॥१३॥
समरात्रिंदिवेकालेविषुवद्विषुवंचतत्॥"पुष्ययुक्तापौर्णमासीपौषीमासेतुयत्रसा॥१४॥
नाम्नासपौषोमाघाद्याश्चैवमेकादशापरे॥१॥"मार्गशीर्षसहामार्गआग्रहायणिकश्चसः॥१४॥

स्येत्यर्थः। रात्रिंदिवशब्दअचतुरविचतुरेत्यादिनासाधुः।"पुष्यनक्षत्रयुक्तापौर्णमासीपौषीज्ञेया।सापौषीयस्मिन्मासेवर्ततेसनाम्नापौषः। मघायुक्तापौर्णमासीयत्रसमाघःसआद्योयेषांते।परेपौषादन्येएकादशमासाएवमुक्तरीत्याज्ञेयाः" एकैकं।मार्गशीर्षः। सहाः।मार्गः।आग्रहायणिकः।चत्वारिमार्गशीर्षस्य॥१४॥

पौषः तैषः सहस्यः त्रीणि पौषस्य तपाः माघः द्वे माघस्य फाल्गुनः तपस्यः फाल्गुनिकः त्रयं चैत्रः चैत्रिकः मधुः त्रयं ॥१५॥ वैशाखः माधवः राधः त्रीणि ज्येष्ठः शुक्रः द्वे शुचिः आषाढः द्वे श्रावणः नभाः श्रावणिकः त्रीणि ॥१६॥ नभस्यः प्रौष्ठपदः भाद्रः भाद्रपदः चत्वारि आश्विनः इषः आश्वयुजः त्रीणि कार्तिकः ॥१७॥ बाहुलः ऊर्जः कार्तिकिकः चत्वारि ऋतुभेदानाह ॥ हेमंत इत्येकऋतुः

पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने ॥ स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ॥१५॥ वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयं ॥ आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥१६॥ स्युर्नभस्ये प्रौष्ठपद भाद्र भाद्रपदाः समाः ॥ स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्तिके ॥१७॥ बाहुलोर्जौ कार्तिकिको हेमंतः शिशिरो-ऽस्त्रियां ॥ वसंते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ॥१८॥ निदाघ उष्णागम उष्मा ऊष्मागमस्तपः ॥ ७

शिशिर इत्यपरः सचपुन्नपुंसकलिंगः एकैकं वसंतः पुष्पसमयः सुरभिः त्रीणि वसंतस्य ग्रीष्मः ऊष्मकः "ऊष्मकः" ॥१८॥ निदाघः उष्णागमः उष्णः ऊष्मागमः "ऊष्मागमः" तपः इतिसप्तकं ग्रीष्मस्य तपोकारांतः पुंसि ॥ ७

प्रावृट्। वर्षाः। द्वे वर्षतोः। तत्र प्रावृट् स्त्री अब्दः पुंसि अंतः स्त्रियां। वर्षाशब्दस्तु। स्त्रीलिंगो भूम्नि नित्यं बहुवचनांत इत्यर्थः। शरदित्येकऋतुः सः स्त्रीलिंगो दकारांतः॥१९॥ अमी हेमंतादयः षडपि ऋतवः ऋतुसंज्ञकाः। ऋतुशब्दः पुल्लिंगः। तेच हेमंतादयः मार्गशीर्षादिमासानां षड्भिर्युग्मैः क्रमाद्भवंति। उक्तंच। आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुर्मल इति। संवत्सरः। वत्सरः। अब्दः। हायनः। शरत्। इमाः षट् वर्षस्य। तत्र हायनांता अस्त्रियां। समाः स्त्रियां बहुत्वेच। समांसमां विजायते इत्येकत्वेपि दृश्यते॥२०॥ मानुषेण मासेन एकः पैत्र्योऽहोरात्रः। तत्र कृष्णाष्टम्याउत्तरार्धेदिनारंभः शुक्लाष्ट

स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाअथशरत्स्त्रियां॥१९॥षडमीऋतवःपुंसिमार्गादीनांयुगैःक्रमात्॥संवत्सरोवत्सरोब्दो हायनोऽस्त्रीशरत्समाः॥२०॥मासेनस्यादहोरात्रःपैत्र्योवर्षेणदैवतः॥दैवेयुगसहस्रेद्वेब्राह्मंकल्पोतुतोनृणां॥२१॥

म्याउत्तरार्धेरात्र्यारंभः। तथा। मानुषेण वर्षेण दैवस्य देवानामहोरात्रः तत्रोत्तरायणंदिनं। दक्षिणायनं रात्रिः। मानुषाणांयत्कृतादियुगचतुष्टयं। तद्दैवंयुगं ज्ञेयं। एवंदैवेद्वेयुगसहस्रेब्राह्मोहोरात्रः। अयमर्थः। उक्तानां देवताहोरात्राणांषष्ट्यधिकशततत्रयेणदिव्यं वर्षं दिव्यैर्द्वादशभिर्वर्षसहस्रैर्मानुषचतुर्युगं तच्च देवानामेकंयुगं तत्सहस्रं ब्रह्मणोदिनं तत्तुभूतानांस्थितिकालस्तावत्येवरात्रिर्भूतानां प्रलयकालइति। अतउक्तं तोकल्पाविति। येद्वेदैवेयुगसहस्रेतोनृणांकल्पोस्थितिप्रलयकालावित्यर्थः॥२१॥

दिव्यानांयुगानांयाएकसप्ततिरेकाधिकासप्ततिःतन्मन्वंतरं।मनूनांस्वायंभुवचाक्षुषादीनामंतरमवकाशोऽवधिर्वा।तेश्चतुर्दशभिर्ब्रह्मणोदिनंभवति।एकं।संवर्तः।प्रलयः।कल्पः।क्षयः।कल्पांतः।पंचप्रलयस्य॥२२॥पंकं।पाप्मा।पापं।किल्बिषं।कल्मषं।कलुषं।वृजिनं।एनः।अघं।अंहः।"अंघः"।दुरितं।दुष्कृतं।द्वादशपापस्य।तत्रपंकंक्लीबपुंसोः।पाप्मानकारांतःपुंसि।शेषंक्लीबे॥२३॥धर्मं।पुण्यं।श्रेयः।सुकृतं।वृषः।पंचकंसु

मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिः॥संवर्तःप्रलयःकल्पःक्षयःकल्पांतइत्यपि॥२२॥अस्त्री पंकंपुमान्पाप्मापापंकिल्बिषकल्मषं॥कलुषंवृजिनेनोऽघमंहोदुरितदुष्कृतं॥२३॥स्याद्धर्ममस्त्रियां पुण्यश्रेयसीसुकृतंवृषः॥मुत्प्रीतिःप्रमदोहर्षःप्रमोदामोदसंमदाः॥२४॥स्यादानंदथुरानंदःशर्म शातसुखानिच॥स्वःश्रेयसंशिवंभद्रंकल्याणंमंगलंशुभं॥२५॥ ७

कृतस्य।तत्रधर्मंक्लीबपुंसोः।वृषःपुंसि।मुत्।प्रीतिः।प्रमदः।हर्षः।प्रमोदः।आमोदः।संमदः॥२४॥आनंदथुः।आनंदः।शर्म।शातं।"दंत्यादिर्वा"सुखं।द्वादशहर्षस्य।तत्रप्रीतिसाहचर्यान्मुदपिस्त्रियांदकारांतः।स्वःश्रेयसं।शिवं।भद्रं।"भंदं।भंदभद्रंशिवंतथेतित्रिकांडशेषः।"कल्याणं।मंगलं।शुभं॥२५॥ ७

भावुकं। भविकं। भव्यं। कुशलं। क्षेमं। शस्तं। द्वादशकल्याणमात्रस्य। तत्र क्षेमंशस्तंच पुन्नपुंसकयोः। स्वः श्रेयसमितिच तुरक्षरं। पापपुण्यशब्दौ तथा सुरवादिशब्दाः स्वः श्रेयः शिवभद्रादयः। "शस्तांताः"। द्रव्येविशेष्येवर्तमानास्त्रिषुविशेष्यलिंगाइत्यर्थः। यथा पापास्त्री। पापः पुमान्। पापंकुलमित्यादि॥२६॥ मतल्लिका। मच्चर्चिका। प्रकांडं। "प्रकांडःपुंस्यपि। प्रकांडोनस्त्रीविटपेमूलशारवांतरेनरोः। शस्तइतिमेदिनी। अस्त्री प्रकांडोवि-

भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियां॥ शस्तंचाथत्रिषुद्रव्येपापंपुण्यंसुरवादिच॥२६॥
मतल्लिकामच्चर्चिकाप्रकांडंमुद्गुतल्लजौ॥ प्रशस्तवाचकान्यमून्ययः शुभावहोविधिः॥२७॥

टपेतरुस्कंधप्रशस्तयोरितिरभसः।" उद्गुः। तल्लजः। अमूनिपंचप्रशस्तवाचकानि। एतेतुपंचनित्यं द्रव्येएवलिंगांतरेणसामानाधिकरण्येपिस्वलिंगंनजहति। प्रशंसावचनेश्चेतिकृष्णसर्पवाप्यश्वादिवत्तूनित्यसमासः। यथा प्रशस्तोब्राह्मणोब्राह्मणमतल्लिकाप्रशस्तागौर्गौर्मच्चर्चिका। गोप्रकांडं। ब्राह्मणोद्गुः। कुमारीतल्लजः। अयः शुभावहोविधिः। शुभोत्सादकंदैवंसोऽयउच्यते। अयोऽकारांतः। एकं॥२७॥

दैवं। दिष्टं। भागधेयं। भाग्यं। नियतिः। विधिः। षट्पुंस्याक्तनकर्मणः। नियतिः स्त्री। विधिः पुंसि। हेतुः। कारणं। बीजं। त्रयं हेतुमात्रस्य। हेतुः पुंसि। यदादिकारणं तन्निदानं। एकमुपादानकारणस्य॥ २८॥ क्षेत्रज्ञः। आत्मा। पुरुषः। त्रयं हरीराधिदैवतस्य। प्रधानं। प्रकृतिः। हे सत्त्वादिगुण साम्यावस्थायाः। यः कालिको विशेषः। कालकृतो देहादेर्विशेषः यौवनादिरवस्थोच्यते। एकं। सत्त्वं। रजः। तमः। एते गुणाः प्रकृतेर्धर्माः। ए

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः॥ हेतुर्नाकारणं बीजं निदानं त्वादिकारणं॥ २८॥ क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियां॥ विशेषः कालिकोवस्था गुणाः सत्त्वं रजस्तमः॥ २९॥ जनुर्जननं जन्मानि जनि रुत्पत्तिरुद्भवः॥ प्राणी तु चेतनो जन्मी जंतुर्जन्त्वसरीरिणः॥ ३०॥ जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता॥

केकं। रजस्तमसी सांते॥ २९॥ जनुः। जननं। जन्म। जनिः। उत्पत्तिः। उद्भवः। षट्पुंस्यन्मनः। जनुः सांतं। जनिः स्त्री। प्राणी। चेतनः। जन्मी। जंतुः। जन्तुः। सरीरी। षट्पुंस्प्राणिनः॥ ३०॥ जातिरित्यादि पद्यं केचिदत्र पठंति। "इतिटीकाकारेण लिखितं परंतु मूल एवैतत्पद्यं दृश्यते।" जातिः। जातं। सामान्यं। त्रयं घटत्वादिजातेः। व्यक्तिः। पृथगात्मता। हे घटादिव्यक्तेः॥

चित्तं । चेतः । हृदयं । स्वांतं । हृत् । मानसं । मनः । सप्तकंचित्तस्य । हृदुत्कारांतः ॥२१॥ ॥ इतिकालवर्गः ॥ ॥ बुद्धिः । मनीषा । धिषणा । धीः । प्रज्ञा । ज्ञोमुषी । मतिः । प्रेक्षा । उपलब्धिः । चित् । संवित् । प्रतिपत् । ज्ञप्तिश्चेतना । चतुर्दशबुद्धेः । तत्रचित्तांतः संवित्प्रतिपत्तदंतः ॥ १ ॥ याधारणावतीधीः मामेधा । एकं । यन्मानसंकर्ममनोव्यापारः ससंकल्पः । एकं । "अवधानादित्रयंसमाधानस्य" चिंताभोगः । मनस्कारः । द्वे मनसः सुरादीतत्पर

चित्तंतुचेतोहृदयंस्वांतंहृन्मानसंमनः ॥ २१ ॥ ॥इतिकालवर्गः॥ ॥बुद्धिर्मनीषाधिषणाधीःप्रज्ञाज्ञोमुषीमतिः॥
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः॥ १ ॥ धीर्धारणावतीमेधासंकल्पःकर्ममानसं ।"अवधानंसमाधानं
प्रणिधानंतथैवच"॥ चिंताभोगोमनस्कारश्चर्चासंख्याविचारणा ॥ २॥ "विमर्शोभावनाचैववासनाच
निगद्यते" ॥ अध्याहारस्तर्कऊहोविचिकित्सातुसंशयः ॥ संदेहद्वापरोचाथसमोनेणयनिश्चयो ॥ ३ ॥

नायाः । चर्चा । संख्या । विचारणा । त्रयंप्रमाणेरर्थपरीक्षणस्य ॥ २ ॥ "विमर्शादित्रयंपूर्वानुभूताविस्मरणस्य" । अध्याहारः । तर्कः । ऊहः । त्रयंतर्कस्य । "अपूर्वोत्प्रेक्षणंतर्कः" विचिकित्सा । संशयः । संदेहः । द्वापरः । चत्वारिसंशयज्ञानस्य । निर्णयः । निश्चयः । द्वे निश्चयज्ञानस्य ॥ ३ ॥

मिथ्यादृष्टिः। नास्तिकता। ह्यपरलोकाभाववादिज्ञानस्य। नास्तिपरलोकइतिमतिर्यस्यतस्यभावोनास्तिकता। व्यापादः। द्रोहचिंतनं। ह्यपरद्रोहचिंतनस्य सिद्धांतः। राद्धांतः। ह्यसिद्धांतस्य। सिद्धोअंतोनिर्णयोयस्यसासिद्धांतः। भ्रांतिः। मिथ्यामतिः। भ्रमः। त्रयमयथार्थज्ञानस्य। स्थाणौपुरुषोयमितिज्ञानंभ्रांतिः। स्थाणुर्वापुरुषोवायमित्यनेककोटिकंज्ञानंसंशयः। स्थाणौस्थाणुरितिज्ञाननिश्चयः॥ ४॥ संवित्। आगूः। प्रतिज्ञानं। नियमः। आश्रवः। संश्र

मिथ्यादृष्टिर्नास्तिकताव्यापादोद्रोहचिंतनं॥ समोसिद्धांतराद्धांतोभ्रांतिर्मिथ्यामतिर्भ्रमः॥ ४॥
संविदागूःप्रतिज्ञानंनियमाश्रवसंश्रवाः॥ अंगीकाराभ्युपगमप्रतिश्रवसमाधयः॥ ५॥ मोक्षे
धीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्रयोः॥ मुक्तिःकैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतं॥ ६॥

वः। अंगीकारः। अभ्युपगमः। प्रतिश्रवः। समाधिः। दशकंअंगीकारस्य। तत्रसंवित्आगूश्चस्त्रियां। "आगूर्यधूर्वत्। आग्रेो। आगइत्या दिपक्षेधूर्वत्। आगुरो। आगुरइत्यादि"॥ ५॥ मोक्षविषयेयाधीर्बुद्धिःतज्ज्ञानं। एकं। मोक्षशास्त्रादन्यत्रशास्त्रेशिल्पे। वाशब्दाच्चधीर्ज्ञानंमुच्यते "मोक्षनिमित्तंशिल्पशास्त्रयोर्धीर्ज्ञानं। अन्यनिमित्तंयातयोर्धीः साविज्ञानमितिवा। विज्ञानंकर्मणिज्ञानेइतिहेमः। एकं। मुक्तिः। कैवल्यं। निर्वाणं। श्रेयः। निश्रेयसं। अमृतं॥ ६॥

मोक्षः। अपवर्गः। अष्टकं मोक्षस्य। अज्ञानं। अविद्या। अहंमतिः। त्रयमज्ञानस्य। रूपं। शब्दः। गंधः। रसः। स्पर्शः। एतेपंचविषयाइतिगोचराइतिइंद्रियार्थाइतिचोच्यंते। त्रयं॥ ७॥ हृषीकं। विषयि। इंद्रियं। त्रयंचक्षुरादेरिंद्रियस्य। विषयिनांतं। पायूपस्थादिकंमेंद्रियमुच्यते। आदिनावागादि॥ "तद्यथा॥ पायूपस्थंपाणिपादौवाक्चेतींद्रियसंग्रहः। उत्सर्गआनंदादानगत्यालापाश्चतत्क्रियाइति"॥ मनोनेत्रादि। धींद्रियमुच्यंते। आदिनाश्रोत्रादि॥ "मनः कर्णोनथानेत्रंरसनाचत्वचामह॥ नासिकाचेतिषट्तानिधींद्रियाणिप्रचक्षते"॥ एकं॥ ८॥ अथरसभेदानाह॥ तुवरः। "दीर्घादिरपि। कुवरो

मोक्षोपवर्गोथाज्ञानमविद्याहंमतिःस्त्रियां॥ रूपंशब्दोगंधरसस्पर्शश्चविषयाअमी॥ ७॥ गोचराइंद्रियार्थाश्चहृषीकंविषयींद्रियं॥ कर्मेंद्रियं पायवादिमनोवाचादिधींद्रियं॥ ८॥ तुवरस्तुकषायोत्स्त्रीमधुरोलवणःकटुः॥ तिक्तोम्लाश्चरसाःपुंसितद्वत्सुषडमीत्रिषु॥ ९॥

पि"। कषायः। देतुवरस्यप्राकृतभाषयातुरटइतिरव्यानस्य। मधुराद्याः पृथक्पृथक्ज्ञेयाः। एवंतुवराद्याः षडपिरसाउच्यंते॥ तत्रतुवरोहरीत क्यादौप्रसिद्धः। मधुरोजलादौप्रसिद्धः। लवणःसैंधवादौप्रसिद्धः। कटुर्मरीचादौप्रसिद्धः। एवंतिक्तोनिंबादौ। अम्लस्तिंतिड्यादौ। "अम्लं" अमीतुवराद्याः षडपिरसमात्रेवर्तमानाः पुंसि। तद्वत्सरसवत्सुवर्तमानास्त्रिषु। वाच्यलिंगाइत्यर्थः। "तुवरकषायोनपुंसकावपि। अम्लीत्यकृत्वातु"॥ १०॥

विमर्दोत्थेसंघर्षणादिनोत्पन्नेजनमनोहरे गंधेपरिमलइत्येकं। विमर्दग्रहणेनजातिपद्मादेर्निरासः। योतिनिर्हारीअत्यंतसमाकर्षीसगंदआमोदउच्यते॥ कस्तूरिकायामामोदः कर्पूरेसुरवासनः॥ बकुलेस्यात्परिमलश्चंपकेसुरभिस्तथेतिशब्दार्णवः”॥ एकं। इतःपरंआगुणाद्गुणाशुक्लादयइतिवक्ष्यमाणाद्गुणशब्दात्साकूवाच्यलिंगत्वंअभिधेयानुसारेणत्रिलिंगत्वं॥ समाकर्षी। निर्हारी। ह्येदूरनिपातिनोगंधद्रव्यस्य। निर्हरत्यवश्यंमनोनिर्हारी॥

विमर्दोत्थेपरिमलोगंधेजनमनोहरे॥आमोदःसोतनिर्हारीवाच्यलिंगत्वमाद्गुणात्॥१०॥
समाकर्षीतुनिर्हारीसुरभिर्घ्राणतर्पणः॥इष्टगंधःसुगंधिःस्यादामोदीसुरवासनः॥११॥
पूतिगंधिस्तुदुर्गंधोविस्रंस्यादामगंधियत्॥शुक्लशुभ्रशुचिश्वेतविशदश्च्येतपांडराः॥१२॥

सुरभिः। घ्राणतर्पणः। इष्टगंधः। सुगंधिः। चत्वारिशोभनगंधयुक्तस्य। शोभनोगंधोऽस्यसुगंधिः। आमोदी। सुरवासनइतिद्वेयन्सुरंवासयतितस्यतांबूलादेः॥११॥ पूतिगंधिः। दुर्गंधः। द्वेअनिष्टगंधयुक्तस्य। पूतिर्दुष्टगंधोयस्यसः। [illegible]धेतादूरं। एकंअपक्कमांसादिगंधस्य। आमोऽपक्कंमलस्तस्येवगंधोयस्यतत्। उपमानाच्चेतीत्। शुक्लः। शुभ्रः। शुचिः। श्वेतः। विशदः। श्च्येतः। पांडरः॥१२॥

अवदातः । सितः । गौरः । अवलक्षः । "वलक्षोपि" धवलः । अर्जुनः । हरिणः । पांडुरः । पांडुः । षोडशानामानिशुक्लस्य । "तत्रार्जुनोतानित्रयोदशानामा निशुक्लस्य । हरिणादीनित्रीणि पीतमिश्रशुक्लस्येतिविभागःसाधुः । शब्दार्णवेतुश्वेतस्तुसमपीतोसौरकेतरजपारुचिः । वलक्षस्तुसितःशावः कदलीकुसुमो पमः ॥ अर्जुनस्तुसितःकृष्णलेशवान्कुमुदच्छविः ॥ पांडुस्तुपीतभागार्द्रःकेतकीधूलिसन्निभइत्युक्तं । हरिणोपांडुसारंगाविति हैमः ॥ "ईषत्पांडुः । धूसरः । "धूसरस्तुसितःपीतलेशवान्बकुलच्छविरितिशब्दार्णवः" । ईषदूवलस्य ॥१३॥ कृष्णः । नीलः । असितः । श्यामः । कालः । श्याम

अवदातःसितोगौरोऽवलक्षोधवलोर्जुनः ॥ हरिणःपांडुरःपांडुरीषत्पांडुस्तुधूसरः ॥ १३ ॥
कृष्णनीलासितश्यामकालश्यामलमेचकाः ॥ पीतोगौरोहरिद्राभःपालाशोहरिनोहरित् ॥ १४ ॥
लोहितोरोहितोरक्तः शोणःकोकनदच्छविः ॥

लः । मेचकः । "मेचकःकृष्णनीलः स्यादतसीपुष्पसंनिभइतिशब्दार्णवः" । समकंनील्यादिगतवर्णस्य । पीतः । गौरः । हरिद्राभः । त्रयंपी तस्य । पालाशः । "पलाशोपि" । हरिनः । हरित् । त्रयंशिरीषादिपत्रगतवर्णस्य । हरिन्तांतः ॥ १४ ॥ लोहितः । रोहितः । रक्तः । त्रयंरक्तस्य । य कोकनदच्छविःरक्तोत्पलाभः सशोणइत्येकं ॥

योऽव्यक्तरागईषद्रक्तःसोऽरुणः। "अरुणःकृष्णलोहितइत्यमरमाला"। एकं। यःश्वेतमिश्रोरक्तःसपाटलइत्येकं॥१५॥ श्यावः। कपिशः। द्वेधूसरारुणवर्णस्य। कपिर्मर्कटःतद्वद्वर्णोऽस्त्यस्यकपिशः। धूम्रः। धूमलः। कृष्णलोहितः। त्रयंकृष्णमिश्रलोहितवर्णस्य। कडारः। कपिलः। पिंगः। पिशंगः। कद्रुः पिंगलः। षट्पिंगलवर्णस्य। अयमत्यंतगौरबालकस्यकेशेषुप्रसिद्धः। पिंगागोरोचनापांडुरितिकात्यः। "शब्दार्णवेतुसितपीतहरिद्रक्तः कडारस्तृणवन्निभवत्। अयंतद्रक्तपीतांगः कपिलोगोविभूषणः॥ हरितांशोधिकेऽसौतुपिशंगःपद्मधूलिवत्। पिशंगस्त्वसितावेशात्पिंशोदीपशिरवादिषु। पिंगल

अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः॥१५॥ श्यावः स्यात्कपिशोधूम्रधूमलोकृष्णलोहिते॥ कडारःकपिलःपिंग पिशंगोकद्रुपिंगलौ॥१६॥ चित्रेकिर्मीरकल्माषशाबलेलाश्वकर्बुरे॥ गुणेशुक्लादयःपुंसिगुणिलिंगास्तुतद्वति॥१७॥

॥ ॥ इतिधीवर्गः॥ ॥

स्तुपरच्छायः। पिंगश्शुक्लांगरखंडइतित्र्यंकं"॥१६॥ चित्रे। किर्मीरः। "कर्मीरः" कल्माषः। शाबलः। एतः। कबुरः। षट्कंकर्बुरस्य। विचित्रवर्णस्येत्यर्थः। रक्तादयः गुणेगुणमात्रेवर्तमानाःपुंसि। चित्रंतुरूपभेदान्नपुंसकं। यथास्यपटस्य शुक्लंरूपं। तद्वतिगुणवतिवस्तुनिवर्तमानागुणिलिंगाः अभिधेयलिंगाः। यथाशुक्लाशाटी। शुक्लःपटः। शुक्लंवस्त्रं। रोहितादीनांस्त्रीत्वितुवर्णादनुदात्तोपधात्तोनङ्वक्तव्यः। तकारस्यनकारश्च। यथाश्येनी। श्येना। रोहिणी। रोहिता। लोहिनी लोहितेत्यादि॥१७॥ इतिधीवर्गः॥ ॥

ब्राह्मी । भारती । भाषा । गीः । " गिरापि ब्राह्मणी वचनं वाचा जल्पितं गदितं गिरेति शब्दार्णवः । गीर्भणिति गिरेति त्रिकांडशेषः । तत्र गिराचार्णीति पाठः । " वाक् । वाणी । सरस्वती । व्याहारः । उक्तिः । लपितं । भाषितं । वचनं । वचः । चयोदशानामानि वचनस्य । तत्रापि सरस्वत्यंतानि वचनाधिष्ठात्र्या देवतायाअपि । व्याहारादीनित्वधिष्ठेयस्येव । गीःरेफांता ॥ १ ॥ अपभ्रष्टः शब्दः गावी गोणीत्यादि अपशब्दः सोपभ्रंश इत्युच्यते । एकं । शास्त्रं व्याकरणा

ब्राह्मीतुभारतीभाषागीर्वाग्वाणीसरस्वती ॥ व्याहारउक्तिर्लपितंभाषितंवचनंवचः ॥ १ ॥
अपभ्रंशोपशब्दःस्याच्छास्त्रंशब्दस्तुवाचकः ॥ तिङ्सुबंतचयोवाक्यंक्रियाकारकान्विता ॥ २ ॥

दयोवाचकः सशब्द इत्युच्यते । एकं ॥ यथा ओतप्रोततंतूनांवाचकःपटइति । तिङ्सुबंतचयः तिङंतसुबंतपदसमूहोवाक्यं । तिङंतचयोयथा॥ पचतिभवतिपाकोभवतीत्यर्थः । सुबंतचयोयथा । प्रकृतिसिंहमिदंहीमहात्मनां । कारकान्विताकारकैः संबधात्क्रियावावाक्यमुच्यते । यथादेवदत्तगामभिरक्षगुरुकुलंडेन । अत्रान्वितआकांक्षायोग्यतासन्निधिवशाज्ज्ञेयं ॥ २ ॥

श्रुतिः । वेदः । आम्नायः । त्रयी । चत्वारिवेदस्य । अत्रलिंगसंकरोनदोषायस्त्रीतिविशेषविधानात् । त्रय्याव्याख्यायमानत्वाच्च । तद्विधिःवैदिकोविधि
र्यज्ञादिःधर्मइत्युच्यते । वेदमूलत्वात्स्मृत्युक्तोपिविधिर्धर्मएव । यदाहगौतमः । श्रुतिस्मृतिविहितोधर्मइति । केचित्तुलिंगसंकरोमाभूदितित्रयीधर्मइति
समस्तंपदमाहुः । "विधानमृग्यजुःसाम्नांत्रयीधर्मंविदुर्बुधाः" ॥ त्रयीशब्दोविशेषंदर्शयन्वेदभेदानभिधत्ते । ऋक् । साम । यजुः । इतित्रयोवेदासिलि

श्रुतिः स्त्रीवेद आम्नायस्त्रयी धर्मस्मृतद्विधिः ॥ स्त्रियामृक्सामयजुषीइतिवेदास्त्रयस्त्रयी ॥ ३ ॥
शिक्षेत्यादिश्चतुरंगमोंकारप्रणवौसमौ ॥ इतिहासःपुराहृत्तमुदात्ताद्यास्त्रयःस्वराः ॥ ४ ॥

त्राम्नायाङ्गेया । तत्रऋक्शब्दःस्त्रीलिंगः ॥ ३ ॥ शिक्षाकल्पोव्याकरणमित्यादिवेदस्यांगज्ञेयं । "शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः ॥ छंदो
विचितिरित्येषषडंगोवेदउच्यते । कल्पः कल्पसूत्रं" । ओंकारः । प्रणवः । द्वे । इतिहासःपुराहृत्तं । द्वेपूर्ववृत्तस्यमहाभारतादेः । उदात्तः । अनुदात्तः ।
स्वरितः । इतित्रयस्वराउच्यंतएके ॥ "उदात्तश्चानुदात्तश्चस्वरितश्चस्वरात्रयः ॥ चतुर्थःप्रचितोनोक्तोयतोमोछांदसःस्मृतः" ॥ ४ ॥

आन्वीक्षिकीत्येकंतर्कविद्यायांगौतमादिप्रणीतायां। दंडनीतिरित्येकंअर्थशास्त्रेबृहस्पत्यादिप्रणीते।"अर्थस्यभूम्यादेःशास्त्रे"।आख्यायिका।उपलब्धार्था।इयंअनुभूतार्थप्रतिपादकस्यवासवदत्तादेः।यत्पंचलक्षणंतत्पुराणमुच्यते।"सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच ॥ वंश्यानुचरितंचैव पुराणंपंचलक्षणं"॥ ५॥ प्रबंधस्याख्यविस्तरस्यायाकल्पनारचनासाकथा। एकंनाटकंसमायणादेः।प्रवल्लिका।"प्रबल्हिका"प्रहेलिका।इयंय

आन्वीक्षिकीदंडनीतिस्तर्कविद्यार्थशास्त्रयोः ॥ आख्यायिकोपलब्ध्यार्थापुराणंपंचलक्षणं॥५॥
प्रबंधकल्पनाकथाप्रवल्लिकाप्रहेलिका ॥ स्मृतिस्तुधर्मसंहितासमाहृतिस्तुसंग्रहः ॥ ६॥७

थापरैःसंदिह्यतेतादृशगुणाभिधानस्य। यथा। पानीयंपातुमिच्छामित्वन्नःकमललोचने ॥ यदिदास्यसिनेच्छामिनोदास्यसिपिबाम्यहमिति।"यदुक्तं। व्यक्तीकृत्यकमप्यर्थंस्वरूपार्थस्यगोपनात्। यत्रबाह्यार्थसंबंधःकथ्यतेसाप्रहेलिकेति"। यामन्वादिभिःप्रणीताधर्मसंहिता।"धर्मबोधार्थंरचितासंहिता"। सास्मृतिः। एकंसमाहृतिः। संग्रहः।"विस्तरेणोपदिष्टानामर्थानांसूत्रभाष्ययोः। निबंधोयःसमासेनसंग्रहंतंविदुर्बुधाः"।इयंसंग्रहग्रंथस्य॥६॥

यासमासार्थापूरणीयार्थासामसमस्या। यथा। शतचंद्रंनभस्थलं। तत्पूरणंयथा। दामोदरकराघातविह्वलीकृतचेतसा॥ दृष्टंचाणूरमल्लेनेति।"समस्यात समासार्थेनिपाठेतुअपरिपूर्णार्थेत्यर्थः।" किंवदंती। "किंवदंतिः"।जनश्रुतिः। हेचतुरक्षरेनामनीलोकप्रवादस्य। वार्ता। प्रवृत्तिः। वृत्तांतः। उदंतः। चत्वारि यथास्थितलोकवृत्तकथनस्य। आख्यः॥ ७॥ आख्या। आख्या। अभिधानं। नामधेयं। नाम। षट्नाम्नः। हूतिः। आकारणा। आह्वानं। नयंआह्वा

समस्यातुसमासार्थाकिंवदंतीजनश्रुतिः॥ वार्ताप्रवृत्तिर्वृत्तांतउदंतस्यादथाख्यः॥ ७॥ आख्या
द्वेअभिधानंचनामधेयंचनामच॥ हूतिराकारणाह्वानंसंहूतिर्बहुभिःकृता॥ ८॥ विवादोव्य
वहारस्यादुपन्यासस्तुवाङ्मुखं॥उपोद्घातउदाहारःशपनंशपथःपुमान्॥ ९॥ ७

नस्य। याबहुभिःकृताहूतिःसासंहूतिः। एकं॥ ८॥ विवादः। व्यवहारः। "विनानार्थेऽवसंदेहेहरणंहारउच्यते॥ नानासंदेहहरणाद्व्यवहारःप्रकीर्तितइतिकात्यायनः"। हेकृणदानादिनिमित्तविविधवादस्य। उपन्यासः। वाङ्मुखं। हेवचनारंभस्य। उपोद्घातः। उदाहारःहेप्रकृतसिद्ध्यर्थचिंतनस्य। तदुक्तं॥ चिंताप्रकृतसिध्यर्थमुपोद्घातंप्रचक्षतइति। "उपोद्घातादिहेवक्ष्यमाणोपयोग्यर्थवर्णनस्येतिवा।" शपनं। शपथः। द्वयं॥ ९॥ ७ ७

प्रश्नः। अनुयोगः। इच्छा। अयंप्रश्नस्य। प्रतिवाक्यं। उत्तरं। द्वे प्रतिवचनस्य। मिथ्याभियोगः। अभ्याख्यानं। द्वे।"शालेमधारयसीत्याद्य" सत्याक्षेपस्य। मिथ्याभिशंसनं॥ ९०॥ अभिशापः। द्वेसुरापानादिमिथ्यापापोद्भावनस्य। अनुरागजःगुणानुरागोत्थः शब्दः प्रणादइत्युच्यते। एकं। यशः। कीर्तिः। समज्ञा "समज्यासभाज्ञावेति पाठांतर" अयंकीर्तेः। स्तवः। स्तोत्रं। स्तुतिः। नुतिः। चत्वारिस्तुतेः॥ ९१॥ द्विवारंत्रिवारंवोक्तं आम्रेडितमुच्यते।"यथा। सर्पः

प्रश्नोनुयोगःइच्छाचप्रतिवाक्योत्तरेसमे ॥ मिथ्याभियोगोऽभ्याख्यानमथमिथ्याभिशंसनं॥ ९०॥
अभिशापःप्रणादस्त्वनुशब्दःस्यादनुरागजः॥ यशःकीर्तिसमज्ञाचस्तवःस्तोत्रंस्तुतिर्नुतिः॥ ९१॥
आम्रेडितंद्विस्त्रिरुक्तमुच्चैर्घुष्टंतुघोषणा॥ काकुःस्त्रियांविकारोयःशोकभीत्यादिभिर्ध्वनेः॥ ९२॥
अवर्णक्षेपनिर्वादपरीवादापवादवत्॥ उपक्रोशोजुगुप्साचकुत्सानिंदाचगर्हणे॥ ९३॥ ७

सर्पइति।" एकं। उच्चैर्घुष्टं। घोषणा। द्वे उच्चैर्घोषस्य। शोकभीतिकामादिभिर्ध्वनेर्योविकारःसाकाकुः। एकं॥ ९२॥ अवर्णः"वर्णः प्रशंसासतद्गुणो वर्णः"। आक्षेपः। निर्वादः। परीवादः।"परिवादः"। अपवादः। उपक्रोशः। जुगुप्सा। कुत्सा। निंदा। गर्हणं। दशानिंदायाः। अपवादवदितिवत्प्रत्ययेनअवर्णादीनामुपक्रोशस्यचैकलिंगत्वंज्ञापितं। उपक्रोशांताअवर्णादयःपुंसीतितात्पर्यं॥ ९३॥ ७ ७ ७

पारुष्यं । अनिवादः । द्वेनिष्ठुरभाषणस्य । अपकारगीः अपकारार्थकंभाषणं । "चौरोसित्वंघातयिष्यामीत्यादि" तद्दुर्जनमुच्यते । एकं । यःस निंदः निंदायुक्तउपालंभस्तत्रपरिभाषणमित्येकं । "उपालंभोद्वेधा । गुणाविष्करणपूर्वकोनिंदापूर्वकश्च । आद्योयथा । महाकुलीनस्यतवकिमुचि तमिदं । द्वितीयस्तुबंधकीसुतस्यतवोचितमेवेदमिति" ॥ तत्रयोद्वितीयः सपरिभाषणं" ॥ १४ ॥ मैथुनंप्रतिपरस्त्रीपुरुषसंयोगेननिमित्तेनयआ

पारुष्यमनिवादःस्याद्दुर्जनंत्वपकारगीः ॥ यःसनिंदउपालंभस्तत्रस्यात्परिभाषणं ॥ १४ ॥
तत्रत्वाक्षारणंयःस्यादाक्रोशोमैथुनंप्रति ॥ स्यादाभाषणंलापःप्रलापोनर्थकंवचः ॥ १५ ॥
अनुलापोमुहुर्भाषाविलापःपरिदेवनं ॥ विप्रलापोविरोधोक्तिःसंलापोभाषणंमिथः ॥ १६ ॥

क्रोशस्तत्र आक्षारणंत्येकं । "आक्षारणमिति क्लीबमपि" । आभाषणं । आलापः । द्वेअन्योन्यसंबोधनपूर्वकभाषणस्य । यदनर्थकंवचः सप्रलाप इत्येकं ॥ १५ ॥ अनुलापः । मुहुर्भाषा । द्वेबहुशोभाषणस्य । विलापः । परिदेवनं । द्वेरोदनपूर्वकभाषणस्य । विप्रलापः । विरोधोक्तिः । द्वेअन्योन्यविरु द्धभाषणस्य । मिथः परस्परं उक्तिप्रत्युक्तियुक्तंयद्दूषणंसमंलापः । "आलापस्तुएकेनापिक्रियते" ॥ १६ ॥

सुप्रलापः। सुवचनं। द्वेसुभाषितस्य। अपलापः। निन्हवः। द्वेगोपनकारिवचनस्य। यथा नन्मिथ्येतिप्रतिवादिनोनिन्हवः। "चोद्यादित्रयमद्भुतप्रभृत्य।
शापादित्रयंशापवचनस्य। चाट्वादित्रयंप्रेम्णामिथ्याभाषणस्य।" संदेशवाक्। वाचिकं। द्वेदूतादिमुखेनसंदिश्यमानवचनस्य। उत्तरेअनःपरंवक्ष्य
माणाःवाक्भेदाः। "रुशत्यादयःसम्यगंता" स्त्रिषुत्रिलिंगाः॥१७॥ यथारुशन्नुशब्दःरुशद्वचनं। याअकल्याणीवाक्सारुशती। एकंतांनं। याशुभान्मि

सुप्रलापःसुवचनमपलापस्तुनिन्हवः॥"चोद्यमाक्षेपाभियोगोशापाक्रोशोदुरेषणा॥अस्त्रीचाटुश्चटुश्लाघाप्रेम्णा
मिथ्याविकत्थनं॥१॥" संदेशवाग्वाचिकंस्याद्द्वाभेदास्तुत्रिषूत्तरे॥१७॥रुशतीवागकल्याणीस्यात्कल्यातुशुभात्मिका॥
अत्यर्थमधुरंसांत्वंसंगतंहृदयंगमं॥१८॥निष्ठुरंपरुषंग्राम्यमश्लीलंसूनृतंप्रिये॥सत्येऽथसंकुलक्लिष्टपरस्परपराहते॥
॥१९॥

कावाक्साकल्या। "काल्यादि"। एकंतालव्यांतं। यदतिशयेनमधुरंतत्सांत्वं। एकं। संगतं। हृदयंगमं। द्वेसंबद्धवचनस्य॥१८॥निष्ठुरं। परुषं। द्वेकर्क
शवचनस्य। ग्राम्यं। अश्लीलं। द्वेशिथिलवचसः। "अश्रीकारकभंडादिवचसइत्यर्थः।" यत्प्रियंसत्यंवचनंतत्रसूनृतमित्येकं। यत्परस्परेणपराहतं
"मातामेवंध्येतिव।" पूर्वापरविरुद्धंतत्रसंकुलंक्लिष्टमितिनामद्वयं। यथा। पश्यत्यचक्षुःसशृणोत्यकर्णः॥१९॥

यत्लुप्तवर्णपदंअसंपूर्णोच्चारितंवचस्तद्लुप्तमित्येकं।यच्चरितोदितंतन्निरस्तं।एकं।सनिष्ठीवंलालायुक्तंतदंबूकृतमुच्यते।"सनिष्ठेवमपि"। एकं। यदनर्थकंअर्थशून्यंतदबद्धंस्यात्। एकं।"अवध्यमपि।अवध्यमवधोर्हस्यादनर्थकवचस्यपीतिदर्शनात्।"॥२०॥अनक्षरं।"नष्टाक्षराणियस्मिन्अक्षरागमश्चास्त्यंचार्थद्वारकंतच्चवचनानर्हं।" अवाच्यं।देवकुमनर्हस्यवचसः।मृषार्थकंअत्यंताभूतार्थकंतत्आहतंज्ञे

लुप्तवर्णपदंयस्तंनिरस्तंत्वरितोदितं॥अंबूकृतंसनिष्ठीवमबद्धंस्यादनर्थकं॥ २० ॥अनक्षर
मवाच्यंस्यादाहतंतुमृषार्थकं॥"सोल्लुंठनंतुसोत्रासंभणितंरतिकूजितं॥श्राव्यंहृद्यंमनोहा
रिविस्पष्टंप्रकटोदितं॥" १॥ अथक्लिष्टमविस्पष्टंवितथंत्वनृतंवचः॥ २१॥

यंयथाएषवध्यासुतोयातीति।एकं।"सोल्लुंठनादिद्वेसोपहासवचनस्य।भणितादिद्वेरतिसमयकूजितस्य।श्राव्यादिपंचस्पष्टवचनस्य।"क्लिष्टं। अविस्पष्टं।"अत्राक्लिष्टमित्यार्ष्यादिपाठएवदृश्यते।क्लिष्टंविष्वव्यक्तवाचीतिमेदिनी।द्वेअव्यक्तवचनस्य।" यदनृतंवचः।यथासत्यपिधने नास्तिधनमिति।तद्वितथमित्युच्यते।एकं॥२१॥

सत्यं। तथ्यं। ऋतं। सम्यक्। चत्वारि सत्यस्य। सम्यक्चकारानः। पूर्वेषाभेदास्तुविपूर्त्तर इतिवचनवृत्तित्वेनसत्यादीनांत्रिलिंगत्वमुक्तं। यथा। सत्यः शब्दः। सत्याधाक्। सत्यंवचनमिति। इदानींवक्तृवृत्तित्वेन एषांत्रिलिंगत्वमाह। अमूर्नामि। तद्वृत्तिसत्यवतित्रिषु। यथासत्यास्त्री। सत्यःपुमान्। सत्यंकुलमिति। शब्दः। निनादः। निनदः। ध्वनिः। ध्वानः। रवः। स्वनः॥२२॥ स्वानः। निर्घोषः। निर्ह्रादः। नादः। निस्वानः। निस्वनः। आरवः। आरावः। सं-

सत्यतथ्यमृतंसम्यगमूनित्रिषुतद्वृत्ति॥ शब्देनिनादानिनदध्वनिध्वानरवस्वनाः॥२२॥
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः॥ आरवारावसंरावविरावाअथमर्म्मरः॥२३॥
स्वनितंवस्त्रपर्णानांभूषणानांतुशिंजितं॥ निक्काणोनिक्वणःक्काणःक्वणःक्वणनमित्यपि॥२४॥

रावः। विरावः। सनदशब्दमात्रस्य। वस्त्रपर्णानांस्वनितेशब्दे मर्मरइत्येकं। मर्मरोवस्त्रभेदेचशुष्कपर्णध्वनौतथा। पुंसिस्त्रियांपुनर्भोक्तामर्मरापीतदारुणीतिमेदिनी।" ॥२३॥ भूषणानांनूपुरादीनांस्वनितेशिंजितमित्येकं। "तालव्यादि" निक्काणः। निक्वणः। क्काणः। क्वणः। क्वणनं। पंचवीणादिस्वनितस्य॥२४॥

आदेरुपसर्गात्पेप्रक्काणःप्रक्कणइत्यादयस्तेवीणायाएवक्कणितेनान्यत्र।"आदिशब्दादुपक्कणादयः"।कोलाहलः।कलकलः।ट्वेबहुभिःकृतस्य स्पष्टशब्दस्य।ट्वेतिरश्चांपक्षिणांरुतंशब्दः।वाशितं।एकं।तालव्यमध्योयं।प्रतिश्रुत्।प्रतिध्वानः।ट्वेप्रतिशब्दस्य।गीतं।गानं।ट्वेगायनस्य॥२५॥ इति शब्दादिवर्गः॥ ७॥ ॥स्वरभेदानाह।निषादः।ऋषभः।गांधारः।षड्जः।मध्यमः।धैवतः।पंचमः।इत्यमीतंत्रीभ्यःकंठेभ्यश्चोत्थिताःसप्त

वीणायाःक्वणितेप्रादेःप्रक्काणप्रक्कणादयः॥कोलाहलःकलकलस्तिरश्चांवाशितंरुतं॥स्त्रीप्रतिश्रुत्प्रतिध्वाने गीतंगानमिमेसमे॥२५॥ इतिशब्दादिवर्गः॥ ७॥ निषादर्षभगांधारषड्जमध्यमधैवताः॥पंचमश्चेत्यमीसप्तनंत्री कंठोत्थिताःस्वराः॥१॥काकलीतुकलेसूक्ष्मेध्वनौतुमधुरास्फुटे॥कलोमंद्रस्तुगंभीरेतारोत्युच्चैस्त्रयस्त्रिषु॥ २॥

स्वरज्ञेयाः।एकैकं।तत्रनिषादंनर्दतिगजाः।ऋषभंगावः।गांधारंअजादयः।षड्जंमयूराः।मध्यमंक्रौंचाः।धैवतमश्वाः।पंचमंकोकिलाः॥१॥सूक्ष्मेक लेकाकलीत्येकंस्त्रीलिंगं।"काकलिरपि"।कलेरिन्।साधूदितंकाकलिभिःकुलीनैरितिप्रयोगः।मधुरःश्रुतिसुखःसचासौअस्फुटोऽव्यक्ताक्षरः एतादृग्ध्वनीकलइत्येकं।गंभीरेध्वनौमंद्रइत्येकं।अत्युच्चैर्ध्वनौतारइत्येकं।त्रयःकलमंद्रतारास्त्रिषु॥२॥ ७, ७,

यःसमन्वितलयःसम्यगन्वितोऽनुगतोलयोगीतादिसाम्यंयत्रसएकतालउच्यते।"एकः।समस्तालोमानमस्येत्येकतालः।" एकं।वीणा।वल्लकी।विपंचीत्रयंवीणायाः।सावीणातुसप्तभिस्तंत्रीभिरुपलक्षिता।परिवादिनी।परिवदत्यवश्यं॥३॥यद्वीणादिकंवाद्यंनन्ननमुच्यते।आदिनासैरंध्रीरावणहस्तकिन्नर्यादि। यन्मुरजादिकंमृदंगादिकंआदिनापटहादितदानद्धमुच्यते।वंशादिकं।"वंशीवेणुस्तेनवंश्यादिकमित्येव।" आदिनाशंखादितत्सुषिरं ज्ञेयं।"सुषिरशब्दोदंत्यादिः।प्राचीनास्तुतालव्यादिरपीत्याहुः।"यत्कांस्यमयतालादिकंआदिनाघंटाझंझुर्यादितद्घनंज्ञेयं। एकैकं॥४॥

"नृणामुरसिमध्यस्थोद्वाविंशतिविधोध्वनिः॥समंद्रःकंठमध्यस्थस्तारःशिरसिगीयते॥१॥"समन्वितलयस्त्वेकतालोवीणातुवल्लकी॥विपंचीसातुतंत्रीभिःसप्तभिःपरिवादिनी॥२॥ततंवीणादिकंवाद्यमानद्धंमुरजादिकं॥वंशादिकंतुसुषिरंकांस्यतालादिकंघनं॥४॥चतुर्विधमिदंवाद्यंवादित्रातोद्यनामकं॥मृदंगामुरजाभेदास्त्वंक्याआलिंग्योर्ध्वकास्त्रयः॥५॥

इदंतालादिकंचतुर्विधंवाद्यंवादित्रातोद्यनामकं।वादित्रंआतोद्यंचनामयस्यतत्।यदाहभरतः।ततंचैवावनद्धंचघनंसुषिरमेवच॥चतुर्विधंतुविज्ञेयमातोद्यंलक्षणान्वितमिति।मृदंगाः।मुरजाः।"मुरात्वेष्टनाज्जाताः।"द्वेमृदंगस्य।बहुविधत्वाद्बहुवचनं। अंक्यः।आलिंग्यः।ऊर्ध्वकः।"निर्वकारमपि।"एतेत्रयःमृदंगस्यभेदाः। अंकएवनिधायवादनादंक्यः। आलिंग्यवादनादालिंग्यः।ऊर्ध्वाकृतेनमुरवेनवादनादूर्ध्वकः।किंचहरीतक्याकृतिस्त्वंक्योयवमध्यस्तथोर्ध्वकः।आलिंग्यश्चैवगोपुच्छसमानःपरिकीर्तितइति॥५॥

यशसेयआदोपटहोवाद्यतेसयशःपटहः।सएवढक्केत्युच्यते।ढेढक्कायाः।भेरी।"भेरिः"।दुंदुभिः।ढेदुंदुभेः।"भेर्यामानकदुंदुभीत्यपिपाठः।" आनकः।पटहः।ढेपटहस्य।"अस्त्रीतिपूर्वान्वयी।पटहोनासमारंभेआनकेपुन्नपुंसकमितिमेदिनी।"वीणादिवाद्यतेयेनतद्वीणादिराकृतिकाष्ठंकोणउच्यते॥६॥वीणायादंडःप्रवालः।एकं।ककुभः।प्रसेवकः।ढेवीणादंडादधोदारुमयंभांडंशब्दगांभीर्यार्थंयच्चर्मणाच्छाद्यतेतस्य।"वीणाप्रांतस्थवक्रकाष्ठविशेषस्येत्यन्ये।"अस्यावीणायाःकायःतंत्रीरहितोदंडादिसमुदायःकोलंबकइत्युच्यते।एकं।यत्रवीणाप्रांतेतंत्र्योनिबध्यंतेतत्

स्याद्यशःपटहोढक्काभेरीस्त्रीदुंदुभिःपुमान्॥आनकःपटहोस्त्रीस्यात्कोणोवीणादिवादनं॥६॥
वीणादंडःप्रवालःस्यात्ककुभस्तुप्रसेवकः॥ कोलंबकस्तुकायोस्त्याउपनाहोनिबंधनं॥७॥
वाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झराः॥ मर्दलःपणवोन्येचनर्तकीलासिकेसमे॥८॥

निबंधनंउपनाहइत्युच्यते।एकं॥७॥डमरुप्रभृतयोवाद्यविशेषाःज्ञेयाः।तत्रडमरुःकापालिकादीनांवाद्यं।सएवविपुलोमड्डुः।डिंडिमः।ढंवडीइतिभाषाढूः। झर्झरः।झांगडइतिप्रसिद्धः।मर्दलोमृदंगसदृशोवाद्यभेदः।पणवोप्येकः।अन्येचहुडुक्कोमुखादयःसंति।नर्तकी।लासिका।"वाच्यलिंगत्वान्नर्तकोलासकः।समाधितिपुंस्त्वनिर्देशोकर्तव्येस्त्रीलिंगनिर्देशोऽपूर्वापरीविवेकार्थः"ढेनर्तक्याः॥८॥

यद्द्रुतंविलंबितंनृत्यादिकंतत्तवमित्युच्यते। एकं। यद्द्रुतंशीघ्रंनृत्यादिकंतत्ओघइत्युच्यते। एकं। यन्मध्यंनविलंबितंनापिद्रुतंतद्घनमित्युच्यते। एकं। कालक्रिययोर्मानंनियमहेतुस्तालइत्युच्यते। एकं। गीतवाद्यपादादिन्यासानांक्रियाकालयोःसाम्यंलयइत्युच्यते। एकं॥९॥ तांडवं। नटनं। नाट्यं। लास्यं। नृत्तं। "नृत्तं।" नर्तनं। षट्कंनृत्यस्य। तत्रतांडवंकीबपुंसोः। नृत्यगीतवाद्यमितीदंत्रयंमिलित्वातौर्यत्रिकमितिचोच्यते। "तूर्यमुरजादितत्रभवंतौर्यं तौर्योपलक्षितंत्रिकमितिविग्रहः।" द्वे॥१०॥ यःस्त्रीवेषधारीनर्तकःपुरुषःतत्र। भ्रकुंसः। भ्रुकुंसः। भ्रूकुंसः। इतित्रयमित्यर्थः। नाट्योक्तौना

विलंबितंद्रुतंमध्यंतत्त्रयमोघोघनंक्रमात्॥तालःकालक्रियामानंलयःसाम्यमथास्त्रियां॥९॥तांडवंनटनंनाट्यंलास्यं नृत्तंचनर्तने॥तौर्यत्रिकंनृत्यगीतवाद्यंनाट्यमिदंत्रयं॥१०॥भ्रकुंसश्चभ्रुकुंसश्चभ्रूकुंसश्चेतिनर्तकः॥स्त्रीवेषधारीपुरुषो नाट्योक्तौगणिकाज्जुका॥११॥भगिनीपतिरावुत्तोभावोविद्वानथावुकः॥जनकोयुवराजस्तुकुमारोभर्तृदारकः॥१२॥

टयप्रकरणेअधिकारोयं। "भागंगहारात्।" अज्जुकादिसंज्ञायाःनाट्यादन्यत्रप्रयोगोनास्तीत्यर्थः। यागणिकासाअज्जुका। एकं॥११॥ भगिन्याः पतिःआवुत्तइत्युच्यते। "आवुत्तोपि"। एकं। योविद्वान्साभावइत्युच्यते। भावयतीतिभावइतियोगव्युत्पत्त्यानाट्यादन्यत्रापीतादृशानांप्रयोगेनदोषः। एकं। जनकस्तुआवुकइत्युच्यते। एकं। युवराजस्तुकुमारः। भर्तृदारकः। द्वयं॥१२॥

राजा। भट्टारकः। देवः। दूयंराज्ञः। तस्य राज्ञः सुता भर्तृदारिका। एकं। कृतोभिषेको यस्यास्तस्यां राज्ञां देवीत्येकं। इतरासु राज्ञीषु भट्टिनीत्येकं। "अन्तर्विदो षः शब्दार्णवे। गणिकानुचरेरज्जुकेतिनाम्नानृपेणसा। युवराजस्तुसर्वेण कुमारो भर्तृदारकः। भट्टारको वादेवो वाच्याभृत्यजनेनसः॥ ब्रात्मणेननुनाम्नैवराजन्नितृषिभिःसचावयस्यराजन्नितिवाविदूषकइमंवदेत्॥ अभिषिक्तानुराज्ञासौदेवीत्यन्यातुभोगिनी। भट्टिनीत्यपरैरन्या

राजाभट्टारकोदेवस्तत्कृताभर्तृदारिका॥ देवीकृताभिषेकायामिनरासुनुभट्टिनी॥१३॥
अब्रह्मण्यमवध्योक्तौराजश्यालस्तुराष्ट्रियः॥अंबामातास्थबालास्याद्वासूरार्यस्तुमारिषः॥१४॥

नीचैर्गोस्वामिनीतिमेनि॥" १२॥ अवध्यस्यवधानर्हस्यब्रात्मणादेरुक्तौदोषात्करणेअब्रह्मण्यमित्येकं। राज्ञः श्यालः राष्ट्रियउच्यते। एकं। अंबा। माता। द्वे। बाल्या। वासूरिति द्वेकुमार्याः। आर्यः। "कर्तव्यमाचरन्कामम कर्तव्यमनाचरन्। तिष्ठतिप्राकृताचारोयःसआर्यइतिस्मृत इतिवासिष्ठः।" मारिषः। "मार्षकः। आर्येमारिषमार्षकाविति शब्दार्णवः।" द्वेआर्यस्य॥१४॥

याज्येष्ठा भगिनीसाअत्तिका।"अत्ता मातासेवअंतिका। अत्तिकाचांतिकातथेतिहिरूपकोशः।" एकं।निष्ठा।निर्वहणं।द्वे"मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः पंचनाटकेसंधयः तत्रपंचमस्यसंधेः"। प्रस्तुतकथासमाप्तिरित्यन्ये।"निर्वहणंतुरुत्रीसंहारश्चसमापनइतिशब्दार्णवः।समेइतिसमानार्थेननुसमानलिंगेशब्दार्णवेलिंगभेददर्शनात्।" नीचांप्रत्याह्वानेहंडेइत्येकं।चेटींप्रतिआह्वानेहंजेइत्येकं।सखींप्रत्याह्वानेहला।"हलधातोर्बाहुलकादप्रत्ययः।हलाशब्दष्टाबंतोपिसखीपर्यायः।तत्रपक्षेह्रस्वः।बालावासूःसखीहलेतिस्त्रिकांडेबोपालितात्।" अमूनित्रीण्यव्ययानि॥१५॥

अत्तिकाभगिनीज्येष्ठानिष्ठानिर्वहणेसमे॥हंडेहंजेहलाह्वानेनीचांचेटींसखींप्रति॥१५॥
अंगहारोंगविक्षेपोव्यंजकाभिनयोसमौ॥निर्वृत्तेत्वंगसत्वाभ्यांद्वेत्रिष्वांगिकसात्विके॥१६॥

"अंगस्यस्थानात्स्थानांतरेनयनंअंगहारः।"अंगुल्यादिविन्यासः"।अंगविक्षेपः।द्वेनृत्यविशेषस्य। व्यंजकः। अभिनयः।द्वेहस्तादिभिर्मनोगतार्थप्रकाशनस्य। अंगेननिर्वृत्तेनिष्पन्नेकर्मणिआंगिकं।"भ्रूविक्षेपादि।"सत्वेनअंतःकरणेननिर्वृतेसात्विकं।"तद्यथा।स्तंभःस्वेदोथरोमांचःस्वरभंगोऽथवेपथुः।वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकागुणाः।" इमेद्वेअपित्रिषु॥१६॥

नाटकेहिरसाःअष्टावेवोक्तास्तानाह। शृंगारः। वीरः। करुणः। अद्भुतः। हास्यः। भयानकः। बीभत्सः। रौद्रः। एतेशैरसाज्ञेयाः। "नवाब्दाच्छांतोपिनवमः। वात्सल्यंदशमः।" शृंगारः। रुचिः। उज्वलः। त्रयंशृंगारस्य॥१७॥ उत्साहवर्द्धनः। वीरः। द्वे वीरस्य। कारुण्यं। करुणा। घृणा। कृपा। दया। अनुकंपा। अनुक्रोशः। सप्तकंकरुणस्य। हसः॥१८॥ हासः। हास्यं। त्रयंहासस्य। बीभत्सं। विकृतं। "वैकृतोपि। विकृतोवैकृतोप्याग्रहायण्यामग्रहा

शृंगारवीरकरुणाद्भुतहास्यभयानकाः॥बीभत्सरौद्रोचरसाः शृंगारः रुचिरुज्वलः॥१७॥उत्साहवर्द्धनोवीरः कारुण्यंकरुणाघृणा॥ कृपादयानुकंपास्यादनुक्रोशोप्यथोहसः॥१८॥ हासोहास्यंचबीभत्सं विकृतंत्रिषिदंद्वयं॥विस्मयोद्भुतमाश्चर्यंचित्रमप्यथभैरवं॥१९॥दारुणंभीषणंभीष्मंघोरंभीमंभयानकं॥भयंकरंप्रतिभयंरौद्रंतूग्रममीत्रिषु॥२०॥

यणमितिशब्दार्णवः।" द्वेबीभत्सस्य। इदंद्वयंरसेपुंसितद्धतित्रिषु। विस्मयः। अद्भुतं। आश्चर्यं। चित्रं। चत्वारिअद्भुतस्य। भैरवं॥१९॥ दारुणं। भीषणं। भीष्मं। घोरं। भीमं। भयानकं। भयंकरं। प्रतिभयं। नवकंभयानकस्य। रौद्रं। उग्रं। द्वेरौद्रस्य। अमीअद्भुतादयउग्रांताश्चतुर्दशशब्दारसेपुंसि। शृंगारवीरेत्यादिश्लोकेपुंस्त्वदर्शनात्। अभिन्नलिंगानामेवद्वंद्वप्रतिज्ञानात्। तद्धतित्रिषु। वाच्यलिंगाः॥२०॥

रसानुत्कातदनुगुणत्वेनोच्चावचानुभावानभिधत्ते। दरः। त्रासः। भीतिः। भीः। साध्वसं। भयं।"भिया।स्यादर्त्सनमृतीयाचगर्हायांचाथभयंभियेतिशब्दार्णवः।" षट्कं भयस्य।मानसः मनःसंबंधिविकारः भावउच्यते।एकं।"भावयतिकरोतिरसानितिभावः।" योभावबोधकःचित्तविकारस्यसकाशकः कटाक्षादिःसोऽनुभाव इत्युच्यते।एकं॥२१॥ गर्वः।अभिमानः।अहंकारः।त्रयंगर्वस्य।"अहमितिकरणमहंकारः।" चित्तस्यसमुन्नतिः

चतुर्दशादरस्त्रासोभीतिर्भीःसाध्वसंभयं॥ विकारोमानसोभावोऽनुभावोभावबोधकः॥ २१॥
गर्वोभिमानोहंकारोमानश्चित्तसमुन्नतिः॥"दर्पोवलेपोवष्टंभश्चित्तोद्रेकःस्मयोमदः॥" अनादरःपरिभवःपरीभावस्तिरस्क्रिया॥ २२॥ रीढावमाननावज्ञावहेलनमसूक्षणं॥ ७

परस्मादुत्कर्षचिंतनेनोन्नत्यंमानउच्यते।"एकं।गर्वादयःपंचापिपर्यायाइतितुयुकं। दर्पादिषट्कंमदस्य।" अनादरः।परिभवः।परीभावः।तिरस्क्रिया॥२२॥रीढा।अवमानना।अवज्ञा।अवहेलनं।असूक्षणं।नवकमनादरस्य॥ ९ ९

मंदाक्षं। ह्रीः। त्रपा। व्रीडा। लज्जा। पंचलज्जायाः। घत्रिव्रीडोपि। गंडूषगर्ज्यभुजजागरहारकीलज्वालाझटारभसवर्तकगर्द्यृंगाः। व्रीडादयश्चव
रटश्चषराटकश्चउत्कंठबाणकरकाश्चसमामयाश्चेतिस्त्रीपुल्लिंगकथनेरभसः। सालज्जाऽन्यतःपरस्मात्चेद्पत्रपा। एकं॥२३॥क्षांतिः।तितिक्षा।
द्वेषाभ्युदयसहनस्य। परस्यविषयेपरकीयधनेस्पृहाः।भिध्या।"परस्वविषयस्पृहेत्यपिपाठः। तत्रपरस्वविषयविषयिणीच्छेत्यर्थः"। एकं।

मंदाक्षंह्रीस्त्रपाव्रीडालज्जासाःपत्रपान्यतः॥२३॥क्षांतिस्तितिक्षाभिध्यातु परस्यविषयेस्पृहा॥
अक्षांतिरीर्ष्यासूयातु दोषारोपे गुणेष्वपि॥२४॥वैरं विरोधोविद्वेषोमन्युश्शोकोतुरुक्शुक्स्त्रियां॥
पश्चात्तापोनुतापश्चविप्रतीसारइत्यपि॥२५॥कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधोस्त्रियो॥७

अभिधारेणध्यानंअभिध्या।अक्षांतिःईर्ष्या। द्वेषाभ्युदयासहनस्य।गुणेष्वपिदोषारोपः असूया। एकं॥२४॥वैरं।विरोधः।विद्वेषः।त्रयंवै-
रस्य।मन्युः।शोकः। रुक्। त्रयंशोकस्य।शुक्शोचंता। पश्चात्तापः।अनुतापः।विप्रतीसारः। त्रयंपश्चात्तापस्य॥२५॥ कोपः। क्रोधः।अमर्षः।रो-
षः।प्रतिघः।रुट्। क्रुध्। सप्तकंक्रोधस्य। तत्ररुट्शंता।स्त्रियोस्त्रीलिंगे।"रुट्क्रुधोदाबंतावपि।क्रोधोभामःक्रुधारुषेतिशब्दार्णवः॥" ७

शुचौशुद्धेचरितेआचरणेशीलं।एकं।उन्मादः।चित्तविभ्रमः।द्वेचेतसोऽनवस्थितेः॥२६॥प्रेमा।प्रियता।हार्दं।प्रेम।स्नेहः।पंचप्रेम्णः।तत्रप्रेमा
नापुमान्स्नेहश्च।लिंगस्योक्त्वातूसंकरोनदोषाय।प्रेमक्लीबे।दोहदं।इच्छा।कांक्षा।स्पृहा।ईहा।तृट्।वांछा।लिप्सा।मनोरथः॥२७॥कामः।
अभिलाषः।तर्षः।द्वादशस्पृहायाः।तत्रदोहदंगर्भिणीच्छायामिच्छामात्रेपिदोहदं।तृट्षांता।सतर्षेमहांश्चेल्लालसा।द्वयोःस्त्रीपुंसयोः।
उपाधिः।धर्मचिंता।द्वेधर्मचिंतनस्य।तत्रोपाधिःपुंसि।आधिः।मानसीव्यथा।द्वेमनःपीडायाः।आधिरुच्यतेपुंसि॥२८॥चिंता।स्मृतिः।आ-

शुचौतुचरितेशीलमुन्मादश्चित्तविभ्रमः॥२६॥प्रेमानाप्रियताहार्दंप्रेमस्नेहोथदोहदं॥इच्छाकांक्षास्पृहेहातृ
ड्वांछालिप्सामनोरथः॥२७॥कामोऽभिलाषस्तर्षश्चसोत्यर्थेलालसाद्वयोः॥उपाधिर्नाधर्मचिंतापुंस्याधिर्मानसीव्य
था॥२८॥स्याच्चिंतास्मृतिराध्यानमुत्कंठोत्कलिकेसमे॥उत्साहोध्यवसायःस्यात्सवीर्यमतिशक्तिभाक्॥२९॥

ध्यानं।त्रयंस्मरणस्य।उत्कंठा।उत्कलिका।द्वेउत्कंठायाः।"चिंतातुस्मृतिराध्यानंस्मरणंसस्पृहेपुनः।उत्कंठोत्कलिकेतस्मिन्नभिध्यातू
भयोरपीतिशब्दार्णवः।"उत्साहः।अध्यवसायः।द्वेउत्साहस्य।येनकृत्वाअसाध्यसाधनेप्युद्यतोभवति।सउत्साहोऽतिशक्तिभाक्सातिश
क्तिश्चेद्वीर्यमुच्यते।"अतिशयशक्तिर्वीर्यादितिचामरमालायांस्त्रीत्वं"।एकं॥२९॥

कपटः।व्याजः।दंभः।उपधिः।छद्म।कैतवं।कुसृतिः।निकृतिः।शाठ्यं। नवशाठ्यस्य। "शाठ्यकैतवे।कपटःपुन्नपुंसकयोः।" प्रमादः।अनवधानता। हेलकर्तव्यानवधानस्य॥२०॥कौतूहलं।कौतुकं।कुतुकं।कुतूहलं।चत्वारिकौतुकस्य।विलासः।विब्बोकः।विभ्रमः।ललितं॥२१॥हेला।लीला। अमीस्त्रीणांशृंगारभावजाः।शृंगाररससमुद्भूताःक्रियाश्चेष्टाःषडमीहावाउच्यंते।एकैकं।तत्रारामानयनवदनभ्रूप्रभृतीनांयःकश्चिदुत्

कपटोऽस्त्रीव्याजदंभोपधयश्छद्मकैतवे॥ कुसृतिर्निकृतिःशाठ्यंप्रमादोनवधानता॥२०॥कौतू
हलंकौतुकंचकुतुकंचकुतूहलं॥स्त्रीणांविलासविब्बोकविभ्रमाललितंतथा॥२१॥हेलालीलेत्यमी-
हावाःक्रियाःशृंगारभावजाः॥ द्रवकेलिपरीहासाःक्रीडालीलाचनर्मच॥२२॥ ७ ७

द्यतेविशेषःसविलासः। गर्वाभिमानसंभूतोविकारोनादरात्मकोविब्बोकः। वाग्वस्त्रभूषणादीनांस्थानविपर्यासोविभ्रमःसकलांगसमीचीनविन्यासो ललितं।अवगणनापूर्वकाधिनयप्रदर्शनंहेला। प्रियभूषणवचनाद्यनुकृतिर्लीला। "तत्रारामादिलीलातस्यमूलंत्वेवं।विलासोंऽगेविशेषो

यःप्रियासावासनादिषु विश्वोकोऽभिमतासावपिगर्वादनादरः।चित्तस्यानवस्थानंशृंगाराद्विभ्रमोमतः।अनाचार्योपदिष्टंस्याल्ललितंरतिचेष्टितं।।स्याद्भावसूचकोहावोहेलास्येवानुभावनं।।प्रौढेच्छासुरतेहेलेतिवा।।प्रियस्यानुकृतिर्लीलाश्लिष्टावाग्वेषचेष्टितैः।।इतिशब्दात्प्रकारार्थाद न्येपिज्ञेयाः।लीलाविलासोविच्छित्तिर्विभ्रमःकिलकिंचितं।।मोट्टायितंकुट्टमितंविब्बोकोललितंतथा।।विहृतंचेतिमंतव्याद्दशस्त्रीणांस्वभावजाइतिनाटकरत्नकोशाः।। विच्छित्तिः।मंडनानादरन्यासोविच्छित्तीरूपदर्पतः।।किलकिंचितं।हर्षादुदितगीताद्व्यामिश्रंकिलकिंचितं।।मोट्टायितं।

व्याजोपदेशोलक्ष्यंचक्रीडारेवलाचकूर्दनं।।घर्मोनिदाघःस्वेदःस्यात्प्रलयोनष्टचेष्टता।।३२।।

मोट्टायितंप्रियंस्मृत्वासांगभंगंविजृंभणं।।कुट्टमितं।दुःखोपचारःसौख्येपिहर्षात्कुट्टमितंमतं।विहृतं।वक्तव्याभाषणव्याजाद्विहृतंदर्शितेंगितं।"द्रवः।केलिः।परीहासः।" परिहासः"क्रीडा।लीला।"लीलेत्यत्ररेवलेतिकेचित्।"नर्म।षट्कीडामात्रस्य।केलिःपुंसि।भिन्नलिंगानांहूंहूभावात्।।३१।।अभीप्सितार्थसिध्यर्थमर्थांतरानुष्ठानंव्याजः।तत्रव्याजःअपदेशः।लक्ष्यमितित्रयं।"स्वरूपाच्छादनस्य।लक्षमपि।व्यारव्यायांचननालक्ष्यंक्रीडव्याजशरव्ययोरितिमूर्द्धन्योनेरभसः।क्रीडा।रेवला।कूर्दनं।त्रयंबालक्रीडायाः।घर्मः।निदाघः।स्वेदः।त्रयंस्वेदस्य।प्रलयः।नष्टचेष्टता।ह्रेपरिस्यंदनाद्यास्य।।३२।।

अवहित्था। आकारगुप्तिः। द्वे "शोकादिजनितमुखग्लान्यादेः।" आकारगोपनस्य। संवेगः। संभ्रमः। द्वे हर्षादिनाकर्मसुत्वरणस्य। सोल्लासः। साभिप्रायोहासः। "उल्लासेनाधिक्येनक्षपणेनवासहितइतिवा।" आच्छुरितकमुच्यते। एकं। "परमस्यानर्षजनकस्याव्यक्तहासस्य।" सहासोमनाक् ईषत्स्मेतमुच्यते। "ईषद्विकसितैर्दंतैः कटाक्षैःसौष्ठवान्वितं। अवेक्षितद्विजद्वारमुत्तमानांस्मितंभवेत्।"॥३४॥ सहासोमध्यमश्चेदनल्पाधिक

अवहित्थाकारगुप्तिःसमौसंवेगसंभ्रमौ॥स्यादाच्छुरितकंहासःसोल्लासःसमनाक्स्मितं॥३४॥
मध्यमस्याद्विहसितंरोमांचोरोमहर्षणं॥क्रंदितंरुदितंकुष्टंजृंभस्तुत्रिषुजृंभणं॥३५॥ ७

स्तर्हिविहसितंस्यात्। "आकुंचितकपोलाक्षंसस्वनंनिःस्वनंतथा॥प्रस्तावोत्थंसानुरागमाहुर्विहसितंबुधाः।" एकं। रोमांचः। रोमहर्षणं। "पुलकःकंटकोरोमविक्रियारोमोद्गमश्चात्रैव" द्वे रोमोद्गमस्य। क्रंदितं। रुदितं। कुष्टं। त्रीणिरुदितस्य। जृंभः। जृंभणं॥ द्वे जृंभिकायाः। "जांभईइतिख्याताया।" तत्रजृंभस्त्रिषु॥३५॥ ७ ७ ७

विप्रलंभः। विसंवादः। द्वे वंचनायुक्तभाषणस्य।"अंगीकृतासंपादनस्येतिवा।"रिंगणं।"रिंखणं"।स्खलनं। द्वे स्वधर्मादेश्चलनस्य।"बालानांहस्तपादगमनस्येत्यन्ये"निद्रा। शयनं। स्वापः। स्वप्नः।संवेशः।पंचकंनिद्रायाः॥१६॥तंद्री।"तंद्रिःतंद्रा।"श्रमीलाः। द्वेनिद्रायाआदौअंतेचयद्दालक्ष्यंतस्य। "अत्यंतश्रमादिनासर्वेंद्रियासामर्थ्यस्येतिवा।"भ्रकुटिः।भ्रुकुटिः।भ्रूकुटिः।"पृषोदरादित्वाद्दकारेभृकुटीत्यपि।"त्रयंक्रोधादिजनितभ्रूवक्रता

विप्रलंभोविसंवादोरिंगणंस्खलनंसमे॥स्यान्निद्राशयनंस्वापःस्वप्नःसंवेशइत्यपि॥१६॥तंद्रीप्र
मीलाभ्रुकुटिर्भ्रुकुटिःभ्रूकुटिःस्त्रियां।अदृष्टिःस्यादसौम्येऽक्ष्णिसंसिद्धिप्रकृतौत्रिमे॥१७॥स्वरूपंचस्व
भावश्चनिसर्गश्चाथवेपथुः॥कंपोऽथक्षणउड्डूर्षोमहउड्डवउत्सवः॥१८॥ ७ इतिनाट्यवर्गः॥ ७

याः। भ्रकुंसवल्त्रेरूप्यं।असौम्येऽक्ष्णिसरोषेचक्षुषिअदृष्टिरित्येकं।"असौम्येअसुंदरेवा।विरुद्धादृष्टिरदृष्टिः।क्रूरदृष्टिरित्यर्थः।"संसिद्धिः। प्रकृतिः॥१७॥स्वरूपं। स्वभावः।निसर्गः।पंचस्वभावस्य।"इमेइतिहूयोःस्त्रीत्वबोधनार्थमुक्तं।द्वेकंपस्य।क्षणः।उड्डूर्षः।महः।उड्डवः।उत्सवः। पंचउत्सवस्य।महोऽर्दनः॥१८॥ ॥ ७ ॥ इतिनाट्यवर्गः॥ ७ ॥ ७ ७

अधोभुवनं। पातालं। बलिसद्म। रसातलं। नागलोकः। पंचपातालस्य। कुहरं। क्षुषिरं। "तालव्यादिरपि" विवरं। बिलं॥१॥ छिद्रं। निर्व्यथनं। रोकं। रं-
ध्रं। स्वभ्रं। "तालव्यादि"। वपा। सुषिः। "ऋषिः" एकादशच्छिद्रमात्रस्य। सुषिः स्त्री। भुवियत्स्वभ्रंतत्र गर्तोऽवट इति द्वयं। "गर्तोवटेकुकुंदरेइति
हैमः। गर्तेत्यपि। शठकुसरगर्तऋंगाइतिस्त्रीपुंसयकरणेरभसात्। अवटिरितीदंतोपि"। सुषिरमित्येकंसरंध्रेरंध्रयुक्तेवसुनि। "ऋषिरमपि"

अधोभुवनपातालंबलिसद्मरसातलं॥नागलोकोथकुहरंक्षुषिरंविवरंबिलं॥१॥छिद्रंनिर्व्यथनंरोकंरंध्रंस्वभ्रं-
वपाऋषिः॥गर्तोवटौभुविस्वभ्रेसरंध्रेसुषिरंत्रिषु॥२॥अंधकारोऽस्त्रियांध्वांततमिस्रंतिमिरंतमः॥ध्वांतेगाढेंऽधत
मसंक्षीणेऽवतमसंतमः॥३॥विष्वक्कृसंतमसंनागाःकाद्रवेयास्तदीश्वरः॥शेषोऽनंतोवासुकिःसर्पराड्जोथगोनसे॥
॥४॥

तत्रिषुवाव्यलिंगं॥२॥अंधकारः। ध्वांतं। तमिस्रं। तिमिरं। तमः। पंचकमंधकारस्य। तत्रांधकारः क्लीबपुंसोः। गाढेध्वांतेसातिशयेतमसिअंधतम
समित्येकं। क्षीणेध्वांतेऽवतमसमित्येकं॥३॥विष्वक्कृतमः सर्वव्यापिध्वांतंसंतमसमुच्यते। एकं। नागाः। काद्रवेयाः। द्वेनागानां। तदीश्वरः नागाना
मीशः शेषोऽनंतइतिचोच्यते। द्वयं। वासुकिः। सर्पराजः। द्वेनागराजस्य। गोनसः। "गोनासगोनसावितित्रिकांडशेषः।"॥४॥

तिलित्सः। द्वे पाणसइतिप्रसिद्धस्य।अजगरः।अयुः।वाहसः। इतित्रयंअजगरस्य।आरइतिख्यातस्य।अलगर्दः।"अलगर्दः" जलव्यालः। द्वेजलसर्पस्य।"पाणसर्पविरोलेंइत्यादिप्रसिद्धस्य।"राजिलः।"राजीलः"डुंडुभः।" तषर्गतृतीयादिरपि" द्वेनिर्विषस्यद्विमुखसर्पस्यमालुंड, दुनोंडेंइतिख्यातस्य।निर्मुक्तोनिर्विषःसर्पोराजिलःपरिकीर्तितइत्यभिधानात्॥५॥मालुधानः।मातुलाहिः।द्वेरवद्वाकारचित्रसर्पस्य।,आधोलें,दिवड

तिलित्सःस्यादजगरेऽयुर्वाहसइत्युभौ॥अलगर्दोजलव्यालःसमौराजिलडुंडुभौ॥५॥मालुधानोमातुलाहिर्निर्मुक्तो मुक्तकंचुकः॥सर्पःपृदाकुर्भुजगोभुजंगोहिर्भुजंगमः॥६॥आशीविषोविषधरश्चक्रीव्यालःसरीसृपः॥कुंडलीगूदपाच्च क्षुःश्रवाःकाकोदरःफणी॥७॥दर्वीकरोदीर्घपृष्ठोदंदशूकोबिलेशयः॥उरगःपन्नगोभोगीजित्मगःपवनाशनः॥८॥

इतिख्यातस्य। निर्मुक्तः।मुक्तकंचुकः। द्वेत्यक्तकंचुकस्य।"अत्रकंचुकस्तकू"सर्पः।पृदाकुः।भुजगः।भुजंगः।अहिः।भुजंगमः॥६॥आशीविषः।"आशीर्विषोपि।आशीस्तालुगतादंष्ट्रातयाविद्धोनजीवति।तत्रविषमस्येति"विषधरः।चक्री।व्यालः।"व्याडोपि"।सरीसृपः।कुंडली।गूदपात्।चक्षुश्रवाः। काकोदरः। फणी॥७॥दर्वीकरः।दीर्घपृष्ठः।दंदशूकः।बिलेशयः।उरगः।पन्नगः।भोगी।जित्मगः।पवनाशनः।पंचविंशतिःसर्पस्य॥८॥ ४

"लेलिहानाद्यष्टोसर्पमात्रस्य। भोगइतिसर्पशरीरस्यैकं।आशीरित्यादिद्वेसर्पदंष्ट्रायाः।" यद्विषास्थ्यादिअहिभवंतत्आहेयमुच्यते।एकं।स्त्रियां आहेयी। स्फटा। "फटा" फणा। द्वे फणायाः। द्वेअपिस्त्रीपुंसयोः। कंचुकः।निर्मोकः। "निर्व्वयेनमुच्यतइति" द्वेसर्पत्वचः। क्ष्वेडः।गरलं।

"लेलिहानोद्विरसनोगोकर्णःकंचुकी तथा॥ कुंभीनसःफणधरोहरिर्भोगधरस्तथा॥१॥
अहेःशरीरंभोगःस्यादाशीरप्यहिदंष्ट्रिका॥" त्रिष्वाहेयंविषास्थ्यादिस्फटायांतुफणा
द्वयोः॥ समौकंचुकनिर्मोकौक्ष्वेडस्तुगरलंविषं॥९॥ पुंसिक्लीबेचकाकोलकालकूटहला
हलाः॥ सौराष्ट्रिकःशौक्किकेयोब्रत्नपुत्रःप्रदीपनः॥१०॥ ० ० ०

विषं। "पुल्लिंगमपि।पुंसिक्लीबेचेतिविषेणापिसंबध्यतइत्युक्तत्वात्" वयंविषमात्रस्य॥९॥ काकोलः। कालकूटः। हलाहलः। सौराष्ट्रिकः। शौक्किकेयः। ब्रत्नपुत्रः।प्रदीपनः॥१०॥ ० ० ०

दारदः। वत्सनाभः।अमीकाकोलाद्यानवस्थावरविषभेदाः।तत्र"काकोलात्रियंक्लीबपुंसोः।काकोलः काकमेचकः।कालकूटः। पृथुमालिदैत्यरक्तो द्भवः।हलाहलस्तालपत्राकृतिः।हलाहलंहालहलंहलाहलमित्यपितत्पर्यायाः।"हलाहलंहालहलंवदंत्यपिहलाहलमितिहिरूपकोशः। गोना सगोनसोहलाहलंहालहलंविषमितित्रिकांडशेषः।"सुराष्ट्रदेशोभवःसौराष्ट्रिकः।"सौराष्ट्रिकइत्यपि"शुक्तिकायांभवःशौक्तिकेयः।सोमलइ तिप्रसिद्धः। ब्रह्मणःपुत्रःब्रह्मपुत्रःयद्याज्ञवल्क्यः।लंविषब्रह्मणःपुत्रःसत्यधर्मेव्यवस्थितइति।प्रदीपयतिजठरमितिप्रदीपनः। दरदिदेशोभ

दारदोवत्सनाभश्चविषभेदाअमीनव।।विषवैद्योजांगुलिकोव्यालग्राह्यहितुंडिकः।।११।। इतिपातालभोगिवर्गः।।

वोदारदः।वत्सनाभः।वचनागइतिप्रसिद्धः।विषवैद्यः।जांगुलिकः।हेविषहारवैद्यस्य।"जांगुलांविषविद्यामधीतेवेदवा।उक्तंच। परीक्षितंसमभीया ज्जांगुलीभिर्भिषग्वृतइति।"व्यालग्राही।अहितुंडिकइतिहेसर्पग्राहिणः।गारुडीतिप्रसिद्धस्य।"व्यालग्राह्याहितुंडिकइतिपाठः। तत्रआहितुं- डिकइति"।।११।। इतिपातालभोगिवर्गः।। ७।। ७ ७ ७

नारकः। नरकः। निरयः। दुर्गतिः। चत्वारिनरकस्य। नरकभेदानाह। तपनः। अवीचिः। महारौरवः। रौरवः॥१॥ संघातः। "संहारः" कालसूत्रं। इत्याद्यास्तपनादिनरकभेदाः। आद्यद्वाब्दात्तामिस्रकुंभीपाकादयः। तप्यंतेअनेनतपनः। जलवद्भासमानोप्यश्मपृष्ठरूपत्वान्नवीचयोयत्रसोवीचिः। रुरवो नामकव्याघ्रादयोतिक्रूरास्तत्संबंधी महान्नरकोमहारौरवः। रुरवःसर्पेभ्योति हिंस्राजंतुविशेषास्तत्संबंधीरौरवः। सम्यक्हन्यतेयत्रसंघातः। का-

स्यान्नारकस्तुनरकोनिरयोदुर्गतिःस्त्रियां॥ तद्भेदास्तपनावीचिमहारौरवरौरवाः॥ १॥
संघातैःकालसूत्रंचेत्याद्याःसत्वास्तुनारकाः॥ प्रेतावैतरणीसिंधुःस्यादलक्ष्मीस्तुनिर्ऋतिः॥२॥

लरूपाणि सूत्राणि यत्र तत्कालसूत्रं। एकैकं। नारकाः नरकेभवाःसत्वाः प्राणिनः प्रेताउच्यंते। एकं। नारकीसिंधुनदीवैतरणीज्ञेया। एकं। नारक्यलक्ष्मीरशोभानिर्ऋतिःउच्यते। एकं॥ २॥

विष्टिः। आजूः। द्वे नरकेहठात्क्षेपस्य। "निर्मूल्यकर्मकरणेइतिमुकुटः। भद्रारव्यकरणस्येत्यन्ये। विष्टिःकर्मकरेमूल्येभद्राजूःप्रेरणेषुचेतिहेमः" आजूवेतनयोर्विष्टिरितिशाश्वतः। कारणा। यातना। तीव्रवेदना। त्रयंनरकपीडायाः। पीडा। बाधा। "आबाधेतिवाछेदः। आबाधावेदनादुःखमितिहलायुधः।" व्यथा। दुःखं। आमनस्यं। "अमानस्यं। प्रसूतिजनमानस्यंकृच्छ्रकष्टंकलाकुलमितिवाचस्पतिः। अत्रअमनसोभावइतिमान

विष्टिराजूःकारणातुयातनातीव्रवेदना॥पीडाबाधाव्यथादुःखमामनस्यंप्रसूतिजं॥३॥
स्यात्कष्टंकृच्छ्रमाभीलंत्रिष्वेषांभेद्यगामियत्॥ ४॥ ॥इतिनरकवर्गः॥ ६

स्याद्विन्नमितिवाविग्रहः।"। प्रसूतिजं॥३॥कष्टं। कृच्छ्रं। आभीलं। नवदुःखस्य। अत्रनवापिदुःखस्येत्येके। पीडादिचतुष्कंमनःपीडायाः। आमनस्यादिहृयंवैमनस्यस्य। कष्टादित्रयंशारीरपीडायाइतिभेदः।" एषांमध्येयदुःखादिकंभेद्यगामिविद्योच्यतेतत्त्रिषु। यथासेयंसेवादुःखाचबहुरूपा। सोयंदुःखःसुतोऽगुणः।सर्वंदुःखंविवेकिनइति। भेद्यगामित्वाभावेतदुक्तलिंगमेव॥ ४॥ इतिनरकवर्गः॥ ६॥ ६॥

समुद्रः। अब्धिः। अकूपारः। पारावारः। "पारापारः"। सरित्पतिः। उदन्वान्। उदधिः। सिंधुः। "सिंधुर्वमधुदेशाब्धिनदेनासरिति स्त्रियामितिविश्वमेदिन्यौ।" सरस्वान्। सागरः। अर्णवः॥१॥ रत्नाकरः। जलनिधिः। यादःपतिः। अपांपतिः। पंचदशसमुद्रमात्रस्य। तस्यसमुद्रस्य प्रभेदाः। क्षीरोदः। लवणोदः। तथा अपरेदध्युदघृतोदसुरोदेक्षूदस्वादूदाः। "लवणेक्षुसुरासर्पिर्दधिक्षीरजलाःसमाइत्याद्युक्तेः।" एकैकं॥२॥ आपः। वाः। वारि।

समुद्रोऽब्धिरकूपारःपारावारःसरित्पतिः॥उदन्वानुदधिःसिंधुःसरस्वान्सागरोर्णवः॥१॥ रत्नाकरोजलनिधिःर्यादःपतिरपांपतिः॥तस्यप्रभेदाःक्षीरोदोलवणोदस्तथापरे॥२॥ आपःस्त्री भूम्निवार्वारिसलिलंकमलंजलं॥पयःकीलालममृतंजीवनंभुवनंवनं॥३॥ कबंधमुदकंपाथःपुष्करंसर्वतोमुखं॥अंभोर्णस्तोयपानीयनीरक्षीरांबुऽंबरं॥४॥ छ

"वारं" सलिलं। "सरिलं। सरिलंसलिलंजलमितिवाचस्पतिः।" कमलं। जलं। पयः। कीलालं। अमृतं। जीवनं। भुवनं। वनं॥३॥ कबंधं। "कमंधमितिवा।" उदकं। "दकमित्यपि। प्रोक्तंप्राज्ञैर्भुवनममृतंजीवनीयं दकंचेतिहलायुधः। कंदकंजलमितित्रिकांडशेषः। अस्मिन्पक्षेकबंधंचदकंपाथइतिपाठः।" पाथः। पुष्करं। सर्वतोमुखं। अंभः। अर्णः। तोयं। पानीयं। नीरं। "नारं" क्षीरं। अंबु। ऽंबरं। "संबरमित्यादि"॥४॥

मेघपुष्पं। घनरसः।सप्तबिंदातिर्जलस्य। तत्रआपःस्त्रियांबहुत्वेचनित्यं।वारेफांता। पूर्वोत्तरसाहचर्यात्स्त्रियांक्लीबेच। घनरसःपुंसि।द्वेषंक्लीबे "अस्रनिआपःसांतंक्लीबेच। वारंनारमित्युभयमक्लीबं।अत्रसर्वत्रसंसारावर्तःप्रमाणं। नारंघनरसःपुमानितिशब्दार्णवः। घनरसमितिक्लीबमपि। घनरसमंबुक्षीरमितिरत्नकोशात्।" कूपीठं कांडमस्त्रीस्याज्जीवनीयंकुशंविषमित्यपि। आप्यं।अम्मयं।द्वेजलविकारस्य।त्रिषु।आप्या।

मेघपुष्पंघनरसास्त्रिषुद्वेआप्यमम्मयं॥ भंगस्तरंगऊर्मिर्वास्त्रियांवीचिरथोर्मिषु॥५॥
महत्सूल्लोलकल्लोलोस्यादावर्तोंभसांभ्रमः॥ पृषंतिबिंदुपृषताःपुमांसोविप्रुषःस्त्रियां॥६॥

अम्मयी। इत्यादि।" भंगः।तरंगः।ऊर्मिः।वीचिः।चत्वारिलहर्याः। वास्त्रियामितिऊर्मिणावीचिनाचसंबध्यतेकाकाक्षिवत्। ऊर्मिरेवस्त्रीपुंसयोः।वीचिस्त्वनित्यंस्त्रीत्येके। महत्ऊर्मिषुउल्लोलःकल्लोलइतिद्वयं। अंभसांभ्रमःमंडलाकारेणभ्रमणंआवर्तःस्यात्। एकं॥६॥ पृषंति। बिंदवः।पृषतः।विप्रुषः।चत्वारिजलबिंदूनां। तत्रपृषत्क्लीबे।बिंदुपृषतोपुंसि।विप्रुत्स्त्री॥६॥

चक्राणि।"वक्राण्यपि।वक्रःत्रीनेभ्वरेपुंसिपुटभेदेनपुंसकं।"पुटभेदाः।भ्रमाः।जलनिर्गमाः।चत्वारियानिचक्राकारेणजलान्यधोयांतितेषां।
"चक्रादिद्वयंचक्राकारेणजलानामधोयानस्य।भ्रमादिद्वयंजलनिःसरणजालकस्य।नद्यादौअधःस्थजलस्योर्ध्वनिःसरणस्येतिवामतं।"
कूलं।रोधः।तीरं।प्रतीरं।तटं।पंचतीरस्य।रोधःसांतं।"अदंतोपिरोधःप्रोक्तश्चरोधसीतिसंसारावर्तः।"तटंत्रिलिंगं॥७॥परंचअर्वाक्चुपरा

चक्राणिपुटभेदाःस्युर्भ्रमाश्चजलनिर्गमाः॥कूलंरोधश्चतीरंचप्रतीरंचतटंत्रिषु॥७॥पारावारेपरार्वा
चीतीरेपात्रंतदंतरं॥द्वीपोऽस्त्रियामंतरीपंयदंतर्वारिणस्तटं॥८॥तोयोत्थितंततुलिनंसैकतंसिकता
मयं॥निषद्वरस्तुजंबालःपंकोऽस्त्रीशाद्कर्दमौ॥९॥ ७

र्वाचीतीरक्रमेणपारावारेउच्येते।नद्याःपरतीरंपा
रंअवाकतीरंअवारमित्यर्थः।एकैकं।तयोःपारावारयोःअंतरंमध्यंपात्रमुच्यते।एकं।वारिणोंतर्मध्येयत्तटंतत्द्वीपइतिअंतरीपमितिचो
च्यते।अस्त्रियामित्युभाभ्यांसंबध्यते।द्वे "द्विर्गताआपोत्रसद्वीपः।अपांअंतर्गतंअंतरीपं॥८॥तोयोत्थितंतोयक्रमेणोत्थंतत्तुलिनमुच्यते।एकं।
सैकतं।सिकतामयं।द्वेवालुकाप्रचुरस्थानस्य।निषद्वरः।जंबालः।पंकः।शाद्दः।कर्दमः।पंचकर्दमस्य।तत्रपंकःपुन्नपुंसकयोः॥९॥ ७

जलोच्छ्वासाः। परीवाहाः।"परिवाहाः।" द्यूतनिर्गममार्गेः। अवहृं जलंपरिवहतितेषां। तथाचप्रयोगः। उपार्जितानांवित्तानांत्यागएवहिरक्षणं॥
नडागोदरसंस्थानांपरीवाहाइवांभसामिति। जलप्रवृद्धिरेवपरीवाहइत्येके। कूपकाः। विदारकाः। हेवक्ष्यमाणघादौहिजलार्थंगर्ताः क्रियंतेतेषां।
स्रोतोद्विधाकारिणः। शिलादयः। कूपकाइत्येके। नौतार्थेनावातारितुमर्हेजलादौनाव्यं। एकं। तत्त्रिषु। नौः। तरणिः। तरिः। त्रयंनौकायाः। तरीरित्यपि

जलोच्छ्वासाःपरीवाहाःकूपकास्तुविदारकाः॥नाव्यंत्रिलिंगंनौतार्येस्त्रियांनौस्तरणिस्तरिः॥१०॥
उडुपंतुप्लवःकोलःस्रोतोंबुसरणंस्वतः॥आतरस्तरपण्यंस्याद्द्रोणीकाष्ठांबुवाहिनी॥११॥

लक्ष्मीवत्। "कृदिकारादितिङीषि। तरणी। तरीइत्यपि। तरणीतरीतिहेमः।"॥१०॥उडुपं। प्लवः। कोलः। त्रयमल्पनौकायाः॥"हेरी. पडांवइतिख्या
तायाः। स्वतोयदंबुसरणंजलगमनंतत्स्रोतउच्यते। सांतमेकं। "तालव्यादिरपि।" आतरः। तरपण्यं। द्वेतरणमूल्यस्य। काष्ठांबुवाहिनीकाष्ठमयी
जलवाहिनीसाद्रोणीउच्यते। "द्रुणिःद्रोणिः" काष्ठमुपलक्षणंपाषाणादेः। एकं। डोणीइतिख्यातस्य॥११॥

सांयात्रिकः। "समुदितानांगमनंद्वीपांतरगमनंवासंयात्रासाध्योजनमस्यास्तीति।" पोतवणिक्। द्वे नौक यावाणिज्यकारिणः।कर्णधारः।नाविकः। द्वे अरित्रंधृत्वायस्मारयतितस्य। नियामकाः।पोतवाहाः।द्वे पोतमध्यस्थितकाष्ठाग्रेदुष्टजंत्वादिज्ञानायस्थित्वायेनियंतुंशक्तास्तेषां।कूपकः।गुणदृक्षकः। द्वे रज्वाद्याधारमध्यस्तंभस्य कुवा, "डोलकाठी" इतिख्यातस्य।।१२।। नौकादंडः।क्षेपणी। "क्षेपणिःक्षिपणिरितिच" द्वेनौकावाहकदंडस्य। "बल्ले इतिख्यातस्य।अरित्रं। केनिपातकः। द्वेकर्णस्यसुकाणूं इतिख्यातस्य। अभ्रिः। "अभ्रीत्यपि।" काष्ठकुद्दालः। "काष्ठकूद्दालः।" द्वे पोतादेर्मलापनयनार्थंकाष्ठकुद्दालस्य।कुडतीइतिख्यातस्य। सेकपात्रं। सेचनं। द्वेचर्मादिरचितस्यजलोत्सर्जनपात्रस्य। "बादली। डोल इतिख्यातस्य।" यानपात्रंतुपोतोऽधिरोहेत्रिपुसमुद्रियं॥सामुद्रिकोमनुष्योऽधिजातासामुद्रिकाचनौरितिक्वचित्॥१३॥ ४० ४०

सांयात्रिकःपोतवणिक्कर्णधारस्तुनाविकः॥नियामकाःपोतवाहाःकूपकोगुणदृक्षकः॥१२॥
नौकादंडःक्षेपणीस्यादरित्रंकेनिपातकः॥अभ्रिःस्त्रीकाष्ठकुद्दालःसेकपात्रंतुसेचनं॥१३॥

नावोर्धेअर्धनावमित्येकं। तत्क्लीबे। नावोद्विगोरर्धाच्चेतिटच्। अतीतनौकेनौकामतीत्यवर्तमानेमनुष्यादौअतिनु। एकं। त्रिलिंगं। अतःपरंअगाधात्अगाधशब्दमभिव्याप्यत्रिषु। वाच्यलिंगाइत्यर्थः। प्रसन्नः। अच्छः। द्वेनिर्मलस्य। कलुषः। अनच्छः। आविलः। त्रयंमलमिश्रस्य।।१४।। निम्नं। गभीरं। गंभीरं। त्रीणिगंभीरस्यर्षिबोलइतिख्यातस्य।" तद्विपर्ययेगंभीरादितरस्मिन्नुत्तानमित्येकं। अगाधं। अतलस्पर्शी। द्वेअत्यंतगंभीरस्य। केवर्तः। दाशः। "दा

क्लीबेऽर्धनावंनावोर्द्वेऽतीतनौकेऽतिनुत्रिषु।।त्रिष्वागाधात्प्रसन्नोऽच्छःकलुषोनच्छआविलः।।१४।।निम्नंगभीरंगंभीरमुत्तानंतद्विपर्ययेे।।अगाधमतलस्पर्शेकैवर्तेदाशधीवरौ।।१५।।आनायःपुंसिजालंस्याच्छणसूत्रंपवित्रकं।।मत्स्याधानीकुवेणीस्याद्बडिशंमत्स्यवेधनं।।१६।। पृथुरोमाझषोमत्स्योमीनोवैसारिणोऽण्डजः।। विसारःशाकुलीचाथगडकःशाकुलार्भकः।।१७।। छ

सः" धीवरः। त्रयंकैवर्तस्य।।१५।।आनायः। जालं। द्वेजालस्य। शणसूत्रं। पवित्रकं। द्वेशणसूत्रस्य। मत्स्याधानी। कुवेणी। द्वेमत्स्यबंधनकरंडिकायाः। बडिशं।" बडिशा। बडिशी। त्रयोपिलमध्यावा।" मत्स्यवेधनं। द्वेमत्स्यवेधनस्य। गलइतिख्यातस्य।।१६।। पृथुरोमा। झषः। मत्स्यः। मीनः। वैसारिणः। अंडजः। विसारः। शाकुली। अष्टौमत्स्यस्य। गडकः। शाकुलार्भकः। द्वेमत्स्यविशेषस्य। गरइतिप्रसिद्धस्य।।१७।। छ छ

सहस्रदंष्ट्रः। पाठीनः। द्वेबहुदंष्ट्रस्यमत्स्यविशेषस्य। उलूपी। शिशुकः। द्वेशिशुमाराकारमत्स्यस्य। नलमीनः। "डलयोरभेदान्नडमीनोपि"। चिलिचिमः। "चिलिचिमिः। नलमीनश्चिलीचिमीरितिबोपालितः।" द्वेजलतृणचारिमत्स्यविशेषस्य। वेगसाद्वतिप्रसिद्धस्य। श्रोष्ठी। शफरी। द्वेसहरीद्वतिख्यातस्य। "क्षुद्र" मत्स्यविशेषस्य। पुंसितुश्रोष्ठः। शफरः॥१८॥ क्षुद्राश्चतेअंडमत्स्याश्चतेषांसंघातःपोताधानमुच्यते। एकं। अथोझषामत्स्य

सहस्रदंष्ट्रःपाठीनउलूपीशिशुकःसमौ॥ नलमीनश्चिलिचिमःश्रोष्ठीतुशफरीद्वयोः॥१८॥
क्षुद्रांडमत्स्यसंघातःपोताधानमथोझषाः॥ रोहितोमद्गुरःशालोराजीवःशाकुलस्तिमिः॥१९॥

विशेषाः वक्ष्यंतेनतुपर्यायाः। रोहितः। रोहीद्वतिप्रसिद्धस्य। मद्गुरः। मंगराद्वतिप्रसिद्धः। शालः। "सालेपि" चक्रांकितोमत्स्यः। राजीवः। रायाद्वति प्रसिद्धः। शाकुलः। "शाकिवेगवान्। सौराद्वतिप्रसिद्धः। तिमिः॥१९॥

तिमिंगिलः। आदिशब्दान्नंद्यावर्तादयोन्ये। एकैक। यादांसि। जलजंतवः। हे जलचरमात्रस्य। तद्भेदाः जलजंतूनांविशेषाः। शिशुकुमारः शिरसइतिख्या तः। "शिशुमारोंऽबुसंभूतजंतौतारात्मकेच्युतइतिविश्वमेदिन्यौ।" उद्रः हूदइतिप्रसिद्धः। शंकुः सफूइतिप्रसिद्धः। मकरोमगरइतिप्रसिद्धः। आदिशब्दा ज्जलहस्त्यादयः॥२०। कुलीरः। "कुलिरः"। कर्कटकः। "करकटः। कर्कटः। कर्कडः। कर्कडः कुलिरेइतिहेमः।" हे कुरलें "खेंकडा" इतिख्यातस्य। कूर्मः। कमठः। कच्छपः। "अन्यत्रकच्छपीत्यपिपाठः। कच्छपीवल्लकीभेदेडुलौक्षुद्रगंडांतरे। पुंसिनिध्यंतरेकूर्मेमल्लबंधांतरेपिचेतिविश्वमेदिन्यौ।"

तिमिंगिलादयश्चाथयादांसिजलजंतवः॥ तद्भेदाःशिशुकुमारोद्रशंकवोमकरादयः॥ २०॥
स्यात्कुलीरःकर्कटकःकूर्मेकमठकच्छपौ॥ ग्राहोवहारोनक्रस्तुकुंभीरोथमहीलता॥ २१॥

त्रीणिकांसवइतिप्रसिद्धस्य। ग्राहः। अवहारः। हे गोह। "नाडेसावज" इतिख्यातस्य। अवह्रियतेऽनेनेति अवहाराधारावायानामुपसंख्यानमितिघञ्। कर्तरिणोवा। "अत्रअवराहइतिपर्यायांतरंदृश्यतेतत्तु। अवपूर्वकाद्रहत्यागइत्यस्मात्घञ्निबोध्यं। अवहारस्तुयुद्धादिविश्रांतौग्राह्यचोरयोरितिहेमः।" नक्रः। कुंभीरः। हे नक्रस्य ग्राहविशेषस्य। "सुसरइतिख्यातस्य।" कुंभीहस्तीतमीरयतिकुंभीरः। महीलता॥ २१॥ ७

गंडूपदः। किंचुलकः।" किंचिलिकः। किंचुलुकः।" त्रीणिजलचरभेदस्य। केंचू।"काडू.दानवार.गांडोळ." इतिरव्यातस्य। गंडूपदस्य ग्रंथयः पदान्यस्य गंडूपदः। निहाका। गोधिका। द्वे जलगोधिकायाः।" पाण्यांतीलघोरपड इतिरव्यातायाः।" रक्तपा। जलौका। जलौकसः। त्रीणिजळू इतिरव्यातस्य तस्य जलौकसः स्त्रीत्वेबहुत्वेचनित्यं।"उचःकइतिनिपातितोऽंतओकशब्दः। जलौकातुजलौकास्याज्जलूकाचजलौकसीतिसंसारावर्ती

गंडूपदःकिंचुलकोनिहाकागोधिकासमे॥ रक्तपातुजलौकायांस्त्रियांभूम्निजलौकसः॥२७॥
मुक्तास्फोटःस्त्रियांशुक्तिःशंखःस्यात्कंबुरास्त्रियौ॥ क्षुद्रशंखाःशंखनखाःशंबूकाजलशुक्तयः॥२७॥

ह्रहुवचनंप्राथिकं। जलौकापिजलौकास्याज्जलूकाजलजंतुकेतितारपालोपि"॥२२॥मुक्तास्फोटः। शुक्तिः। द्वेशुक्तिकायाः। शंखः। कंबुः। द्वे शंखस्य।" पुन्नपुंसकौ।" क्षुद्रशंखाः। शंखनखाः। "शंखनकाः। द्वेसूक्ष्मशंखानां। जलशुक्तयःजलमात्रजाः शुक्तयः शंबूकाउच्यंते।"शंबुकः। शांबूकः। शंबुः।"एकं। क्षुद्रशुक्तिकानां। शंबूकःस्त्रीपुंसयोः।"शंबूकाननपुंसकेइतिमेदिनी। शंबूकः। शंबुकः। शंबुपूर्वःकांतस्तुसर्वदा। ककारेणविनाबोधोदृश्यते ग्रंथविस्तरइत्युत्पलिनी"॥२३॥ ७

भेकः। मंडूकः। वर्षाभूः। शालूरः। "परिसरकृकलासस्वेदसालूरइत्यूष्मविवेकाद्दंत्यादिरपि" प्लवः। दर्दुरः। षट्भेकस्य। शिली। गंडुपदी। द्वेस्वल्पगंडूपदजातेः। भेकी। वर्षाभ्वी। "वर्षाभूः" द्वेक्षुद्रभेकजातेः। कमठी। डुलिः। द्वेकूर्म्मस्य॥२४॥ मद्गुरस्यप्रियास्त्रीशृंगीत्युच्यते। एकं दुर्नामा। "दुर्नाम्नी।" दीर्घकोशिका। द्वेजलूकाकारस्यजलचरविशेषस्य। जलाशयाः। जलाधाराः। द्वेतडागादीनां। तत्रजलाशयेष्वेववक्ष्यमाणावि

भेकेमंडूकवर्षाभूश्शालूरप्लवदर्दुराः॥शिलीगंडूपदीभेकीवर्षाभ्वीकमठीडुलिः॥२४॥मद्गुरस्यप्रियाशृंगीदुर्नामादीर्घकोशिका॥जलाशयाजलाधारास्तत्रागाधजलोह्रदः॥२५॥आहावस्तुनिपानंस्यादुपकूपजलाशये॥पुंस्येवांऽधुःप्रहिःकूपउदपानंतुपुंसिवा॥२६॥नेमिःस्त्रिकांस्यवीनाहोमुखबंधनमस्ययत्॥ ७॥

शेषाः। अगाधमतलस्पर्शीजलंयस्यसजलाशयोह्रदउच्यते। एकं॥२५॥ उपकूपजलाशयेकूपसमीपेयोजलाशयःकूपोद्भूतांऽबुस्थापनीयशिलादिरचितोगर्तःयत्रत्यंजलं सुखेनगावः पिबंतितत्रआहावः। निपानं। द्वेतिद्वे। अंधुः। प्रहिः। कूपः। उदपानं। चत्वारिविहीरइतिख्यातस्य। तत्रोदपानंपुंसिवा॥२६॥ अस्यकूपस्यनेमिः अंतेरज्ज्वादिधारणार्थंदारुयंत्रंसात्रिका। एकं। "हानराहाटइतिख्यातस्य।" अस्यकूपस्यपाषाणादिभिर्यन्मुखनिबंधनंनंदीपटइतिख्यातंसवीनाहउच्यते। "विनाहः" एकं

पुष्करिणी। खातं। द्वे पुष्करिण्याः। अखातं। देवखातकं। "अखातो देवखातकइतिपुंस्कांडेऽमरदत्तात्पुंस्यपि" द्वे अकृत्रिमख्यातस्य। "देवह्रारस्थ जलाशयस्येत्यन्ये।"॥२७॥ पद्माकरः। तडागः। कासारः। सरसी। सरः। पंचनडागस्य। तत्रतडागेतटाकइतिपाठः। सपुन्नपुंसकयोः। "तटाकतडागावपि। अत्रपद्मादिद्वेसपद्मागाधजलाशयस्य। कासारादित्रयंकृत्रिमपद्माकरस्येत्यपिमतं।" सरसीस्त्री। सरःसांतं। वेशंतः। पल्वलं। "पल्वलः" वेशंत. पल्वलोऽस्त्रीनिवाचस्पतिः।" अल्पसरः। त्रीणिस्वल्पसरसः। वापी। "वापिः। वाप्यांवापिरपिस्मृतेतिद्विरूपकोशः।" दीर्घिका। द्वे। दीर्घातिख्या

पुष्करिण्यांतुखातंस्यादखातंदेवखातकं॥२७॥ पद्माकरस्तडागोऽस्त्रीकासारःसरसीसरः॥ वेशंतःपल्वलंचाल्पसरोवापी तुदीर्घिका॥२८॥ खेयंतुपरिखाऽधारस्त्वंभसांयत्रधारणं॥ स्यादालवालमावालमावापोथनदीसरित्॥२९॥ ७

नायाः। "अयरोहणवापिकायाः।"॥२८॥ खेयं। परिखा। द्वे दुर्गाद्बहिर्यत्परितःखातंक्रियतेतस्यचरइतिभसिद्वस्य। यत्रअंभसांधारणंक्षेत्रादिसेकार्थंजलानांसंग्रहणंसआधारउच्यते। एकं। "धरण. बांध इतिख्यातस्य।" यदुक्तं। अपांधारणमाधारस्तदल्पंचालवालकमिति। आलवालं। "अलवालं।" आवालं। आवापः। त्रीणिवृक्षादिमूलेसमंततोऽभसोधारणार्थंयद्वेष्टनंतस्य। "अलेंइतिख्यातस्य।" नदी। सरित्॥२९॥ ७

तरंगिणी। वेावलिनी। तटिनी। ह्रादिनी। "ह्लादिनी।" धुनी। स्रोतस्विनी। "स्रोतस्वती।" द्वीपवती। स्रवंती। निम्नगा। आपगा। "अपगेतिह्रस्वादिरपि। विद्याद्गारमागारमपगामापगामपीतिद्विरूपकोशः।" द्वादशानद्याः॥२०॥ "कूलंकषादिसरस्वत्यंतानिचत्वार्यपिनद्याः"। गंगा। विष्णुपदी। जन्हुतनया। सुरनिम्नगा। भागीरथी। त्रिपथगा। त्रिस्रोताः। भीष्मसूः। अष्टोभागीरथ्याः। त्रिस्रोताः सांता॥२१॥ कालिंदी। सूर्यतनया। यमुना। श्यामनस्वसा। चत्वारियमुनायाः। श्यामनस्वसाक्रंता। रेवा। नर्मदा। सोमोद्भवा। मेकलकन्यका। "मेखलकन्यका" चत्वारिनर्मदायाः। "मेकलऋषिरद्रिर्वातस्यकन्यका"॥२२॥ करतोया। सदानीरा। द्वैगौरीविवाहेकन्यादानोदकाज्जातायाः। "यदुक्तं। प्रथमंकर्कटेदेवीव्यहंगंगारजस्वला। संवारिरुधिरंयत्रनद्यः करतोयांबुवाहिनीति।" बाहुदा। सेतवाहिनी। द्वैकार्तवीर्यार्जुनेनयाऽवतारितातस्याः। "बाहुदस्यकार्तवीर्यस्येयंबाहुदा।"॥

तरंगिणीवेावलिनीतटिनीह्रादिनीधुनी॥स्रोतस्विनीद्वीपवतीस्रवंतीनिम्नगापगा॥२०॥"कूलंकषानिर्झरिणीरोधोवक्रासरस्वती॥"गंगाविष्णुपदीजन्हुतनयासुरनिम्नगा॥भागीरथीत्रिपथगात्रिस्रोताभीष्मसूरपि॥२१॥कालिंदीसूर्यतनयायमुनाश्यामनस्वसा॥रेवातुनर्मदासोमोद्भवामेकलकन्यका॥२२॥करतोयासदानीराबाहुदासेतवाहिनी॥ ७

शतद्रुः। शुतुद्रिः। हे शतरुद्रेति देशभाषायामसिद्धायाः। शतुद्रिरित्यपि पाठः। शुतुद्रिस्तोममिति श्रुतेः पाठात्। वसिष्ठशापभयाच्छतधाद्रुतायाशतद्रुः। विपाशा। विपाट्। हे पाशा मोचिनीति ख्यातायाः। वसिष्ठंविपाशायतीतिविपाट्। शकारांता॥३३॥ शोणः। हिरण्यवाहः। हेनदविशेषस्य। "शोणानदीति प्रसिद्धस्य।" याऽल्पा कृत्रिमासरित्सा कुल्या। तालव्यांतं। एकं। "कुल्यानदीकुल्यमस्थिकुल्यावारिप्रणालिकेतिधरणेर्नदीमात्रेपि। शरावती। वेत्र

शतद्रुस्तु शुतुद्रिःस्याद्विपाशातुविपाट्स्त्रियां॥३२॥ शोणोहिरण्यवाहःस्यात्कुल्याऽ
ल्पाकृत्रिमासरित्॥ शरावतीवेत्रवतीचेंद्रभागासरस्वती॥३४॥ कावेरीसरितोन्या-
श्चसंभेदःसिंधुसंगमः॥ द्वयोःप्रणालीपयसःपदव्यांत्रिषुतूत्तरौ ॥३५॥ ७

वती। चंद्रभागा। "चांद्रभागा। चांद्रभागी। चंद्रभागी। चंद्रभागाचांद्रभागाचांद्रभागीचसामता॥ चंद्रभागीचसेवोक्तेतिद्विरूपकोशः।" सरस्वती॥३४॥ कावेरी। एतेपंचसरिद्विशेषाः। एकैकं। अन्याश्चसरितः कौशिकीगंडकीचर्मण्वतीगोदावेण्याद्याः संतीतिशेषःसंभेदः। सिंधुसंगमः। द्वेनदीमेलकस्य। "संभिद्यंतेमिलंत्यत्रसंभेदः।" पयसोजलस्यपदव्यांनिर्गमनमार्गेमकरमुखादिरूपाप्रणालीत्येकंतत्तूद्वयोः। पुंसितुप्रणालः॥३५॥ ७

उत्तरोदाविकसारवौविषुदेविकायांनद्यांभवंदाविकं।सरव्यांनद्यांभवंसारवं।एकंकं।स्त्रियांतुदाविकी।सारवी।सौगंधिकं।कल्हारं।"कल्हारं" संध्याविकासिनःवाकुसरोजस्य।हल्लकं।रक्तसंध्यकं।द्वेरक्तकल्हारस्य।सक्तान्संधान्अकतिरक्तसंध्यकं॥३६॥उत्पलं।कुवलयं।द्वेकुमुदस्य।"कमलसाधारणस्येत्यन्ये।कुवलंतूत्पलंकुवामितिविकांडशेषः।"नीलेस्मिन्नुत्पलेनीलांबुजन्म।इंदीवरंइतिद्वे।"इंदिवरं।इंदीवारं।इत्यपि।"सि

देविकायांसरव्यांचभवेदाविकसारवौ॥सौगंधिकंतुकल्हारंहल्लकंरक्तसंध्यकं॥३६॥
स्यादुत्पलंकुवलयमथनीलांबुजन्मच॥इंदीवरंचनीलेस्मिन्सितेकुमुदकैरवे॥३७॥
शालूकमेषांकंदस्याद्वारिपर्णीतुकुंभिका॥जलनीलीतुशैवालंशैवलेथकुमुद्वती॥३८॥

तेशुभ्रेस्मिन्नुत्पलेकुमुदं।कैरवं।द्वे।कैरवस्यहंसस्येदंप्रियंकैरवं॥३७॥एषांउत्पलविशेषाणांकंदःशालूकंस्यात्।एकं।वारिपर्णी।कुंभिका।द्वेजलकुंभीतिख्याताथाः।जलनीला।शैवालं।शैवलः।"शैवालः।शैवालश्चापिशैवालःशैवलोजलनीलिका।"त्रयंशैवाळइतिख्यातस्य।कुमुद्वती॥३८॥

कुमुदिनी। द्वे कुमुदिन्याः। "कुमुदयुक्तदेशस्यच।" नलिनी। "नडिन्यपि। नडाःसंत्यस्त्रेतिनडिनी।" बिसिनी। पद्मिनी। त्रयंकमलिन्याः। मुख

शब्दात्सरोजिनीप्रभृतयः। पद्मं। नलिनं। अरविंदं। महोत्पलं॥३९॥ सहस्रपत्रं। कमलं। शतपत्रं। कुशेशयं। पंकेरुहं। तामरसं। सारसं। स-

कुमुदिन्यांनलिन्यांतुबिसिनीपद्मिनीसुखाः॥ वापुंसिपद्मंनलिनमरविंदंमहोत्पलं॥३९॥
सहस्रपत्रंकमलंशतपत्रंकुशेशयं॥ पंकेरुहंतामरसंसारसंसरसीरुहं॥ ४०॥
बिसप्रसूनराजीवपुष्करांभोरुहाणिच॥ पुंडरीकंसितांभोजमथरक्तसरोरुहे॥४१॥

रसीरुहं॥४०॥ बिसप्रसूनं। राजीवं। पुष्करं। अंभोरुहं। षोडशाकमलस्य। वापुंसीतिषोडशाभिरपिसंबध्यते। तत्रपुंडरीकं। सितांभोजं। द्वेसितकमलस्य। रक्तसरोरुहं॥४१॥

रक्तोत्पलं। कोकनदं। ह्रयंरक्तकमलस्य। कोकनदमितिरक्तकुंदेपिवर्तते। यदाहुः। रक्तांभोरक्तकुंदेचबुधैःकोकनदंस्मृतमिति। नालः। नालं। "बालानालीच"। द्वेपद्मादिदंडस्य। मृणाल्लं। बिसं। "मृणाली। मृणालः। बिशं। मृणालंनलदेक्लीबंपुन्नपुंसकयोर्बिशइतिविश्वः॥ मृणालेतुबिशंबिसमितिद्विरूपकोशाः।" द्वे मृणालस्यभिसेंइतिख्यातस्य। अस्त्रियांक्लीबपुंसोः। अब्जादिकदंबेकमलादीनांसमूहेखंडमित्येकमस्त्रियां। "शंडःषं

रक्तोत्पलंकोकनदंनालोनालंमथास्त्रियां॥ मृणाल्लंबिसंमब्जादिकदंबेखंडमस्त्रियां॥४२॥कर
हाटःशिफाकंदःकिंजल्कःकेसरोऽस्त्रियां॥संवर्तिकानवदलंबीजकोशोवराटकः॥४३॥इतिवारिवर्गः॥

डः"। तालव्योमूर्द्धन्योऽब्जादिकदंबेषंडशब्दोयं। मूर्द्धन्यएववृषभेपूर्वाचार्यैर्विनिर्दिष्टइत्यूष्मविवेकः॥४२॥करहाटः। शिफाकंदः। द्वेपद्ममूलस्य। "शिफामूलतरुप्ररोहस्तत्सहितःकंदः। कंदोमूलं। शिफेतिचकंदमितिच पृथक्नामनीइत्येके। किंजल्कः। केसरः "केसरः"। द्वेकेसरस्य। संवर्तिका। नवदलं। द्वेपद्मादीनांनवपत्रस्य। बीजकोशः। वराटकः। द्वेबीजकोशस्य। बीजानांकमलाक्षाणांकोशोबीजकोशः॥४३॥ ७॥ इतिवारिवर्गः॥

उक्तानूवर्गान्संग्रहेणोपसंहरति।उक्तमिति।मयास्वर्व्योमादिकमुक्तं।शब्दादीतिरसगंधादिग्रहणार्थमादिशब्दः।एषांस्वर्गादीनांसंगतंसंबंधवशात्मासंदेवासुरमेघादिकंतच्चोक्तं॥१॥ इतीति।एवममरसिंहस्यकृतौनाम्नांलिंगानांचानुशासनेस्वरादिशब्दानांकांडःसमूहःसांगःअं

कांडः१

उक्तंस्वर्व्योमदिक्कालधीशब्दादिसनात्मकं॥पातालभोगिनरकंवारिचैषांचसंगतं॥१॥
इत्यमरसिंहकृतौनामलिंगानुशासने॥स्वरादिकांडःप्रथमःसांगएवसमर्थितः॥१॥

गोपांगसहितःप्रथमःसमर्थितःकथितः॥१॥श्रीमत्यमरविवेकेमहेश्वरेणविरचितएवं।प्रथमःस्वरादिकांडःसमाप्तः॥ ७ ७

अमरकोशप्रथमकांडस्यवर्गानुक्रमेणश्लोकसंख्या.

वर्गांकाः	वर्गनामानि	मूलश्लोकाः	क्षेपकश्लोकाः	वर्गांकाः	वर्गनामानि	मूलश्लोकाः	क्षेपकश्लोकाः	
	आदौपरिभाषायाःश्लोकाः॥	५	०	६	शब्दादिवर्गस्य	२५	२	मूलश्लोकाः क्षेपकश्लो० इवं २५
१	स्वर्गवर्गस्य	६९॥	३	७	नाट्यवर्गस्य	३८	११॥	
२	व्योमवर्गस्य	२	०॥०	८	पातालभोगिवर्गस्य	११	१॥	
३	दिग्वर्गस्य	३९	३॥	९	नरकवर्गस्य	३॥	०	
४	कालवर्गस्य	३१	१॥	१०	वारिवर्गस्य	४३	०॥०	
५	धीवर्गस्य	१७	२॥		अनुक्रमश्लोक	२	०	
		१५९॥	११			१२२॥	५॥	

इत्यमरकोशेऽमरविवेकटीकायां प्रथमकांडः समाप्तः

अथ अमरकोशटीका द्वितीयकांडारंभः

श्रीगणेशायनमः॥ ॥वर्गाइति। इहवक्ष्यमाणेऽस्मिन्काण्डेऽंगेमूर्च्छारवानगरादिभिरुपांगेमूर्त्सावेशादिभिःसहितैःपृथ्वीपुरादिशब्दै

वर्गाउदिताः। वक्ष्यमाणेत्यर्थः॥ नत्वस्माभृच्छैलःमृगादिभिरित्यादिशब्देनपक्षिणांग्रहः।"यद्वा मृगानत्तिपुनःपुनःसमृगारिसिंहः"

॥१॥ भूः। भूमिः। अचला। अनंता। रसा। विश्वंभरा। स्थिरा। धरा। धरित्री। धरणिः। क्षोणिः।"क्षोणिः।क्षौणी"। ज्या। काश्यपी। क्षितिः॥२॥स-

वर्गाः पृथ्वीपुरक्ष्माभृन्नोषधिमृगादिभिः॥ नृब्रह्मक्षत्रविट्शूद्रैःसांगोपांगैरिहोदिताः॥१॥
भूर्भूमिरचलानंतारसाविश्वंभरास्थिरा॥धराधरित्रीधरणिःक्षोणिर्ज्याकाश्यपीक्षितिः॥२॥
सर्वंसहावसुमतीवसुधोर्वीवसंधरा॥गोत्राकुःपृथिवीपृथ्वीक्ष्माऽवनिर्मेदिनीमही॥३॥

र्वंसहा। वसुमती। वसुधा। उर्वी। वसंधरा। गोत्रा। कुः। पृथिवी।"पृथ्वी।पृथवीपृथिवीपृथ्वीतिशब्दार्णवः।" पृथ्वी। क्ष्मा। अवनिः।"अवनी"

मेदिनी। मही।"महिः"। इतिसप्तविंशतिर्नामानि भूमेः। अत्रभूमीधरणीत्यादयोऽर्थनामापि। ऋदिकारादिनइतिगणसूत्रात्॥३॥ ७

"विपुलेत्येकादशाभूमेश्च।" मृत्। मृत्तिका। द्वे मृदः। मृत्सा। मृत्स्ना। द्वे प्रशस्तमृदः। प्रशस्ता मृत्तिका त्वित्यन्वयः। कृष्णभूमः कृष्णमृत्स्या दु
दग्भूमउदड्-मृदि। पांडुभूमः पांडु मृच्चेत्यपि पठ्यते॥ सर्वैः सस्यैरादया मृत्तिका उर्वरेत्युच्यते। एकं। ऊषः। क्षारमृत्तिका। द्वे क्षारमृत्ति
कायाः। ऊषादंतः॥४॥ ऊषवान्। ऊषरः। द्वयंक्षारमृद्विशिष्टस्य। द्वावप्यन्यलिंगौ। यथा। ऊषवतीऊषरावास्थली। ऊषरंस्थलमि-

"विपुलागह्वरीधात्रीगोरिलाकुंभिनीक्षमा॥ भूतधात्रीरत्नगर्भाजगतीसागरांबरा॥३॥"
मृन्मृत्तिकाप्रशस्तातु मृत्सामृत्स्नाचमृत्तिका॥उर्वरासर्वसस्यादयास्यादूषःक्षारमृत्तिका॥४॥
ऊषवानूषरोद्वावप्यन्यलिंगौस्थलंस्थली॥ समानौमरुधन्वानौद्वेखिलाप्रहतेसमे॥५॥

त्यादि। स्थली। अकृत्रिमस्थानस्य। "कृत्रिमातुस्थला। स्थलमुभयसाधारणं।" मरुः। धन्वा। द्वे मरुदेशस्य। निर्जलोयं। स्त्रियतेपि
पासयायस्मिन्मरुः। खिलं। अप्रहतं। द्वे अकृष्टक्षेत्रादेः। नप्रहन्यतेहलादिभिरप्रहतं। "समेसमानार्थे" त्रिषुलिंगेषुइत्यर्थः॥५॥

जगती। लोकः। विष्टपं। "पिष्टपं।" जगत्स्यात्पिष्टपेक्लीबंत्रयोनाजंगमेत्रिषु॥ जगतीभुवनेस्माया छंदोभेदेजनेपिच॥ लोकस्तुभुवनेजनेइतिमेदिनी। "विष्टपःपुमानितिबोपालितः।" भुवनं। जगत्। पंच भूतलस्य। "एकंमहाभूतंपृथिवी। पंचमहाभूतविषयेंद्रियात्मकंजगदितिपृथ्वीजगतोर्भेदः।" अयंजंबुद्वीपवर्तीदृश्यमानोलोकःभारतनामकंवर्षज्ञेयं। "उक्तंच।उत्तरंयत्समुद्रस्याहिमाद्रेश्चैवदक्षिणं॥ वर्षंतद्भारतंनामभारतीयत्रसंततिरिति।" भरतस्यराज्ञइदंभारतं। "वर्षशब्दःपुंक्लिंगोपि।पुन्नपुंसकयोर्वर्षंजंबुद्वीपाब्दवृष्टिष्वितिरुद्रः। वर्षेस्त्रीभारतादौचजंबुद्वीपाब्दवृष्टिष्वितिमेदिनी।" एकं। एवमिलावृतादीन्यष्टौवर्षाण्यन्यापे। आरावत्याअवधेः॥ ६॥ यःप्राग्दक्षिणःप्राक्सहितोदक्षिणोदेशः।सप्राच्यइत्येकं। आरावत्याअवधेर्यःपश्चिमोत्तरःपश्चिमसहितउत्तरोदेशःसउदीच्यइत्येकं॥ ७ ७

त्रिष्वथोजगतीलोकोविष्टपंभुवनंजगत्॥ लोकोयंभारतंवर्षमारावत्या
स्तुयोवधेः॥ ६॥ देशाःप्राग्दक्षिणःप्राच्यउदीच्यःपश्चिमोत्तरः॥ ७

प्रत्यंतः। म्लेच्छदेशः। द्वीपादाचाररहितस्य कामरूपादेः। "यदुक्तं। चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते। तं म्लेच्छविषयं प्राहुरार्यावर्तमतः परमिति।" मध्यदेशः। मध्यमः। द्वीएनत्सरिमाणंतु। हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तित इति। विनशनं तीर्थभेदः। "कुरुक्षेत्रं"॥७॥ आर्यावर्तः। पुण्यभूमिः। द्वैविंध्यहिमाचलयोरंतरस्य। उक्तंच। आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। तयोरेवांतरं गिर्योरार्यावर्तं विदुर्बुधा इति। "हिमप्रधानोऽगः हिमागः। हिमेनाल्यते हिमालः। अलभूषणादौ घञ्।" नीवृत्। जनपदः। द्वैजनैर्वा

प्रत्यंतो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः॥७॥ आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमाल
योः॥ नीवृज्जनपदो देशविषयौ तूपवर्तनं॥८॥ त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि॥

स्यमानराष्ट्रस्य मगधादेः। नीवृत्तुंसि। माहचर्यात्। नियतं वर्ततेस्मिन्नीवृत्। नहि वृतीतिदीर्घः। "जनः पदं वस्तु यत्र। जानपदेपि। भवेज्जनपदो जानपदोपि जनदेशयोरिति विश्वभेदिन्यौ।" देशः। विषयः। उपवर्तनं। त्रीणि ग्रामसमुदायलक्षणस्य देशमात्रस्य॥८॥ अथ गोष्ठशब्दमभिव्याप्य वक्ष्यमाणास्त्रिषु। त्रिषुलिंगेषु इत्यर्थः। नड्वान्। नड्वलः। द्वे नडप्राये नड बहुले देशे॥

कुमुद्वानित्येकंकुमुदभ्राये। वेतस्वानित्येकंबहुवेतसे।बहवोवेतसाबानीरायत्रतस्मिन्देशे। नदास्मिन्नस्तीत्यर्थेकुमुदनडवेतसेभ्योऽध्रुतुप्।।९।।शा
द्वैर्बालतृणैर्हरितेदेशेशाद्वलइत्येकं। शादाःसंत्यस्मिन्शाद्वलः।सजंबालेकर्दमयुक्तेदेशेपंकिलइत्येकं। जलभाग्यं।अनूपं। हेजलबहुलदेशास्य
अनुगताआपोऽत्रअनूपं।तथाविधःअनूपसदृशःकश्चिन्नद्यादेरुपांतदेशःकच्छइत्यच्यते।एकं।कच्छशब्दस्यपुंसीतिविशेषस्त्रिषितिपूर्वो
क्तस्यबाधनार्थः।कच्छइत्यनूपस्यैवपर्यायइतिकेचित्।"कच्छं।कच्छमनूपइतिबोपालितः।"।।१०।। शार्करा। शार्करिलः।हेवालुकायुक्तदेशे।

कुमुद्वान्कुमुदभ्रायेवेतस्वान्बहुवेतसे।।९।।शाद्वलःशादहरितेसजंबालेतुपंकिलः।।जलभाग्यमनूपंस्यात्पुंसि
कच्छेस्त्रथाविधः।।१०।।स्त्रीशार्करासार्करिलःशार्करःशार्करावति।।देशएवादिमावेषुन्नेयाःसिकतावति।।११।।

तत्रशार्करास्त्री।शार्करः।शार्कराबान्।हेवालुकायुक्तस्यदेशादेः।आदिमौशार्कराशार्करिलौदेशएव। देशेलुबिलचौचेतिनियमात्।एवंसिकता
वत्युन्नेयाऽहनीयाः। तथाहि।सिकताः।सिकतिलइति।हेसिकतायुक्तस्यदेशस्यासिकतः।सिकताबान्।हेवालुकायुक्तस्यदेशादेः। तत्रसिकता
नित्यंस्त्रियांबहुत्वेच।"अत्रशार्करासिकताशब्दौद्वावपिबहुवचनांताविति केचित्।"।।११।।

देशाइति। नद्यंबुभिर्वृष्टयंबुभिश्च संपन्नेव्रीहिभिःशालितो देशः क्रमेण नदीमातृको देवमातृकश्चस्यात्। नद्यंबुजातसस्यर्द्धितोनदीमातृकः। वृष्ट्यंबु जातसस्यर्द्धितोदेवमातृकइत्यर्थः। एकैकं॥१२॥धर्मशीलःशोभनोराजा यत्रससुराजातस्मिन्देशेराजन्वान्। एकं। ततोन्यत्रराजमात्रयुक्तेदे शेराजवान्। एकं। गोष्ठं।गोस्थानकं।द्वेगवांस्थानस्य।तत्गोष्ठं भूतपूर्वकंचेत्गोष्ठीनमित्युच्यते। पूर्वंयत्रगावआसन्तत्स्थानंगोष्ठीनमित्य

देशोनद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः॥स्यान्नदीमातृकोदेवमातृकश्चयथाक्रमं॥१२॥सुराज्ञि
देशेराजन्वान्स्यात्ततोऽन्यत्रराजवान्॥गोष्ठंगोस्थानकंतत्तुगोष्ठीनंभूतपूर्वकं॥१३॥पर्यंभूःपरिसरःसे
तुरालौस्त्रियांपुमान्॥वामलूरश्चनाकुश्चवल्मीकंपुन्नपुंसकं॥१४॥अयनंवर्त्ममार्गाध्वपथौनःपदवीसृतिः॥

र्थः। गोष्ठात्वञ्भूतपूर्वेइतिस्वञ्। एकं॥१३॥ पर्यंतभूः।परिसरः। द्वेनदीपर्वतादीनामुपांतभुवः। सेतुः।आलिः।"आली"द्वेसेतोः"पूलइति ख्यातस्य।"स्त्रीलिंगायामालौसेतुःपुमानित्यमरः। वामलूरः। नाकुः। वल्मीकं। त्रीणिवल्मीकस्य॥१४॥अयनं। वर्त्म।मार्गः।अध्वा। पंथाः।"पथः वाटःपथश्चमार्गश्चेतित्रिकांडशेषः" पदवी।"पदविः"। सृतिः॥

सरणिः।"शरणिः पथिचावलाविति तालव्यादिविजयात्तालव्यादिरपि।ङीषंतोपि"पद्धतिः।"पद्धती"पद्या।वर्त्मनी।"वर्तनिः।वर्त्मनिः।वर्त्मनी।वर्त्मनी पथीतिहेमः।"एकपदी।द्वादशमार्गस्य॥१५॥अतिपंथाः।सुपंथाः।सत्पथः।त्रयंअर्चितेध्वनि।शोभनेमार्गे।व्यध्वः।दुरध्वः।विपथः।कदध्वा।कापथः।"कुपथोपि"पंचदुर्मार्गस्य।तत्रकदध्वानांतः॥१६॥अपंथाः।अपथं।द्वेअमार्गस्य।शृंगाटकं।चतुष्पथं।द्वेचत्वारादाइतिख्यातस्य।दूरश्वासेशून्यश्चदूरशून्यः छायाजलादिवर्जितोदूरस्थोध्वामार्गः प्रांतरमित्युच्यते।एकं।यदुर्गमंचोरकंटकाद्युपद्रवयुक्तंवर्त्ममार्गःकां

सरणिःपद्धतिःपद्या वर्त्तन्येकपदीतिच॥१५॥अतिपंथाःसुपंथाश्चसत्पथश्चार्चितेध्वनि॥व्यध्वोदुरध्वो
विपथःकदध्वाकापथःसमाः॥१६॥अपंथास्त्वपथंतुल्येशृंगाटकचतुष्पथे॥प्रांतरंदूरशून्योऽध्वाकांता
रंवर्त्मदुर्गमं॥१७॥गव्यूतिःस्त्रीक्रोशौयुगंनल्वःकिष्कुचतुःशतं॥

तारमित्यच्यते।"पुंसिकांतारः।कांतारोऽस्त्री महारण्येविलेदुर्गमवर्त्मनीतिमेदिनी।एकं॥१७॥क्रोशौयुगंगव्यूतमित्यच्यते।क्रोशोधनुःसहस्रेद्वे धनुर्हस्तचतुष्टयं॥"द्वाभ्यांधनुःसहस्राभ्यांगव्यूतिःपुंसिभाषितमिति शब्दार्णवातुंस्यपि।स्त्रीवेतुगव्यूते।धन्वंतरसहस्रंतुक्रोशःक्रोशद्वयंपुनः।गव्यूतंस्त्रीतुगव्यूतिर्गोरुतंगोमतंचतदितिवाचस्पतिः।"किष्कूणांहस्तानांचतुःशतं"चतुःशतीवा"नल्वइत्युच्यते।चतुःशतहस्तमितस्थानंनल्वसंज्ञकमित्यर्थः।एकं॥९॥

घंटापथः संसरणं। द्वे राजपथमात्रस्य। घंटोपलक्षितगजादीनां पंथाः घंटापथः। "दशधन्वंतरे राजमार्गे घंटापथः स्मृत इति चाणक्यः" तत्संसरणं पुरस्य नगरस्य चेत्युपनिष्करमित्येकं। बुधैः सरणं वर्त्म गजादीनां संकुलं। पुरस्योपस्करं चोक्तमिति भुग्नः॥ १८॥ "द्यावेत्यादिपंच द्विवचननामानि द्यावाभूम्योः। गंजेत्यादित्रयं क्षारसमुद्रस्य। गंजाखनौ करागृहे। रुमासुग्रीवदारेषु विशिष्टलवणाकरइ-

घंटापथः संसरणं तत्पुरस्योपनिष्करं॥१८॥"द्यावापृथिव्योरोदस्योद्यावाभूमी चरोदसी॥
द्विवस्पृथिव्योर्गंजातु रुमास्याल्लवणाकरः॥१॥"इतिभूमिवर्गः॥ पूःस्त्री पुरीनगर्यौवा पत्तनंपुटभेदनं॥

तिभेदिनी। गंजारुमेस्त्रियां।"॥१॥ अंगोपांगापेक्षयाभूमिरेवात्रप्रधानमितिभूमिवर्गइतिव्यपदेशः। एवमन्यत्रापिमंतव्यं॥ छ॥
॥ छ॥ ॥इतिभूमिवर्गः॥ छ ॥ पूः। पुरी। "पुरिः।" नगरी। पत्तनं। "पट्टनं।" पुटभेदनं॥ छ छ

स्थानीयं। निगमः। ससर्कनगरस्य। पुः। पुरी। पुरी नगर्यौ वास्त्रियौ। पक्षे पुरं। नगरं। केचिदत्रभेदं च कुर्यथा। यत्रानेकश्रेष्ठिप्रभृतिनानेक
वणिगादिव्यवहारस्तत्पुरादिसंज्ञं। यत्र राजा तदनुचराश्च संतिष्ठते तत्पुरं षत्तनादिसंज्ञं। यत्प्राकारादिवेष्टितं विस्तीर्णं पुरं तत्स्थानीया
दिनामकमिति। यन्मूलनगरादन्यत्पुरं तच्छाखानगरमित्यन्वयः। एकं मूलनगरं राजधानी।" ॥१॥ वेश्याजनस्य समाश्रयो निवे
शस्थानं वेशइत्यच्यते। हे वेश्यानिवासस्य। "तालव्यांतं नेपथ्ये गृहमात्रे च वेशो वेश्यागृहे पि चेति तालव्यांतेरभसः। गृहमात्रे गणि

स्थानीयं निगमोऽस्त्र्यन्मूलनगरात्पुरं ॥१॥ तच्छाखानगरं वेशो वेश्याजन
समाश्रयः॥ आपणस्तु निषद्यायां विपणिः पण्यवीथिका॥ २॥ ४

काया: सद्मनि वेशोभवेत्तु तालव्यः। तालव्यौ मूर्द्धन्यौ लकरेण कथित आचार्यैरित्यूष्मविवेकः।" आपणः। निषद्या। हेक्रय्यवस्तुशालायाः।
हट्टवणिक्पथपण्याजिरादिकमपि। विपणिः। "विपणी।" पण्यवीथिका। हेक्रय्यवस्तुशालापंक्तेः। चत्वार्यपि हट्टस्येत्यन्ये। विपणिस्त्री
"आपणादि त्रयं हट्टस्य। बाजार इतिप्रसिद्धस्य। विपणीति त्रयं हट्टशून्यविक्रयस्थानस्येत्यपिमतं॥ २॥

रथ्या। प्रतोली। विशिरवा। त्रीणिग्रामाभ्यंतरमार्गस्य। चयः। वप्रं। द्वेपरिखोद्धृतमृत्तिकाकूटस्य।"प्राकाराधारस्यवा।" प्राकारः। वरणः। सालः।"स्यालः। तालव्योनृपद्मषयोः। शालोवृक्षेवृतौद्वयोः। तालव्यदंत्यउक्तस्तथास्त्रियांवृक्षशारवायामित्यूष्मविवेकः। सालोवरणसर्जयोरितिरभसः।" त्रयंयष्टिकाकंटकादिरचितवेष्टनं। नगरादेः प्रांतभागेयावृत्तिःवेष्टनंवेणुकंटकादीनांतत्प्राचीनमित्यर्थः

रथ्याप्रतोलीविशिरवास्याच्चयोवप्रमस्त्रियां॥ प्राकारोवरणःसालःप्राचीनंप्रांततोवृतिः॥ २॥
भित्तिःस्त्रीकुड्यमेडूकंयदंतर्न्यस्तकीकसं॥ गृहंगेहोदवसितंवेश्मसद्मनिकेतनं॥ ४॥

ने।"प्राचीरमित्यपि।" एकं॥ २॥ भित्तिः। कुड्यं। द्वेभित्तेः। तत्कुड्यंअंतर्न्यस्तकीकसंचेदेडूकसंज्ञं।"एडुकं।एडोकं। भवेदेडोमेडुकमितिद्विरूपकोशाः।" एकं। अंतर्न्यस्तानिकीकसानिअस्थीनिदार्ढ्यार्थंयत्रतत्। कीकसंकठिनद्रव्यस्योपलक्षणं। गृहं। गेहं। उदवसितं। वेश्म। सद्मनिकेतनं॥ ४॥

निशांतं। पस्त्यं।"वस्त्यं। वसेस्तिः। तत्रसाधुरितियत्।" सदनं।सादनं। सदनंसादनंसभमितिद्विरूपकोशः। भवनं। अगारं।"आगारं। विद्यादगारमागारमपगामापगामपीतिद्विरूपकोशः।" मंदिरं।गृहाः।निकाय्यः।निलयः।आलयः।षोडशगृहस्य। तत्रगृहशब्दःबहुत्वेनित्यंपुंसिच।"क्लीबेपि।" ॥५॥ वासः। कुटी। शाला। सभा। चत्वारिसभागृहस्य। तत्रकुटीहूयोःस्त्रियांतुकुटीकुटिश्च।"कुटःकोटेपुमा

निशांतपस्त्यसदनंभवनागारमंदिरं॥गृहाःपुंसिचभूम्न्येवनिकाय्यनिलयालयाः॥५॥
वासःकुटीहूयोःशालासभासंजवनेत्रिदं॥चतुःशालंमुनीनांतुपर्णशालोटजोस्त्रियां॥६॥

नस्त्रीघटेस्त्रीपुंसयोगृहे इतिमेदिनी। गृहादिसभांतानिविंशतिर्नामानिगृहस्येत्यन्ये।" संजवनं। चतुःशालं। द्वेअन्योन्याभिमुखशालाचतुष्कस्य "चौसोपि.चोपट.चौकइतिप्रसिद्धस्य।"पर्णशाला।उटजः।द्वेमुनिगृहस्य।" उटजस्तृणपर्णादिरितिदेशीकोशः।" ६॥ ७

चैत्यं। आयतनं। द्वेयज्ञायतनभेदस्य। वाजिशाला। मंदुरा। द्वेअश्वशालायाः। "पागाद्वनिरव्यातायाः।" आवेशनं। शिल्पिशाला। "शिल्पशालेत्यपिपाठः। तत्रशिल्पस्यशालेति।" द्वेस्वर्णकारादीनांशालायाः। प्रपा। पानीयशालिका। द्वेजलशालायाः। "पाणपोहीइतिप्रसिद्धायाः।"॥७॥ छात्रादिनिलयः शिष्यादीनांगृहंमठइत्युच्यते। "छात्रोंतेवास्यादिर्येषांपरिव्राजकक्षपणकादीनांतेषांनिलयइतिवा।" आदिनाकापालिकादिसंग्रहः।

चैत्यमायतनंतुल्येवाजिशाला तुमंदुरा॥आवेशनंशिल्पिशालाप्रपापानीयशालिका॥७॥
मठश्छात्रादिनिलयोगंजातु मदिरागृहं॥ गर्भागारंवासगृहमरिष्टंसूतिकागृहं॥ "कुट्टि-
मोऽस्त्रीनिबद्धाभूश्चंद्रशालाशिरोगृहं॥ ८॥ ७

गंजादिद्वयंमद्यस्थानस्य। गर्भागारं। वासगृहं। द्वेगृहमध्यभागस्य। अरिष्टं। सूतिकागृहं। "सूतकादीनामत्वविकल्पात्सूतकागृहं।" द्वेप्रसवस्थानस्य। "चत्वारोपिपर्यायाइत्यन्ये। पाषाणादिनिबद्धाभूः सकुट्टिमइत्येकं। भूमिगृहतलघरइतिप्रसिद्धस्य। चंद्रादिद्वयंगृहोपरितनगृहस्यउपरमाडी. अटाळीइत्यादिप्रसिद्धस्य॥८॥

वातायनं। गवाक्षः। द्वे गवाक्षस्य। "झरोकाइतिप्रसिद्धस्य" मंडपः। जनाश्रयः। द्वे मंडपस्य। तत्र मंडपः क्लीबपुंसोः। धनिनांधनवतांवासःगृहं तत्तुह

र्म्यादि। आदिनास्वस्तिकादालिकादेर्ग्रहः। देवानांराज्ञांचगृहंप्रासादइत्येकं॥९॥सौधः। राजसदनं। उपकार्या। उपकारिका। चत्वारिराजगृहस्य

वातायनंगवाक्षोऽथमंडपोऽस्त्रीजनाश्रयः॥हर्म्यादिधनिनांवासःप्रासादोदेवभूभुजां॥९॥
सौधोऽस्त्रीराजसदनमुपकार्योपकारिका॥स्वस्तिकःसर्वतोभद्रोनंद्यावर्तादयोपिच॥१०॥
विच्छंदकःप्रभेदाहिभवंतीश्वरसद्मनां॥ रूप्यगारंभूभुजामंतःपुरंस्यादवरोधनं॥११॥

स्वस्तिकादयईश्वरसद्मनांराजगृहाणांप्रभेदाःस्युः। तत्रचतुर्द्वारतोरणःस्वस्तिकः। उपर्युपरिगृहंसर्वतोभद्रः। वर्तुलाकृतिर्नंद्यावर्तः॥१०॥विस्ती

र्णस्कंदरोविच्छंदकः। "विच्छर्दकः" आदिनाकुचकवर्द्धमानादिग्रहः। भूभुजांराज्ञांरूप्यगारंस्त्रीगृहंतत्तु अंतःपुरंअवरोधनं॥११॥

द्रुद्वांतः। अवरोधः। चत्वारि। अदृः। क्षौमं। "क्षौमं" देहर्म्यादिपृष्ठस्य। "उपरिगृहस्यभाडीइत्यादिख्यातस्य।" गृहविशेषस्येत्येके। प्रघाणः। प्रघणः। अलिंदः। "आलिंदः। गृहैकदेशेआलिंदःप्रघाणःप्रघणस्त्वथेत्यमरमाला।" त्रीणिद्वारा द्वहिर्यःप्रकोष्ठकस्तत्र। "द्वारप्रकोष्ठाद्वहिर्द्वारायवर्तिचतुष्कस्येतिवा।" ॥१२॥ गृहावग्रहणी। देहली। द्वेगृह द्वारोधोभागस्यउंबराइतिप्रसिद्धस्य। "देहंगोमयाद्युपलेपंलातीतिविगृहीतत्वाद्गृहद्वारा

द्रुद्वांतश्चावरोधश्चस्याददृःक्षौममस्त्रियां॥ प्रघाणप्रघणालिंदाबहिर्द्वारप्रकोष्ठके॥१२॥
गृहावग्रहणीदेहल्यंगणंचत्वराजिरे॥ अधस्ताद्दारुणिशिलानासादारूपरिस्थितं॥१३॥

धोभागस्यउंबरबोगाउंबरठाइतिख्यातस्य।" अंगणं। "अंगनं। अंगनंप्रांगणेयानेकामिन्यामंगनामतेतिनांतवर्गेविश्वः।" चत्वरं। आजिरं। त्रीणिप्रांगणस्य। शिलेत्येकं द्वारस्तंभाधःस्थितकाष्ठस्य। "शिली। तलदारुशिलीधोपिन्नासादास्तूर्ध्वमस्ययदितिबोपालितात्।" नासेत्येकं। "दंत्यांतं" द्वारस्तंबोपरिस्थितस्यदारुणः। "मस्तकपट्टीगणेशपट्टीइतिप्रसिद्धस्य।" ॥१३॥ ९ ९

प्रच्छन्नं। अंतर्द्वारं। द्वे गुप्तद्वारस्य। खिडकीसंज्ञस्य। पक्षद्वारं। पक्षकं। द्वे पार्श्वद्वारस्य। "प्रच्छन्नमंतर्द्वारंस्यात्पक्षद्वारंतदुच्यते। खिडकीत्याख्या पक्षद्वारं पूर्वान्वयीत्यन्ये।" वलीकं। "वलीकःपटलंप्रांतइतिबोपालितात्पुंस्त्वमपि"। नीध्रं। द्वे पटलप्रांतेगृहच्छादनस्य। "भित्तिबहिर्भागीयस्य वलचणपडवीइतिख्यातस्य" पटलं। छदिः। द्वे छादनस्य। "शाकारइतिख्यातस्य।" छदिःसांतंस्त्रियां। छदिषी।।१४॥ गोपानसी। वलभी।

प्रच्छन्नमंतर्द्वारंस्यात्पक्षद्वारंतुपक्षकं॥ वलीकंनीध्रेपटलप्रांतेयपटलंछदिः॥ १४॥
गोपानसीतुवलभीछादनेवक्रदारुणि॥कपोतपालिकायांतुविटंकंपुन्नपुंसकं॥१५॥

"वलभिः"। वडभीतिमुर्द्धन्यमध्योपि। इहद्वांतेवडभीचंद्रशालेसौधोर्ध्ववेश्मनीतिरभसः। ओकोगृहंपिटंचालोवडभीचंद्रशालिकेतित्रिकांडशेषः।" द्वे छादनार्थंयद्वक्रदारुतत्र। पटलाधारभूतवक्रकाष्ठेइत्यर्थः। "पटलाधारवंशापंजरस्यओमणकडणीवांसाइतिप्रसिद्धस्य सज्ज्ञाइत्यपिमतं।" कपोतपालिका। विटंकं। द्वे सौधादेकाष्ठादिरचितपक्षिगृहस्य॥१५॥

द्वाः।द्वारं। प्रतीहारः।"प्रतिहारः।" त्रयंद्वारस्य। तत्रद्वाःस्त्रियांरेफांतः।वितर्दिः।"वितर्दी"वेदिका।द्वेवेद्याः।"अंगणादिषुकृतस्योपवेशास्छा
नस्येतिवा।" वितर्दिस्त्री। तोरणः।बहिर्द्वारं।द्वेतोरणस्य।"द्वारबाह्यभागस्य।" पुरद्वारं। गोपुरं।द्वेनगरद्वारस्य॥१६॥ पूर्द्वारिनगरद्वारेसु
रेवनावतारणार्थं"क्रमनिम्नं"यन्मृत्कूटंक्रियते तत्रहस्तिनरवइत्येकं। कपाटं"किवाटं।कवाटश्च कपाटश्चत्रिषुस्यादररंननेतिवाच

स्त्रीद्वाद्वारंप्रतीहारःस्याद्वितर्दिस्तुवेदिका॥ तोरणोःस्त्रीबहिर्द्वारंपुरद्वारंतुगोपुरं॥१६॥
कूटंपूर्द्वारियद्धस्तिनरवस्तस्मिन्नथत्रिषु॥ कपाँटमररंतुल्येतद्विष्कंभोःर्गलंनना॥
॥१७॥आरोहणंस्यात्सोपानंनिश्रेणिस्त्वधिरोहिणी॥ छ छ

स्पनिः।कवाटश्चाररमितित्रिकांडशेषः।"अररं।द्वेकवाड इतिख्यातस्य।तेत्रिषु।तत्रस्त्रियांकपाटी।अररी। तद्विष्कंभः तस्यकपाटस्यावष्टं
भकंयन्मुसलंतदर्गलमित्यर्थः।तत्स्त्रीनपूंसकयोःस्त्रियात्वर्गला।"तद्विष्कंभ्यर्गलमितिपाठः।"॥१७॥ आरोहणं।सोपानं।द्वेसोपानस्य।"पा
यरीइतिख्यातस्य।"निःश्रेणिः।"निश्रेणिरित्यपि।नियताश्रेणिःपंक्तिरत्रेतिनिश्रेणिः" अधिरोहिणी। द्वयंनिसणी।"शिडी"इतिख्यातस्य॥ छ

संमार्जनी। द्वे शोधनी। द्वे सारणी।"केरसुणी।" इतिख्यातस्य। तयासंमार्जन्यानिक्षितेनिरस्तेकेरइतिख्यातेसंकरः।"संकारइतिपाठेकर्मणिघञ्।" अवकरः।इतिद्वयं॥१८॥मुखंनिःसरणं।द्वेगृहादेर्मुखभूतस्यद्वारप्रदेशस्य।"उसदारपुदीलदारइतिख्यातस्य।निःसरंत्यनेननिःसरणं।" सन्निवेशः।निकर्षणं। द्वेसमीचीनवासस्थानस्य।"पुरादौगृहादिरचनापरिच्छिन्नदेशस्येत्यर्थः।संवसथः।ग्रामः।द्वेग्रामस्य।वेश्मभूर्गृहभूमिःवास्तुरित्युच्यते। द्वे।"गृहरचनावच्छिन्नभूमेः।"॥१९॥ग्रामांतेग्रामस्यसमीपप्रदेशोउपत्राल्यमित्येकं।

संमार्जनीशोधनीस्यात्संकरोऽवकरस्तथा॥१८॥क्षिप्रेमुखंनिःसरणंसन्निवेशोनिकर्षणं॥
समौसंवसथग्रामौवेश्मभूर्वास्तुरस्त्रियां॥१९॥ग्रामांतेनुपत्राल्यंस्यात्सीमसीमेस्त्रियामुभे॥
घोषआभीरपल्लीस्यात्पल्लणःत्रावरालयः॥२०॥ ॥इतिपुरवर्गः॥ ७

ग्रामांतमुपत्राल्यमित्यपिपाठः।"तत्रग्रामस्यांतंसमीपं"।सीमा।सीमा। द्वेग्रामादेर्मर्यादायां।नामनूसीमन्नित्यादिनिपातनात्।पूर्वोनकारांतः।"उभेद्वेस्त्रियां" घोषः।आभीरपल्ली।"आभीरपल्लिः।" द्वेगोपालग्रामस्य।तद्वृहस्यवा।कुटीकग्रामकयोःपल्लिरितिशाश्वतः।त्रावरस्यालयःपल्लणइत्यप्यच्यते द्वे।"भिल्लग्रामस्य।" त्रावरोवनचांडालः॥२०॥इतिपुरवर्गः॥ ७ ७ ७

महीध्रः। द्विरवरः। क्ष्माभृत्। अहार्यः। धरः। पर्वतः। अद्रिः। गोत्रः। गिरिः। ग्रावा। अचलः। शैलः। शिलोच्चयः। त्रयोदश पर्वतसामान्यस्य॥ १॥
लोकालोकः। चक्रवालः। "चक्रवाडः" द्वे सप्तद्वीपवत्या भूमेः प्राकारभूते गिरौ। त्रिकूटः। त्रिककुत्। द्वे त्रिकूटाचलस्य। दांतः त्रिककुत्। अस्तः चरमक्ष्माभृत्। द्वे अस्ताचलस्य। "अस्तंक्षिसेय्यवसिते त्रिषुनाप्यश्चिमाचले इतिविश्वमेदिन्यौ।" उदयः। पूर्वपर्वतः। द्वे उदयाचलस्य॥ २॥

महीध्रेद्विरवरिक्ष्माभृदहार्यधरपर्वताः॥ अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः॥ १॥
लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ॥ अस्तस्तुचरमक्ष्माभृदुदयः पूर्वपर्वतः॥ २॥
हिमवान्निषधोविंध्योमाल्यवान्पारियात्रिकः॥ गंधमादनमन्येचहेमकूटादयोनगाः॥ ३॥

हिमवानित्यादयः सप्तपर्वतविशेषाः। आदिनामलयचित्रकूटमंदरादयः। एकैकं। "ठक्। पारियात्रिकः। पारियात्रकइत्यपिपाठः। गंधमाद
नइतिपुंलिंगोप्यन्यत्रास्ति। द्वे गंधमादनोभृंगगंधकेवानरांतरे॥ स्त्रीसुरायांनगेनस्त्रीनिमेदिनी॥" ३॥

पाषाणः। प्रस्तरः। ग्रावा। उपलः। अश्मा। शिला। दृषत्। ससपाषाणस्य। शिलादृषदौस्त्रियां। कूटः। शिखरं। शृंगं। त्रयमपिपुन्नपुंसकलिंगं पर्वतस्य। "अस्त्रीनिपूर्वोत्तराभ्यांसंबध्यते। शिखरवाचीशृंगशब्दः क्लीब एवदृश्यते।" प्रपातः। अतटः। भृगुः। त्रयंपर्वतात्पतनस्थानस्य। प्रपतत्यस्मिन्प्रपातः। नविद्यतेतटोऽत्रेत्यतटः। " प्रपातस्तुतटोभृगुरित्यपिपाठः। तत्रप्रपत्यतेयतस्तटात्ससटोभृगुरिति॥४॥अद्रे

पाषाणप्रस्तरग्रावोपलाश्मानःशिलादृषत्॥ कूटोऽस्त्री शिखरंशृंगंप्रपातस्त्वतटोभृगुः॥४॥ कटको
ऽस्त्रीनितंबोद्रेःस्नुःप्रस्थःसानुरस्त्रियां॥उत्सःप्रस्रवणंवारिप्रवाहोनिर्झरोझरः॥५॥

र्नितंबोमध्यभागः कटकइत्यु
च्यते। एकं। स्नुः। प्रस्थः। सानुः। त्रीणिपुन्नपुंसकलिंगानि। समभूभागेपर्वतैकदेशे। तत्रस्नुःपुमानेवेति सर्वधरः। स्नौतिप्रस्रवत्यंभःस्नुः। प्रतिष्ठंतेऽस्मिन्प्रस्थः। सनोतिददातिसरवंसानुः। उत्सः। प्रस्रवणं। द्वेयत्रपानीयंनिपत्यबहुलीभवतितस्यस्थानस्य। प्रस्रवत्यस्मिन्प्रस्रवणं। वारिप्रवाहः। निर्झरः। झरः। "सृषोदेवादिकात्तुषित्वादडि-झरा। अचइः झरिः। ङीषिझरीच" त्रीणि झराइतिख्यातस्य। पंचापिपर्यायाइत्यन्ये॥५॥

दरी। कंदरः। द्वेपर्वतस्यगृहाकारकृत्रिमविवरस्य। पक्षेकंदरा। गुहा। गह्वरं। द्वेदेवखातेऽकृत्रिमेबिलेबिलविषये। केचिद्देवखातादिपर्यायचतुष्टयमाहुः। यत्कात्यः। देवखातेबिलंगुहेति। गह्वरंबिलदंभयोरितिच। केचित्तु। सूक्ष्मस्थूलभेदेनद्वाभ्यांद्वाभ्यांभेदमाहुः। गिरेःसकाशाच्च्युताःपतिताये स्थूलपाषाणास्तेगंडशैलाइत्युच्यंते। "गिरेस्तिर्यक्प्रदेशाद्बहिर्निर्गताःशूलाकारपाषाणास्तेदंतकाइत्येकं।"

दरीतुकंदरोवास्त्रीदेवखातबिलेगुहा॥ गह्वरंगंडशैलास्तुच्युताःस्थूलोपलागिरेः॥ ६॥
"दंतकास्तुबहिस्तिर्यक्प्रदेशान्निर्गतागिरेः॥" खनिःस्त्रियामाकरस्यात्पादाःप्रत्यंतपर्वताः॥
उपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधित्यका॥ ७॥ छ

॥ ६॥ खनिः। "खानी। खानिः। खनिरेव मतारवानिरितिद्विरूपकोशाः।" आकारः। द्वेरत्नाद्युत्पत्तिस्थानस्यखाणइतिख्यातस्य। पादाः। प्रत्यंतपर्वताः। द्वेपर्वतसमीपस्थाल्पपर्वतानां। अद्रेरधःसन्निहिताभूमिरुपत्यकेत्युच्यते। एकं। अद्रेरूर्ध्वायाभूमिःसाऽधित्यका। एकं॥ ७॥ छ छ

अद्रेर्यन्मनःशिलादिसधातुरित्यच्यते। आदिनाहरितालस्वर्णताप्यादिग्रहः।"तदुक्तं।सुवर्णरौप्यताम्राणिहरितालंमनःशिला।गैरिकांजनकासीससीसलोहाःसहिंगुलाः॥गंधकोऽभ्रकइत्याद्याधातवोगिरिसंभवाइति।"गैरिकं।विद्रोषतोधातुः।विद्रोधेणधातुरित्येवप्रसिद्धमित्यर्थः। एकं।गेरू"काव"इतिख्यातस्य। निकुंजः।कुंजः।द्रुलतादिपिहितोदरेलताद्याच्छादितगर्भेस्थाने।"विकल्पेनद्रुक्लीबेअ

धातुर्मनःशिलाद्यद्रेर्गैरिकंतुविद्रोषतः॥निकुंजकुंजोवाक्लीबेलतादिपिहितोदरे॥८॥इतिबोलवर्गः॥ ७ अटव्यरण्यंविपिनंगहनंकाननंवनं॥महारण्यमरण्यानीगृहारामास्तुनिष्कुटाः॥१॥ ७

पि।" आदिनातृणादिग्रहः॥८॥ इतिबोलवर्गः॥ ७ ॥ अटवी। अरण्यं।विपिनं।गहनं।काननं।वनं।षण्णामरण्यस्य।नत्राटवीस्त्रिया।"ऋदिकागदितिर्ङीष्वा।तेनान्यत्राटविरित्यपि" महारण्यं।अरण्यानी।हेमहत्तोवनस्य।अरण्यानीस्त्रिया।गृहारामाः।निष्कुटाः।द्वेगृहसमीपकृत्रिमवनेषु।"कुटाद्रुहान्निष्क्रांतानिष्कुटाः।" ॥१॥ ७ ७ ७

यत्कृत्रिमंकृत्यानिर्वृत्तंवनंतत्रआरामः।उपवनं। इतिहे। वृक्षवाटिकेत्येकममात्यानांवेश्यानांचयद्गृहोपवनंतत्र॥२॥यद्राज्ञःसाधारणं
प्रमदाभिरन्येर्वासहक्रीडार्थंवनंतत्रआक्रीडः।उद्यानमितिहे।"क्षेयमाक्रीडमुद्यानमित्यमरमालायामाक्रीडस्यापिक्लीबत्वमुक्तं।"
अतउद्यानंअंतःपुरोचितंराज्ञीनामेवक्रीडायमुचितंचेत्प्रमदवनंस्यात्। ङ्यापोःसंज्ञाछंदसोरिनिह्रस्वः।एकं॥३॥वीथी।"ङीषोवि-

आरामःस्यादुपवनंकृत्रिमंवनमेवयत्॥अमात्यगणिकागेहोपवनेवृक्षवाटिका॥२॥
पुमानाक्रीडउद्यानंराज्ञःसाधारणंवनं॥स्यादेतदेवप्रमदवनमंतःपुरोचितं॥३॥
वीथ्यालिरावलिःपंक्तिःश्रेणिर्लेखास्तुराजयः॥वन्यावनसमूहेस्यादंकुरोऽभिनवोद्भिदि॥४॥

कल्यादन्यत्रवीथिरित्यपि।" आलिः।आवलिः।पंक्तिः।श्रेणी। पंचकंपंक्तेः।"आल्यादित्रीणिङीषिदीर्घांतान्यपि।श्रेणीह्रस्वांतोऽपि"
लेखाः।"रेखाः" राजयः। द्वेलेखायां। सांतरापंक्तिः।"निरंतरालेखाः।यथाविप्रपंक्तिः।" भस्मलेखा। वनानांसमूहेवन्येत्येकं।अ
भिनवोद्भिदि।नूतनप्ररोहेअंकुरइत्येकं।"अंकूरः।अंकूरश्चांकुरःप्रोक्तइतिहलायुधः।" ॥४॥

वृक्षः। महीरुहः। शाखी। विटपी। पादपः। तरुः। अनोकहः। कुटः। शालः।" सालः। सालःसर्जतरौ वृक्षमात्रप्राकारयोरपीति। सालःपादपसा
त्रेस्यात्प्राकार इतिमेदिनीविश्वकोशौ।" पलाशी। द्रुः। द्रुमः। अगमः। त्रयोदशवृक्षस्य। पुष्पाज्जातैःफलैरुपलक्षितोवृक्षोवानस्पत्यः। ए-
कं। आम्रादेः। आपुष्पा त्पुष्पंविनाजातैःफलैरुपलक्षितोवृक्षोवनस्पतिः। एकं। पनसोदुंबरादेः। द्रुममात्रेपिवनस्पतिः।"वनस्पतिर्नाद्रुमा

वृक्षोमहीरुहःशाखीविटपीपादपस्तरुः॥अनोकहःकुटःशालःपलाशीद्रुद्रुमागमाः॥५॥
वानस्पत्यःफलैःपुष्पात्तैरपुष्पाद्वनस्पतिः॥ओषध्यःफलपाकांताःस्युरवंध्यःफलैर्ग्रहिः॥
॥६॥वंध्योऽफलोऽवकेश्यादिफलवान्फलिनःफली॥ ७ ७

त्रेविना पुष्पंफलिद्रुम इतिमेदिनीकोशात्।" फलपाकएवांतोयासांताः ओषध्यःस्युः। एकंव्रीहियवादेः।"ओषधिःफलपाकांताःस्या
दितिवापाठः। इमाःपिओषधी।" अवंध्यः।"अबंध्यः" फलैर्ग्रहिः। हेयथाकालंफलधरस्य॥६॥ वंध्यः।"बंध्यः। बंधेसाधुःयत्" १२
अफलः। अवकेशी। त्रयंऋतावपिफलरहितस्य। फलवान्। फलिनः। फली। त्रीणिसफलस्य। फलिनोऽदंतः॥ ७

प्रफुल्लः।उत्फुल्लः।संफुल्लः।व्याकोशः।"मूर्ध्न्यांतोशः"विकचः।स्फुटः॥७॥फुल्लः।एतेश्वेविकसितेपुष्पितेस्युः।अवंध्यादयः।अवंध्योऽफलइत्या
दयोविकसितांताःत्रिषुत्रिलिंग्यांस्युः।स्थाणुः।ध्रुवः।शंकुः।वीणि छिन्नविटपस्यप्रकांडे।वाना।स्थाणुशब्दोविकल्पेनपुंसीत्यर्थः।"रूपभे
दाल्लीवत्वं।स्थाणुरस्त्रीतिवापाठः।स्थाणुःकीलेहरेपुमान्।अस्त्रीध्रुवइतिमेदिनी।" शारवाप्रसिद्धा।खिफाद्दक्षमूलं।ह्रस्वेशारवाशिफे

प्रफुल्लोत्फुल्लसंफुल्लव्याकोशौविकचस्फुटाः॥७॥फुल्लश्चैतेविकसितेस्युरवंध्या
दयःस्त्रिषु॥स्थाणुर्वानौध्रुवःशंकुर्ह्रस्वेशारवाशिफःक्षुपः॥८॥अग्रकांडेस्तंब
गुल्मोवल्लीतुव्रततिर्लता॥लताप्रतानिनीवीरुद्गुल्मिन्युलपइत्यपि॥९॥ ७

यस्यसक्षुपइत्युच्यते।एकं॥८॥नविद्यतेप्रकांडोयस्यतस्मिन्स्तंबः।गुल्मः।इतिद्वयं।वल्ली।"सर्वधातुभ्यइन्"वल्लिः।वेल्लिः।वल्लीतुवेल्लिःस्म
रणइतिवाचस्पतिः।व्रततिः।"व्रततिः।व्रततीः।व्रततिर्व्रततीस्तथेतिहलायुधः।"लता।अयंलतायाः।वीरुत्।गुल्मिनी।उलपः।इतित्रयं
याप्रतानिनीशारवादिभिर्विस्तृतालता।तत्रेत्यर्थः।तत्रवीरुच्छब्दोधातुःस्त्रियां॥९॥ ७ ७

नगाद्यारोहोद्वृक्षादीनामुच्चत्वंतत्रउच्छ्रायः।उत्सेधः।उच्छ्रयः। इतित्रयं।"आरोहोदैर्घ्येपि।आरोहोदैर्घ्यउच्छ्रायेस्त्रीकथ्यमानभिधापि। आरोहणेगजारोह इतिहैमः। इत्यादिनागिरिदेवालयादिग्रहः।उत्सेधमित्यपि।उत्सेधस्तूच्छ्रयेनस्त्रीक्लीबंसंहननेपिचे तिमेदिनी।" प्रकांडः।स्कंधः। इतिहेतरोर्मूलमारभ्यशाखापर्यंतोयोभागस्तत्र।"तरोर्मूलस्कंधयोरंतरंप्रकांडः।"॥१०॥ शाखा। लता

नगाद्यारोहउच्छ्रायउत्सेधश्चोच्छ्रयश्चसः॥अस्त्रीप्रकांडःस्कंधःस्यान्मूलाच्छाखावधिस्तरोः॥१०॥
समेशाखालतेस्कंधशाखाशालेशिफाजटे॥शाखाशिफाःवरोहःस्यान्मूलाच्चाग्रंगतालता॥११॥

हेशाखायाः। स्कंधशाखा। शाला। हेप्रधानशाखायाः।"स्कंधात्प्रथमोत्पन्नशाखायाइत्यर्थः।शिफा। जटा। हेतरुमूलस्य।"पाळइति प्रसिद्धस्य।" शाखायाः शिखामूलंअवरोहइत्यच्यते।एकं।"पारोगापारंबाइतिप्रसिद्धस्य।"मूलाद्वृक्षमूलमारभ्याग्रपर्यंतंगंगतालतागुडू च्यादिरप्यवरोहइत्यच्यते।एकं।"मूलादूर्ध्वंगताशिफालतास्यादित्यपि।"॥११॥

शिरसोऽं। शिरोग्रंतत्तुशिरवरमित्यन्यते। शिरआदयस्त्रयोपिपर्यायाइतिकेचित्। शिरवरंवाना। पक्षेपुंसीत्यर्थः। मूलं। बुध्नः। अंघ्रिनामकः। पादमूलपर्यायसंज्ञकः। त्रीणिवृक्षादेर्मूलस्य। सारः। मज्जा। द्वयंवृक्षादेःस्थिरांशे। "गाभानरइतिख्याते" तन्नमज्जानांतःनरिपुंसि। क्वचिद्बंतोपिदृश्यते। "सारोमज्जासमौत्वक्स्त्रीतिपाठः। समौसमानलिंगौ।" त्वक्। वल्कं। वल्कलं। त्रयंत्वचः। तत्रवल्कादिद्वयंक्लीबपुंसोः॥१२॥

शिरोग्रंशिरवरंवानामूलंबुध्नोंऽघ्रिनामकः॥सारोमज्जानरित्वक्स्त्रीवल्कंव
ल्कलमस्त्रियां॥१२॥ काष्ठंदार्विधनंत्वेधद्ध्मेधःसमित्स्त्रियां॥ ७

काष्ठं। दारु। "दारुरित्यन्यत्र।पुन्नपुंसकयोर्दारुरित्यक्तेः।" द्वेकाष्ठमात्रस्य। इंधनं। एधः। इध्मं। एधः। समित्। पंचकंवृक्षस्यतृणकाष्ठादेः। "आद्यत्रयंअग्निसंदीपनतृणकाष्ठादेः।जलवणइतिप्रसिद्धस्य। अंत्यद्वयंयागादौहूयमानसमिदादेरितिमतं।" तत्रआद्यएधः शब्दः सांतःक्लीबे। अन्यस्त्वंतःपुंसि। समिद्धांतः॥ ७ ७ ७

निष्कुहः। कोटरं। द्वे वृक्षगतविवरस्य। कोटरंवानापक्षेपुमान्। वल्लरिः। मंजरिः। क्रुदिकारादक्तिनइतिगणसूत्रात्वल्लरी। मंजरीत्यपि। द्वे तुल्यादेरभिनवोद्भेदे। "केसरइतिख्यातस्य"॥१३॥ पत्रं। पलाशं। छदनं। दलं। पर्णं। छदः। षट्सुपत्रस्य। तत्रछदोऽदंतःपुंसि। "पर्णस्त्रिपत्रेपर्णंतुपत्रेइतिहैमः। पल्लवः। किसलयं। "किशालयमपि" द्वे पत्रादियुक्तेशाखायाःपर्वणि। तत्रकिसलयंपुंसिक्लीबेच। "पुंसिक्लीबेचपल्लव

निष्कुहःकोटरंवानावल्लरीमंजरिःस्त्रियौ॥१३॥पत्रंपलाशंछदनंदलंपर्ण
छदःपुमान्॥ पल्लवोऽस्त्रीकिसलयंविस्तारोविटपोऽस्त्रियां॥ १४॥ ७

इतिनुव्याडिः। "विस्तारःशाखापल्लवसमुदायलक्षणआभोगःविटपउच्यते।एकं।" विटपोनास्त्रियांस्तंबशाखाविस्तारपल्लवइति मेदिनीकोशात्। शाखायांपल्लवेस्तंबेविस्तारेविटपोस्त्रियामितिरभसाश्चपल्लवादिचतुष्टयमेकार्थकंवा।अत्रयदुक्तंकात्स्न्येन।स्कंधादूर्ध्वंतरोःशाखाकटकोविटपोमतइति॥" ॥१४॥ ७ ७ ७ १४

वृक्षादीनामिनिपूर्वेणापिसंबध्यते। वृक्षादीनांफलंसस्यमित्युच्यते। "तालव्याद्यपि" एकं। प्रसवःपुष्पादिःबध्यतेयेनतत्वृंतमुच्यते। एकं। देंठ "डेंख" इतिख्यातस्य। बंधनंपुष्पयोर्वृंतमाहकात्यः। आमेअपक्वेफलेबालाडुरित्येकं। वृक्षेफलेवानमित्येकं। उभेबालाडुर्वानंच त्रिषुत्रिलिंग्यां॥१५॥ क्षारकः। जालकं। द्वेनूतनकलिकायाः। तद्वृंतस्येत्येके। तत्रजालकंक्लीबेएव। कलिका। कोरकः। द्वेअस्फुटितपुष्पस्य।

वृक्षादीनांफलंसस्यंवृंतंप्रसवबंधनं॥आमेफलेबालाडुःस्याच्छुष्केवानमुभेत्रिषु॥१५॥
क्षारकोजालकंक्लीबेकलिकाकोरकःपुमान्॥स्याद्गुच्छकस्तुस्तबकःकुड्मलोमुकुलोस्त्रियां॥
॥१६॥स्त्रियःसुमनसःपुष्पंप्रसूनंकुसुमंसुमं॥

कळीइतिख्यातस्य। गुच्छकः। स्तबकः। द्वे कलिकादिभिराकीर्णस्यपल्लवग्रंथेः। "विकासोन्मुखकलिकायाइतिकेचित्" स्तबकेहारभेदेचगुच्छःस्तंबेपिकीर्तितइतिदंत्यांतेरुद्रः। पुष्पादिस्तबकेगुच्छइतितालव्यांतेरंतिदेवः। कुड्मलः। मुकुलः। द्वेईषद्विकसितकलिकायां॥१६॥ सुमनसः। पुष्पं। प्रसूनं। कुसुमं। सुमं। "सर्वधातुसमानेषुसमंस्यादभिधेयवदितिमेदिनी।" चत्वारिपुष्पस्य। "कुसुमंसममित्यपिपाठः। तत्रपुष्पस्यपंचनामानि।"

भूम्निस्त्रियांसुमनसइतिरत्नकोशाः।सुमनाःपुष्पमालत्योःस्त्रियामितिमेदिनीकोशाः। मकरंदः।पुष्परसः।द्वेपुष्पमधुनि।परागः।सुमनोरजः।द्वेपुष्परेणोः॥१७॥सर्वेवक्ष्यमाणंवृक्षलतौषधिजातीयंस्त्रीपुल्लिंगमपि।अश्वत्थकपित्थादीनामभिधानंप्रसवेपुष्पेफलेमूलेचवर्तमानं तद्विहीनंज्ञेयं।द्वाभ्यांस्त्रीपुंसाभ्यांहीनंनपुंसकलिंगमित्यर्थः।यथा।चंपकंआम्रंसूरणमित्यादि।तत्रविशेषमाह। हरीतक्याःफलंहरीत

मकरंदःपुष्परसःपरागःसुमनोरजः॥१७॥द्विहीनंप्रसवेसर्वंहरी
तक्यादयःस्त्रियां।आश्वत्थवैणवप्लाक्षंन्यग्रोधेंगुदंफले॥१८॥

की। आदिनाकोशातकीकर्कटीद्राक्षेत्यादि।अश्वत्थस्यफलंआश्वत्थं।वेणोःफलंवैणवं।प्लक्षस्यफलंप्लाक्षं।न्यग्रोधस्यफलंनैय्यग्रोधं इंगुद्याःफलंऐंगुदं।बृहत्याःफलंबार्हतं।एकैकं।प्लक्षादिभ्योणिति पुनरणविधानात्।अश्वत्थादिवाच्येभ्यःफलेलुड्नास्तीत्यर्थः॥ ॥१८॥

जंबूः। जंबु। जाम्बवं। व्रीणि जंब्वाःफले। जातीयूथिकामल्लिकेत्यादयः पुष्पेबर्तमानाःस्वलिंगाएवस्युः। ननुक्लीबे। यथाजात्याःपुष्पंजाती स्त्रीव्रीहयःफलेस्वलिंगाः। यथाव्रीहीणांफलानिव्रीहयःपुंसि। एवंमाषमुद्गयवादयोपिज्ञेयाः। यथामाषाणांफलंमाषाः॥१९॥ विदारीबृहत्यंशुमतीत्याद्यामूलेपिस्वलिंगाः। यथाविदार्यामूलंविदारी। अपिशब्दात्पुष्पेपिस्वलिंगाः। पाटलापुष्पेबर्तमानाक्लीबे। यथा पाटलायाःपुष्पं पा-

बार्हतंचफलेजंब्वाजंबूःस्त्रीजंबुजांबवं॥पुष्पेजातीप्रभृतयःस्वलिंगाव्रीहयःफले॥१९॥
विदार्याद्यास्तुमूलेपि पुष्पेक्लीबेपिपाटला॥बोधिद्रुमश्चलदलःपिप्पलःकुंजराशनः॥२०॥
अश्वत्थोथकपित्थेस्युर्दधित्थग्राहिमन्मथाः॥तस्मिन्दधिफलःपुष्पफलदंतशठावपि॥२१॥

टलं। अपिशब्दात्स्वलिंगा। "पाटलःकुसुमेवर्णेप्याम्रव्रीहिश्चपाटलः॥तिन्नाश्वत्थातुलिंगोपि।" बोधिद्रुमः। चलदलः। पिप्पलः। कुंजराशनः॥२०॥ अश्वत्थः। पंचपिप्पलवृक्षस्य। कपित्थः। "अमरमालायांपवर्गतृतीयमध्योपि।" दधित्थः। ग्राही। मन्मथः। दधिफलः। पुष्पफलः। दंतशठः। सप्तकंकपित्थस्य। "कवठइतिप्रसिद्धस्य॥२१॥

उदुंबरः। "भेदिन्यांटवर्गे तृतीयमध्यः। त्रिकांडशेषे त्येनमेव।" जंतुफलः। यज्ञांगः। हेमदुग्धकः। चत्वारि उदुंबरस्य। उंबरइतिख्यातस्य। कोविदारः। चमरिकः। कुद्दालः। युगपत्रकः। चत्वारि कांचनइतिख्यातस्य॥२२॥ सप्तपर्णः। विशालत्वक्। शारदः। "उद्यंतोपि। शारदीतीर्थपिप्पल्यांसप्तपर्णेचेति दंत्यांतेषुरुद्रः। शारदोद्वेस्त्रियांतोर्थपिप्पलीसप्तपर्णयोरितिमेदिनी।" विषमच्छदः। चत्वारिसांतवणइतिख्यातस्य। दुरधिगम

उदुंबरोजंतुफलोयज्ञांगोहेमदुग्धकः॥ कोविदारश्चमरिकःकुद्दालोयुगपत्रकः॥२२॥
सप्तपर्णोविशालत्वक्शारदोविषमच्छदः॥ आरग्वधोराजवृक्षश्चाम्याकश्चतुरंगुलः॥२३॥

वस्तुनः। प्राकृतसंज्ञयापिव्याख्यानेनदोषः। यदुक्तं। प्रयोजनार्थंवचनंतृतीयंतस्ततः। प्राकृतदोषइति। किंच। रसवीर्यविपाकेभ्योमूलात्पुष्पात्फलाद्दलात्। आकाराद्वाकालादेर्वनौषध्यर्थमुन्नयेदिति। आरग्वधः। "अरग्वधः। अर्ग्वध। अरग्वधोयवांपाकःकृतमालस्तथार्ग्वधइतिरत्नकोशः।" राजवृक्षः। चाम्याकः। "संपाकःशंपाकश्च। संपाकस्तर्कधृष्टेक्षुनाचतुरंगुलइतिमेदिनी।" चतुरंगुलः॥२३॥

आरेवतः। व्याधिघातः। कृतमालः। सुवर्णकः। "सुपर्णकः"। अष्टौ बाहवा इतिरव्यातस्य। जंबीरः। "जंबिरः" दंतशाठः। जंभः। जंभीरः। जंभलः "जंभरः" पंचकं जांबेर। "लघुरुडनिंबू" इतिरव्यातस्य ॥२४॥ वरुणः। वरणः। सेतुः। तिक्तशाखः। कुमारकः। पंचवायवर्णा इतिरव्यातस्य। पुन्नागः पुरुषः। तुंगः। केसरः। "केशरः" देववल्लभः। पंचकं उंडी। "उडणी उंडली" इतिरव्यातस्य ॥२५॥ पारिभद्रः। निंबतरुः। मंदारः। पारिजातकः। चत्वा

आरेवत व्याधिघात कृतमालसुवर्णकाः॥ स्युर्जंबीरे दंतशाठजंभजंभीरजंभलाः॥२४॥ वरुणोवरणःसेतुस्तिक्तशाकःकुमारकः॥ पुन्नागेपुरुषस्तुंगःकेसरोदेववल्लभः॥२५॥ पारिभद्रे निंबतरुर्मंदारःपारिजातकः॥ तिनिशेस्यंदनोनेमीरथद्रुरतिमुक्तकः॥२६॥ वंजुलश्चित्रकृच्चाथह्योपीतनकपीतनौ॥ आम्रातकेमधूकेतुगुडपुष्पमधुद्रुमौ॥२७॥ ७१

रिनिंबतरोः। "कडूनिंबइतिरव्यातस्य" तिनिशः। स्यंदनः। नेमी। "नेमिःपुल्लिंगस्त्रिनिशेनेमिश्चक्रभांतेस्त्रियांमपीतिरुद्रः" रथद्रुः। अतिमुक्तकः। वंजुलः। चित्रकृत्। ससतिवस इतिरव्यातस्य। अयंखदिरसदृशः कंटकरहितः। पीतनः। कपीतनः। आम्रातकः। "अम्रातकः। कपित्थोऽम्रातकोस्यफलेपशुहरीतकीतित्रिकांडशेषः।" अयंअंबाडा इतिरव्यातस्य। मधूकः। "मधुकः। मधूलः। मधुलः।" गुडपुष्पः। मधुद्रुमः॥२७॥ ७१ ॥

वानप्रस्थः। मधुष्ठीलः। पैचकंमोहाइतिख्याते। जलजेत्रमधूकेमधूलकइत्येकं। अन्यत्तु दीर्घपत्रः। "गिरिजेत्रमधूलकइत्यपिपाठः। गौर आकोमधूकोन्यो गिरिजःसोल्पपत्रक इतिमाधवः। मधूकोन्यो मधूलस्तुजलजोदीर्घपत्रक इतिस्वामी।" पीलुः। गुडफलः। स्त्रंसी। त्रीणिपीलुवृक्षस्य। "अक्कोडइतिप्रसिद्धस्य।" अयंगुर्जरदेशेप्रसिद्धः। गिरिसंभवे तस्मिन्पीलौ॥२८॥ अक्षोटः। "अक्षोडः। आक्षोडः। आक्षो-

वानप्रस्थमधुष्ठीलोजलजेत्रमधूलकः॥पीलौगुडफलःस्त्रंसीतस्मिंस्तुगिरिसंभवे॥२८॥ अक्षोटकंदरालौहावं कोदंतुनिकोचकः॥ पलाशेकिंशुकःपर्णोवातपोथोऽथवेतसे॥२९॥रथाभ्रपुष्पविदुरशीतवानीरवंजुलाः॥ ह्रीपरिव्याधविदुलोनादेयीचांबुवेतसे॥३०॥

क्षः। आक्षोटः।" कंदरालः। "कर्परालः" इतिद्वयं। "पर्वतपीलोःडोंगरी अक्कोडइतिख्यातस्य।" अंकोटः। "अंक्षोठः। अंकोलः।" निकोचकः। निकोटकः। द्वेअंकोटस्य। "पिस्ते इतिख्यातस्य।" पलाशः। किंशुकः पर्णः। वातपोथः। चत्वारिपलाशास्य। वेतसः॥२९॥ रथः। आभ्रपुष्पः। विदुलः। शीतः। "शीतं। शीतंतुषारवानीरबहुवारद्रुमेषुचेत्यजयात्" वानीरः। वंजुलः। सप्तकंवेतसस्य। "वेत इतिख्यातस्य।" परिव्याधः। विदुलः। नादेयी। अंबुवेतसः। चत्वारिजलवेतसस्य। नादेयीस्त्री॥३०॥

सोभांजनः। "सोभांजनः। शोभांजनः। शोभांजनः।" त्रियुः। तीक्ष्णगंधकः। अक्षीवः। "आक्षीवः। मोचकः। पंचकं शोगूल। "शोवगा शोगट" इति रव्यातस्य। असौ सोभांजनो रक्तो रक्तपुष्पश्चेन्मधुत्रियुरित्युच्यते। एकं। अरिष्टः। फेनिलः। द्वे रिठा इति रव्यातस्य। "अन्यत्वरिष्टमित्यपि रिष्टंस्यान्नञ्भावे पुंसिवद्वेचफेनिल इतिमेदिनी।"।२१॥ बिल्वः। शांडिल्यः। शैलूषः। मालूरः। श्रीफलः। पंचकं बिल्वस्य। पूक्षः। ज-

सौभांजनेत्रियुतक्षीरपर्कोक्षीव मोचकाः॥ रक्तेसौमधुत्रियुःस्यादरिष्टःफेनिलःसमौ॥२१॥
बिल्वेशांडिल्यशैलूषौमालूरश्रीफलावपि॥ पूक्षोजटीपर्कटीस्यान्न्यग्रोधोबहुपाद्वटः॥२२॥
गालवःशाबरोलोध्रस्तिरीटस्तिल्वमार्जनौ॥ आम्रश्चूतोरसालोसौसहकारोऽतिसौरभः॥२३॥

टी। "जटिः" पर्कटी। "पर्कटिः।" त्रयंपिंपरी इतिरव्यातस्य। अयंगोमांतकभाषयाकेच्छाइतिरव्यातः। तत्रजटीपर्कटिनाविन्नंतौ। पर्कटी ङीषंतेतिकश्चित्। न्यग्रोधः। बहुपात्। वटः। अगं [illegible] ॥२२॥ गालवः। शाबरः। "साबरः" लोध्रः। तिरीटः। तिल्वः। मार्जनः। षट्कं लोध्रस्य। "तत्राद्यौ श्वेतलोध्रे रोपारक्तलोध्रे इत्येके।" आम्रः। चूतः। रसालः। त्रयं आम्रस्य। असौ आम्रोतिसौरभश्चेत्सहकार इत्येकं॥२३॥ ४

कुंभः।उलूखलकं। कुंभेतिसंघातविगृहीतं।कुंभमितिक्लीबमपि।कार्मुकेवारनार्यांचकुंभःक्लीबंतुगुग्गुलाविति।रभसः।कुंभंत्रिवृत्तिगुग्गुलाविति।विश्वप्रकाशः। उदूखलमित्यपि।उदूखलंगुग्गुलौस्यादुलूखलेपिनद्वयोरितिमेदिनी।उलूखलेगुग्गुलौचक्लीबमुक्तमुदूखलमितिरुद्रः। अत्रपक्षेकुंभंचोदूखलमितिपाठःकर्त्तव्यः।कुंभोलूःखलकं।कुंभोलूखलकं।कुंभोलूखलाकाराद्वृक्षकोद्यान्निर्यातः।कुंभोलूखलकंकुंभंकुंभोलुखलकंवरमितिवाचस्पतिः। कौशिकः।गुग्गुलुः।"गुग्गुलः"पुरः।पंचगुग्गुलवृक्षस्य।पुरोदंतः। दोलुः।"सेलुः"।श्लेष्मातकः।शीतः।उद्दालः।

कुंभोलूखलकंक्लीबेकौशिकोगुग्गुलुःपुरः॥दोलुःश्लेष्मातकःशीतउद्दालोबहुवारकः॥३४॥
राजादनंप्रियालःस्यात्सन्नकद्रुर्धनुःपटः।गंभारीसर्वतोभद्राकाश्मरीमधुपर्णिका॥३५॥

बहुवारकः।पंचदोलट।"भोंकरी"इतिख्यातस्य॥३४॥राजादनं।"राजातनः।राजादनः।राजादनंप्रसरकोराजातनइतिवाचस्पतिः।प्रियालः। "पियालश्चप्रियालकइतिमाधवः।"सन्नकद्रुः।धनुःपटः।चत्वारिचारइतिख्यातस्य।धनुः।पटइतिव्यस्तमपि।धनुःप्रियालेनानस्त्रीराट्टिभेदेशारासनइतिमेदिनी।पटःप्रियालवृक्षेनासुचेलेपुन्नपुंसकमितिरभसः।गंभारी।"कंभारी"।सर्वतोभद्रा।काश्मरी।"काश्मर्री"मधुपर्णिका॥३५॥

श्रीपर्णी। भद्रपर्णी। काश्मर्यः। सप्तशिवणीइतिख्यातस्य। काश्मर्योः द्वंतःपुंसि। कर्कधूः। "कर्कधुः" बदरी। कोलिः। "कोली।" कोला। त्रीणिबो
रइतिख्यातस्य। तत्रकर्कधूर्द्वयोः स्त्रीपुंसयोः। कोलं। कुवलं। फेनिलं॥२६॥ सौवीरं। "यत्रिसौवीर्यौ" बदरं। घोंटा। षट्कं बदरीफलस्य। घोंटा
शब्दोबदरीसदृशोवृक्षभेदेपिवर्तते। "बदरीसदृशाकारोवृक्षःसूक्ष्मफलोभवेत्। अटव्यामेवसाघोंटा गोंपघंटेतिचोच्यतइतिसभूत्यक्तेः।"
स्वादुकंटकः। विकंकतः। "वैकंकतः।" स्रुवावृक्षः। ग्रंथिलः। व्याघ्रपात्। पंचविकंकतस्य। "वेहडीइतिख्यातस्य।" अयंयज्ञियवृक्षभेदः

श्रीपर्णीभद्रपर्णीचकाश्मर्यश्चाप्यथद्वयोः॥कर्कंधूर्बदरीकोलिःकोलंकुवलंफेनिले॥२६॥
सौवीरंबदरंघोंटाप्यथस्यात्स्वादुकंटकः॥विकंकतःस्रुवावृक्षोग्रंथिलोव्याघ्रपादपि॥२७॥
ऐरावतोनागरंगोनादेयीभूमिजंबुका॥तिंदुकैःस्फूर्जकःकालस्कंधश्चाथितिसारके॥२८॥

करनाटकभाषयाहलुमाणिकाइतिख्यातः॥२७॥ ऐरावतः। नागरंगः। नादेयी। भूमिजंबुका। चत्वारिनागरंगस्य। नारिंगइतिख्यातस्य।
अत्रपूर्वद्वयंनागरंग्याः। अपरद्वयंभूमिजंबाइत्यपिमतं।" तिंदुकः। "तिंदुकी।" स्फूर्जकः। कालस्कंधः। द्यितिसारकः। चत्वारितेंदू।
टेंभुरणीइतिख्यातस्य॥२८॥

काकेंदुः। कुलकः। काकतिंदुकः। काकपीलुकः। चत्वारि काकतेंदू। "काकटेंभुरणी. कडुटेंभुरणी इति. कुचला. काजरा" इतिरव्यातस्य। गोलीढः। झाटलः। घंटा। पाटलिः। मोक्षः। मुष्ककः। पंच घंटापाटलेः। "मोरवा इतिप्रसिद्धस्य। घंटा। पाटलिरितिनामद्वयंवा।"॥३९॥ तिलकः। क्षुरकः। श्रीमान्। त्रयंतिलवा "तिलकपुष्प" इतिरव्यातस्य। पिचुलः। झावुकः। द्वे झावुकस्य। तिलकभेदोयं। "कोबी इतिरव्यातेयमितिकेचित्।"

काकेंदुःकुलकःकाकतिंदुकःकाकपीलुके॥गोलीढोझाटलोघंटापाटलिर्मोक्षमुष्ककौ॥३९॥
तिलकःक्षुरकःश्रीमान्समौपिचुलझावुकौ॥श्रीपर्णिकाकुमुदिकाकुंभीकेडर्यकह्लौ॥४०॥
ऋमुकःपट्टिकारव्यःस्यात्पट्टीलाक्षाप्रसादनः॥तूदस्तुयूपःऋमुकोब्रह्मण्योब्रह्मदारुच॥४१॥

श्रीपर्णिका। कुमुदिका। कुंभी। केडर्यः। कह्लः। पंच कुंमल। "कुंभ्याइति. कायफल" इतिरव्यातस्य। कुंभीस्त्री॥४०॥ ऋमुकः। पट्टिकारव्यः पट्टी। लाक्षाप्रसादनः। चत्वारिलोहितलोध्रस्य। पट्टिकाआरव्यायस्यसः पट्टाभ्यांतिपट्टीइन्नंतः। "ङीषंतोवा।" तूदः। "तूदः" यूपः ऋमुकः। ब्रह्मण्यः। ब्रह्मदारु॥४१॥

तूलं। "तूलोपि" षट्पदअवस्थाकारेवृक्षभेदे। "पारसापिंपलइतिख्यातस्य।" नीपः। प्रियकः। कदंबः। हरिप्रियः। चत्वारिकळंबइतिख्यातस्य। वीरवृक्षः। अरुष्करः। अग्निमुखी। भल्लातकी। चत्वारि "बिबबा. भिलावाइतिख्यातस्य।" ॥४२॥ गर्दभांडः। कंदरालः। कपीतनः। सुपार्श्वकः। पूक्षः। पंचगजहंड "खालीपिंपरी" इतिख्यातस्य। तिंतिडी। "तिंतिली। अम्लिका। चाम्लिका। चिंचा। तिंतिडीका। चतिंतिली। तिचंद्रः। चिंचा। आम्लिका। "आम्लिका। आम्लीका। तिंतिडी। चाम्लिका। चिंचा। तिंतिडीका। कपिप्रियेतिवाचस्पतिः।" त्रयंचिंचायाः। पीतसारकः।

तूलंचनीपप्रियककदंबास्तुहालिप्रिये॥ वीरवृक्षोऽरुष्करोऽग्निमुखीभल्लातकीत्रिषु॥ ४२॥
गर्दभांडेकंदरालकपीतनसुपार्श्वकाः॥ पूक्षश्चमिंतिडीचिंचाऽम्लिकाऽथोपीतसारके॥४३॥
सर्जकासनबंधूकपुष्पप्रियकजीवकाः॥ सालेतुसर्जकार्ष्यौचवकर्णकाःसस्यसंवरः॥४४॥

॥४३॥ सर्जकः। असनः। "आसनेपिठेभस्कंधयोःक्लीबमासनंनातुजीवकइतिरुद्रभसो।" बंधूकपुष्पः। प्रियकः। जीवकः। षट्पदं असपाइतिख्यातस्य। "तत्रकांडेअसणः पाले असणइतिद्वौभेदौख्यातौ।" सालः। "ख्यालः" सर्जः। कार्ष्यः। "कार्ष्यः" अवत्थकर्णकः। सस्यसंवरः "शस्यसंवरः" पंचशालवृक्षस्य "सालई इतिप्रसिद्धस्य॥ ४४॥

नदीसर्जः। वीरतरुः। इंद्रद्रुः। ककुभः। अर्जुनः। पंचकमर्जुनवृक्षस्य। "अर्जुनसादडाइत्यपि वदंति।" राजादनः। "राजादनं। राजादनंक्षीरिकायांप्रियालेकिंशुकेऽपिचेतिमेदिनी।" फलाध्यक्षः। क्षीरिका। त्रयंखिरणीइतिख्यातस्य॥४५॥ इंगुदी। तापसतरुः। द्वेइंगुद्याः। "हिंगणबेडइतिख्यातायाः।" द्वयोरित्यक्त्वात्पुंसि तु इंगुदः। भूर्जः। चर्मी। मृदुत्वक्। त्रीणिभूर्जवृक्षस्य। पिच्छिला। पूरणी। मोचा। स्थिरायुः। शाल्मलिः। "शाल्मलिः। शाल्मलः।" पंचसांवरीइतिख्यातस्य। द्वयोःस्त्रीपुंसयोः। "स्थिरमायुर्यस्याःस्थिरायुः। षष्टिवर्षसहस्रा

नदीसर्जोवीरतरुरिंद्रद्रुःककुभोऽर्जुनः॥राजादनःफलाध्यक्षःक्षीरिकायामथद्वयोः॥४५॥
इंगुदीतापसतरुर्भूर्जेचर्मिमृदुत्वचौ॥पिच्छिलापूरणीमोचास्थिरायुःशाल्मलिर्द्वयोः॥४६॥
पिच्छातुशाल्मलीवेष्टरोचनःकूटशाल्मलिः॥चिरिबिल्वोनक्तमालःकरजश्चकरंजके॥४७॥

णिवनेजीवतिशाल्मलिरितिवचनात्।"॥४६॥ शाल्मल्यावेष्टेनिर्यासेपिच्छेत्येकं। "सांवरीचाडीकइतिख्यातस्य। क्काथः कषायोनिर्यूषोनिर्यासोवेष्टकस्तथेतिरभसः।" रोचनः। कूटशाल्मलिः। द्वेकाष्ठीसांवरीइतिख्यातस्य। चिरिबिल्वः। "चिरबिल्वः।" नक्तमालः। "रक्तमालः" करजः। करंजकः। चत्वारिकरंजवृक्षस्य॥४७॥

प्रकीर्यः।पूतिकरजः"पूतीकरजः।पूतीकरंजः।पूतीकरंजःस्कमनास्तथाकलहनाशनइतिरुद्रः।" पूतिकः।"पूतीकः"कलिमारकः।"कलिकारकइत्यपिपाठः।" चत्वारिकांटेकरंज "घाणेराकरंज" इतिख्यातस्य।षट्ग्रंथः।मर्कटी।अंगारवल्लरी।एतेत्रयःकरंजभेदाः।"अंगारवर्णपर्णावल्लरीअंगारवल्लरी।"॥४८॥ रोही।रोहितकः।प्लीहशत्रुः।दाडिमपुष्पकः।चत्वारिरक्तरोहिडाइतिख्यातस्य।गायत्री।"वन्हिगा-

प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः॥ करंजभेदाः षट्ग्रंथो मर्कट्यंगारवल्लरी॥४८॥
रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः॥ गायत्री बालतनयैः खदिरो दंतधावनः॥ ४९॥

यत्रिणातथेतिवैद्यकादिन्नंतोपि।" बालतयः।खदिरः।दंतधावनः।चत्वारिखदिरस्य।"गायत्रीस्त्रियांगायत्रीखदिरेस्त्रीस्यादितिरभसः। बालपत्रश्चेतिप्राचांपाठः।यदाह।खदिरोरक्तसारश्चगायत्रीदंतधावनः। कंटकीबालपत्रश्चजिन्हशल्यःक्षतिःक्षयइतित्रिकांडशेषेष्येवमेवपाठः॥" ४९॥

अरिमेदः।विट्खदिरः।द्वेदुर्गंधिखदिरस्य।विट्गंधिः।खदिरोविट्खदिरः।सितेशुक्लसारेखदिरेकदरः।सोमवल्कः।इतिद्वयं।व्याघ्रपुच्छः।गंधर्वहस्तकः॥५०॥एरंडः।उरूवूकः।"उरुवुकः।रूवूकः।रूवुकः।" रुचकः।चित्रकः।चंचुः।पंचांगुलः।मंडः।वर्धमानः।व्यडंबकः "व्यडंबनोपि" एकादशएरंडस्य।मंडयतीतिमंडः।कश्चिदमंडइतिपदमाह।"आमंडइत्यपि।गंधर्वहस्तकोमंडआमंडोव्याघ्रपुच्छक

अरिमेदोविट्खदिरेकदरःखदिरेसिते।।सोमवल्कोप्यथव्याघ्रपुच्छगंधर्वहस्तकौ।।५०।।
एरंडउरूवूकश्चरुचकश्चित्रकश्चसः।।चंचुःपंचांगुलोमंडवर्द्धमानव्यडंबकाः।।५१।।
अल्पाद्वामीद्वामीरस्याच्छमीसक्तुफलाशिवा।।पिंडीतकोमरुबकःवसनःकरहाटकः।।५२।।
द्वाल्यश्चमदनेद्वाक्षपादपःपारिभद्रकः।।भद्रदारुद्रुकिलिंपीतदारुचदारुच।।५३।।

इतिनारपालः"॥५१॥याल्पाख्यल्पाकाराद्वामीसद्वामीरइत्येकं।द्वामी।सक्तुफला।"सक्तुफली"शिवा।त्रयंद्वाभ्यां।पिंडीतकः।मरुबकः।वसनः।करहाटकः॥५२॥द्वाल्यः।मदनः।षट्पुंगोद्वाइतिख्यातस्य।द्वाक्षपादपः।पारिभद्रकः।भद्रदारु।द्रुकिलिं।पीतदारु।दारु॥५३॥

पूतिकाष्ठं।एतानिसप्तदेवदारूणि। पाटलिः।"पाटली। पाटला। मोघा।"आमोघा। अलिप्रियाविशालाग्राप्यमोघापाटलिर्द्वयोःइतिवाचस्पतिः।" काचस्थाली।"कालास्थालीफलेरुहेत्यपिपाठस्तत्रकाला। स्थाली। इतिपदद्वयं। कालातुकृष्णवृंतारव्यामंजिष्ठानीलिकासुचेतिमेदिनी।स्थालीस्यात्पाटलोरवयोरितिमेदिनीविश्वप्रकाशौ।" फलेरुहा॥५४॥ कृष्णवृंता। कुबेराक्षी।सप्तपाटलायाः।"पाढलीइतिख्यातायाः।"

पूतिकाष्ठंचसप्तस्युर्देवदारुण्यथद्वयोः॥पाटलिःपाटलामोघाकाचस्थालीफलेरुहा॥५४॥
कृष्णवृंताकुबेराक्षीद्वयामातुमहिलाह्वया॥लतागोवंदिनीगुंद्राप्रियंगुःफलिनीफली॥५५॥
विष्वक्सेनागंधफलीकारंभाप्रियकश्चसा॥मंडूकपर्णपत्रोर्णनटकट्वंगटुंटुकाः॥५६॥

तत्रपाटलिर्द्वयोः। द्वयामा।महिलाह्वया। लता।गोवंदिनी।गुंद्रा। प्रियंगुः।फलिनी।फली॥५५॥विष्वक्सेना।गंधफली।कारंभा।प्रियकः॥ द्वादशप्रियंगुवृक्षे।"वाघांटाइतिख्याते।" महिलायाःस्त्रियाःआह्वयइवआह्वयोयस्याःसा।महिलायाःसमयनामभिरभिधीयतइत्यर्थः। तत्रप्रियकःपुंसि। शेषंस्त्रियां। मंडूकपर्णः।पत्रोर्णः। नटः।कट्वंगः।टुंटुकः॥५६॥

स्योनाकः।"श्योनाकः।शोणाकः" ऋकनासः।ऋक्षः।दीर्घवृंतः।कुटंनटः। शोणकः"शोनकः" अरलुः।"अरदुः।" द्वादश दंडिका।"दिं
डा" इतिख्यातस्य।क्वचिदर्यंटेंटू इतिख्यातः। तिन्यफला।आमलकी॥५७॥अमृता।वयस्था।चत्वारिआमलक्याः।त्रिषिक्युक्तेः।आमलकः
आमलकं। विभीतकः। अक्षः।तुषः।कर्षफलः।भूतावासः। कलिद्रुमः। षट्कुंधाडिंगइतिख्यातस्य। क्वचिदर्यंबेहडाइतिख्यातः।त्रिलिंगत्वाद्वि
भीतकीविभीतकमितिच॥५८॥ अभया।अव्यथा। पथ्या।कायस्था।"अत्रवयस्थेत्यपिपाठः।" पूतना।अमृता। हरीतकी। हैमवती।

स्यौनाकश्ऋकनासस्त्वृक्षो दीर्घवृंतकुटंनटाः॥ शोणकश्चारलौतरदुःफलात्वामलकी त्रिषु॥५७॥
अमृताचवयस्थाचत्रिलिंगस्तुविभीतकः॥ नाक्षस्तुषःकर्षफलोभूतावासःकलिद्रुमः॥५८॥अ-
भयात्वव्यथापथ्याकायस्थापूतनामृता॥ हरीतकीहैमवतीचेतकीश्रेयसीशिवा॥५९॥पीतद्रुःस
रलःपूतिकाष्ठंचाथद्रुमोत्पलः॥ कर्णिकारःपरिव्याधोलकुचोलिकुचोडहुः॥६०॥ चेतकी।श्रेयसी।शि
वा।एकादशाहिरडाइतिख्यातायां।हरीतक्यां॥५९॥पीतद्रुःसरलः। पूतिकाष्ठं। त्रयंसरलस्य "देवदार इतिख्यातस्य।" द्रुमोत्पलः।कर्णिकारः।
परिव्याधः।त्रयंकर्णिकारस्य।"पांगारा इतिचख्यातस्य।"लकुचः।लिकुचः।डहुः।"डहूः" त्रयंओंडइतिख्यातस्य।"क्षुद्रपनसस्येत्यपि
मतं"॥६०॥

पनसः। "फलसः" कंटकिफलः। "कंटकफलः" हेपनस इतिप्रसिद्धस्य। निचुलः। हिज्जलः। "इज्जलः। निचुलेज्जलहिज्जला इतिरभसः।" अंबुजः। त्रीणि इजर इतिख्यातस्य। जलवेतसभेदस्य। "स्थलवेतसस्येत्यपिक्वचित्। निचुलस्थलवेतस इतिशब्दार्णवात्। समुद्रफलस्येत्यपिमतं।" काकोदुंबरिका। फल्गुः। मलयूः। "मलपूः। मलात्यापातुनाति। मलापूरित्यपि। मलधारणेबाहुलकादापूः"। जघनेफला। च

पनसःकंटकिफलोनिचुलोहिज्जलोंऽबुजः॥ काकोदुंबरिकाफल्गुर्मलयूर्जघनेफला॥६१॥
अरिष्टःसर्वतोभद्रहिंगुनिर्यासमालकाः॥ पिचुमंदश्चनिंबेऽथपिच्छिलाऽगुरुरिंद्रापा॥६२॥

त्वारिकाळाउंबर "बोरवाडा.रवर्वत" इतिख्यातस्य। जघनेबुध्नेफलान्यस्याजघनेफला। पूर्वोत्तरसाहचर्यात्फल्गुरपिस्त्री। मलयूरिति तालव्यांतं॥६१॥ अरिष्टः। सर्वतोभद्रः। हिंगुनिर्यासः। मालकः। पिचुमंदः। "पिचुमर्दः" निंबः। षड्वृंनिंबस्य। हिंगुगंधिनिर्यासोयं। "हिंगुनिर्यासइत्येषनिंबेहिंगुरसेपिचेतिमेदिनी।" पिच्छिला। अगुरुरिंद्रापा॥ ६२॥

कपिला। भस्मगर्भा। चत्वारिसिंसवाइतिख्यातस्य। अगुरुइतिपृथग्पदंवा। "तलुन्नपुंसकं। अगुरुक्लीबेशिंशपायामितिरुद्रः। अगुरुःस्याच्छिंशपायामितिविश्वप्रकाशः। शिंशपातंत्रयंशिशवाइतिख्यातस्य। याकपिलाकृष्णवर्णपुष्पासाभस्मगर्भेत्येकमित्यन्ये। काष्ठाशिंसवाइतिप्रसिद्धस्य।" शिरीषः। कपीतनः। भंडिलः। "भंडिरः। भंडीलः। भंडीलोभंडिरोनेतिवाचस्पतिः।" त्रयंशिरसइतिख्यातस्य। चंपेयः। चंपकः। हेमपुष्पकः। त्रयंकुडचापा "सोनचांपा" इतिख्यातस्य॥ ६३॥ एतस्यचंपकस्यकलिकागंधफलीत्येकं। तथाचप्र-

कपिलाभस्मगर्भासाशिरीषस्तुकपीतनः॥ भंडिलोप्यथचांपेयश्चंपकोहेमपुष्पकः॥ ६३॥
एतस्यकलिकागंधफलीस्यादथकेसरे॥ बकुलोवंजुलोशोकेसमौकरकदाडिमौ॥ ६४॥

योगः। नखदूपदोगंधफलीमजिघ्रदितिकेसरः। "तालव्यमध्योपि।" बकुलः। द्वेओंबळ। "बकूळ" इतिख्यातस्य। वंजुलः। अशोकः। द्वेअशोकस्य। करकः। दाडिमः। "दाडिंबः। दालिमः। डालिमः। दाडिंबसारपिंडीरस्वाद्वम्लरुक्कबल्लभाइतिरभसः। त्रिकांडशेषोप्येवं।" द्वे दाडिमस्य। डाळिंबइतिख्यातस्य॥ ६४॥

चांपेयः। केसरः। नागकेसरः। "स्वर्णेभसर्पाख्यौनागकेसरः षट्पदप्रियः इतिरभसः।" कांचनाह्वयः। चत्वारिनागचांपाइतिख्यातस्य। कांचनाह्वयः स्वर्णपर्यायनामकइत्यर्थः। जया। जयंती। तर्कारी। नादेयी। वैजयंतिका। पंचटांहाकळ। "थोरऐरण" इतिख्यातायाः ॥६५॥ श्रीपर्णी। अग्निमंथः। कणिका। गणिकारिका। जयः। पंचनखेल इतिख्यातस्य। दशाप्येकस्यपर्यायाइत्येके। कुटजः। वाक्षः। वत्स-

चांपेयः केसरो नागकेसरः कांचनाह्वयः॥ जया जयंती तर्कारी नादेयी वैजयंतिका॥ ६५॥
श्रीपर्णमग्निमंथः स्यात् कणिका गणिकारिका॥ जयोथ कुटजः वाक्षो वत्सको गिरिमल्लिका॥ ६६॥
एतस्यैव कलिंगेंद्रयवौ भद्रयवं फले॥ कृष्णपाकफलाविघ्नकृषेणाः करमर्दके॥ ६७॥

कः। गिरिमल्लिका। चत्वारिकुडाइतिप्रसिद्धस्य॥६६॥ एतस्यैवकुटजस्यफलेकलिंगं। इंद्रयवं। भद्रयवमितित्रीणि। "कलिंगः। इंद्र-यवः। कलिंगेंद्रयवःपुमानि त्यमरमाला। कलिंगा। तत्रैवस्त्रीकांडेपाठात्।" कृष्णपाकफलः। अविघ्नः। "आविघ्नः" कृषेणः। करमर्दकः। चत्वारिकारमर्दकस्य। करवंइतिख्यातस्य। कृष्णपाकफलमस्यकृष्णपाकफलः॥ ६७॥

कालस्कंधः। तमालः। तापिच्छः। "तापिंजः" त्रयंतमालस्य। सिंदुकः। "सिंधुकः" सिंधुवारः। इंद्रसुरसः। "इंद्रकरिसः। निर्गुंडी। "निर्गुंठी" इंद्राणिका। पंचसिंदुवारस्य। सिंधुआरी। निगडी। निर्गुंडी इतिख्यातस्य॥६८॥ वेणी। गरा। गरी। "खरेत्यपि। अगरीत्यपि। देवताडे खरातीक्ष्णे त्रिषुस्याद्वर्दभेयुगानितिरभसः। खरागरीतिसमस्तमपि। मूषिकाविषघ्नत्वाद्वरमागिरतिगरागरीत्येकंपदमपि। तदुक्तं।

कालस्कंधस्तमालःस्यात्तापिच्छोप्यथसिंदुके॥सिंदुवारेंद्रसुरसोनिर्गुंडीइंद्राणिकेत्यपि॥६८॥
वेणीगराग्गरीदेवताडोजीमूतइत्यपि॥ श्रीहस्तिनीतुभूरुंडीतृणशून्यंतुमल्लिका॥६९॥

जीमूतकोदेवताडोवज्रकेचोगरागरीति।" देवताडः। जीमूतः। पंचदेवतालस्य। देवताली। "देवडंगरी" इतिख्यातस्य। श्रीहस्तिनी। भूरुंडी। हेहस्तिकर्णाभपत्रस्य। शाकभेदस्यसिरिहस्तिनी। "थोरकुरडू" इतिख्यातस्य। तृणशून्यं "तृणशूलेगुल्मेसाधु। तत्रसाधुरियतू। मल्लिकाहंसभेदेस्यात्तृणशून्येपिमल्लिकेतिरुद्रः।" मल्लिका॥६९॥

भूपदी। ग्रीतभीरुः।"ग्र तभीरुः। मल्लिका ग्रातभीरुश्वगवाद्यभिद्रमल्लिका। ग्रीतभीरुर्मदार्यंतीभूपदी तृणशून्यकमितिवाचस्पतिः।" चत्वारि मल्लिकायाः। "मोगरी इतिख्यातायाः।" सैव मल्लिका वनोद्भवा आस्फोटेत्युच्यते। एकं। "रानमोगरी इतिख्यातस्य। आस्फोतेत्यपि। आस्फोतागिरिकर्ण्यां च वनमल्ल्यां चयोषितीतिमेदिनी।" ग्रीफालिका। "ग्रीफालिका।" स्रुवहा। निर्गुंडी। नीलिका। चत्वारि कृष्णपुष्पायाः निं

भूपदीग्रीतभीरुश्वसेवास्फोटावनोद्भवा।।ग्रेफालिकातुस्रुवहानिर्गुंडीनीलिकाचसा।७०।।
सितासोग्रवेतसुरसाभूतवेग्रयथमागधी।।गणिकायूथिकांबष्ठासापीताहेमपुष्पिका।।७१।।

र्गुंड्याः। "रानानिर्गुंडीइतिख्यातायाः। इयंग्रवेतपुष्पा"॥७०॥ ग्रसौनिर्गुंडी सिताग्रवेतसुरसा। भूतवेग्रीइति चोच्यते। "इयंकानरीनिर्गुंडी इतिख्यातायाः।" मागधी। गणिका। यूथिका। ग्रंबष्ठा। चत्वारि यूथिकायाः। जुईइतिख्यातायाः। सायूथिकापीतापीतपुष्पाचेत् हेमपुष्पिकास्यात्। एकं॥७१॥

अतिमुक्तः। पुंड्रकः। वासंती। माधवी। लता। पंचकुंदभेदस्यकुसरीइति "कस्तूरमोगरा. मधुमाधवीइतिच।" ख्यातस्य। अतिमुक्तादि हूयंमल्लिकाभेदस्येत्येके। "माधवीलतेत्येकंपदमपि" सुमनाः। मालती। जातिः। "जाती। जातीफलेचमालत्यामितिमेदिनी।" त्रीणिजातेः जाई "चमेली मोठी बेवलजाई पीतवर्णजाई" इतिख्यातायाः। तत्रसुमनाःसंतः। "टाबंनोपि।सुमनायाश्चपत्रेणेतिसुक्षुतेर्द्वयोरपि।"

अतिमुक्तःपुंड्रकःस्याद्वासंतीमाधवीलता ॥ सुमनामालतीजातिःस
मलानवमालिका ॥७२॥ माध्यंकुंदंरक्तकस्तुबंधूकोबंधुजीवकः ॥

समला। नवमालिका। "नवमल्लिका" हूनेबाची "थोरमोगरा. वटमोगरा. वेलमोगरा." इतिख्यातायाः॥७२॥ माध्यं। कुंदं। "कुंदः। कुंदोमाध्येस्त्रीमुकुंदभ्रमिनिध्यंतरेपुचेतिमेदिनी।" हूकुंदस्य। रक्तकः। बंधूकः। "बंधुकः।" बंधुजीवकः। त्रीणि बंधुकस्य। "दुपारीइतिख्यातस्य।"

सहा। कुमारी। तरणिः। त्रीणि कुमारीइति "कांटेरोंवती। लघुरानसेंवती रोंवती गुलाब" इतिरत्नमालायाः कुमार्याः। अम्लानः। महासहा। हे आबोलीइतिख्यातायाः। "तत्राम्लान इत्येकं। कुरंटकमात्रस्य। कांटेरोंवती. थोरसानरोंवती इत्याख्यायाइतिकेचित्।" ॥७३॥ तत्राम्लानेपीतेरक्तेकुरबक इत्येकं। "कुरुबक इत्यपि।" तत्राम्लानेपीतवर्णेकुरंटक इत्येकं। "कुरंटक इत्यपि" नीलीनीलवर्णायाझिंटीतत्रबाणा।

सहाकुमारीतरणिरम्लानस्तु महासहा॥७३॥तत्रपीतेकुरबकस्तत्रपीतेकुरंटकः॥नीलीझिंटीद्वयोर्बाणादासीचार्तगलश्चसा॥७४॥सेरेयकस्तुझिंटीस्यात्तस्मिन्कुरबकोरुणे॥

दासी। अंतर्गलः। "आर्तगलः" इतित्रयं। द्वयोरित्युक्तेर्बाण इत्यपि। "नीलाझिंटीनीलझिंटीचेत्यपिपाठः।" ॥७४॥ सेरेयकः। "सेरीयकः सेरीयकः सहचरः सेरेयश्चसहाचरः। पीतोरक्तोथनीलश्चकुसुमैस्तंविभावयेत्॥ पीतःकुरंटकोज्ञेयोरक्तःकुरबकःस्मृतः॥नीलआर्तगलोदासीबाणओदनपाक्यपीत्युक्तं" झिंटी। द्वयंझिंटीमात्रस्य। कोरांटी इतिख्यातस्य। तस्मिन्सेरेयके रुणेरक्तवर्णे कुरबक इत्येकं॥ ७

यापीतपुष्पाझिंटीसाकुरंटकइत्युच्यते। तस्मिन्कुरंटकेसहचरीत्यपि।द्वयोरित्युक्तेसहचरइत्यपि॥७५॥ओंड्रपुष्पं।जपापुष्पं।द्वेजास्वंदइतिख्याते।जवेत्यपि।जवायांतुजपास्त्रियामितिधर्मदासः।ओंड्रपुष्पेपिवृक्षेपिजवाशब्दःप्रकीर्तितइतित्रिकांडशेषात्।ओंड्रपुष्पस्यवृक्षस्यापिचजवेत्यभिधानं।यत्तिलस्यपुष्पंतद्वज्रपुष्पसंज्ञकं। एकं। प्रतिहासः।"प्रतीहासः" इतप्रासः। चंडातः। हयमारकः॥७६॥

कांडः२

पीताकुरंटकोझिंटीतस्मिन्सहचरीद्वयोः॥७५॥ओंड्रपुष्पंजपापुष्पंवज्रपुष्पं तिलस्ययत्॥प्रतिहासइतप्रासचंडातहयमारकाः॥७६॥करवीरेकरीरेतुककर ग्रंथिलाद्वयोः॥उन्मत्तःकितवोधूर्त्तोधत्तूरःकनकाह्वयः॥७७॥ ७

करवीरः। पंचकंकरवीरस्य।कण्टेरइतिख्यातस्य। करीरः।ककरः।ग्रंथिलः।त्रीणिकरीरस्यकारवी"नेबनी"इतिचख्यातस्य।उन्मत्तः।कितवः।धूर्तः।धत्तूरः।"धुस्तूरः।धुस्तुरः।धुस्तूरः।धुतूरः।धुस्तुरस्तुंडशेषाधुस्तुरःकनकाह्वयइतिशब्दार्णवः।उन्मत्तउन्मादवतिधुत्तूरमुचुकंदयोरितिविश्वप्रकाशः। मदनःस्मरवसंतदुमिद्धूस्तुरस्त्रिक्थकइतिमेदिनी।"कनकाह्वयः॥७७॥

मातुलः। मदनः। सप्तकंधत्तूरस्य। धोतराइतिख्यातस्य। कनकाह्वयः। स्वर्णपर्ययनामकः। अस्य धत्तूरस्य फले मातुलपुत्रकइत्येकं। फल
पूरः। बीजपूरः। रुचकः। मातुलुंगकः। चत्वारिमातुलिंगस्य महाळुंगइतिख्यातस्य॥७८॥ समीरणः। मरुबकः। अस्थपुष्पः। फणिज्जकः। जं-
बीरः "जंभीरः" पंचदेशांतरे जंबीर इतिख्यातस्य। स्वल्पपर्णस्य पर्णासभेदस्य। "श्वेतमरवा इतिचख्यातस्य।" पर्णासः। कठिंजरः। कु

मातुलोमदनश्चास्यफलेमातुलपुत्रकः॥ फलपूरोबीजपूरोरुचकोमातुलुंगके॥७८॥
समीरणोमरुबकःअस्थपुष्पःफणिज्जकः॥ जंबीरोऽथपर्णासेकठिंजरकुठेरकौ॥७९॥
सितेऽर्जकोऽत्रपाठीतुचित्रकोवह्निसंज्ञकः॥ अर्काह्वयस्त्वर्कआस्फोटैगणरूपविकीरणाः॥८०॥

ठेरकः। त्रीणिपर्णासस्य। "आजबलेतिबाबरीइतिचख्यातस्य।"॥७९॥अत्रपर्णासेसितेकांडपुष्पाभ्यांश्वेतेअर्जकइत्येकं। पाठी। चि-
त्रकः। वह्निसंज्ञकः। त्रयंचित्रकस्य। चिताइतिख्यातस्य। तत्रपाठीइत्येनः। वह्निसंज्ञकोवह्निपर्यायनामकः। अर्काह्वयः। वस्फकः। "व
सूकः।" आस्फोटः। "आस्फोनः। आस्फोनस्तु पुमानर्के पर्णेस्यात्कोविदारक इतिमेदिनी।" गणरूपः। विकीरणः। "विकिरणः।"॥८०॥

मंदारश्चार्कपर्णोऽत्र रुक्कुऽलर्कस्तु तापसौ ॥ शिवमल्लीपाद्रुपत एकाशीलोऽथ बुक्कोवसुः ॥८१॥
वंदा वृक्षादनी वृक्षरुहा जीवंतिके त्यपि ॥ वत्सादनीछिन्नरुहा गुडूचीतंत्रिकाऽमृता ॥८२॥
जीवंतिका सोमवल्लीविशल्यामधुपर्ण्यपि ॥ मूर्वा देवीमधुरसा मोरटा तेजनी स्वधा ॥८३॥

लताविशेषस्य वेदर्ल "वेटागुळी.बांधें" इतिख्यातस्य। वत्सादनी। छिन्नरुहा। गुडूची। "गुडूची" तंत्रिका। अमृता॥८२॥ जीवंतिका। सोमवल्ली। विशल्या। मधुपर्णी। नवगुडूच्याः। "गुलवेळ" इतिख्यातायाः। मूर्वा। "मूर्वा" देवी। मधुरसा। मोरटा। तेजनी। स्वधा। "स्वुधा"॥८३॥

मधूलिका। मधुश्रेणी। गोकर्णी। पीलुपर्णी। दशामूर्वायाः। मूर इतिख्यातायाः। इयंभनुर्गुणा। क्योगिनी। इयंमोरवेल इतिप्रसिद्धस्येत्येके। गोक्षा। अंबष्ठा। विडूकर्णी। "अविध्यकर्ण्यपि।" स्थलपद्मिनी। श्रेयसी। रसा॥ ८४॥ एकाक्षीला। पापचेली। प्राचीना। वनतिक्तिका। दशापाठायाः। पाडबली। "पाहाडमूळ" इतिख्यातायाः। कटुः। कटंभरा। "कटंबरा" भद्रोकरोहिणी। "व्यस्तमपीदंनाम। अ-

मधूलिकामधुश्रेणीगोकर्णीपीलुपर्ण्यपि॥ पाठांबष्ठाविडूकर्णीस्थापनीश्रेयसीरसा॥ ८४॥
एकाक्षीलापापचेलीप्राचीनावनतिक्तिका॥ कटुःकटंभराभद्रोकरोहिणीकटुरोहिणी॥ ८५॥
मत्स्यपित्ताकृष्णभेदीचक्रांगीशाकुलादनी॥ आत्मगुप्ताऽजहाऽण्डाकंडूराप्रावृषायणी॥ ८६॥

द्रोकाकटुरोहिण्या मद्रोकोबंजुलद्रुम इतिरभसः। रोहिणीकटुरोहिण्यामितिरुद्रः।" कटुरोहिणी॥ ८५॥ मत्स्यपित्ता। कृष्णभेदी। "कृष्णभेदा। कृष्णभेदाचंडरुहेतिनिघंटुः। चक्रांगी। शाकुलादनी। अश्वोकेदारकुटकीइतिख्यातायाः। आत्मगुप्ता। — अजहा। "जडा" अण्डा। कंडूरा। "कडुरा। कपिकच्छूश्चकंडूरेतींदुः।" प्रावृषायणी॥ ८६॥ ७ ॥

ऋष्यप्रोक्ता। शूकशिंबिः।"शाववल्लशाकशिंशिराणिचशूकशिंबिरित्यूष्मविवेकाद्विनालव्या। शूकशिंबापि। मर्कटीशूकशिंबाचेति वाचस्पतिः।" कपिकच्छुः।"कपिकच्छूः।" मर्कटी। नवकुवली।"कुहिरी" इतिख्यातायां। मर्कटतुल्यलोमयुक्तत्वान्मर्कटी। यत्स्वेदनिकंडूरुत्पद्यतेऽतःकंडूरा। चित्रा। उपचित्रा। न्यग्रोधी। द्रवंती। शंबरी। हृषा॥८७॥ प्रत्यक्श्रेणी। स्फुतश्रेणी। रंडा।"चंडा। प्रत्यक्

ऋष्यप्रोक्ता शूकशिंबिःकपिकच्छ्वमर्कटी॥ चित्रोपचित्रान्यग्रोधी द्रवंतीशाब-
रीहृषा॥८७॥ प्रत्यक्श्रेणीस्फुतश्रेणीरंडामूषिकपर्ण्यपि॥ अपामार्गःशैखरिको
ऽधाभार्गवमयूरको॥८८॥ प्रत्यक्पर्णीकेशपर्णीकिणिहीखरमंजरी॥ ७

श्रेणी हृषा चंडापुनश्चेण्यारुपर्णिकेतिनिघंटुः।" मूषिकपर्णी। दशामूषिकपर्ण्याः। उंदीरकानीइतिख्यातायाः। अपामार्गः। शैखरिकः। धामार्गवः।"अधामार्गवः। अधामार्गवोऽपामार्गःकोशातकीचेतिव्यर्थे।" मयूरकः॥८८॥ प्रत्यक्पर्णी। केशपर्णी।"कीशपर्णी कपिलोमतुल्यानिलोमशानिपर्णान्यस्याः।" किणिही। खरमंजरी। अष्टकं अपामार्गस्य। आघाडाइतिख्यातस्य॥ ७

हंजिका। "कंजिका" ब्राह्मणी। पद्मा। भार्गी। ब्राह्मणयष्टिका॥ ८९॥ अंगारवल्ली। वालेयशाकः। बर्बरः। वर्धकः। नवकंभार्य्याः। "भारंग इतिख्यातायाः।" मंजिष्ठा। विकसा। "विकषा" जिंगी। समंगा। कालमेषिका। "कालमेशिका"॥ ९०॥ मंडूकपर्णी। मंडीरी। "भंडिरी। रक्ता भंडिरिकाचेतींदुः।" भंडी। योजनवल्ली। नवकंमंजिष्ठायाः। "योजनपर्ण्यपीतिपाठः।" यासः। यवासः। दुस्पर्शः। धन्वयासः। "धनु

हंजिकाब्राह्मणीपद्माभार्गीब्राह्मणयष्टिका॥ अंगारवल्लीबालेयशाकबर्बर
वर्द्धकाः॥ मंजिष्ठाविकसाजिंगीसमंगाकालमेषिका॥ ९०॥ मंडूकपर्णीमंडीरी
भंडीयोजनवल्ल्यपि॥ यासोयवासोदुःस्पर्शोधन्वयासःकुनाशाकः॥ ९१॥ रोदनीक
च्छुरानंतासमुद्रांतादुरालभा॥ पृश्निपर्णीपृथक्पर्णीचित्रपर्ण्यंघ्रिवल्लिका॥ ९२॥

र्यासः।" कुनाशाकः॥ ९१॥ रोदनी। "चोदनी" कच्छुरा। अनंता। समुद्रांता। दुरालभा। दशकंधन्वयासस्यधमासाइतिख्यातस्य। पृश्निपर्णी। पृथक्पर्णी। चित्रपर्णी। अंघ्रिवल्लिका। "अंघ्रिपर्णिकेतिपाठः।" ॥ ९२॥

कोष्टुविल्ला। सिंहपुच्छी। कलशी। "कलशिः" धावनी। "धावनिः।" गुहा। नवकं सिंहपुच्छ्याः। डवला. "पिठवण" इतिख्याताया निदिग्धिका। स्पृक्का। व्याघ्री बृहती। कंटकारिका।।९३।। प्रचोदनी। कुली। क्षुद्रा। दुःस्पर्शा। राष्ट्रिका। द्वयं कंटकारिकायाः रिंगणी इतिख्याताया। नीली। काला। कूर्मालिका। ग्रामीणा। मधुपर्णिका।।९४।। रंजनी। श्रीफली। तुत्था। द्रोणी। "तूणी। तूणीनील्यांनि-

कोष्टुविल्लासिंहपुच्छीकलशीधावनीगुहा॥निदिग्धिकास्पृक्काव्याघ्रीबृहतीकंटकारिका॥
॥९३॥प्रचोदनीकुलीक्षुद्रादुःस्पर्शाराष्ट्रिकेत्यपि।नीलीकालाकूर्मालिकाग्रामीणामधुपर्णिका॥
॥९४॥रंजनीश्रीफलीतुत्थाद्रोणीदोलाचनीलिनी।अवल्गुजःसोमराजीसुवल्लिःसोमवल्लिका॥९५॥

षंगेनेतिमेदिनी। तूणीतुनील्यांतूणानियंगकइतिविश्वप्रकाशः।" दोला "मला। तुत्थाश्रीफलिकामेलास्मरवाहीचरंजनीतिनिघंटुः" नीलिनी। एकादशानील्याः। इयं वस्त्रादिरंजनकारिणी कृष्णवर्णा। अवल्गुजः। सोमराजी। सुवल्लिः। सोमवल्लिका॥९५॥

कालमेषी।"कालमेत्री।" कृष्णफला। बाकुची।"वागुजी" पूतिफली।अवल्गुबाकुंची बावंची इतिरत्नाकरे।"सोमराजिह्वाबल्गुःकृष्णफलेतथा।कृष्णा।उपकुल्या। वैदेही। मागधी। चपला। कणा॥९६॥ उषणा।"ऊषणा" पिप्पली।"पिप्पलिः।" शौंडी। कोला। दशकंपिप्पल्याः। करिपिप्पली। कपिवल्ली। कोलवल्ली। श्रेयसी। वशिरः।"दंतमध्योपि" पंचगजपिप्पल्याः॥९७॥ चव्यं।" चव्या। चव्याकोलाच

कालमेषीकृष्णफलाबाकुचीपूतिफल्यपि॥कृष्णोपकुल्यावैदेहीमागधीचपलाकणा॥९६॥
उषणापिप्पलीशौंडीकोलाथकरिपिप्पली॥कपिवल्लीकोलवल्लीश्रेयसीवशिरःपुमान्॥९७॥
चव्यंतुचविकाकाकचिंचीगुंजेतुकृष्णला॥पलंकषाविष्वगंधाखदंष्ट्रास्वादुकंटकः॥९८॥

चविकेतिहेमचंद्रः।" चविका।"चविकइतिपुल्लिंगोपि।" द्वेचव्यस्यचवकइतिरत्नाकरस्य।"केचित्चव्यादिद्वयंपूर्वान्वयीत्याहुः।अत्रपक्षेतुस्थानेचःपाठ्यः।" काकचिंची।"काकचिंचिः। काकचिंचा। गुंजातुकाकचिंचायांपटहेचकलध्वनाविति मेदिनी।" गुंजा। कृष्णला। त्रीणिगुंजायाः। पलंकषा। इक्षुगंधा। खदंष्ट्रा। स्वादुकंटकः॥९८॥

गोकंटकः। गोक्षुरकः। वनशृंगाटः। सस्कंगोक्षुरस्यसंज्ञादइतिख्यातस्य। विश्वा। विषा। प्रतिविषा। अतिविषा। उपविषा। अरुणा॥९९॥
शृंगी। महौषधं। अष्टकं अतिविषायाः। "अतिविषवइतिख्यातायाः।" क्षीरावी। दुग्धिका। द्वेदुग्धीइतिख्यातायाः। शतमूली। बहुसुता।
अभीरुः। इंदीवरी। वरी॥१००॥ ऋष्यप्रोक्ता। अभीरुपत्नी। नारायणी। शतावरी। अहेरुः। दशकमपिस्त्रीलिंगं। सहस्रमूल्याः। "शतावरी

गोकंटकोगोक्षुरकोवनशृंगाटइत्यपि॥ विश्वाविषाप्रतिविषातिविषोपविषारुणा॥ ९९॥
शृंगीमहौषधंचाथक्षीरावीदुग्धिकाद्वयम्॥ शतमूलीबहुसुताभीरुरिंदीवरीवरी॥ १००॥
ऋष्यप्रोक्ताभीरुपत्नीनारायण्यःशतावरी॥ अहेरुरथपीतद्रुकालीयकहरिद्रवः॥ १०१॥
दार्वीपचंपचादारुहरिद्रापर्जनीत्यपि॥ वचोग्रगंधाषड्ग्रंथागोलोमीशतपर्विका॥ १०२॥

रीतिख्यातायाः।" पीतद्रुः। कालीयकः। "कालेयकः"। हरिद्रुः॥१०१॥ दार्वी। पचंपचा। "पचंवचेत्यपि" दारु-हरिद्रा। पर्जनी। सस्कंदारु
हलदइतिख्यातस्य। वचा। उग्रगंधा। षड्ग्रंथा। गोलोमी। शतपर्विका। पंचकंवचायाः वेरवंउइतिख्यातायाः॥ १०२॥

या ऋक्षगंधावचासाहैमवतीत्येकं। वैद्यमाता। सिंही। वाशिका।"दंत्यमध्यापि" वृषः। अटरूषः।"अडरूषः"। सिंहास्यः। वासकः। वाजिदंतकः। अष्टकं अटरूषस्य अडुळसा इतिख्यानस्य॥१०२॥ आस्फोता।"आस्फोता"। आस्फोतागिरिकर्ण्यांचवनमल्यांचयोषितीतिमेदिनी। गिरिकर्णी। विष्णुक्रांता। अपराजिता। चत्वारिविष्णुक्रांतायाः। इक्षुगंधा। कांडेक्षुः। कोकिलाक्षः। इक्षुरः। क्षुरः। पंचकोकिलाक्षस्य। कोळसंदा।" तालिमखाम्याचेंबीं। कोलिस्ता।" इतिख्यातस्य॥१०४॥ शालेयः। शीतशिवः। छत्रा। मधुरिका। मिसिः।"मिसी। मिश्री। मिश्रीः। मिश्री।

ऋक्षगंधाहैमवतीवैद्यमातृसिंह्यौतुवासिका॥वृषोऽटरूषःसिंहास्योवासकोवाजिदंतकः॥१०२॥
आस्फोतागिरिकर्णीस्याद्विष्णुक्रांताऽपराजिता॥इक्षुगंधातुकांडेक्षुकोकिलाक्षेक्षुरक्षुराः॥१०४॥
शालेयःस्याच्छीतशिवश्छत्रामधुरिकामिसिः॥मिश्रेयाप्यथसीहुंडोवज्रःस्नुक्स्नुहीगुडाः॥१०५॥

मिशी मिशिरितितालव्यांत आहसोमनंदी।" मिश्रेया। षट्पुंमधुरिकायाः।"वाडिद्रोप" इतिख्यातायाः। सीहुंडः। वज्रद्रुमः सिहुंडोथेतिरभसातून्हस्वादिरपि। सीहुंड इतितालव्यादिरपि।" वज्रः। स्नुक्। स्नुही।"स्नुहिः। स्नुहा। स्नुहीस्नुहास्नुगित्यमरदत्तः।" गुडा।"गुडी। गुडोगोलेक्षुविक्लीस्नुहीगुडिकयोर्गुडेनिरुद्रः।" ॥१०५॥

समंतदुग्धा। वज्रवज्रद्रुमस्य "वेरानिवडुंग" इतिख्यातस्य। नवस्नुक्नुहकारांतःस्त्री। "वज्रद्रुस्नुक्स्नुहीगुडेतिपाठः।" वेल्लं। अमोघा। "मोघापि। कृमिघ्नं तंडुलंमोघेतिवाचस्पतिः।" चित्रतंडुला। तंडुलः। "तंतुलः। तंतुकृमिसूत्रंबलाति।" कृमिघ्नः। विडंगं। षट्पंविडंगस्यवावडिंगइतिख्यातस्य॥१०६॥ बला। वाट्यालका। द्वेतुपकडी। "चिकणा" इतिख्यातस्य। घंटारवा। द्रोणपुष्पिका। द्वेद्रोणपुष्पिकायाः। "लघुतागरी इतिचेत्यैके।" मृद्वीका। गोस्तनी। "गोस्तना" द्राक्षा। स्वाद्वी। मधुरसा। पंचद्राक्षायाः॥१०७॥ सर्वानुभूतिः। सरला। "सरणा" त्रिपुटा। "त्रिपुटी। सर्वानुभूतिःसरणात्रिपूटारोचनीसरा। त्रिपूटीमहतीश्यामेतिवाचस्पतिः।" त्रिवृता। त्रिवृत्। त्रिभंडी। रोचनी। "रेचनी। रेचनीत्रिवृतादंत्योरितिमेदिनी।" सप्तत्रिवृतायाः। "तेदुवेतनिशोत्तर इतिचख्यातायाः।" श्यामा। पालिंदी। "पालिंधी" कृष्णेणिका॥१०८॥

काला। मसूरविदला। अर्द्धचंद्रा। कालमेषिका। सप्तकृष्णवर्णाभिधानस्य। "काचातेंडू, निशोत्तर, निगडी, तिधारें इति चरव्याताया:।" मधुकं। क्लीतकं। यष्टिमधुकं। "यष्टीमधुकं।" मधुयष्टिका। चत्वारियष्टिमधुकस्य। गौडेंकोष्ट "ज्येष्ठमध" इतिख्यातस्य ॥१०९॥ विदारी। क्षीरकृष्णा। ऋक्षगंधा। कोष्ट्री। चत्वारिशुक्लभूमिकोहेकिं इतिख्यातस्य। यासिताऋक्षविदारीत्यन्वयः। क्षीरविदारी। महाश्वे-

कालामसूरविदलार्धचंद्राकालमेषिका॥मधुकंक्लीतकंयष्टिमधुकंमधुयष्टिका॥१०९॥
विदारीक्षीरऋक्षेक्षगंधाकोष्ट्रीतुयासिता॥अन्याक्षीरविदारीस्यान्महाश्वेतर्क्षगंधिका॥११०॥

ता। ऋक्षगंधिका। त्रीणिकृष्णभूमिकूष्मांडस्य। अन्येति। सितायाअन्याकृष्णेत्यर्थः। "कोष्ट्रीशृगालिकाकृष्णाविदारीलांगलीषुचेति मेदिन्यांकृष्णाविदारीत्युक्तत्वात्यासितेत्यत्रासितेतिपदच्छेदेमेदिन्यविरोधेनपूर्वंनामचतुष्कंकृष्णभूकूष्मांडस्य। क्षीरेतित्रयं ऋक्षभूकूष्मांडस्येतिवा। असिताया अन्याऋक्षेत्यर्थः।" ॥११०॥

लांगली। शारदी। तोयपिप्पली। शाकुलादनी। चत्वारिशाकभेदस्यमोगुड "जलपिंपली" इतिख्यातस्य। खराश्वा। कारवी। दीप्यः। मयूरः। लोचमस्तकः। "लोचमर्कटः" पंचमयूरशिखायाः। मोरशेंडा इतिख्यातायाः। "अजमोदा इत्यपिमतं।" ॥१११॥ गोपी "अजादित्वा ट्टाप्। गोपा। गोपीश्यामागोपवल्लीगोपागोपालिकासचेतिवाचस्पतिः" श्यामा। शारिवा। "सारिवा" अनंता। उत्पलशारिवा। पंच

लांगलीशारदीतोयपिप्पलीशाकुलादनी॥खराश्वाकारवीदीप्योमयूरोलोचमस्तकः॥१११॥
गोपीश्यामाशारिवास्यादनंतोत्पलशारिवा॥योग्यमृद्धिःसिद्धिर्लक्ष्म्यौवृद्धेरप्याकृयाइमे॥११२॥

उत्पलशारिवायाः। उपरसाब्ज। "उपलसरी" इतिख्यातायाः। योग्यं। ऋद्धिः। सिद्धिः। लक्ष्मीः। चत्वारि ऋद्धिनामकस्यओषधिविशेषस्य। "केवणी, मुरुडशेंग इतिचरव्यातस्य।" इमेयोग्यादयश्चत्वारोवृद्धेर्ऋद्धिनामकौषधेरप्याकृयाःस्युः॥११२॥

कदली। "अजादित्वादापि कदला। कदलोपि। कदलश्च कदल्यस्यां विनिव्याडिः।" वारणबुसा "वारणबुषा।" रंभा। मोचा। अंशुफला। काष्ठीला। षट्कदल्याः। मुद्गपर्णी। काकमुद्गा। सहा। त्रयंकाकमूग "रानमूग" इतिख्यातायाः काकमुद्गायाः॥११३॥ वार्ताकी। "पुंस्यपि वार्ताकइनि। वार्ना। वार्ताकुः। वार्तिंगणस्तु वार्तंगोवार्ताकः शाकबिल्वकइतिरभसः। वार्ताबार्तिंगणे वृत्तावितिविश्वः। वार्ताकुरेषागुणसप्तयुक्तेतिवैद्यकाच्च।" हिंगुली। सिंही। भंटाकी। दुष्प्रधर्षिणी। पंचवार्ताक्याः रानबागी "डोरली" इतिख्यातायाः

कदलीवारणबुसारंभामोचांशुफलाकाष्ठीलामुद्गपर्णीतुकाकमुद्गासहेत्यपि॥११३॥
वार्ताकीहिंगुलीसिंहीभंटाकीदुष्प्रधर्षिणी॥नाकुलीसुरसारास्नासुगंधागंधनाकुली॥११४॥
नकुलेष्टाभुजंगाक्षीछत्राकीस्रुवहाचसा॥विदारिगंधांशुफलतीसालपर्णीस्थिराध्रुवा॥११५॥

नाकुली। सुरसा। रास्ना। स्रुगंधा। गंधनाकुली॥११४॥ नकुलेष्टा। भुजंगाक्षी। छत्राकी। स्रुवहा। नवरास्नायाः। मुंगसी "मुगुसवेल" इतिख्यातायाः। "रास्नास्रुगंधयोःस्थानेनागसुगंधेतिपाठः।" विदारिगंधा। "विदारीगंधा। अंशुफलती। सालपर्णी। "शालपर्णी।" स्थिरा। ध्रुवा। पंचसालपर्ण्याः। डाव "डवला.सालवण" इतिख्यातायाः॥११५॥

तुंडिकेरी। समुद्रांता। कार्पासी।"कर्पासी"बदरा। चत्वारिकार्पास्याः। साकार्पासी वन्यावनेभवा चेद्वारद्वाजीत्यच्यते। एकं।शृंगी। ऋषभः। ऋषः। त्रयंऋषभाख्यौषधिविशेषस्य। "बेलघाटीइतिख्यातस्य।"शृंगीशब्दइन्नंतः॥११६॥गांगेरुकी। नागबला। झषा। ह्रस्वगवेधुका। चत्वारिबलाविशेषस्य।"ह्रस्वचिकणाइतिख्यातस्य।" धामार्गवः। घोषकः।द्वेघोषवत्याः।"घोसाळी.शेडकीइति

तुंडिकेरीसमुद्रांताकार्पासीबदरेतिच॥भारद्वाजीतुसावन्याशृंगीतुऋषभोऋषः॥
॥११६॥गांगेरुकीनागबलाझषाह्रस्वगवेधुका॥धामार्गवोघोषकःस्यान्महाजाली
सर्पातकः॥११७॥जोत्स्नीपटोलिकाजालीनादेयीभूमिजंबुका॥ ७ ७

ख्यातायाः।" सघोषकः। पीतकःपीतपुष्पश्वेतपुष्पश्चेतुमहाजालीत्यच्यते।एकं।स्त्रीलिंगं॥११७॥जोत्स्नी"ज्योत्स्ना। जोत्स्नीपटोलीज्योत्स्ना तिहेमः।" पटोलिका। जालिन्यपिपटोलिकायाः।"पडवळीइतिख्यातायाः।" नादेयी। भूमिजंबुका। द्वेभूजंबाः"भुइजांभळीइति - ख्यातायाः। नादेयीनागरंगेस्याज्जयायांजलवेतसे॥भूमिजंबांजबायांचव्यंगुष्टेपिचयोषितीतेमदिनी।" ७ ७

लांगलिकी। अग्निशिखा। द्वे लांगल्याः। वागचबका। "कञ्चलावी" इतिचरव्यातायाः। काकांगी। काकनासिका। द्वे काकजंघाख्योषधिविशे
षस्य। "काचळी इतिख्यातस्य।" ॥११८॥ गोधापदी। स्फुवहा। द्वे हंसपादिकायाः। "रक्तलाजा क्वूं इतिख्यातायाः।" मुसली। तालमूलिका।
द्वे मुसल्याकंदमुसलकंद इतिख्यातायाः। अजशृंगी। विषाणी। द्वे मेढाशिंगी इतिख्यातायाः। औषधेः। इयंत्वजशृंगाकारफलावहुसीरा

ख्याङ्गालिक्यग्निशिखाकाकांगीकाकनासिका ॥११८॥ गोधापदीतुस्फुवहामुसलीताल
मूलिका॥ अजशृंगीविषाणीस्याद्द्वोजिह्वादार्विकेसमे॥११९॥ तांबूलवल्लीतांबूलीनागव-
ल्ल्यप्यथद्विजा॥ हरेणुरेणुकाकौंतीकपिलाभस्मगंधिनी॥ १२०॥ ७

सकंटकानेत्रौषधिरितिस्फूतिराह। गोजिह्वा। दार्विका। "दर्विका" द्वेदवली। "पाथरी" इतिख्यातस्य। क्षेत्रजन्यद्वाकभेदस्य॥११९॥
तांबूलवल्ली। तांबूली। नागवल्ली। त्रीणिनागवल्ल्याः। "पानवेल इतिख्यातायाः।" द्विजा। हरेणुः। रेणुका। कौंती। कपिला। भस्मगंधिनी।
षड्रेणुकाख्यगंधद्रव्यस्य। "रेणुकबीज इतिप्रसिद्धस्य।" ॥१२०॥ ७ ७ ७

एलाबालुकं। ऐलेयं। स्कंधि। हरिवालुकं। वालुकं। पंचवालुकाख्यगंधद्रव्यस्य। "वालुक.काकडीइतिख्यातस्येत्यपिमतं।" पालंकी। मुकुंदः। कुंदः। कुंदरुः। "मुकुंदः। कुंदुः। कुंदरः।" चत्वारिपालंकी। "पोईशाकवास्तुकाकारा पालवः।" इतिचख्यातस्य॥१२१॥ बालं। ह्रीबेरं। बर्हिष्ठं। उदीच्यं। केशाबुनाम। पंचबालाइतिख्यातस्य। "बालः। बालोनाकुंतलेऽश्वस्यगजस्यापिचबालधौ॥ वाच्यलिंगो

एलाबालुकमैलेयंस्कंधिहरिवालुकं॥ वालुकंचाथपालंक्यांमुकुंदःकुंदकुंदुरू॥
॥१२१॥ बालंह्रीबेरबर्हिष्ठोदीच्यंकेशांबुनामच॥ कालानुसार्यंदृङ्नाम्नपुष्पशीत
शिवानितु॥१२२॥ शैलेयंतालपर्णीतुदेत्यागंधकुटीमुरा॥ ७

र्भकेमूर्वेह्रीबेरेपुन्नपुंसकमितिमेदिनी।" केशाश्चांबुचतयोर्नामयस्यतत्केशांबुनामयावत्केशारयांबुनश्चनामानितानिसर्वाणि बालस्यापीत्यर्थः। कालानुसार्यं। दृङ्नं। अश्वमपुष्पं। शीतशिवं॥१२२॥ शैलेयं। पंचशैलेयस्य। फूल। "शिलाजित" इतिख्यातस्य। तालपर्णी। देत्या। गंधकुटी। मुरा॥ ७ ७ ७

गंधिनी। चत्वारि सुरायाः तालिसपत्र "भोरमांसी" इतिख्यातायाः। गजभक्ष्या। "गजभक्षा" स्फवहा। स्फरभी। "सुरभिः। स्फरभिः स्फुकी मातृभिन्नुरागेषु योषितीतिमेदिनी। स्फरभीरसेत्येकमपि पदं।" रसा॥१२३॥ महेरुणा। "महेरुणा" कुंदुरुकी। सल्लकी। "शल्लकी। सिल्लकी। श्वाविद्भेदौशकुक्यावितितालव्यादौरभसः। सल्लकीसिल्लकी ह्लादेतिरुद्रः।" ह्लादिनी। "ह्लादिनी।" अष्टसालईइतिख्याता

गंधिनी गजभक्ष्यातुस्फवहास्फरभीरसा॥१२३॥ महेरुणाकुंदुरुकीसल्लकीह्लादिनीतिच॥ अग्निज्वालासुभिक्षेतु धातकीधातुपुष्पिका॥१२४॥ पृथ्वीकाचंद्रबालैलानिष्कुटीबहुलाथसा॥ सूक्ष्मोपकुंचिकातुत्थाकोरंगात्रिपुटात्रुटिः॥१२५॥

याः। अग्निज्वाला। "अग्नेर्ज्वालेवरक्तपुष्पत्वात्" सुभिक्षा। धातकी। धातुपुष्पिका। "धार्तपुष्पिका।" चत्वारि धातक्याः। धायफूल "धायटी" इतिख्यातायाः॥१२४॥ पृथ्वीका। चंद्रबाला। एला। निष्कुटिः "निष्कुटी।" बहुला। पंचकंएलायाः। सा एला सूक्ष्मासूक्ष्मपरिमाणा चेत्उपकुंचिका। तुत्था। कोरंगी। त्रिपुटा। त्रुटिः। "त्रुटी" इतिपंचनामानि॥१२५॥

व्याधिः। कुष्ठं। पारिभाव्यं। वाप्यं। "व्याप्यं। आप्यं।" पाकलं। उत्पलं। षट्कं। कटुकोष्ठ "गोडेकोष्ठ" इतिख्यातस्य। शंखिनी। चोरपुष्पी। केशिनी। त्रयं चोरबल्लयाः चोर। "शंखाहुली, सांखवेल" इतिख्यातायाः। वितुन्नकः॥१२६॥ झटामला। अझटा। ताली। शिवा। तामलकी। षट्कं भूम्यामलक्याः। झटामलेत्यत्र झटेति पृथक्पदंवा। अमलेतिछेदः। आह च। नामलक्यामलातालीति। झटातामलकी

व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलं। शंखिनी चोरपुष्पीस्यात् केशिन्यथ वितुन्नकः॥१२६॥
झटामलाऽझटाताली शिवातामलकीति च॥ प्रपौंडरीकं पौंड्यमथ तुन्नः कुबेरकः॥ १२७॥
कुणिः कच्छः कांतलको नंदिवृक्षोऽथ राक्षसी॥ चंडाधनहरी क्षेमदुष्पत्रगणहासकाः॥१२८॥

तिचेति। प्रपौंडरीकं। पौंड्यं। "पुंड्यं"। इदंशालपर्णीतुल्यपत्रंज्ञेयं। स्थलपद्ममितिगौडाः। तुन्नः। कुबेरकः॥१२७॥ कुणिः। "तुणिः" कच्छः। कांतलकः। नंदिवृक्षः। "नंदीवृक्षः"। षट्कं नंदिवृक्षस्य "नांदरुखी इतिख्यातस्य।" अयमवस्थाकारपत्रः। राक्षसी। चंडा। धनहरी। क्षेमः। दुष्पत्रः। गणहासकः। षट्कं चोराख्यगंधद्रव्यस्य। "चोरओंवा। किरमाणीओंवा। गठीना। गाडीवनमूळ इतिचख्यातस्य। गणइत्यप्यस्यनाम"॥१२८॥

व्याडायुधं। "व्यालयुधं।" व्याघ्रनखं। करजं। चक्रकारकं। चत्वारिव्याघ्रनखनामकगंधद्रव्यस्य। "लघुनखलाघनखइतिख्यातस्य।" सुषिरा। विद्रुमलता। कपोतांघ्रिः। नदी। नली॥१२९॥ धमनी। अंजनकेशी। सप्तनलीनामकगंधद्रव्यस्य। "पचारीतिलोकेप्रसिद्धस्य। इयं उत्तरपथेप्रसिद्धा।" हनुः। हट्टविलासिनी। वक्रिः। शंखः। खुरः। कोलदलं। नखं। "नखी" सप्तनखाख्यगंधद्रव्यस्य। "नखलाइति"

व्याडायुधंव्याघ्रनखंकरजंचक्रकारकं॥सुषिराविद्रुमलताकपोतांघ्रिर्नदीनली॥१२९॥
धमन्यंजनकेशीच हनुर्हट्टविलासिनी॥ वक्रिःशंखःखुरःकोलदलंनखंमथादकी॥१३०॥
काक्षीमृत्स्नातुवरिकामृत्तालकस्कराष्ठजे॥कुटंनटंदाशपुरंवानेयंपरिपेलवं॥१३१॥

ख्यातस्य। अत्रहनुरुदंतः। स्त्रीसाहचर्यात्। बदरीतुल्यपत्रत्वात्कोलदलं। आदकी॥१३०॥ काक्षी। मृत्स्ना। तुवरिका। वर्षिकाधूलिकाबहुवर्षा ढकीकुच्छुरा झाटीतिबोपालितात्तूवरिका।" मृत्तालकं "मृतालकं।" स्कराष्ठजं। षट्तुवरिकायाः। तूरइतिख्यातायाः। कुटन्नटं। दाशपुरं। "दशापुरमितिदशपूरमितिदाशपूरमितिच। दशापूरंदशपुरंभुवनंजीविताख्यमितिवाचस्पतिः।" वानेयं। परिपेलवं॥१३१॥

ध्रुवं। गोपुरं। गोनर्दं। केवर्तीमुस्तकं। "केवर्तिमुस्तकं। कैवर्तमुस्तकं।" अष्टकं केवर्तीमुस्तकस्य केवडी. "जलमुस्ता. क्षुद्रमोस्ता मोथा" इतिख्यातस्य। ग्रंथिपर्णं। ऋकं। बर्हपुष्पं। "ऋकबर्हमित्येकमपिनाम। बर्हिपुष्पं। बर्हिःपुष्पंबर्हपुष्पंचेतिपृथगापि।" स्थौणेयं। कुक्कुरं। पंचगंदीवन "भडोरा" इतिख्यातस्य॥१३२॥ मरुन्माला। पिशुना। स्पृक्का "स्पृषोदरादित्वात्सलोपेपृक्कापि"

ध्रुवगोपुरगोनर्दकेवर्तीमुस्तकानिच।ग्रंथिपर्णंऋकंबर्हपुष्पंस्थौणेयकुक्कुरे॥१३२॥
मरुन्मालातुपिशुनास्पृक्कादेवीलतालघुः॥समुद्रांतावधूःकोटिवर्षालंकोपिकेत्यपि॥१३३॥

देवी। लता। लघुः। समुद्रांता। वधूः। कोटिवर्षा। लंकोपिका। दशकं पिंडकेतिख्यातायाः। स्पृक्कायाः। अत्र मरुन्मालेतिसंज्ञा तविगृहीतं। यदाह वाचस्पतिः। स्पृक्कातुब्राह्मणीदेवीमरुन्मालालतालघुः।समुद्रांतावधूःकोटिवर्षालंकोपिकामरुत्। मुनिर्माल्यवतीमालामोहनाकुटिलालतेति॥१३३॥

तपस्विनी। जटामांसी। जटिला। लोमशा। मिश्री। "मिसिः। मिषिः। मिषी। मसिः। मषिः। मषी। मसी।" पंच जटामांस्याः। जटेति पृथक्पदं वा। यदाह। मांसी कृष्णजटाहिंस्रा नलदा जटिलामिसिः। जटा च पिशिनी पेशी क्रव्यादी च तपस्विनी नि। त्वक्पत्रं। उत्कटं। भृंगं। त्वचं। चोचं। वरांगकं षट्त्वक्पत्रस्य "दालचिनी" तंजइति ख्यातस्य। त्वक्त्वचोच शब्दाः स्युर्वल्के चर्माणि पत्रकइति धरणिः॥१२४॥ कर्चूरकः। "कर्बूरकः।" द्राविडकः। काल्पकः। वेधमुख्यकः। चत्वारि कचरइति ख्यातस्य। हहिद्राभस्य। कल्पेभवः काल्पक ओषध्यमध्यः। "तालव्य

तपस्विनीजटामांसी जटिलालोमशामिश्री॥ त्वक्पत्रमुत्कटं भृंगंत्वचंचोचं वरांगकं॥१२४॥
कर्चूरकोद्राविडकः काल्पकोवेधमुख्यकः॥ओषध्योजातिमात्रेस्युरजातौसर्वभौषधं॥१२५॥

मध्योपि।" ओषध्यइति। फलपाकांतानां व्रीह्यादीनां जातावेव ओषध्यः स्युः। ओषधिशब्दप्रयोगः स्यादित्यर्थः। बहुत्वविवक्षायां बहुवचनं न तुनित्यं। यदातु ओषधेः रोगहारित्वमात्रं प्रतीयते नतन्यत्। तदाओषधशब्दप्रयोगः। ओषधेरजातावित्यण्। न केवल मोषधिरेवौषधशब्दवाच्या। किंतुरोगहरत्वेन घृतक्षीद्रत्रिफलाकल्कादिचौषधमितिसर्वमितिविश्वौषणात्ज्ञेयं॥१२५॥ ९

यत्तत्र पुष्पादितच्छाकसंज्ञकं। एकंभोजनसाधनस्यपुष्पादेः। आदिनामूलादिग्रहः। उक्तंच। मूलपत्रकरीराग्रफलकांडाधिरूढकं ॥ त्वक्पुष्पंकवचंचैवशाकंदशविधंस्मृतमिति। तत्रकरीरंवंशांकुरः। कांडमिक्षुदंडादि। अधिरूढकं। बीजांकुरः। कवचंछ त्राकं। शोषंस्पष्टं। तुंडुलीयः। अल्पमारिषः। हेतांदळी। "तादुळजा" इतिख्यातस्य। विशाल्या। अग्निशिखा। अनंता। फलिनी। शाकपु ष्पिका। पंचकमग्निशिखायाः। "कळलावीइतिख्याताया" शाकोऽर्जुनतरुः तत्पुष्पमिवपुष्पंअस्याः शाकपुष्पी॥१३६॥ ऋक्षगंधा। "ऋ

शाकाख्यंपत्रपुष्पादि तंडुलीयोल्पमारिषः॥ विशाल्याग्निशिखानंताफलिनीशाकपुष्पिका॥१३६॥
स्याद्ऋक्षगंधाछगलांघ्र्यावेगीवृद्धदारकः॥ जुंगोब्राह्मीतुमत्स्याक्षीवयस्थासोमवल्लरी॥१३७॥

क्षगंधा।" छगलांघ्री "छगलांघ्री। छगलांडी। छगलेतिपृथक्पदंवा। छागेतु छगलश्छागी वृद्धदारकयोःस्त्रियामित्यनेकार्थकोशः।" आवेगी। वृद्धदारकः। जुंगः। पंचवृद्धदारकस्य। "वरधारा. जीर्णफंजी इतिख्यातस्य।" ब्राह्मी। मत्स्याक्षी। वयस्था। सोमवल्लरी। "सोमवल्लरिः"। चत्वारिसोमलतायाः। "यस्याःवृक्षुपक्षेपर्णान्युद्भवंतिक्षीणेचपतंतिसासोमवल्लीसेवसोमवल्लरी" ॥१३७॥ ९

पटुपर्णी। हैमवती। स्वर्णक्षीरी। हिमावती। चत्वारि स्वर्णक्षीर्याः। "पिसोव्वइ इतिख्यातायाः।" हयपुच्छी। कांबोजी। माषपर्णी। महासहा। चत्वारि माषपर्ण्याः। रानउडीद इतिख्यातायाः॥ १२८॥ तुंडिकेरी। "तुंडिकेशी।" रक्तफला। बिंबिका। पीलुपर्णी। चत्वारि तोंडली इतिख्यातायाः। तुंडिकेर्याः। बर्बरा। "बर्बरा। बर्बरी। बर्बरः पामरे क्रोचक्रलेनीदृदंतरे। फंजिकायां पुमान् शाकभेदः पुष्पाभिदोः स्त्रियां

पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती॥ हयपुच्छी तु कांबोजी माषपर्णी महासहा॥ १२८॥
तुंडिकेरी रक्तफला बिंबिका पीलुपर्ण्यपि॥ बर्बरा कबरी तुंगी खरपुष्पाऽजगंधिका॥ १२९॥
एलापर्णी तु सुरवहा रास्नायुक्तरसा चसा॥ चांगेरी चुक्रिका दंतशठांबष्ठाम्ललोणिका॥ १४०॥

मितिमेदिनी।" कबरी। "कवरी" तुंगी। खरपुष्पा। अजगंधिका। "अजगंधेत्यन्यत्र।" पंचवर्बरी। "तिलवणी। कानफोडी" इतिख्यातस्य शाकभेदस्य॥ १२९॥ एलापर्णी। सुरवहा। रास्ना। युक्तरसा। चत्वारि एलापर्ण्याः कोलिंदण इतिख्यातायाः। चांगेरी। चुक्रिका। दंतशठा। अंबष्ठा। अम्ललोणिका। "अम्ललोलिका।" पंचअम्ललोणिकायाः चुका इतिख्यातायाः॥ १४०॥

सहस्रवेधी। चुक्रः। अम्लवेतसः। ज्ञातवेधी। चतुष्कमम्लवेतसस्य "चांगेयादिनवपर्यायाइत्यपिमतं।" नमस्कारी। गंडकारी। "गांड काली।" समंगा। खदिरा। चत्वारिलज्जालु। "लाजालूं" इतिप्रसिद्धायाःओषधेः॥१४१॥ जीवंती। जीवनी। जीवा। जीवनीया। मधुस्रवा। "मधुः। स्रवेतिपदद्वयमपि। मधुपुष्परसेक्षौद्रे मद्येनातु मधुद्रुमे। वसंतरेत्यभिख्यैत्रेस्याज्जीवंत्यांतुयोषितीतिमेदिनी। विश्वप्रकाशोप्येवं। पंचजीवंत्याः। "हरणवेल हरणडोडी इतिख्यातायाः।" कूर्चशीर्षः। मधुरकः। शृंगः। ह्रस्वांगः। जीवकः। पंच

सहस्रवेधीचुक्रोऽम्लवेतसःज्ञातवेध्यपि॥नमस्कारीगंडकारीसमंगाखदिरेत्यपि॥१४१॥
जीवंतीजीवनीजीवाजीवनीयामधुस्रवा॥कूर्चशीर्षोमधुरकःशृंगह्रस्वांगजीवकाः॥१४२॥
किरातितिक्तोभूनिंबोनार्यतिक्तोऽथसप्तला॥विमलाज्ञातलाभूरिफेनाचर्मकषेत्यपि॥१४३॥

जीवकस्य॥१४२॥ किरातितिक्तः। "चिरतिक्तश्चिरातिक्तश्च किरातश्चिरतिक्तश्चभूनिंबहिमकावपीतिरभसः।" भूनिंबः। अनार्यतिक्तः। त्रयंकिराईत इतिख्यातस्य। सप्तला। विमला। ज्ञातला। "सातला। विमलासातलायांस्यादितिविश्वप्रकाशः।" भूरिफेना। चर्मकषा। पंचसप्तलायाः। "शिकेकाई इतिप्रसिद्धायाः।" ॥१४३॥

वायसोली। स्वादुरसा। वयस्था। त्रयंलहानकावल्लीकाकोली इतिचरव्यातस्य। मकूलकः। "पृषोदरादित्वादुत्वेमुकूलकोपि"। निकुंभः। दंतिका। "दंतिजा"। प्रत्यक्श्रेणी। उदुंबरपर्णी। ऊदुंबरपर्णी। उदुंबरपर्णी।" पंचद्रव्याः। "दंती इतिरव्यातायाः।" यस्याः बीजं जयपाल इतिरव्यातं॥१४४॥ अजमोदा। उग्रगंधा। ब्रह्मदर्भा। यवानिका। "यमानिका।" ह्रेयवान्याः। ओंवा इतिरव्यातायाः। "यवानी ह्रयस्यद्वेद्वे

वायसोलीस्वादुरसावयस्थाःथमेकूलकः॥ निकुंभोदंतिकाप्रत्यक्श्रेण्युदुंबरपर्ण्यपि॥१४४॥
अजमोदातूग्रगंधाब्रह्मदर्भायवानिका॥ मूलेपुष्करकाश्मीरपद्मपत्राणिपौष्करे॥१४५॥
अव्यथातिचरापद्माचारटीपद्मचारिणी॥ कांपिल्यःकर्कशश्चंद्रोरक्तांगोरोचनीत्यपि॥१४६॥

नामनीत्यपिमतं।" पुष्करं। काश्मीरं। पद्मपत्रं। "पद्मवर्णमितिपाठः।" त्रीणिपौष्करमूले। पुष्करमौषधिविशेषस्तस्यमूलेत्यर्थः॥१४५॥ अव्यथा। अतिचरा। पद्मा। चारटी। पद्मचारिणी। पंचउत्तरदेवोप्रसिद्धायाः पद्मचारिण्याः। "स्थलकमलिनीइतिरव्यातायाः।" कांपिल्यः। "कांपिल्लः। चंद्रः कर्पूरकांपिल्लसुधांशुस्वर्णवारिधिक्षितिमेदिनी। कर्कशः। चंद्रः। रक्तांगः। रोचनी। "रेचनी।" पंचरुंडारोचनीतिरव्यातायारोचन्याः॥१४६॥

प्रपुन्नाडः। "प्रपुन्नालः। प्रपुनालः। प्रपुनाडः। प्रपुन्नडः।" एडगजः। "एलगजः।" द्रुघ्नः। "द्रूघ्नः।" चक्रमर्दकः। पद्माटः। उरणाख्यः। "उरणास्यः।" षट्पुटाकञ्चाइतिख्यातस्य। पलांडुः। स्फकंदकः। द्वे पलांडोः। "कांदाइतिभाषिद्वस्य।" ॥१४७॥ हरितेहरिद्वर्णेतत्रपलांडौलतार्कः। दुद्रुमः। इतिद्वे। महौषधं। लशुनं। "लशूनं। गृंजनं। अरिष्टः। महाकंदः। रसोनकः। षट्लशुनस्य। लशुनगृंजनयोराकृतिभेदेपिरसैक्यात् अभेदोबहवोमन्यंते॥१४८॥ पुनर्नवा। शोथघ्नी। द्वे पुनर्नवायाः। "घेटुडीइतिदेशभाषिद्वायाः।" वि-

प्रपुन्नाडस्त्वेडगजोद्रुघ्नश्चक्रमर्दकः॥ पद्माटउरणाख्यश्च पलांडुस्फकंदकः॥१४७॥
लतार्कदुद्रुमौतत्र हरितेऽथमहौषधं॥ लशुनंगृंजनारिष्टमहाकंदरसोनकाः॥ १४८॥
पुनर्नवातुशोथघ्नीवितुन्नंस्फनिषण्णकं॥ स्याद्वातकःशीतलोपराजितानाणपर्ण्यपि॥१४९॥

तुन्नं। स्फनिषण्णकं। द्वे स्फुन। "कुरुडु" इतिख्यातस्य। शाकभेदस्य। वातकः। शीतलः। अपराजिता। नाणपर्णी। "सनपर्णी। असनपर्णी। आरानपर्णी। भवेदसनपर्ण्यौ नशीतलःशिशिरेन्यवदितिविश्वप्रकाशः। शीतलंपुष्पकासीसेशैलजेमलयौद्वये। पुमानासनपर्ण्यास्याच्छिशिरेवाच्यलिंगकमितिमेदिनी।" चत्वारिनाणपर्ण्याः गोकर्णीइतिख्यातायाः। "शीतलोवातकइत्येकंपदामितिधन्वंतरिराह"॥१४९॥

पारावतांघ्रिः।"पारावतांघ्री।" कटभी।पण्या।ज्योतिष्मती।लता।पंचज्योतिष्मत्याःमालकांगन्यां।इतिरत्नमालायाः।पारावतांघ्रिःस्त्री।
वार्षिकं।त्रायमाणा। त्रायंती। बलभद्रिका। चतुष्कंत्रायमाणायाः।।१५०।।विष्वक्सेनप्रिया।गृष्टिः।"गृष्टिः।"वाराही।वदरा।चतुष्कं
वाराह्याः।"वाराहीकंदडुकरकंदइतिरत्नमालायाः।"मार्कवः।भृंगराजः।"भृंगरजाः।भृंगइवरजोऽस्य।सांतोऽदंतोपि।स्यान्मार्कवोभृंग

पारावतांघ्रिःकटभीपण्याज्योतिष्मतीलता।।वार्षिकंत्रायमाणास्यात्रायंतीबलभद्रिका।।१५०।।
विष्वक्सेनप्रियागृष्टिर्वाराहीवदरेत्यपि।। मार्कवोभृंगराजैःस्यात्काकमाचीतुवायसी।।१५१।।
व्रातपुष्पासितच्छत्राऽतिच्छत्रामधुरामिसिः।।अवाक्पुष्पीकारवीचसैरणीतुप्रसारिणी।।१५२।।

रजोभृंगराजःकजागरइतिरभसात्।"डेमाकाइतिरत्नमालायस्य। काकमाची। वायसी। डेकावली।"काकजंघा"इतिरत्नमालायाः।।१५१।।व्रातपु-
ष्पा। सितच्छत्रा। अतिच्छत्रा। मधुरा। मिसिः।"मिसी"अवाक्पुष्पी। कारवी।सप्तकंचोपइतिरत्नमालायां।व्रातपुष्पायां।सरणा।"सरणी।सा-
रणी।सरणासरणी-चार्वीकटंभरामहाबलेतिरुद्रः। रुग्भेदेनाप्रसारण्यांस्वल्पनद्यांचसारणीतिमेदिनी।" प्रसारिणी।।१५२।।

कटंभरा। "कटंबरा।" राजबला। भद्रबला। पंचप्रसारण्याः। चांद्रबेल। "कुब्जप्रसारिणी।" इतिख्यातायाः। जनी। "जनिः" जतूका। "तुका" रजनी। "रजनिः" जतुकृत्। चक्रवर्तिनी॥१५३॥ संस्पर्शा। षट्चक्रवर्तिन्याः चाकवत इतिख्यातायाः। शटी। गंधमूली। "गंधमूला।" षड्ग्रंथिका। कर्चूरः। "कर्बूरः। कर्बुरः।" पलाशः। पंचशाख्याः। "कापूरकाचरी, आंबेहळद इतिख्यातायाः।" कारवेल्लुः। कठिल्लकः। "कटिल्लकः"

तस्यांकटंभराराजबलाभद्रबलेत्यपि॥ जनीजतूकारजनीजतुकृच्चक्रवर्तिनी॥१५३॥
संस्पर्शाथशटीगंधमूलीषड्ग्रंथिकेत्यपि॥ कर्चूरोपिपलाशोथकारवेल्लुःकठिल्लकः॥१५४॥
स्कषवीचाथकुलकंपटोलस्तिक्तकःपटुः॥ कूष्मांडकस्तुकर्कारुर्वारुःकर्कटीस्त्रियो॥१५५॥

॥१५४॥ स्कषवी। "स्कसवी। स्कन्नावी।" त्रीणिकारवेल्लस्य। कारली इतिख्यातस्य। कुलकं। पटोलः। तिक्तकः। पटुः। चत्वारि पटोल "पडवळ" इतिख्यातस्य। कूष्मांडकः। कर्कारुः। द्वे कूष्मांडस्य। "कोहळा इतिख्यातस्य।" उर्वारुः। "ईर्वारुः। इर्वारुः। ईर्वालुः। एर्वारुः। उन्मत्तोधुस्तुरिर्वारुः कर्कटिः स्यादितिपुंस्कांडे रत्नकोशात्।" कर्कटी। "कर्कटिः" द्वे कर्कट्याः कांकडी इतिख्यातायाः॥१५५॥

इक्ष्वाकुः। कटुतुंबी। द्वे कटुतुंब्याः।" दुध्याकडुभोंपळाइतिख्यातायाः। अत्र इक्ष्वाकुशब्दः कटुकटुतुंब्युभयसाधारणः।" तुंबी "तुंबिः। तुंबा।" अलाबूः।" आलाबूः। आलाबुः। लाबुः। लाबूः। अलाबुः स्त्रीपिंडफलातुंबिस्तुंबीमहाफला। तुंबातुवर्तुलाऽलाबूर्निबेतुंबीतुलाबुके तिवाचस्यनिः। अलाबूस्तुंबकः प्रोक्तइतिचंद्रः। लाबुकेत्यन्यकोशे। द्वेकाळाभोंपळाइतिख्यातस्य।" अलाबुर्ह्रस्वांतोपिक्वचित्। चित्रा। गवाक्षी। गोडुंबा। त्रीणिगोडुंबायाः" कवडळइतिख्यातायाः।चित्राऽखुपर्णीगोडुंबासुभद्रादंतिकास्तु च॥ मायायांसर्पनक्षत्रेनदीभेदेषु

इक्ष्वाकुः कटुतुंबीस्यात्तुंब्यलाबूरुभेसमे।।चित्रागवाक्षीगोडुंबाविशाला
त्विंद्रवारुणी॥ १५६॥ अर्शोघ्नःसूरणःकंदोगंडीरस्तुसमांशिला॥ ७

चास्त्रियामितिमेदिनी। गवाक्षीत्विंद्रवारुण्यांगवाक्षोजालकेकपाविति हेमः। गोदुग्धेतिपक्षेनदृश्यते कोशेषु। गोदुग्धेतिचभूडइतिप्रसिद्धिर्वैद्यके" विशाला। इंद्रवारुणी। द्वेइंद्रवारुण्याः।" मोठीकंवडळइतिख्यातायाः॥१५६॥ अर्शोघ्नः। सूरणः।" तालव्यादिरपि।" कंदः। त्रीणिसूरणस्य। गंडीरः।समशिला। द्वेगंडीराख्यशाकभेदस्य।" कडूसूरणइतिख्यातस्य।" ॥ ७ ७

कलंब्यादयः पंचशाकभेदाःस्युः। एकैकं। तत्रकलंबी वेण्वाकृतिः। "कलंबीतुशातपर्वाकलंबूर्वास्फबिरुधइतिवाचस्पतिः। कलंबीशाकभेदेपिस्याद्दंडशारयोःपुमानितिमेदिनी।" उपोदिका। "उपोदीकापि" वाळी। "थोरमयाळ. पोईमांडवीवेल" इतिप्रसिद्धा। मूलकंमुच्चा इतिख्यातं। हिलमोचिकादेशांतरेहलहंची। "चाकवत" इतिप्रसिद्धा॥१५७॥ वास्तूकं। बथुवा। "चंदनबटुवा" इतिप्रसिद्धं। "वास्तूक

कलंब्युपोदिकास्त्रीतुमूलकंहिलमोचिका॥१५७॥ वास्तूकंशाकभेदाःस्फर्दूर्वातु
शातपर्विका॥सहस्रवीर्याभार्गव्योरुहानंताःथसासिता॥१५८॥ गोलोमीशा
तवीर्याचगंडालीशाकुलाक्षका॥कुरुविंदोमेघनामामुस्तामुस्तकमस्त्रियां॥१५९॥

मपि" दूर्वा। शातपर्विका। "शातपर्णिका" सहस्रवीर्या। भार्गवी। रुहा। अनंता। षट् दूर्वायाः॥१५८॥ सादूर्वा। सिताशुक्लावेतृतत्र गोलोमी। शतवीर्या। गंडाली। शाकुलाक्षका। इतिचत्वारि। कुरुविंदः। मेघनामा। मुस्ता। मुस्तंकं। चत्वारिमुस्तायाः। "माथइतिख्यातायाः" मेघनामा मेघपर्यायनामकः। "मुस्तकंपुंसिक्लीबेच।" ॥१५९॥

भद्रमुस्तकः। भद्रमिति पृथगपि नाम। भद्रंस्यान्मंगले हेम्नि मुस्तके करणांतरे इति रुद्रः।" गुंद्रा। द्वे मुस्तविशेषस्य। भद्रमुस्तकस्य। "नागरमोथा इति ख्यातस्य।" अस्त्रियामिति मुस्तकभद्रमुस्ताभ्यां संबध्यते। धन्वंतरिरयं भेदमाह। मुस्तकं बुधरोमेघो घनो राजीवरोरुकः भद्रमुस्तोवराहोद्रो गांगेयः कुरुविंदक इति। चूडाला। चक्रला। उच्चटा। त्रीणि उच्चटामूलस्य। "फुरडी इति कोंकणे ख्यातस्य मुस्तविशेषस्य।" वंशः। त्वक्सारः। कर्मारः। त्वचिसारः। तृणध्वजः॥ १६०॥ शातपर्वा। यवफलः। वेणुः। मस्करः। तेजनः। दृढकंवेणोः। ये वे-

स्याद्भद्रमुस्तकोगुंद्रा चूडाला चक्रलोच्चटा॥ वंशोत्वक्सारकर्मारत्वचिसारतृ
णध्वजाः॥ १६०॥ शातपर्वायवफलोवेणुमस्करतेजनाः॥ वेणवःकीचकास्तेस्यु
र्येस्वनंत्यनिलोद्धताः॥ १६१॥ ग्रंथिर्नापर्वपरुषीगुंद्रस्तेजनकःशरः॥ ७

णवः अनिलोद्धताः अनिलेनकीटादिकृतरंध्रगतवायुनोद्धताः स्वनंतिशब्दंकुर्वंतितेकीचकाःस्युरित्येकं॥ १६१॥ ग्रंथिःपर्वापरुः। "पकरुरंतोपि। मृज्जासारोग्रंथिपरुःपरागःकुसुमेरेणुरिति पुस्कांडेरत्नकोशात्।" त्रीणिवंशादिग्रंथेः। पेरे इति ख्यातस्य। तत्रग्रंथिर्नापुमान्। गुंद्रः। तेजनकःशरः। "सरः। सरस्तुंजोबाणाख्योगुंद्रस्तेजनकःशर इतिवाचस्पतेर्दित्यादिश्च।" त्रीणिशरस्य। ७ ७

नडः।"नलः।अथपोटगलःपुंसिनलेचकाशोमत्स्ययोरितिमेदिनी।" धमनः।पोटगलः।त्रीणिदेवनळइतिख्यातस्य।काशः।"कासं" ॥१६२॥ इक्षुगंधा।पोटगलः।त्रीणिकाशस्य।"काशंपुन्नपुंसकं।"बल्वजाइत्येकंपुल्लिंगंबहुवचनांतं।"मोळ, लव्हाळे, लवा इतिख्यातस्य। एकोबल्वजइतिभाष्यकारवचनादेकत्वेपि।" रसालः। इक्षुः।द्वेइक्षोः।पुंड्रः।कांतारकः।इत्यादयस्तस्येक्षोर्भेदाः।

नडैरुक्कधमनःपोटगलोऽथोकाशैमस्त्रियां॥१६२॥इक्षुगंधापोटगलःपुंसि भूम्नि तुबज्वजाः॥रसालइक्षुस्तद्भेदाःपुंड्रकांतारकादयः॥१६३॥स्याद्वीरणंवीर तरंमूलेस्योशीरमस्त्रियां॥अभयंनलदंसेव्यममृणालंजलाशयं॥१६४॥

आदिनाकोशाकारादिग्रहः। "सच।इक्षुःकर्कटकोवंशःकांतारोवेणुनिःसृतिः।इक्षुरस्यःपौंड्रकश्चरसालःकुसुमारकःइति" एकैकं॥१६३॥ वीरणं। वीरतरं।तृणभेदस्य।"काळावाळाइतिख्यातस्य"द्वे अस्यवीरणस्यमूले।उशीरं।अभयं।नलदं।सेव्यं।अमृणालं।जलाशयं॥१६४॥

लामज्जकं। लघुलयं। अवदाहं। इष्टकापथं। इतिदशनामानिस्युः। लघु। लयं। इतिपृथगपि। लामज्जकंरुचासंस्यादमृणालंलयंलघिति रुश्रुतः। अवदाहेष्टकापथमितिचैकैकंपदमिति। नडादयः। नडकाशादयः। तृणंतृणजातीयाइत्यर्थः। "नलादयइत्यपि पाठः। येचगर्मुच्छ्यामाकप्रमुखाः गर्मुच्छ्यामाकौतृणधान्यविशेषौ। प्रमुखशब्दाद्दृश्यमाणाःकुशादयःकंगुकोद्रवाद्याश्चतेपितृणजा

लामज्जकंलघुलयमवदाहेष्टकापथे॥ नडादयस्तृणंगर्मुच्छ्यामाकप्रमुखाअपि॥१६५॥
अस्त्रीकुशंकुथोदर्भःपवित्रमथकत्तृणं॥ पौरसौगंधिकंध्यामदेवजग्धकरोहिषं॥१६६॥

तीयाः। "अत्रप्रमुखशब्दान्नीवाराद्या ग्रहीतव्याः। अन्यथा कोद्रवादीनां हविष्यत्वापाता तू। श्यामाकः। श्यामकोपिचेति हलायुधाच्छाम कोपि।" एकं॥१६५॥ कुशः। कुथः। दर्भः। पवित्रं। चत्वारिकुशस्य। तत्रकुशंक्लीबपुंसोः। कत्तृणं। पौरं। सौगंधिकं। ध्यामं। देवजग्धकं। रोहिषं। षट्गंजाणं। "रोहिसगवत" इतिख्यातस्यतृणभेदस्य॥१६६॥

छत्रा। अतिछत्रः। पालध्रः।" पालं क्षेत्रं हंतीति पालध्रः।" माला तृणकं।" मालाकाराणि तृणान्यस्य।" भूस्तृणं। पंचवचाकृतेर्जलतृण भेदस्य।" अत्रआद्यत्रयं द्योतगवत इतिख्यातस्य। अंत्यद्वयं मालाकारतृणस्येत्यपिमतं।" शष्पं।" शस्यं" बालतृणं। द्वेकोमलतृणस्य। घासः। यवसं। द्वेगवादीनांभक्ष्यतृणस्य। तृणं। अर्जुनं। द्वेतृणमात्रस्य॥१६७॥ तृणानांसंहतिःसमूहस्तृण्येत्युच्यते। एकं।

छत्रातिच्छत्रपालघ्नीमालातृणकभूस्तृणे॥ शष्पंबालतृणंघासोयवसंतृणमर्जुनं॥१६७॥
तृणानांसंहतिस्तृण्यानड्यातुनडसंहतिः॥ स्तृणराजाह्वयस्तालोनालिकेरस्तुलांगली॥१६८॥

नडानांसंहतिर्नड्येत्युच्यते। एकं। तृणराजः। तालः। द्वेतालस्य। तृणराजाह्वयस्तृणराजनामकः। नालिकेरः।" नारिकेरः। नारिकेलः। नाडिकेरः। नारीकेलः। नारिकेलिः। नारीकेली।" लांगली। द्वेनारिकेलस्य।" नारळ इतिख्यातस्य। लांगलीस्त्री। ङीषंतः। इन्नंतः पुंसीत्येके॥१६८॥

घोंटा। पूगः। क्रमुकः। गुवाकः। "गूवाकः। गुवाकोपि च गूवाकं इति तारपालः।" खपूरः। पंच पूगवृक्षस्य। सुपारीपोफळी इतिख्यातस्य।" अस्य फलंउद्वेगमित्युच्यते। एते ताल नालिकेर पूगास्त्रयः। हिंतालस्तालभेदः सतु अल्पपरिमाणः तत्सहिताः। एवं चत्वारः। खर्जूरादयश्चत्वारश्च। एवमष्टौ एते तृणद्रुमा इत्युच्यंते। एकं। तत्रखर्जूरः खाजूर इतिख्यातः। केतकीडीषंताकेगत। "केतक" इतिख्याता। एवं

घोंटातुपूगःक्रमुकोगुँवाकःखपुरोस्यतु॥फलमुद्वेगमेतेचहिंतालसहितास्त्रयः॥१६९॥खर्जूरःकेतकीतालीखर्जूरीचतृणद्रुमाः॥ इतिवनौषधिवर्गः॥ सिंहोमृगेंद्रःपंचास्योहर्यक्षःकेसरीहरिः॥ "कंठीरवोमृगरिपुर्मृगदृष्टिर्मृगाननः॥ पुंडरीकः पंचनखचित्रकायमृगद्विषः॥ १॥" ७

ताली तालीभेदः। खर्जूरी खर्जूरभेदः॥१६९॥ इतिवनौषधिवर्गः॥ ७॥ ॥ सिंहः। मृगेंद्रः। पंचास्यः। हर्यक्षः। केसरी। हरिः। षट्सिंहस्य। केसरी इन्नंतः। तालव्यमध्योपि। पंचंविस्तृतमास्य मस्य पंचास्यः।" पंचविस्तारे। मुखंपादाश्चपंचास्यानीवयस्येतिवा" कंठीरवोमृगरिपुर्मृगदृष्टिर्मृगाननइत्यादयोप्यस्यपर्यायाः॥१॥ ७ ७ ७

शार्दूलः। द्वीपी। व्याघ्रः। त्रीणिव्याघ्रस्य। तरक्षुः"तरक्षः"मृगादनः। द्वेकुक्कुराकृतेःकृष्णरेखाचित्रि तस्यमृगविशेषस्य। "तरस इति
ख्यातस्य।"। वराहः।सूकरः। घृष्टिः।"गृष्टिः"। कोलः। पोत्री। किरिः।"किरः"किटिः। दंष्ट्री। घोणी।स्तब्धरोमा। क्रोडः।भूदारः।द्वादश
सूकरस्य। तालव्यादिरपि सूकरः। साहचर्याद्वृष्टिःपुंसि। पोत्रिणौ। दंष्ट्रिणौ। घोणिनौ। स्तब्धरोमाणौ।।२॥ कपिः। प्लवंगः। प्लु-

शार्दूलद्वीपिनौव्याघ्रे तरक्षुस्तुमृगादनः॥१॥ वराहःसूकरोघृष्टिःकोलःपोत्रीकिरिः
किटिः॥ दंष्ट्रीघोणीस्तब्धरोमाक्रोडोभूदार इत्यपि॥ कपिप्लवंगःप्लवगशारवामृग
वलीमुखाः॥ मर्कटोवानरःकीशोवनौकाअथभल्लुके॥ २॥ ४

वगः। शारवामृगः। वलीमुखः। "बलिमुखः।बली मुखः।"मर्कटः। वानरः।कीशपवनौकाः। नवकंवानरस्य। वनौकसौ।("शारवाचारी
मृगः शारवामृगः।" भल्लुकः॥२॥ ४ ४ ४

ऋक्षः।अच्छभल्लः।भल्लूकः।"भल्लुकः।भालूकः।" चतुष्कमच्छभल्लस्य।आरण्यः रीस इतिख्यातस्य।केचनभालू इतिख्यातायाः।नाम चतुष्कमिति वदंति।" ह्रस्वमध्योपि। भल्लुक इति। अच्छभल्लपरिषद्विरहतीतित्रयोगः।अच्छइतिच।अच्छस्फटिकभल्लूकनिर्मलेषितिमेदिनी। गंडकः। खड्गः। खड्गी। त्रीणिगंडश्रृंग "गेंडा" इतिलुलायः।"लुलाय इतिओष्ठ्यांतोपि" महिषः। वाहदूषन्। कासरः।सैरिभः। पंचमहिषस्य।"गवाइतिख्यातस्य।"॥४॥ शिवा। भूरिमायः।गोमायुः।मृगधूर्तकः। शृगालः।"सृगालः" वंचुकः।"वंचकः।वंचकस्तुखलेधूर्ते

ऋक्षाऽच्छभल्लभल्लूकागंडकेरवड्गखड्गिनौ॥लुलायौमहिषोवाहदूषत्कासरसैरिभाः॥४॥स्त्रियांशिवाभूरिमाय
गोमायुमृगधूर्त्तकाः॥शृगालवंचुकक्रोष्टुफेरुफेरवजंबुकाः॥५॥ओतुर्बिडालोमार्जारोदृषदंशकआरवुभुक्॥
त्रयोगौधेरगौधारगौधेयागौधिकात्मजे॥६॥ ७॥ गृहबभ्रौचजंबुकइतिकोशांतरात्।" क्रोष्टा।फेरुः।फेरवः। जंबुकः दत्राजंबुकस्यकोल्हाइतिख्यातस्य।स्त्रियामितिपुंव्यक्तावपिशिवाशब्दोनित्यंस्त्रीलिंगइत्यर्थः।चतुष्पदांहिलिंगतावश्यतेनदपवादोयं।" सृगालोदंत्यादिरपि।क्रोष्टुशब्दस्यरूपाणितु। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः।क्रोष्टारं। क्रोष्टारौ। क्रोष्टून्। क्रोष्ट्रा। क्रोष्टुनेत्यादिदीर्घमध्योपिजंबूक इति॥५॥ ओतुः।बिडालः।बिडालः।मार्जारः। दृषदंशकः।आरवुभुक्। पंचमार्जारस्य।गौधेरः। गौधारः।गौधेयः।एतेत्रयःशब्दागौधिका

त्मजेस्थलगोधिकायाअपत्येंगारइतिख्याते।"अयंकृष्णसर्पद्वोधायांघोरपडइतिख्यातायांचतुष्पाज्जायते।अस्यसर्पस्यदंशेनमानवो ऽवश्यंम्रियते।"॥६॥श्वाविन्। शाल्यः।द्वेशाल्यस्य।साळई "साळी" इतिख्यातस्य। श्वानंविध्यतिलोम्ना। श्वावित्। श्वाविधौ। तस्यशाल्य स्यलोम्नि शालली।शालली। शालं। शालं। इतित्रीणि।शाललीस्त्रियां। इदंसीमंनोन्नयनादावुपयुज्यते। वातघ्नमृगः।द्वेवातमृगस्य। बाघूळ इतिख्यातस्य। वातघ्नमृगीरीदंतःपुंसि।रूपाणितु। वातघ्नमृगः।वातघ्नमृग्यौ। वातघ्नमृग्यः। वातघ्नमृगं। वातघ्नमृग्यौ। वातघ्नमृगान्। समस्येकवचनेतुस

श्वाविन्नुशाल्यस्त्वलोम्निशालल्यौशालंशालं॥वातघ्नमृगीवातघ्नमृगःकोकस्त्वीहामृगोवृकः॥७॥
मृगेकुरंगवातायुहरिणाऽजिनयोनयः॥ऐणेयमेण्याश्वर्मांद्यमेणस्यैणंतुभेत्रिषु॥८॥

वर्णदीर्घः। वातघ्नमृगीस्त्रियांतुलक्ष्मीवत्। कोकः।ईहामृगःवृकः। त्रीणिवृकस्यलांडगाइतिख्यातस्य।"॥७॥ मृगः।कुरंगः।वातायुः।"वा नायुः।वनायुः" हरिणः।अजिनयोनिः।पंचहरिणस्य। एण्याहरिण्याश्चर्मांद्यंआद्यशाल्यादिमांसादिऐणेयमित्यच्यते। एकं। प्राणिरज तादिभ्योऽञ्इत्यञ्। एणस्यतुचर्मांद्यंऐणमित्यच्यते।एकं।उभेऐणेयंऐणंचत्रिषुस्वरं॥८॥

कदली। कंदली। चीनः। चमूरुः। प्रियकः। समूरः। एतेषट्हरिणभेदाः। एकैकं। कदली कंदल्योर्ङीषंतेस्त्रियां। स्वामिमनेतुइन्नंतौपुंसि। अमीषट्हरिणाः वक्ष्यमाणाःकृष्णसारादयश्चअजिनयोनयउच्यंते। यत एतेचर्मण्युपयुक्ताः॥९॥कृष्णसारः। "कृष्णसारः।कृष्णश्चासौसारश्च। वर्णोवर्णेनेतिसमासः। सारःशाबलबातयोरितिताल्व्योर्हरभसः।" रुरुः। न्यंकुरंकुः। शंबरः। "शंवरः। संवरः। शंहणोनिहञ्वरणे। रोहिषः। "रोहिषः।रोहिषंकृत्तृणेज्ञेयंरोहिषोहरिणांतरइतिविश्वप्रकाशः" गोकर्णः। पृषतः। ऐणः। ऋश्यः। ऋष्यः। एणः। कु

कदली कंदली चीनश्च मूरुप्रियकावपि॥ समूरुश्चेतिहरिणा अमी
अजिनयोनयः॥९॥ कृष्णसार रुरुन्यंकुरंकुशंबररोहिषाः॥

रंगमोरिष्यःसादृश्यश्चारुलोचनइतित्रिकांडशेषात्। तत्रारिष्योपि।" रोहितः। "लोहितः" चमरः। एतेद्वादशामृगाःमृगभेदाः। एकैकं। तत्र कृष्णसारः कृष्णवर्णेनमिश्रःकृष्णमृगइतिख्यातः। रुरुर्देशांतरभाषायांभुवार "रोहें" इतिख्यातः। न्यंकुर्नागुणइतिख्यातः। "शंबरभेदः" रंकुश्चिता। "चितळ जंडियारमृगविशेष" इतिख्यातः। शंबरः। सांबा। "सांबर" इतिख्यातःरोहिषःरोही इतिख्यातः॥

गोकर्णः गोंच इति ख्यातः। पृषतः बिंदुविशिष्टः पृषिव इति ख्यातः। एणश्चारुनेत्रः। ऋष्यः वीप्रगामी। रोहितोरक्तवर्णः। चमरश्चामरो-
पयोगिपुच्छः॥१०॥ गंधर्वः शरभः। रामः। सृमरः। गवयः। शशः। एतेषट्मृगभेदाः। "शरभस्तालव्यादिः।" तत्रगंधर्वोगंधविशिष्टः।
शरभोलडीसरा इतिप्रसिद्धः। रामोरमणीयरूपोमृगभेदः। सृमरःसरणशीलः। गवयःगवाइति ख्यातः। शशाःससाइति ख्यातः॥

गोकर्णपृषतेणर्ष्यरोहिताश्चमरोमृगाः॥१०॥गंधर्वःशरभोरामःसृमरोगवयःशशाः॥
इत्यादयोमृगेंद्राद्यागवाद्याःपशुजातयः॥११"अधोगंतासुरवनकोवृकःपुंध्वजउंदुरः॥

एकैकं। इत्यादयःगंधर्वादयःआदिशब्दादन्यानुक्तावनपोतादयोयेचपूर्वोक्तामृगेंद्राद्याःसिंहाद्याश्चमरांताश्चयेचवर्गांतरेवक्ष्य
माणागवाद्याःगोहस्त्यश्वादयःतेसर्वेपशुजातयःपशुशब्दवाच्याइत्यर्थः एकं॥११॥ अधोगंता। रवनकः। वृकः। पुंध्वजः। उं-
दुरः। पंचश्लोपकश्लोकगतनामानिमूषकस्य।" ॥

उंदुरुःमूषकः।"ह्रस्वोपधदीर्घोपधमुषमूषधातुभ्यांकुनिमुषकश्चमूषकइतिदूयं।"आखुः।त्रयंमूषकस्यउंदुरुंदुरुरुंदुरइतिशब्दार्णवे।गिरिका। बालमूषिका। द्वे स्वल्पमूषकजातेः।"खर्वारवुबालमूषिकेतिदुर्गः।" छुछुंदरीगंधमुखीदीर्घतुंडादिवांधिकेतिश्लोकार्धेकेचिदत्रपठंति। सरटः।कृकलासः।"कृकलाशः।कृकुलासः।" द्वेसरडाइतिख्यातस्य। मुसली।गृहगोधिका।"गृहगोलिकेत्यपिपाठः।" द्वेगृहगोधायाः।"पालइतिख्यातायाः।"मुसतिसंज्ञायंखंडयतिऋभाऋभसूचकत्वात्मुसलीङीषंता।मुशालीति।तालव्यमध्यापि।ज्ये-

उंदुरुर्मूषकोप्याखुर्गिरिकाबालमूषिका।।सरटः कृकलासःस्यान्मुसलीगृहगोधिका।।१२।।
लूतास्त्रीतंतुवायोर्णनाभमर्कटकाःसमाः।।नीलंगुस्कृमिःकर्णजलौकाःशातपद्युभे।।१३।।

शास्त्रीकुडयमत्स्याचगृहगोधागृहालिकेतिकोशांतरं।।१२।। लूता। तंतुवायः।"तंत्रवायः।"ऊर्णनाभः।मर्कटकः।चत्वारिऊर्णनाभस्य।" कोष्ठी।कोळी इतिख्यातस्य।तत्रलूतानित्यंस्त्री।नीलंगुः।कृमिः।"क्रिमिः।क्रिमिर्नाक्रिमिवत्कीटलाक्षायांकृमिलेखर इतिमेदिनी। द्रुमामयेभवेपुंसिकीटेचकृमिवाक्रिमिरितिरभसः।" द्वेअपिपुंसि।क्षुद्रकीटमात्रस्य।"कुक्कुरडाघुलेंइतिख्यातस्य" नीलंगुरितिदीर्घमध्योपि।"नीलंगुरपिनीलांगुरितिह्लिरूपकोशः।" कर्णजलौकाः। शातपदी। द्वेस्त्रीलिंगे। कर्णजलूका।"घोणगोमवळोंजी" इतिख्यातायाः

शतंपादायस्याःसा। "कर्णजलोकाश सांताकर्णजलूकाकर्णजलौकेतिचटाबंतापि"॥१३॥ वृश्चिकः। यूकंकीटः। हे यूकंकीटस्य। "ऊर्णादिभक्षकस्य कसरइतिख्यातस्य।" यूकं यूकाकारंलोमतद्युक्तसर्वांगःकीटः यूककीटः। अलिः। "आलिः।" वृश्चिकोद्रुणआलिः स्यादितिबोपालितः। आली। अथाली स्याद्वृश्चिकेभ्रमरेपुमानितिकोशांतरं।" द्रुणः। "द्रोणः।" वृश्चिकः। त्रीणिविंचूइतिख्यातस्य।

वृश्चिकः यूककीटःस्याद्दलिद्रुणोतुवृश्चिके ॥ पारावतः
कलरवः कपोतोथशाशादनः ॥ १४॥ ४

विषकीटस्य। तत्रालिर्द्वंतइन्नंतश्च। पारावतः। "पारापतः। पारापतःकलरवःपत्रीद्वयेनःशाशादनइतिरभसः।" कलरवः। कपोतः। त्रीणिपारावतस्य। पारवा। "रक्तचूतर" इतिख्यातस्य। पारावतःकपोतःस्यात्कपोतोविहगांतर इतिविश्वः। शाशादनः॥१४॥

पत्री। श्येनः। श्रयंससाणइतिख्यातस्य। उलूकः। वायसारातिः। पेचकः। त्रयंसुलूकस्य। घूकः। "घुवड.पेंचापक्षी" इतिख्यातस्य। "दिवांधः। कौशिकः। घूकः। दिवाभीतः। निशाटनः। पंचकमघुलूकस्य।" व्याघ्राटः। भरद्वाजः। द्वैभरद्वाजस्यपक्षिणः। "कुकुडकोंबा। कुंभारकोंबा इतिख्यातस्य।" खंजरीटः। खंजनः। द्वैचलसुष्यस्यपक्षिविशेषस्य। "नाजवा.तय्यरइतिख्यातस्य।" ॥१५॥ लोहपृष्ठः। कंक-

पत्री श्येनउलूकस्तुवायसारातिपेचकौ॥ "दिवांधःकौशिकोघूकोदिवाभीतो
निशाटनः॥" व्याघ्राटःस्याद्भरद्वाजःखंजरीटस्तुखंजनः॥१५॥लोहपृष्ठस्तुकंकः
स्यादथचाषैःकिकीदिविः॥कलिंगभृंगधूम्याटाअथस्याच्छत्रपत्रकः॥ १६॥ ४१

द्वैबाणोपयोगिपत्रस्यपक्षिभेदस्य। चाषः। "चामः। इक्षुपक्षिभिदोश्चासइतिदंत्यांतेषुरुद्रः।" किकीदिविः। "किकीदाविः। किकिदिवः। किकिदिवः। किकीदिवाः। किकीदिवः। किकिः। किकी। दिवः। चाषोद्विविः किकिःस्मृतइतिव्याडिः" द्वैचारगा। "चाष.चास.तास." इतिख्यातस्य। कलिंगः। भृंगः। धूम्याटः। त्रीणिफेंचुहार। "मस्तकचूडपक्षी" इतिख्यातस्य। "धूमसमूहइवाटतीतिधूम्याटः।" छत्रपत्रकः॥१६॥ ४१

दार्वाघाटः। द्वे वटपोरा। "स्फतारपक्षी। काष्ठकुट्टकारी।" इतिरव्यातस्य। सारंगः। शारंगः। शारंगश्चातकेरव्यातः। शबले हरिणेपिचेति तालव्यादावजयः।" नोककः। चातकः। त्रीणिचातकस्य। कुकवाकुः। ताम्रचूडः। कुक्कुटः। चरणायुधः। चत्वारिकुक्कुटस्य। "कोंबडेंइति रव्यातस्य।" ॥१७॥ चटकः। कलविंकः। द्वे चटकस्य। "चिमणी इतिरव्यातस्य।" तस्यचटकस्यस्त्री चटकेत्येकं। तयोश्चटकस्यचट

दार्वाघाटोऽथसारंगःस्तोककश्चातकःसमाः॥ कुकवाकुस्ताम्रचूडःकुक्कुटश्चरणायुधः॥१७॥
चटकःकलविंकःस्यात्तस्यस्त्रीचटकातयोः॥पुमपत्येचाटकैरस्त्रपत्येचटकैवसा॥१८॥
कर्करेटुःकरेटुःस्यात्कणक्करोसमौ॥वनप्रियःपरभृतःकोकिलःपिकइत्यपि॥१९॥

कायाश्चपुमपत्येचाटकैरइत्येकं। तयोस्त्र्यपत्येस्त्रीरूपेऽपत्येचटकेत्येकं॥१८॥ कर्करेटुः। "कर्कराटुः।" करेटुः। "करटुः"। द्वेअरुक्षभक्षादिनि पक्षिभेदे। कंकरेट। "करटोंकपक्षी।" इतिरव्याते। "करेटुःकर्करेटुःस्यात्करटुःकर्कराटुक इतिरभसः।" कणः। क्करः। द्वे करकइतिरव्यातस्य। करेटुभेदस्य। कइतिकणतिशब्दं करोतिकेनाणतिशब्दं करोतिवा।" वनप्रियः। परभृतः। कोकिलः। पिकः। चत्वारि कोकिलस्य॥१९॥

काकः। करटः। अरिष्टः। बलिपुष्टः। सकृत्वजाः। ध्वांक्षः। आत्मघोषः। परभृत्। बलिभुक्। वायसः। दत्ताकाकस्य। "चिरंजीवी। एकदृष्टिः। भीरुकुलिः। भीकलिरपि। एतदपित्रयं काकस्य।" परभृतौ। बलिभुजौ॥ २०॥ द्रोणकाकः। काकोलः। ढुंकाकभेदस्य। "डोंवकाचळा। रूप्यकाचळा।" इतिरभ्यातस्य। "द्रोणोस्त्रियामाढकेस्यादाढकादिचतुष्टये। पुमान्रूपीपतौरूप्यकाकेस्त्रीनीरदंतरइतिमेदिनी। द्रोणःकपीपतौरूप्यकाकइतिविश्वप्रकाशाः। द्रोणकाकोदग्धकाकोढुंढुकाकोवनाश्रयइतित्रिकांडशेषः।" दात्यूहः। "दात्योहः।" कालकंठकः। ढुंडाह द

काकेतुकरटारिष्टबलिपुष्टसकृत्वजाः॥ ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसाअपि॥ "सएवचिरंजीवीचैकदृष्टिश्चभीरुकुलिः॥" २०॥ द्रोणकाकस्ढुंकाकोलोदात्यूहःकालकंठकः॥ आतापिचिल्लोदाक्षाघ्यगृध्रोकीरशुकोसमौ॥ २१॥

"अंधकाक। जलकाक" इतिरभ्यातस्य। कालेवर्षाकालेकंठोऽस्यकालकंठकः। आतापी। "आतायी। आतापिनिभवेच्चिल्ल इतिविश्वप्रकाशाः।" चिल्लः। ढे चिल्लस्य। घार इतिग्रसिद्धस्य। आतापिनौ। दाक्षाघ्यः। गृध्रः। ढे गृध्रस्य। "गीध इतिख्यातस्य। दाक्षाघ्य इतिहितालव्यसंयुक्तोत्यपाठःसर्वत्रदृश्यते। दक्षदृढौशीघ्रार्थेच। ब्रूदक्षिस्पृहिगृहीत्याघ्यः। दक्षाघ्यः। दक्षाघ्यस्यायञ्णौ दाक्षाघ्य" कीरः। शुकः। ढे कीरस्य। "रावा। राघू। पोपट इतिख्यातस्य।" ॥ २१॥

कुङ्। क्रौंचः। "क्रुंचः" इत्येके। "कुरकुंचा" इतिख्यातस्य। तत्रकुङ् चांतः। क्रुंचौ। बकः। कङ्कः। इत्येकस्य। "बगळा इतिख्यातस्य।" केजलेक्वयते शब्दंकुरुतेकङ्कः। कंकइतिपाठः। "अयंपाठःकुत्रास्तीतिमदृश्यते। किंतुसर्वत्रकङ्कइत्येव।" पुष्कराङ्कः। सारसः। द्वे सारसस्य। पुष्कराङ्कः पद्मपर्यायनामकः। कोकः। "कुकः" चक्रः। चक्रवाकः। रथांगः। चत्वारिचक्रवाकस्य। रथांगस्यचक्रस्यये आह्वायाः नामानितन्नामकः॥२१॥ कादंबः। कलहंसः। द्वेकलोमधुरवाक्यसचासौहंसश्चतस्यबदकइतिप्रसिद्धस्य। उक्रोशः। कुररः। द्वे कुररस्य।

कुङ्क्रौंचोथबकःकङ्कःपुष्कराङ्कस्सारसः॥ कोकश्चक्रःश्चक्रवाकोरथांगाह्वय
नामकः॥२२॥ कादंबःकलहंसस्स्यादुत्क्रोशाकुररौसमौ॥ हंसास्त्रयेवेतगरुतश्च
त्वांगामानसौकसः॥२३॥ राजहंसास्तुतेचंचुचरणैर्लोहितैःसिताः॥

कुररइतिप्रसिद्धस्य।" हंसः। श्वेतगरुत्। चत्वांगः। मानसौकाः। चत्वारि हंसस्य। बहुत्वविवक्षायांबहुवचनं॥२३॥ यैर्लोहितैः देहेनरक्तैः चंचुचरणैर्लोहितैरुपलक्षिता हंसास्तेराजहंसाःस्युरित्येकं। चंचुसहिताश्चरणास्तैरितिविग्रहः। अन्यथाप्राप्त्यंगत्वादेकवचनंदुर्वारं। लक्षणेनतथा। "हंसानांराजाराजहंसः॥"

मल्लिनेरावडूमेश्वंचुचरणेस्तसिताहंसामल्लिकाक्षाद्वयेकथ्यंते। एकं। मल्लिकाकाराणिअक्षीणियेषांते "मल्लिकाक्ष्या इत्यपि।" सिनेतरेः कृष्णवर्णैःचंचुचरणैलक्षिताःस्तेधार्तराष्ट्राःस्युः। एकं॥२४॥ द्वारारिः।"द्वारातिः।द्वारालिः।द्वाराली। द्वाराटिः।द्वाराडिः। आडिःद्वारालिर्वरटीगंधोलीबानरीकपीतिस्त्रीलिंगकांडेरलकोशः।"आटिः।"आटी"आडिः।"आडी।" अयंस्त्रीलिंगं। आडीतिख्यातस्यपक्षिणः।"आ

मल्लिनेमल्लिकाक्ष्यौस्तेधार्तराष्ट्राःसिनेतरेः॥२४॥ द्वारारिराटिराडिश्चबलाकाबिसकंठिका॥हंसस्ययोषिद्वरदासारसस्यतुलक्ष्मणा॥२५॥ ७

टिःपुल्लिंगोपिक्वचित्।" बलाका।बिसकंठिका।देबालेदोंक।" बगळा " इतिख्यातस्य।बकभेदस्य।बिसमिवदीर्घःकंठोस्याःबिसकंठिका। हंसस्ययोषित्स्त्रीवरदास्यादित्येकं।सारसस्यस्त्रीतुलक्ष्मणेत्यंकथ्यते।"निर्मकारोपि।लक्ष्मणश्चैवसारसइत्यमरमाला। लक्षणंनाम्निचिन्हेचसारस्यालक्षणाक्वचिदितिविश्वः।" एकं॥२५॥ ७ ७

जतुका। "जतूका" अजिनपत्रा। द्वे बदुरी। "चामचिरा ई" इतिख्यातेपक्षिभेदे। अजिनंचर्म तद्रूपेपत्रेपक्षोयस्याःसा। परोष्णी। "परोष्टी।" तैलपायिका। द्वे पशुयुक्केकीटकविशेषेतेलडुबा। "वाघूच" इतिख्याते। तैलंपिबतीवतैलपायिका। चत्वार्यपिजतुकायाडुप्रेके। वर्वणा "बर्बणा" मक्षिका। "मक्षीका। नीला। त्रयंमक्षिकायाः। सरघा। मधुमक्षिका। द्वेमक्षिकाभेदस्य। "मधमाशी इतिख्यातस्य"॥२६॥पतं

जतुकाजिनपत्रास्यात्परोष्णीतैलपायिका॥वर्वणामक्षिकानीलासरघामधुमक्षिका॥२६॥
पतंगिकापुत्तिकास्याद्दंशास्तुवनमक्षिका॥दंशीतज्जातिरल्यास्याद्गंधोलीवरटीद्वयोः॥२७॥

गिका। द्वे मधुमक्षिकाभेदस्य। इयंतुसरघातःक्षुद्रा। यन्निर्मितोमधुभेदः। माक्षिकंतैलपर्णीस्याद्धुनवर्गेतुपोत्तिकमिति। दंशाः। वनमक्षिका। द्वे "मोठीडांस रानमाशी।" इतिख्यातस्य। तेषांदंशानांजातिर्यस्याःसादंशीत्युच्यते। "एकेडांस इतिख्यातस्य"। गंधोली। वरटा। "वरटी। वरटा वरटी हंस्योस्त्वसौवरटःस्मृतइतितारपालः। "द्वे वरटी।" गांधीणमाशी" इतिख्यातस्य। तत्रगंधोलीङीषंना। वरटास्त्रीपुंसयोः॥२७॥

भृंगारी। झीरुका।"झीरिका। झिरुका। झिरिका। झिरीका।" चीरी। झिल्लिका।"झिल्लीका। झिल्लका। चीलिका। चिल्लका।" चत्वारिझिल्ली "मुरा कूट. चिल्लट इत्यादिरव्यातस्या" झी इतिरौतिझीरुका। ची इतिरौतिचीरी। याहि रात्रौअदृश्यासतिस्वनति। तथाचप्रयोगः।अदृश्यझिल्लीस्वनकर्णशूलेरिति। समाइत्यनेनचतुष्टयमेककार्यकमित्यक्तं। इमाइतिस्त्रीत्वनिश्चयः। पतंगः। शालभः। द्वेटोळ."दीपपतंग" इतिरव्यातस्य। खद्योतः।

भृंगारीझीरुकाचीरीझिल्लिकाचसमाइमाः॥ समौपतंगशालभौखद्योतोज्योतिरिंगणः॥२८॥ मधुव्रतोमधुकरोमधुलिण्मधुपालिनः॥ द्विरेफपुष्पलिड्भृंगषट्पदभ्रमरालयः॥२९॥ मयूरोबर्हिणोबर्हीनीलकंठोभुजंगभुक्॥ शिखावलःशिखीकेकीमेघनादानुलास्यपि॥३०॥

ज्योतिरिंगणः। द्वे खद्योतस्य।"काजवा इतिरव्यातस्य" मधुव्रतः। मधुकरः। मधुलिट्। मधुपः। अली। द्विरेफः। पुष्पलिट्। भृंगः। षट्पदः। भ्रमरः। अलिः। एकादशभ्रमरस्य। अमधुकरेमधुकरशब्दोरूढः। मधुकिरतिविक्षिपतीतिवा। मधुलिहौ। पुष्पलिहौ॥२९॥ मयूरः। बर्हिणः। बर्ही। नीलकंठः। भुजंगभुक्। शिखावलः। शिखीकेकी। मेघनादानुलासी। नवमयूरस्या बर्हिणोदंतः। बर्हिइन्नंतः। भुजंगभुजौ। शिख्यादित्रयमिन्नंतं। मेघनादमनुलसत्यवश्यंमेघनादानुलासी॥

॥३०॥

मयूरवाणीकेकेत्युच्यते। एकं। चंद्रकः। मेचकः। द्वे पिच्छस्यनेत्राकारचिन्हस्य। "बर्हिकंठसमवर्णमेचकंब्रुवतेबुधाइतिकात्यः।" शिखा। चूडा। द्वे मयूरशिखायां। शिखंडः। पिच्छं। बर्हं। त्रीणिमयूरपिच्छस्य ॥३१॥ खगः। विहंगः। विहगः। विहंगमः। विहायाः। शाकुंतिः।

केकावाणीमयूरस्यसमौचंद्रकमेचकौ॥शिखाचूडाशिखंडस्तुपिच्छबर्हेनपुंसके॥३१॥
खगेविहंगविहगविहंगमविहायसः॥शाकुंतिपक्षिशाकुनीशाकुंतशाकुनद्विजाः॥३२॥
पतत्रिपत्रिपतगपतत्रत्रथांडजाः॥नगौकोवाजिविकिरविष्किरपतत्रयः॥३३॥
नीडोद्भवागरुत्मंतःपित्संतोनभसंगमाः॥ ७ ७

पक्षी। शाकुनिः। शाकुंतः। शाकुनः। द्विजः॥३२॥ पतत्री। पत्री। पतगः। पतनू। पत्ररथः। अंडजः। नगौकाः। वाजी। विकिरः। विः। विष्किरः। पतत्रिः॥३३॥
नीडोद्भवः। गरुत्मान्। पित्सन्। नभसंगमः। सप्तविंशतिः पक्षिमात्रस्य शाकुंतिरिदंतः। शाकुनेदंतः। विरित्येकाक्षरंनाम। नभसंगम इति पंचाक्षरं॥

अथतेषांविशेषाभिधास्यंतइतिशेषः। हारीतोदेशांतरभाषयाहारिल "तिलगिरूपक्षी" इतिख्यातः। "हारितइतीकारन्हस्वोपि।" मधुः। जलकाकः। "पाणकावळा इतिख्यातः।" कारंडवः। करडुवाइतिख्यातः। "अयंकाकतुंडोदीर्घपादःकृष्णवर्णः।" प्लवः। पुडेरी। "पाणकोंबडा" इतिख्यातः। "प्लवःप्लुक्षेप्लुतौकपौ। द्वाब्देकरंडवेप्लेंच्छजातौभेलकभेलयोः। क्रमनिम्नमहीभागेकुलकेजलवायसे। जलांतरे प्लवंगंधतृणेमुस्तकभिद्यपीतिहेमचंद्रः।" ॥२४॥ तित्तिरिः। "तित्तिरः। कपोतलावतित्तिराइतिवाचस्पतिः।" "तित्तिरपक्षी इतिप्रसिद्धः।

तेषांविशेषाहारीतोमधुःकारंडवःप्लवः॥२४॥तित्तिरिःकुक्कुभोल्लावोजीवं
जीवश्चकोरकः॥ कोयष्टिकष्टिट्टिभकोवर्तकोवर्त्तिकादयः॥ २५॥ ७

कुक्कुभोवनकुक्कुटः। लावोलशा। "लावापक्षी।" इतिप्रसिद्धः। जीवंजीवोमयूरतुल्यपक्षकः। "जीवंजीवयतीतिजीवंजीवः। तद्ध्वनिनेन विषनाशानात्। जीवजीवोजिवाजिवश्चेत्यपि।" चकोरकश्चकोरः। योयंचंद्रिकयातृप्यति। कोयष्टिकः। कोंदा इतिख्यातः। टिट्टिभकः। टिटिभकः। टिट्टिभइत्यपि।" टिटवी इतिख्यातः। वर्तकश्चित्रपक्षःपक्षिभेदः। "गांजीणपक्षीइतिख्यातः।" वर्त्तिकावटई "चक्रचटक" इतिप्रसिद्धा। स्त्रियांवर्तकेत्यपि। आदिशब्दात्सारिकाकपिंजलादयः। एकैकं॥२५॥ ७ ७

गरुत्। पक्षः। छदः। पत्रं। पतत्रं। तनूरुहं। षट्पक्षस्य। गरुतौ। पक्षौ। छदौ। पक्षसीवस्मृतेपक्षाविति रूपभांकः। "गरुत्पक्षेतरौछदमिति क्लीबकांडेबोपालितः।" पक्षस्यमूलंपक्षतिरित्यच्यते। "पक्षतीतिडीषंतोपि" एकं। चंचुः। त्रोटिः। द्वे पक्षिनुंडस्य। चंचूश्चंचुस्त्थात्रोटिरिति हलायुधः॥ ३६॥ प्रडीनं। उड्डीनं। संडीनं। एतास्तिस्रः खगानांगतिक्रियाः गमनव्यापाराः गतिविशेषा इत्यर्थः। तत्रप्रडीनंतिर्यग्गमनं। उ-

गरुत्पक्षश्छदः पत्रं पतत्रं चतनूरुहं॥ स्त्रीपक्षतिः पक्षमूलं चंचुस्त्रोटिरुभेस्त्रियौ॥३६॥
प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः। पेशी कोशोद्वीहीनंडंकुलायो नीडमस्त्रियां॥३७॥

ड्डीनं ऊर्ध्वगमनं संडीनं संगतगमनं। पेशी। "पेशिः" कोशः। "कोषः।" अंडं। त्रयमंडस्य। तत्रपेशी स्त्री। कोशोस्त्रियां। अंडंद्वीहीने। क्लीबे इत्यर्थः। रूपभेदेनैवक्लीबत्वेसिद्धेद्वीहीन इत्यक्तिः। साहचर्येणप्राप्तमस्त्रीत्वंवारयति "पेशीनांमांसखंडानां कोशो भांडागार" इति नामैक्यमिति स्वामी।" कुलायः। नीडं। द्वे पक्षिगृहस्य। "घरटा.स्त्रोपा.कोटं इतिप्रसिद्धस्य॥३७॥"

पोतः। पाकः। अर्भकः। डिंभः। पृथुकः। शावकः। शिशुः। सस्यकं शिशुमात्रस्य। "स्त्रियांतु पोती। डीबंता। पाका। अर्भका। डिंभा। पृथुका। एते च टाबंताः।" स्त्रीपुंसौ। मिथुनं द्वंद्वं। त्रीणि स्त्रीपुरुषरूपयुग्मस्य। स्त्रीच पुमांश्च स्त्रीपुंसौ। अचतुरविचतुरेतिसाधुः। द्वंद्वशब्दस्य स्त्रीपुंसपरत्वे कालिदासप्रयोगः। द्वंद्वानि भावंकियया विवबुरिति। युग्मं। युगुलं। युगं। त्रयं युग्मस्य। के चित्तु द्वंद्वयुग्मे इति समस्तं पठित्वा द्वंद्वादि

पोतः पाकोर्भकोडिंभः पृथुकः शावकः शिशुः॥ स्त्रीपुंसौ मिथुनं द्वंद्वं युग्मं तु युगुलं युगं॥ ३८॥
समूहो निवहव्यूहसंदोहविसरव्रजाः॥ स्तोमौघनिकरव्रातवारसंघातसंचयाः॥ ३९॥
समुदायः समुदयः समवायश्चयो गणः॥ स्त्रियां तु संहतिर्वृंदं निकुरंबं कदंबकं॥ ४०॥

चतुष्टयं समानमाहुः॥ ३८॥ समूहः। निवहः। व्यूहः। संदोहः। विसरः। व्रजः। स्तोमः। ओघः। निकरः। व्रातः। वारः। संघातः। संचयः॥ ३९॥
समुदायः। समुदयः। समवायः। चयः। गणः। संहतिः। वृंदं। निकुरंबं। कदंबकं। द्वाविंशतिः समूहस्य। तत्र संहतिस्त्रियां। "वारः सूर्यादिदिवसे द्वारे वसरवृंदयोः। कुञ्जरेसेहरेवारो वारं मद्यस्य भाजन इति विश्वप्रकाशः।"॥ ४०॥

वृंदभेदाः समुदायविशेषा वक्ष्यंत इति शेषः। समैः सजातीयैः प्राणिभिरप्राणिभिर्वा समूहो वर्ग इत्यभिधीयते। एकं। यथा मनुष्यवर्गः शैलवर्गः स जातीयैर्विजातीयैरपि जंतुभिः प्राणिभिरेव समूहः संघः सार्थ इति चोच्यते। द्वे। यथा पक्षिसंघः। वणिक्सार्थः। सजातीयैर्जंतुभिरेव कुलं यथा विप्रकुलं। एकं। तिरश्चामेव सजातीयानां समूहो यूथं। यथा मृगयूथं। एकं॥४१॥ पशूनामेव वृंदं समज इत्यभिधीयते। एकं। अन्येषां पशुवतिरिक्तानां वृंदं समाजः। यथा श्रोत्रियसमाजः। एकं। सधर्मिणां एकधर्मवतां समूहो निकायः। यथा श्रोत्रियनिकायः। पुंजः। "

वृंदभेदाः समैर्वर्गः संघसार्थौ तु जंतुभिः॥ सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकं॥४१॥ पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणां॥ स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियां॥४२॥ कापोतश्चौकमायूरं तैत्तिरादीनि तद्गणे॥

पिंजः"। राशिः। उत्करः। कूटं। चत्वारि धान्यादिराशेः। "कूटं पुन्नपुंसकं"॥४२॥ तद्गणे तेषां कपोतादीनां समूहः कापोतादीनि स्युः। यथा कपोतानां समूहः कापोतं। ऋक्षकानां समूहः चौकं। एवं मयूराणां समूहः मायूरं। तित्तिराणां समूहो तैत्तिरं। कपोतादिभ्यः अनुदात्तेरञ्। आदिवृद्धान्तू काकमित्यादि।

येगृहासक्ताःक्रीडार्थंपंजरादौस्थापिताइतियावत्। तेपक्षिमृगाःतेकागृह्यकाइतिचस्युः। द्वे।गृह्या एवगृह्यकाःस्वार्थेकन्॥ ॥
इतिसिंहादिवर्गः॥ ॥ ७॥ मनुष्याः। मानुषाः। मर्त्याः। मनुजाः। मानवाः। नराः। पुमांसः। पंचजनाः। पुरुषाः। पूरुषाः।
नरः। एकादशमनुष्याणां। नृशब्दस्यैकवचनंपुना।पुमांसइत्यादिपंचकंतुपुंव्यक्तावपिभायेणप्रयुज्यते।यथापुंस्कोकिलः॥१॥

गृहासक्ताःपक्षिमृगाश्चेकास्तगृह्यकाश्चते॥४२॥ ॥ इतिसिंहादिवर्गः॥ ७
मनुष्यामानुषामर्त्याःमनुजामानवानराः॥स्युःपुमांसःपंचजनाःपुरुषाःपूरुषानरः॥१॥
स्त्रीयोषिद्बलायौषानारीसीमंतिनीवधूः॥सतीपदार्हिणीवामावनितामहिलातथा॥२॥

स्त्री।योषित्।"जोषित्।जोषिता।योषितेत्यपि।स्त्रीवधूर्योषितागमेतिस्त्रिकांडशेषः।" अबला।योषा।"जोषेतिचवर्गतृतीयादिः।" नारी।सीमंतिनी। वधूः।सतीपदार्हिणी। वामा। वनिता। महिला "महस्योत्सवस्यइलाभूमिरितिविग्रहे महेला।महंउत्सवंलातीतिमहलापि।" एकादशस्त्रियाः।स्त्रियौ। योषितौ। वध्वौ॥२॥ ७

विशेषाः स्त्रीणां भेदा वक्ष्यंत इति शेषः। अंगनेत्येकं प्रशस्तांग्याः। एवं रामापर्यंतमेकैकं। तत्र भीरुर्भयशीला। "भीरूरिति ईर्ष्योकारांता। भीलुर्भीलूश्च।" कामिनी। कामयमाना। वामलोचना चारुनेत्रा। प्रमदा प्रकृष्टकामवेगा। मानिनी प्रणयकोपवती। कांता मनोहरा। ललना ललनायुक्ता। नितंबिनी॥ ३॥ सुंदरी शोभनावयवा। "सुंदराविरमणीरमयंती।" "रमणापि" रामा रममाणा। कोपना। "कोपनी।

विशेषास्त्वंगना भीरुः कामिनी वामलोचना॥ प्रमदा मानिनी कांता ललना चनितंबिनी॥ ३॥
सुंदरी रमणी रामा कोपना सेवभामिनी॥ वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी॥ ४॥

कोपिनी।" भामिनी। ईकोपशीलायाः। वरारोहा। "आरोहोनितंबोस्याः" मत्तकाशिनी। "मत्तकासिनी।" उत्तमा। वरवर्णिनी। "वरः वर्णोक्त्यस्याः" चत्वारि गुणैरुत्कृष्टायाः स्त्रियाः। यद्वा उत्तमेति नपर्यायः किंतु उत्तमास्त्री सेतत्पर्याया ज्ञेयेति तदर्थः॥ ग्रीष्मेसुखोष्णस्पर्शा गीग्रीष्मे यासुखशीतला। भर्तृभक्ता च या नारी विज्ञेया वरवर्णिनी तिरुद्रः॥ ४॥

याकृताभिषेकानृपस्त्रीसामहिषीत्येकं।अन्याअकृताभिषेकानृपस्त्रियोभोगिन्यइत्यच्यंते।एकं।पत्नी।पाणिगृहीती।द्वितीया।"द्वयोः पूरणेद्वितीया।द्वितीयातिथिगेहिन्योद्वितीयःपूरणेद्वयोरितिहेमचंद्रः।" सधर्मिणी॥५॥ भार्या।जाया।"जायतेऽस्यां। जायायास्तद्विजायात्वंयदस्यांजायतेपतिरितिमनुः।" दाराः।"दारयंतिभ्रातॄन्। दृविदारणेणिजंतः।" सप्तपरिणीतायाःस्त्रियाः। तत्रदारशब्दोनित्यंबहु

कृताभिषेकामहिषीभोगिन्योन्यानृपस्त्रियः॥पत्नीपाणिगृहीतीचद्वितीयासहधर्मिणी॥५॥
भार्याजायाथपुंभूम्निदारास्त्यात्तुकुटुंबिनी॥पुरंध्रीस्त्रीचरित्रातुसतीसाध्वीपतिव्रता॥६॥

सिबहुवचनांतश्च।"दारशब्दश्चबंधेपि।क्रीडाहारातथादारात्रयएतेयथाक्रमं। क्रीडेहारेचदारेषुदाशब्दःप्रोक्तामनीषिभिरिति हेमचंद्रात्॥" पाणिर्गृहीतीऽस्यांपाणिगृहीती। ङीषंता।कुटुंबिनी।पुरंध्री।"पुरंधिः" द्वेपतिपुत्रादिमत्स्याः।स्त्रीचरित्रा।सती। साध्वी। पतिव्रता। त्वत्वारिपतिसेवातत्परायाः६॥

कृतसापत्निका। अध्यूढा। अधिविन्ना। त्रीणि कृतानेकविवाहस्य। पुंसोयाप्रथमोढास्त्रीतस्याः। कृतसापत्निकंसपत्नीभावोस्याः सा। "कृतसापत्नकेतिपाठः।" स्वयंवरा। पतिंवरा। वर्या। त्रीणि स्वेच्छयापतिवरणोद्युक्तायाः। स्वयंवृणुतेस्वयंवरा। कुलस्त्री। कुलपालिका। द्वे कुलवत्याः॥७॥ कन्या। कुमारी। द्वे प्रथमवयसिवर्तमानायाः। गौरी। नग्निका। अनागतार्तवा। त्रीणि अदृष्टरजस्कायाः। अ-

कृतसापत्निकाध्यूढाऽधिविन्नाथस्वयंवरा॥ पतिंवराचवर्याथकुलस्त्रीकुलपालिका॥७॥
कन्याकुमारीगौरीतुनग्निकाऽनागतार्तवा॥ स्यान्मध्यमादृष्टरजास्तरुणीयुवतिःसमे॥८॥

नागतं अप्राप्तंरजोयस्याःसा। अष्टवर्षाभवेद्गौरी दशमेनग्निकाभवेदिति तस्यावांतरभेदः। मध्यमा। दृष्टरजाः। द्वे प्रथमप्राप्तरजोयोगायाः। तरुणी। तृप्रुवनतरणयोः। त्रोरश्वलोवेत्यननू। "नलुनी। तलूनः। पवनेयूनियुवत्यांतलुनीस्मृतेतिमेदिनी।" युवतिः। "युवतीतिङीषंनेतिकेचिन्नू। यूनीतिङीषंनेत्यन्यत्र" द्वे मध्यमवयसिवर्तमानायाः॥८॥

स्नुषा। जनी। "जनिः।" वधूः। त्रयं पुत्रादिभार्यायाः। "वधूः पत्न्यां स्नुषानार्योः स्मृकासारिवयोरपि। नवपरिणीतायां चेति हेमा तूवधूरित्येकं। नवोढायाः स्त्रियाअपि।" चिरंटी। "चिरंटी। चिरंटी तुरुवासिन्यां स्याद्द्वितीयवयस्त्रियामिति विश्वप्रकाशः।" रुवासिनी। द्वे किंचिल्लब्धयौवनायां परिणीतायां। रुरुवसतिरुवासिनी। "स्वासिनी त्यपि पाठः। तत्रस्वेषुपित्रादिषु वस्तं वीलमस्याइतिविग्रहः। स्वासिन्यांचिरं

समास्नुषाजनीवध्वश्चिरंटीतुरुवासिनी॥ इच्छावतीकामुकास्याद्दृषस्यंतीतुकामुकी॥९॥
कांतार्थिनीतुयायातिसंकेतंसाभिसारिका॥पुंश्चलीधर्षिणीबंधक्यसतीकुलटेत्वरी॥१०॥

टीस्याद्वितीयेवयसिस्त्रियामितिरुद्रः।" इच्छावती। कामुका। द्वे यभनारीच्छावत्याः। दृषस्यंती। कामुकी। द्वे "अवबृषकतू" मैथुनेच्छावत्यौ॥९॥ याकांतार्थिनी भर्तुःसंकेतस्थानंगच्छतिसाभिसारिका। यदुक्तं। हित्वालज्जाभयेश्लिष्टामदेनमदनेनया। अभिसारयतेकांतंसाभवेदभिसारिकेति। एकं। पुंश्चली। धर्षिणी। "धर्षणी। कृषधातोरनिःकर्षणिः।" बंधकी। असती। कुलटा। इत्वरी॥१०॥

स्वैरिणी। पांशुकुला। अस्य स्वैरिण्याः। याशिश्नना रहिता सा अशिश्वी। एकं। निष्पतिसुता पतिपुत्ररहिता सा अवीरा। एकं। "पतिपुत्रवतीवीरेति नाममाला।" विश्वस्ता। विधवा। द्वे रंडायाः॥११॥ आलिः सखी। वयस्या। त्रयं सख्याः। "आलिः सखी संतुरालिरालिरावलिरित्यत इति शाश्वतः।" पतिवत्नी। सभर्तृका। द्वे जीवद्भर्तृकायाः। वृद्धा। पलिक्नी। द्वे पक्वकेश्यां। प्राज्ञी। प्रज्ञा। द्वे यत्किमपि स्वयंप्रकर्षेण

स्वैरिणी पांशुकुलाच स्यादशिश्वीशिश्ननाविना॥ अवीरा निष्पतिसुता विश्वस्ता विधवेसमे॥११॥
आलिः सखी वयस्याऽथ पतिवत्नी सभर्तृका॥ वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञातु धीमती॥१२॥
शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च॥ आभीरी तु महाशूद्री जातिपुंयोगयोः समा॥१३॥

जानाति तस्याः। प्राज्ञा। धीमती। द्वे बुद्धिमत्याः॥१२॥ या शूद्रस्य भार्या सा विजातीयाऽपि शूद्रीत्युच्यते। एकं। तज्जातिः। शूद्रजातिः। "अन्यभार्यापि" शूद्रेत्युच्यते। आभीरी। महाशूद्री। द्वे गोपालिकायाः। जातिपुंयोगयोः। महाशूद्रस्य जातौ महाशूद्रस्य स्त्रीत्वे च। रूपपुंयोगे चसमा। उभयत्रापि नाम द्वयं श्रुत्यर्थयोर्मध्ये वेत्यर्थः॥१३॥

अर्यांणी। आर्या। द्वे वैश्यजात्यसम्भवायाः स्त्रियाः। स्वयं वैश्यजातिः भार्या तु यस्यकस्यचिद्रुद्रस्येत्यर्थो बोध्यः। एवं क्षत्रिया। क्षत्रियाणी। द्वे स्वयं क्षत्रियजातिः। भार्या तु यस्यकस्यचित्। उपाध्याया। उपाध्यायी। द्वे स्वयं या आध्यापिका तस्यां। उपेत्याधीयते तस्याः सकाशादित्युपाध्याया। पुराकल्पे तु नारीणां ब्रह्मबंधनमिष्यते। अध्यापनं च देवानां सावित्रीवचनं तथेति पाराशारमाधवीये यमः। तथा स्वतः स्वयं मंत्रव्याख्या

अर्यांणी स्वयमर्यास्यात्क्षत्रियाक्षत्रियाण्यपि। उपाध्याया त्वुपाध्यायी स्यादाचार्यापि च स्वतः॥१४॥
आचार्यानी तु पुंयोगे स्यादर्यक्षत्रियी तथा॥ उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा॥१५॥

रुद्राचार्या स्यात्तु। एकं। त्रयमपि समानार्थमित्येके॥१४॥ पुंयोगे आचार्यस्य स्त्रीत्येवंरूपेऽर्थे आचार्यानीत्येकं। आचार्यादणत्वं चेति णत्वाभावः। तथा अर्यस्य स्त्रीत्यर्थे अर्यीत्येकं। एवं क्षत्रियस्य स्त्रीत्यर्थे क्षत्रियी। एकं। उपाध्यायानी। उपाध्यायी। द्वे उपाध्यायस्य भार्यायां। स्त्रीपुंसलक्षणा स्तनश्मश्रुरूपेण स्त्रीपुंसचिह्नेन युक्ता पोटेत्युच्यते॥१५॥

वीरपत्नी। वीरभार्या। द्वे वीरस्यभार्यायाः। वीरमाता। वीरसूः। द्वेवीरस्यमातरि। जातापत्या। प्रजाता। प्रसूता। प्रसूतिका। चत्वारिप्रसूतायाः।
श्चित्। दोषज्ञः। सन्। सुधीः। कोविदः। बुधः। धीरः। मनीषी। ज्ञः। प्राज्ञः। "प्रज्ञः। प्रज्ञस्तुपंडितेवाच्यलिंगोबुद्धौतुयोषितीतिमेदिनी।" सं-

विप्रश्चब्राह्मणोऽसौषट्कर्मायागादिभिर्वृतः॥४॥विद्वान्विपश्चिद्दोषज्ञःसन्सुधीः
कोविदोबुधः॥ धीरोमनीषीज्ञः प्राज्ञःसंख्यावान्पंडितःकविः॥५॥धीमान्सूरिःकृती
कृष्टिर्लब्धवर्णोविचक्षणः॥ दूरदर्शीदीर्घदर्शीश्रोत्रियश्छांदसोसमौ॥ ६॥ ४

रव्यावान्। पंडितः। कविः॥५॥ धीमान्। सूरिः। कृती। कृष्टिः। लब्धवर्णः। विचक्षणः। दूरदर्शी। दीर्घदर्शी। द्वाविंशतिः पंडितस्य। विद्वांसौ
विपश्चितौ। संतौ। ज्ञौ। संख्यावंतौ। कृतिनौ। "संख्याविचारणास्त्यस्यसंख्यावान्। लब्धोवर्णःस्तुतिर्येनलब्धवर्णः। दूरान्दूराद्यापश्य
तीतिदूरदर्शी।" श्रोत्रियः। छांदसः। द्वेवेदाध्यायिनः॥ ६॥ ४ ४ ४

मीमांसकमित्यादिपदद्वयमत्र केचित्पठंति। तदत्रत्यंनेत्युपेक्षितं। तस्येयं बालबोधार्थंव्याख्या। मीमांसकः। जैमिनीयः। द्वे मीमांसाशास्त्रवेत्तुः वेदांती। ब्रह्मवादिनी। द्वे वेदांतशास्त्रज्ञस्य। वैशेषिकः। औलूक्यः। द्वे सप्तपदार्थवादिनः। सौगतः। शून्यवादी। द्वे जगत्कारणंशून्यमिति मतावलंबिनो नास्तिकस्य॥१॥ नैयायिकः। अक्षपादः। आक्षपादो वा। द्वे न्यायशास्त्रज्ञस्य। स्याद्वादिकः। आर्हकः। द्वे मास्तोऽस्तिस्यान्ना

मीमांसकोजैमिनीयेवेदांतीब्रह्मवादिनि। वैशेषिकेस्यादौलूक्यः सौगतःशून्य
वादिनि॥१॥ नैयायिकस्त्वक्षपादःस्यात्स्याद्वादिकआर्हकः। चार्वाकलौकायतिको
सत्कार्यसांख्यकापिलो॥२॥ उपाध्यायोध्यापकोऽथस्यान्निषेकादिक्रियुरुः॥

स्तिस्यादिति वादिनः। चार्वाकः। लौकायतिकः। लोकायतिको वा। द्वे देहात्मवादिनोर्बोद्धस्य। सांख्यः। कापिलः। द्वे तदेवेदं कार्यंजगदिनिमानिनः। सांख्यशास्त्रज्ञस्य॥२॥ उपाध्यायः। अध्यापकः। द्वे "उपेत्याधीयतेऽस्मादुपाध्यायः। अध्यापयतीत्यध्यापकः।" निषेकोगर्भाधानं। आदिनापुंसवनादि। तस्यकर्मणःकर्तापित्रादिर्गुरुःस्यात्। एकं॥ ४ ४ ४

मंत्रोवेदस्तस्य व्याख्याकृत् आचार्यः स्यात्। एकं। व्याख्यालक्षणंतु। पदच्छेदःपदार्थोक्तिर्विग्रहो वाक्ययोजना॥ आक्षेपोथ समाधानं व्याख्यानं पंचलक्षणमित्यर्कः। अध्वरे यागविषये यऋत्विजा मादेष्टा सव्रती॥७॥ यष्टा। यजमानः। इतित्रयेणोच्यते। "आदिष्टित्यपि पाठः।" व्रतिनौ। यष्टारौ। सयजमानः सोमवतियागे आदेष्टादीक्षित इत्यर्कः। एकं। इज्याशीलः। यायजूकः। द्वे यजनशीलस्य।

मंत्रव्याख्याकृदाचार्यआदेष्टात्वध्वरेव्रती॥७॥यष्टाचयजमानश्चसोमवतिदीक्षितः॥
इज्याशीलोयायजूकोयज्वातुविधिनेष्टवान्॥८॥सगीष्पतीष्टयास्त्रुपतिःसोमपीथीतुसोमपाः॥

"पुनःपुनःभृशंवायजतेयायजूकः।" विधिनासोमेनयजेतेत्यादियागविधायकविधिमात्रेणेष्टवान् यागंकृतवान् सयज्वास्यात्। एकं। यज्वानौ॥८॥यःगीष्पतीष्टया बृहस्पतिसवविधिना इष्टवान् सस्त्रुपतिरित्यर्कः। वाजपेयेन ष्ट्वा बृहस्पतिसवेन यजेतेतिनाद्विधिः। एकं। सोमपीथी। "सोमपीती। सोमपीवी।" सोमपाः। "सोमपः। द्वे सोमयाजिनः। सोमपीथिनौ "सर्वदाऽयंदीक्षितस्मृतत्काले।"

येनसर्वस्वदक्षिणोविश्वजिन्नामायागइष्टःससर्ववेदाःस्यात्। एकं। "सर्वस्वंदक्षिणायत्र।सर्वंवेदयतिसर्ववेदाःविद्वांभे"सर्ववेदसो॥९॥
सांगोवेदाध्यंगोपेतेप्रवचनेवेदेअधीतेकृताध्ययनोनूचानइत्येकं।योनूचानेगुरोःसकाशात्गृहस्थाद्याश्रमांतरप्राप्तयेलब्धानुज्ञः
समावृत्तःस्यात्। एकं। अभिषवेस्नानेकृतेसतिस्कृत्वास्यात्। स्कृञोर्ङ्-निवितिस्कृनोतेर्भूतेर्ङ्-निपू।स्कृतवान्।स्कृत्वा।सत्वानो।अभि-
षवःस्नपनेपीडनत्वोस्कारासंधानेच॥१०॥ छात्रः। अंतेवासी। "अंतवासीत्यपि। शिष्यः।त्रीणिगुरोर्दोषाच्छादनंछात्रंतच्छीलमस्य

सर्ववेदाःसयेनेष्टायागःसर्वस्वदक्षिणः॥९॥अनूचानःप्रवचनेसांगेधी
तागुरोस्सकाशात्॥ लब्धानुज्ञःसमावृत्तःस्कृत्वात्वभिषवेकृते॥१०॥छात्रांतेवा
सिनोशिष्येशैक्षाःप्राथमकल्पिकाः॥एकब्रह्मव्रताचारामिथःसब्रह्मचारिणः॥११॥

छात्रः।अंतेसमीपेवस्तंत्रीलमस्यांतेवासी" शैक्षाः।प्राथमकल्पिकाः। द्वेआरब्धाध्ययनानांबटूनांशिक्षालभंतेते शैक्षाः।प्रथमक
ल्प आद्यारंभः प्रयोजनंयेषांते प्राथमकल्पिकाः। एकःसमानो ब्रह्मव्रताचारोवेदव्रताचरणंयेषांते। एकशाखास्वाध्यायिनो ब्रह्मचा
रिणस्ते मिथःपरस्परंसब्रह्मचारिणइत्यूच्यंते। चरणे ब्रह्मचारिणीतिसमानस्यसभावः। एकं॥११॥ ७ ७

एकःसमानोगुरुर्येषांते परस्परंसतीर्थ्याःस्युःसमानतीर्थेवासीतिय त्प्रत्ययः। तीर्थेयेइतिसमानस्यसः। एकं।योऽग्निंचित वान्सो ऽग्निचित्। एकं।कृताग्निचयनस्य।ऐतिह्यं।इतिह।इदंयारंपर्येणलोकपरंपरयायउपदेशस्तस्मिन्। इतिहेत्यव्ययं॥१२॥यत्प्रथम ज्ञानंसाउपज्ञास्यात्।यथाग्रंथस्यपाणिनेरुपज्ञा। एकं।ज्ञात्वाय आरंभःसउपक्रमः।यथाग्रंथस्योपक्रमः।ज्ञानपूर्वक आरंभइ त्यर्थः।एकं।यज्ञःसवः।अध्वरःयागः।ससतंतुः।मखः।क्रतुःससयज्ञस्य॥१३॥पाठाद्यःपंचब्रह्मयज्ञादिनामकामहाय

सतीर्थ्यास्त्वेकगुरवःश्चितवानग्निमग्निचित्॥पारंपर्योपदेशोस्यादैतिह्यमितिहाव्ययं॥
॥१२॥उपज्ञाज्ञानमाद्यंस्याज्ज्ञात्वारंभउपक्रमः॥यज्ञःसवोध्वरोयागःससतंतुर्मखःक्रतुः॥
॥१३॥पाठोहोमश्चातिथीनांसपर्यातर्पणंबलिः॥एतेपंचमहायज्ञाब्रह्मयज्ञादिनामकाः॥१४॥

ज्ञाःस्युः। एकं। तत्रपाठोविधिनावेदादेःपठनंसब्रह्मयज्ञः।होमोवैश्वदेवहोमोसदेवयज्ञः।अतिथीनांगृहागतानांसपर्याअन्ना दिनातोषणंसमनुष्ययज्ञः।तर्पणंपितृणामन्नोदकादिनातृप्तिसंपादनंसपितृयज्ञः।बलिःबलिहरणंसभूतयज्ञः।"पठनंपा ठःभावेयञ्।मनुः।अध्यापनंब्रह्मयज्ञः पितृयज्ञस्तुतर्पणं।होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनमिति।" ॥१४॥

समज्या। परिषद्। गोष्ठी। सभा। समितिः। संसत्। आस्थानी। आस्थानं। सदः। नवसभायाः परिषदो। गोष्ठ्येो। संसदो। आस्थान्येो। सदःसांतंक्लीबे। स्त्रीलेतुसदाः। "समजंतिगच्छंत्यस्यांसमज्या। गावोनेकावाचस्तिष्ठंत्यस्यांगोष्ठी। सहसमानावाभांत्यस्यांसभा। संयंतिगच्छंत्यस्यांसमितिः। संसीदंत्यस्यांसंसदत्। आतिष्ठंत्यस्यामस्थानी। सीदंत्यस्यांसदः।" ॥१५॥ हविर्गेहात्पाक्पूर्वदेशेसदस्यादीनां

समज्यापरिषद्गोष्ठीसभासमितिसंसदः। आस्थानीक्लीबमास्थानंस्त्रीनपुंसकयोःसदः॥१५॥
प्राग्वंशाःप्राक्हविर्गेहात्सदस्याविधिदर्शिनः॥सभासदःसभास्तारःसभ्याःसामाजिकाश्चते॥१६॥

यद्गृहंसप्राग्वंशादित्येकं। यज्ञशालायाःपूर्वपश्चिमस्तंभयोरर्पितंदीर्घकाष्ठंप्राग्वंशइतिक्वचित्। यज्ञकर्मणिविधिंवेदोक्तक्रियाकलापं येपश्यंतितेसदस्याः। "ऋत्विग्विशेषाइत्यर्थः।" एकं। सभासदः। सभास्तारः। सभ्याः। सामाजिकाः। चत्वारिसभ्येषु। "सभांस्तृणंतिसभास्तारः। स्तृञ्आच्छादने। सभायांसाधवःसभ्याः। समाजंरक्षंतिसामाजिकाः॥१६॥

यजुर्विदृत्विगध्वर्युः।एकं।सामविदुद्गाता।एकं।ऋग्वेदवित्होता।एकं।धनेर्वार्यायजमानेनधनादिदत्तावरणीयायेआग्नीध्राद्यास्तेऋत्विजः।या-
जकाः।द्वे"आग्नीध्रआद्योयेषांआद्यश्चाद्वर्युद्गातृहोत्रध्वर्व्वादयःषोडश।ऋतोयजंतितेऋत्विजाः।कात्यस्तृताःकुर्वंतियेयज्ञमृत्वि
जोयाजकाश्चतइति॥१७॥परिष्कृतायज्ञार्थसाधिताऽमरुकाराभूमिर्वेदिरित्यच्यते।एकं।वेदीत्यपि।स्थंडिलं।चत्वरं।द्वेयज्ञार्थसंस्कृत

अध्वर्युद्गातृहोतारोयजुःसामर्ग्विदःक्रमात्॥आग्नीध्राद्याधनेर्वार्याऋत्विजोयाजकाश्चते॥१७॥
वेदिःपरिष्कृताभूमिःसमेस्थंडिलचत्वरे॥चषालोयूपकटकःकुंबास्कगहनावृतिः॥१८॥
यूपाग्रंतर्मनिर्मंथ्यदारुणेत्वरणिद्वयोः॥दक्षिणाग्निर्गार्हपत्याहवनीयोत्रयोऽग्नयः॥१९॥

स्यभूभागस्य।यूपकटकः।यूपस्यशिरसिबलयाकारःकार्ष्णविकारश्चषालःस्यात्।एकं।यागभूमावंत्यजादिदर्शनवारणायस्कगहनावृतिर्वेष्टनं
कुंबास्यात्"एकंस्त्रियां"॥१८॥यूपाग्रं।तर्म।द्वेयूपाग्रे।तर्मणी।निर्मंथ्यदारुणिअग्निसिध्यर्थंनिर्मथनीयेकाष्ठेअरणिरित्येकंस्त्रीपुंसयोः।"अरणीति
स्त्रियां।"दक्षिणाग्निः।गार्हपत्यः।आहवनीयः।एतेत्रयोऽग्नयःआग्नित्रेषाःस्युः।एकैकं।"क्वचित्तुत्रयाणांद्वंद्वःपम्यते।"॥१९॥

इदमग्नित्रयंत्रेतास्यात्। एकं। "त्रित्वंइता" त्रेतास्त्री। त्रेते। मंत्रादिनासंस्कृतोऽग्निःप्रणीतइत्येकं। समूह्यः। परिचाय्यः। उपचाय्यः। एतेत्रयः
ऽग्नौप्रयोगिणः अग्नौप्रयोगोस्तियेषांतेअग्निधारणार्थैस्रुवादिशेषप्रयुक्ताः॥२०॥ गार्हपत्यादानीयोद्धृत्ययोदक्षिणाग्निःप्रणीयतेसवे-
द्यतेतत्रआनाय्यइत्येकं। अग्नायी। स्वाहा। हुतभुक्प्रिया। त्रयमग्नेःप्रियायां। अस्यस्वाहाशब्दस्यनाव्ययत्वं। द्रव्यवाचित्वात्। अतएव
स्वाहांतुदक्षिणेपार्श्वेइतिप्रयोगःसंगच्छते॥२१॥ अग्निसमिंधनेसमित्क्षेपेणवह्निज्वलनेयाक्रुक्प्रयुज्यतेसासामिधेनी धाय्याचस्या

अग्नित्रयमिदंत्रेत प्रणीतःसंस्कृतोऽनलः॥ समूह्यःपरिचाय्योपचाय्या नौप्रयो।गिणः॥२०॥
योगार्हपत्यादानीयदक्षिणाग्निःप्रणीयते॥ तस्मिन्नानाय्योऽथाग्नायीस्वाहाचहुतभुक्प्रिया॥२१॥
क्रुक्सामिधेनी धेय्याचयास्यादग्निसमिंधने॥ गायत्रीप्रमुखंछंदोहव्यपाकेचरुःपुमान्॥ २२॥

तु। द्वेगायत्र्युष्णिगित्यादिछंदःस्यात्। एकंसांतर्क्षीवे। हव्यपाकेऽग्निमुखेहूयमानेऽन्नेचरुरित्येकं। "हव्यस्यपाकःहव्यपाकः। अनव
स्त्राविनांतरूष्मपाकओदनश्चरुरितियाज्ञिकाः। चर्यतेभक्ष्यतइतिचरुः। मीमांसकैरपित्रिश्चर्वधिकरणेऽन्नपरत्वंचरुशब्दस्याभ्युपग
तं। विश्वप्रकाशेतु। चरुर्भांडेचहव्यान्नइत्यनेकार्थतोक्ता। अथस्थालीचरुर्हव्यान्नभांडयोरितिमेदिनीच।"॥२२॥ ७

शृतंपक्वंचतदुष्णंचतस्मिन्क्षीरेदधियोगतोयाविकृतिःसाआमिक्षास्यात्। एकं॰ गच्चमर्णारचितंयद्व्यजनंतद्धवित्रमित्येकं। "धुवित्र मित्यपि"॥२३॥ दधियुक्तेघृतेपृषदाज्यमित्येकं। "पृषातकं। पृषातकंसदध्याज्येपृषदाज्यंतदुच्यतइतिहेमचंद्रः।" परमान्नं। पायसं दुग्धेक्षीरान्नस्यादेवपित्र्येदेवपितृसंबंधिनिअन्नेकव्येस्यातां। "हूयंतेग्नौयंतेदेवायेनहव्यं। क्रियतेपितृभ्यःकव्यं। कुशाग्रे।"

आमिक्षासाशृतोष्णेयाक्षीरेस्याद्दधियोगतः॥धवित्रंव्यजनंतद्यद्द्रा[illegible]र्मणा॥२३॥पृषदाज्यंसदध्याज्ये परमान्नंतुपायसं॥हव्यकव्येदेवपित्र्येअन्नेपात्रंस्रुवादिकं॥२४॥ध्रुवोपभृज्जुहूर्नातुस्रुवोभेदाःस्रुचःस्त्रियः॥

देवेभ्योदीयमानमन्नंहव्यं। पितृभ्योदीयमानमन्नंकव्यं मित्यर्थः। "पैत्रमित्यपि। तस्येदमित्यण्।" एकैकं। स्रुवचमसादिकंपात्रंस्यात् एकं॥२४॥ ध्रुवा। उपभृत्। जुहूः। एतेत्रयःस्रुचोभेदाः। स्त्रियः। स्रुवः एकंपुंसि। "अत्रयथास्रुवशब्दस्यरूपभेदात्पुंस्त्वेसिद्धेनेतिपुंस्त्वविधि स्तथापूर्वत्रस्त्रियइतिस्त्रीत्वविधिरपिबोध्यः। स्रुवाहयोर्होमपात्रेशल्कीमूर्वयोस्त्रियामितिमेदिनीकोशेस्त्रीलिंगोपिदृश्यते।"

क्रतोयःपशुरभिमंत्र्यहतःअसौउपाकृतःस्यात्। एकं।"उपक्रियतेहिंस्यतइत्युपाकृतः।"॥२५॥परंपराकं।दामनं।"दासनंससनंचेत्यपि" प्रोक्षणं। त्रयंवधार्थकं।यज्ञियपशुहननवाचीत्यर्थः।प्रमीतः।उपसंपन्नः।प्रोक्षितः।त्रीणियागार्थहतेपशुमात्रेवाच्यलिंगानि॥२६॥ हविर्विशेषः।सान्नाय्यंस्यात्। एकं।अग्नौहुतंयाज्यादिवषट्कृतंस्यात्। तन्त्रिषुवाच्यलिंगं।एकं।"वषडितिमंत्रोपलक्षणं।वषण्मंत्रेणकृतंप्रक्षिसं।"

उपाकृतःपशुरसौयोऽभिमंत्र्यक्रतौहतः॥२५॥परंपराकंदामनंप्रोक्षणंचवधार्थकं॥वाच्यलिंगाःप्रमीतोपसंपन्नप्रोक्षिताहते॥२६॥सान्नाय्यंहविरग्नौतुहुतंत्रिषुवषट्कृतं॥दीक्षांतोऽवभृथोयज्ञेतत्कर्मार्हंतुयज्ञियं॥२७॥त्रिष्वथक्रतुकर्मेष्टंपूर्तंस्वाताद्यकर्मयत्॥ ७

यज्ञेदीक्षांतःदीक्षायाःसमापकःइष्टिपूर्वकस्नानविशेषःअवभृथः। एकं।तत्कर्मार्हंयज्ञकर्मयोग्यंवस्तु"द्विजद्रव्यादि"।यज्ञियं। एकंत्रिषु॥२७॥यत्क्रतुकर्मनदिष्टंस्यात्।"क्रतुर्यज्ञः।कर्मदानं। एकाग्निकर्मबहनंत्रेतायांयच्चहूयते। अंतर्वेद्यांचयद्दानमिष्टंतदभिधीयतइतिमनुः।" एकं।स्वातंवापीकूपादिआदिनादेवालयादियत्कर्मतत्पूर्तंस्यात्। एकं।"पुष्करिण्यःसभावापीदेवतायतनानिच॥आरामश्चविशेषेणपूर्तंकर्मेष्वनिर्देशेदितिस्मृतिः॥" ७

यज्ञशेषे पुरोडाशादौ अमृतमित्येकं। भोजनशेषे देवपित्रादिभुक्तशेषे विघसइत्येकं। यन्मनुः। विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः। विघसो भुक्तशेषः स्यादग्निशेषमथामृतमिति॥ २८॥ त्यागः। विहापितं। दानं। उत्सर्जनं। विसर्जनं। विश्राणनं। वितरणं। स्पर्शनं। प्रतिपादनं॥ २९॥ आदेशानं। निर्वपणं। अपवर्जनं। अंहतिः। त्रयोदशादानस्य। तत्रअंहतिःस्त्री। मृतार्थं मृताय तद्देहदानं मरणादिनमारभ्य दशाह

अमृतं विघसो यज्ञशेषभोजनशेषयोः॥ २८॥ त्यागो विहापितं दानमुत्सर्जनविसर्जने॥ विश्राणनं वितरणं स्पर्शनं प्रतिपादनं॥ २९॥ आदेशाननिर्वपणमपवर्जनमंहतिः॥ मृतार्थं तद्देहदानं त्रिषु स्यादौर्ध्वदेहिकं॥ ३०॥ ७

पर्यंतं पिंडादिदानं और्ध्वदेहिकं स्यात्। "और्ध्वदेहिकमित्यत्र यदवृद्धिरपि।" त्रिषु। स्त्रियांतु और्ध्वदेहिकी। क्रिया। "तदहर्दानमित्यपि पाठः।" ॥३०॥ ७ ७ ७ ७

पितृदानं। निवापः। द्वे पितृनुद्दिश्य यद्दानं क्रियते तत्र शास्त्रतः तत्कर्म पितृसंबंधि कर्म श्राद्धं स्यात्। श्रद्धाऽस्मिन्यत्र तच्छ्राद्धं। त्रयाश्रद्धेतिणः। मासिकेऽमावास्याश्राद्धेऽन्वाहार्यमित्येकं। अन्होऽष्टमोंशः कुतपः स्यात्। अंशशब्दोत्र मुहूर्तपरः। मुहूर्तात्सप्तमादूर्ध्वं मुहूर्तान्नवमादधः स कालः कुतपोज्ञेय इत्यमरोक्तेः। दिवसस्याष्टमे भागे मंदीभवति भास्करः। स कालः कुतपोज्ञेय इति शातातपः। "द्वौ वै नु कुतपौ। शब्दरत्नावल्यां

पितृदाननिवापःस्याच्छ्राद्धं तत्कर्मशास्त्रतः॥ अन्वाहार्यंमासिकेंशोऽष्टमोऽन्हः कुतपोऽस्त्रियां॥३१॥
पर्यषणापरीप्सिश्चाऽन्वेषणाचगवेषणा॥ सनिरध्येषणायाञ्चाऽभिशास्तिर्याचनार्थना॥३२॥

नु कुतुप इति ह्युकारोपि।"॥३१॥ पर्येषणा। परीप्सिः। श्राद्धेद्विजभक्तिरुश्रूषायाः। अन्वेषणा। गवेषणा। द्वे धर्मादिमार्गणस्य। "चतुष्कमपि धर्मान्वेषणस्येत्यपि मतं।" सनिः। अध्येषणा। द्वे यत्गुर्वादेः क्वचिदर्थेप्रार्थनयानियोजनंतत्र। याञ्चा। अभिशास्तिः। "अभिषास्तिः।" याचना। अर्थना। चत्वारियाचनायाः। याञ्चेत्यत्रचकारअकारसंयोगः॥३२॥

षडिति अर्घ्यपाद्यातिथ्यातिथेयावेशिकागंतव इतिषट् शब्दावाच्यलिंगाइत्यर्थः। अर्घः पूजोपचारस्तदर्थंवारिणिजलेअर्घ्यमित्येकं पादायपादार्थंवारिणिपाद्यं। एकं। अतिथ्यर्थंआतिथ्यमित्येकं। अत्रातिथोयत्साधुतत्रआतिथेयमित्येकं॥३२॥ आवेशिकः। आगंतुः। अतिथिः। गृहागतः। चत्वारिगृहागतस्य। नापुमान्। "त्रिकांडशेषेपुन्नपुंसकत्वंतेथिर्द्वयोरित्यक्तं। स्त्रियांतुअतिथी।" दूराच्चोपगतश्चां

षट्त्वत्रिष्वर्घ्यमर्घार्थेपाद्यंपादायवारिणि॥ कामादातिथ्यातिथेयेअतिथ्यर्थेऽत्रसाधुनि॥३३॥
स्युरावेशिकआगंतुरतिथिर्नागृहागते। प्राघूर्णिकःप्राघुणकश्चाभ्युत्थानंतुगोरवं॥३४॥

तंवैश्वदेवउपस्थितं। अतिथिंतंविजानीयान्नातिथिःपूर्वमागतइतिव्यासः। प्राघूर्णिकः। प्राघुणकः। द्वेअभ्यागतस्य। तिथिःपर्वोत्सवोऽस्यवेत्यक्तायेनमहात्मना॥ सोऽतिथिःसर्वभूतानांशेषानभ्यागतान्विदुरितियमः। अभ्युत्थानं। गोरवं। द्वेउत्थानपूर्वकसत्कारस्य॥३४॥

पूजा। नमस्या। अपचितिः। सपर्या। अर्चा। अर्हणा। षट् पूजायाः। वरिवस्या। शुश्रूषा। परिचर्या। उपासना। "उपासनमित्यपि। उपासनंशाराभ्यासे प्युपासावासनेपिचेतिविश्वमेदिन्यौ।" चतुष्कमुपासनस्य। तत्रशुश्रूषाशब्दोगुरुसेवायांलाक्षणिकः। "परिचर्यानुचर्यायां विभागुरिः।" ॥ ३५॥ व्रज्या। अटा। अट्या। पर्यटनं। चत्वारिपर्यनटस्य। अटापर्यटनंभ्रम इतिरत्नकोशः। अट्येत्यत्रमूर्धन्यतालव्यसंयोगः। वृथाट्याखलुस्नान

पूजानमस्यापचितिःसपर्यार्चार्हणाःसमाः॥ वरिवस्यातुशुश्रूषापरिचर्योपासना॥ ३५॥ व्रज्याःटाट्यापर्यटनं
चर्यातीर्यापथेस्थितिः॥ उपस्पर्शस्त्वाचमनमथमौनमभाषणं॥ ३६॥ प्राचेतसश्चादिकविःस्यान्मैत्रावरुणिश्चसः॥

स्येति प्रयोगः। ईर्यापथेध्यानमौनादिकेयोगमार्गेस्थितिश्चर्यास्यात्। एकं। चर्यांतीर्यांविदुर्बुधा इतिग्रंथांतरे। उपस्पर्शः। आचमनं। द्वे "उपस्पर्शःस्पर्शमात्रेस्नानाचमनयोरपीतिमेदिनी।" भोनं। अभाषणं। द्वे॥ ३६॥ प्राचेतस इत्यादिसार्धश्लोकः क्वचिदस्ति। तत्र प्राचेतसादिश्चतुष्कं बाल्मीकस्य। मैत्रावरुणइत्यपि॥

वाल्मीकिः। वल्मिकिरितिद्विरूपकोशे। वल्मीकः। अपिवाल्मीकवल्मीकाविति त्रिकांडशेषः। वल्मिकइतिशब्दरत्नावल्यां। गाधेयादित्रयं विश्वामित्रस्य। "तत्रकौषिकइत्यपि" ॥१॥ व्यासादिचतुष्कंवासस्य॥ ॥आनुपूर्वी। आवृत्। परिपाटिः। "परिपाटीनिडीषंतापि" अनुक्रमः। पर्यायः। पंचकमनुक्रमस्य। आनुपूर्व्यमितिपाठेवा। "आनुपूर्वमितिच। स्त्रियांवेतिपक्षेक्लीबता।" आवृतःपरिपाटेश्च

वाल्मीकश्चाथगाधेयोविश्वामित्रश्चकौशिकः॥१॥ व्यासोद्वैपायनःपाराशर्यःसत्यवतीसुतः॥ आनुपूर्वीस्त्रियांवावृत्परिपाटी अनुक्रमः॥ पर्यायश्चातिपातस्तुस्यात्पर्ययउपात्ययः॥२७॥ नियमोव्रतमस्त्रीतच्चोपवासादिपुण्यकं॥ ७

स्त्रीत्वं। "परिपाटीअनुक्रमइत्यत्रद्विवचनत्वान्नयण्।" अतिपातः। पर्ययः। उपात्ययः। त्रीण्यतिक्रमस्य॥२७॥ नियमः। व्रतं। द्वे व्रतमात्रस्य। तच्चव्रतंउपवासचांद्रायणादियत्पुण्यकं तल्लेयं। "अथवाउपवासआदिर्यस्यतच्छ्रचांद्रायणप्राजापत्यनक्तभोजनादेस्तदुपवासादिव्रतंपुण्यकमित्येकमिति।"

औपवस्तं। "उपवस्तमित्यपि। क्वचिदौपवस्त्रमितिपाठः। तत्र तृचूप्रत्ययांतादुपवस्त्रि इंकर्मेत्यर्थे तस्येदमित्यण्। उपोषणं। उपोषितमित्यपि। भावेक्तः। "उपवासः। द्वेउपवासस्य। माषान्मधुमसूरांश्च वर्जयेदौ[illegible]तिप्रयोगः। पृथगात्मतापृथक्स्वरूपत्वंविवेकःस्यात्। एकं। यथाचिज्जडयोर्विवेक इति॥ २८॥ वृत्तंसदाचारपालनं अध्ययनंवेदाभ्यासः। तयोर्द्वयंसंपत्तिःब्रह्मवर्चसं। एकं। ब्रह्मणःतपःस्वाध्या

औपवस्तंतूपवासोविवेकःपृथगात्मता॥२८॥स्याद्ब्रह्मचर्यसंवृत्ताध्ययनाद्विरथांजलिः॥
पाठेब्रह्मांजलिःपाठेविप्रुषोब्रह्मबिंदवः॥२९॥ध्यानयोगासनेब्रह्मासनंकल्पेविधिक्रमे॥

यादेर्वर्चस्तेजोब्रह्मवर्चसमितिस्वामी। पाठेवेदपठनेयोंजलिःसब्रह्मांजलिः। अध्ययनस्यादौहस्तयोर्मिलनेओंकारपूर्वकमंजलिःक्रियते एकं। वेदपाठेविप्रुषोमुखान्निर्गतजलकणाब्रह्मबिंदवःस्युः। "विप्रुषइत्यपिपाठः।" एकं॥ २९॥ ध्यानयोगयोरासनेब्रह्मासनमित्येकं। एकतानेनमनसास्मरणंध्यानमुच्यते। चित्तवृत्तिनिरोधस्तुसद्भिर्योगइतिस्मृतः। कल्पः। विधिः। क्रमः। त्रयं। नयोगशास्त्रे॥ [illegible]

यःप्रथमःकल्पःआद्योविधिःसमुख्यःस्यात्। यथाव्रीहिभिर्यजेत।ततोमुख्याद्धमोगौणः अनुकल्पःस्यात्। यथाव्रीह्यभावेनीवारै-र्यजेत॥४०॥ संस्कारपूर्वकंश्रुतेग्रहणंउपाकरणंस्यात्। एकंउपाकर्मणि"संस्कारउपनयनं।"पादग्रहणं।अभिवादनं।द्वेनामगोत्रोक्ति पूर्वकस्यनमस्कारविशेषस्य।भिक्षुः।परिव्राट्।कर्मंदी।पाराशरी।मस्करी। पंचसन्यासिनःपरिव्राजो"कर्मंदिनप्रोक्तंभिक्षुसूत्रमधीते

मुख्यःस्यात्प्रथमःकल्पोऽनुकल्पस्ततोऽधमः॥४०॥संस्कारपूर्वंग्रहणंस्यादुपाकरणंश्रुतेः॥
समेतुपादग्रहणमभिवादनमित्यभे॥ ४१॥भिक्षुःपरिव्राट्कर्मंदीपाराशर्यपिमस्करी॥
तपस्वीतापसःपारिकांक्षीवाचंयमोमुनिः॥ ४२॥ ७ ७

कर्मंदी।पाराशर्येणप्रोक्तंभिक्षुसूत्रमधीतेपाराशरी। मस्करोज्ञानंवेणुर्वास्यास्तिमस्करी।" तपस्वीतापसः।पारिकांक्षी। त्रयंतपोयु क्तस्य।"पारिब्रह्मज्ञानंकांक्षतिपारिकांक्षी।" वाचंयमः।मुनिः।द्वेवाग्यतस्य॥४२॥ ७ ७

तपसः क्लेशेऽनुद्विग्नोदांतःस्यात्। एकंवर्णी। ब्रह्मचारी। द्वे ब्रह्मचारिणः। ऋषिःसत्यवाचः। द्वे ऋषिसामान्यस्य। तद्वेदास्कमहर्षिर्देवर्षिब्रह्मर्षिप्रभृतयः योव्रतीवेदव्रतवान्। आप्लुतःस्नातः कृतसमावर्तनइतियावत्सःस्नातकइत्यच्यते। "आप्लुवव्रतीतिपाठोवा।" यदाहुः गुरवेतुवरंदत्वास्नायाद्वा तदनुज्ञया। वेदव्रतानिवापारंनीत्वाद्युभयमेववेति॥४३॥निर्जितःस्ववशास्त्वद्वे येस्तेयतिनः। यतयः। द्वे

तपःक्लेशसहोदांतोवर्णिनोब्रह्मचारिणः॥ऋषयःसत्यवचसःस्नातकस्त्वाप्लुतोव्रती॥४३॥
येनिर्जितेंद्रियग्रामायतिनोयतयश्चते॥यःस्थंडिलेव्रतवशाच्छेतेस्थंडिलशाय्यसौ॥४४॥
स्थांडिलश्चाथविरजस्तमस्युर्द्व्यातिगाः॥पवित्रःप्रयतःपूतःपारखंडाःसर्वलिंगिनः॥४५॥

योनियमवशात्भूमिविद्वेषेशेतेअसौस्थंडिलशायी॥४४॥स्थांडिलः। द्वे विरजस्तमाः। द्व्यातिगः। द्वे सत्वैकनिष्ठेषुव्यासादिषु। "रजस्तमोभ्यांविगतःविरजस्तमाः।" पवित्रः। प्रयतः। पूतः। त्रयंपवित्रस्य। पारखंडः। सर्वलिंगी। द्वे बौद्धक्षपणकादिषु दुःशास्त्रवर्तिषु। "तत्रपारखंडः कवर्गद्वितीयमध्यः। पालनाच्चत्रयीधर्मः पाशब्देननिगद्यते। तंरखंडयंतिनेतस्मात्पारखंडास्तेनहेतुनेति" ॥४५॥ ७

व्रतेब्रह्मचारिणःपलाशसंबंधीदंडआषादइत्यच्यते। एकं। वेणुसंबंधीदंडोरांभइत्येकं।कमंडलुः।कुंडी। द्वेव्रतिनांजलपात्रस्य।"क्लीबे कमंडलुःकुंडीस्त्रियां।जानपदेतिङीष्।"कुंडेयो।व्रतिनांयदासनंसाहृषी। एकं।हृसीतिपाठांतरं॥४६॥अजिनं।चर्म।कृत्तिः।त्रीणिमृगादेश्चर्मणि। भिक्षाणांसमूहोभैक्षं।स्वाध्यायः।जपः।हेवेदाभ्यासस्य।"स्कअतीवाहृत्यास्वार्थेवाध्ययनंस्वाध्यायः।"स्कत्या। अभिषवः।

पालाशोदंडआषाढ्यो व्रतेरांभस्कवेणवः॥अस्त्रीकमंडलुःकुंडीव्रतिनासासनंहृषी॥४६॥
अजिनंचर्मकृत्तिःस्त्रीभैक्षंभिक्षाकदंबकं॥स्वाध्यायःस्याज्जपःस्कत्याऽभिषवःसवनंचसा॥४७॥
सर्वैनसामपध्वंसीजप्यंत्रिष्वघमर्षणं॥दर्शश्चपौर्णमासश्चयागौपक्षांतयोःपृथक्॥४८॥

सवनं।त्रीणिसोमाभिषवस्य।तत्रस्कत्यादाबंता।स्कंतिसोममस्यांस्कत्या।संज्ञायांसमजेतिक्यप्॥४७॥सर्वैनसांसर्वपापानांनाशकंजप्यंक्रगादिअघमर्षणंस्यात्नु।एकं।स्त्रियांत्वघमर्षणी।पक्षांतयोरमावास्यायांपौर्णमास्यांचनिर्हितौयागौक्रमेणदर्शपौर्णमासश्वस्यातां।एकैकं॥४८॥

शारीरसाधनापेक्षंशारीरमात्रेणसाध्यं।नित्यंयत्कर्मतद्यमः। आह च। अहिंसासत्यमस्तेयंब्रह्मचर्यपरिग्रहौयमाइति।एकं।यत्कर्मआगंतुसाधनंआगंतुबाह्यंसाधनंयत्रतत्। मृज्जलादिनासाध्यमित्यर्थः।नित्यंकृत्रिमंयत्कर्मसनियमः।यदाह।शौचसंतोषतपःस्वाध्याये श्वरप्रणिधानानियमाइति।एकं।क्वचित्पुस्तकेक्षौरंतुइत्यादिदृश्यतेतदत्रत्यंनेत्यपेक्षितं।"क्षौरादिचतुष्कंमुंडनस्येत्यपेक्षितसं-

शारीरसाधनापेक्षंनित्यंयत्कर्मतद्यमः॥नियमस्तुसयत्कर्मनित्यमागंतुसाधनं॥४९॥
"क्षौरंतुभद्राकरणंमुंडनंवपनंत्रिषु॥"उपवीतंब्रह्मसूत्रंप्रोद्धृतेदक्षिणेकरे॥ प्राची-
नावीतमन्यस्मिन्निवीतंकंठलंबितं॥५०॥अंगुल्यग्रेतीर्थंदेवंस्वल्पांगुल्योर्मूलेकायं॥

ग्रहः।"॥४९॥ दक्षिणेकरेप्रोद्धृतेसतियद्ब्रह्मसूत्रंतदुपवीतंस्यात्। एकं।अन्यस्मिन्वामेकरेप्रोद्धृतेप्राचीनावीतंस्यात्। एकं। कंठेलंबितंऋजुभावेनविन्यस्तंतद्ब्रह्मसूत्रंनिवीतमित्येकं॥५०॥अंगुलीनामग्रेदेवंतीर्थंज्ञेयं। अतोदेवतीर्थेनतर्पयेदित्यग्रांगुल्यग्रेणेतिबोध्यं।स्व-ल्पांगुल्योरनामिकायाःकनिष्ठिकायाश्चमूलेकायं। कःप्रजापतिर्देवताऽस्यकायं।प्राजापत्यमित्यर्थः॥ ७ ७

अंगुष्ठतर्जन्योर्मध्यभागेपित्र्यं। "पित्र्यमित्यपि" अंगुष्ठस्यमूलेतुब्राह्मंतीर्थं।यद्याज्ञवल्क्यः।कनिष्ठातर्जन्यंगुष्ठमूलान्यग्रंकरस्यच। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्। एकैकं॥५१॥ब्रह्मभूयादित्रयंब्रह्मभावस्य।"ब्रह्मणोभावःब्रह्मभूयं।" तद्देवभूयंदेवत्वंदेवसायुज्यमितित्रयंदेवभावस्य।सांतपनादिकंकृच्छ्रंस्यात्। एकं।तदुक्तं।गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं।एकरात्रोपवासश्चकृच्छ्रंसांतपनं

कांडः२

९२

मध्येंगुष्ठांगुल्योःपित्र्यंमूलेत्वंगुष्ठस्यब्राह्मं॥५१॥स्याद्ब्रह्मभूयंब्रह्मत्वंब्रह्मसायुज्यमित्यपि॥देवभूयादिकंतद्वत्कृच्छ्रंसांतपनादिकं॥५२॥सन्यासवत्यनद्याने पुमान्त्र्यहो ऽथवीरहा॥नष्टाग्निःकुहनालोभान्मिथ्येर्यापथकल्पना॥ ५३॥ ९

स्मृतमिति।आदिनाप्राजापत्यादिग्रहः॥५२॥सन्यासपूर्वकेभोजनत्यागेत्र्यहइत्येकं।अदंतःपुंसि।वीरहा।नष्टाग्निः।द्वेनष्टाग्निर्यस्यतस्य। "वीरोऽग्निस्तंहंतीतिविरहा।" वीरहणे।लोभात्सरधनाद्यभिलाषात्यामिथ्येर्यापथकल्पनादंभेनध्यानादिसंपादनंसाकुहनेत्येकं॥५३॥ ९

९२

संस्कारेणोपनयनेनगौणकालोत्तरंहीनोव्रात्यइत्यर्थः। एकं। अस्वाध्यायः। स्ववाखाध्ययनशून्योनिराकृतिः। एकं। आकृतेरध्ययनचेष्टा यानिर्गतोनिराकृतिः।" धर्मध्वजी। लिंगवृत्तिः। दृजीविकार्थंजटादिधारणवंतः। लिंगंधर्मचिन्हंवृत्तिर्जीविकायस्यसः। अवकीर्णी। क्षि तव्रतः। दृनष्टब्रह्मचर्यस्य। "अवकीर्णेविक्षिसंव्रतमनेनावकीर्णी।" अवकीर्णिचौ॥५४॥ अंशुमानूरविर्यस्मिन्रूक्षेऽस्तमेतिसोऽभि

व्रात्यःसंस्कारहीनःस्यादस्वाध्यायोनिराकृतिः॥धर्मध्वजीलिंगवृत्तिरव की र्णीक्षितव्रतः॥५४॥रूक्षेयस्मिन्नस्तमेतिरूक्षेयस्मिन्नुदेतिच॥अंशुमानभिनि र्मुक्तोभ्युदितोचयथाक्रमं॥५५॥परिवेत्तानुजोऽनूढे ज्येष्ठेदारपरिग्रहात्॥

निर्मुक्तः। एकं। "अभिसर्वतःसायंतनंकर्मनिश्चयेनमुक्तंयेन।" यस्मिन्रूक्षेऽशुमानुदेतिसोऽभ्युदितः। "अभिसर्वतःउदतिश्चयेनइतंगतं नानस्तनंकर्मास्य।"॥५५॥ ज्येष्ठेभ्रातर्यकृतदारपरिग्रहेसतिकृतदारपरिग्रहः। कनिष्ठःपरिवेत्तास्यात्। एकं॥ ७ ७

तस्यपरिवेत्तुर्ज्यायान्ज्येष्ठःपरिवित्तिःस्यात्। एकं। विवाहः। उपयमः॥५६॥ परिणयः। उद्वाहः। उपयामः। पाणिपीडनं। षट्विवाहस्य। व्यवायः। ग्राम्यधर्मः। मैथुनं। निधुवनं। रतं। पंचमैथुनस्य। "नितरांधुवनंहस्तपादादिचालनमत्रनिधुवनं" ॥५७॥ धर्मोवेदविहितोयागादिः। कामोय-

परिवित्तिस्तुतज्ज्यायान्विवाहोपयमोसमौ॥५६॥ तथा परिणयोद्वाहोपयामःपाणि
पीडनं॥ व्यवायोग्राम्यधर्मोमैथुनंनिधुवनंरतं॥५७॥ त्रिवर्गोधर्मकामार्थैश्चतुर्वर्गःस
मोक्षकैः॥ सबलैस्तैश्चतुर्भद्रंजन्याःस्निग्धावरस्यये ॥५८॥ ॥इतिब्रह्मवर्गः॥

थाविधिस्त्रीसेवनं। अर्थोधनं। एभिःस्त्रीभिःसमुदितस्त्रिवर्गः। एकं। समोक्षकैः। धर्मार्थकाममोक्षैरित्यर्थः। एतैःसमुदितश्चतुर्वर्गइत्येकं।
तैर्धर्मादिभिःसबलेश्चतुर्भद्रमित्येकं। "चत्वारिभद्राणिश्रेष्ठानिअत्र।" वरस्यजामातुर्येस्निग्धावयस्याजन्याःस्युरित्येकं॥५८॥इतिब्रह्मवर्गः॥

मूर्धाभिषिक्तः। राजन्यः। बाहुजः। क्षत्रियः। विराट्। पंचक्षत्रियस्य। विराजौ। राजा। राट्। पार्थिवः। क्ष्माभृत्। "क्ष्माभुक्।" नृपः। भूपः। महीक्षित्। सप्तराज्ञः। राजानौ। राजौ। क्ष्माभृतौ। महीक्षितौ॥१॥ प्रणताऽशेषसामंताऽखिलदेशांतरनृपाऽस्यसराजाऽधीश्वरइत्येकं। चक्रवर्ती। सार्वभौमः। द्वेआसमुद्रक्षितीशास्य। तदन्योनृपोमंडलेश्वरइत्येकं॥२॥ राजसूयारव्यक्रतुविशेषणयेनेष्टं। द्वादशमंडलस्येश्वरश्च

मूर्धाभिषिक्तोराजन्योबाहुजःक्षत्रियोविराट्॥राजाराट्पार्थिवःक्ष्माभृन्नृपभूपमहीक्षितः॥१॥
राजातुप्रणतशेषसामंतःस्याद्धीश्वरः॥चक्रवर्तीसार्वभौमोन्योमंडलेश्वरः॥२॥
येनेष्टंराजसूयेनमंडलस्येश्वरश्चयः॥शास्तियश्चाज्ञयाराज्ञःससम्राडथराजकं॥३॥
राजन्यकंचनृपतिक्षत्रियाणांगणेक्रमात्॥मंत्रीधीसचिवोमात्योन्येकर्मसचिवास्ततः॥४॥

यः। यश्चस्वाज्ञयासर्वभूपान्शास्ति ईदृशविशेषणत्रयेणविशिष्टोराजासम्राट्स्यात्। "एकैकविशेषणविशिष्टोपिसम्राट्इतिकेचित्। एकं"॥३॥ नृपतीनांगणेराजकमित्येकं। क्षत्रियाणांगणेराजन्यकइत्येकं। मंत्री। धीसचिवः। अमात्यः। त्रयंबुद्धिसहायस्य। "धीप्रधानःसचिवोधीसचिवः। अमासहसभायेवाभवःअमात्यः। अव्ययात्यप्।" ततोधीसचिवादन्येकर्मोपयुक्ताःसचिवाःकर्मसचिवाःस्युरित्येकं॥४॥ ७ ७

महामात्राः। प्रधानानि। ङे सुरव्यानांराजसहायानां। "प्रधानइत्यपि"। महामात्रः प्रधानःस्यादितिपुंस्कांडेबोपालितात्। महती मात्रायेषांतेमा
हामात्राः। मात्राकर्णविभूषायांवित्तेमानेपरिच्छदइतिमेदिनी। पुरोधाः। पुरोहितः। ङेव्यवहाराणांकृणादिविषयेवादिप्रतिवादिनिर्मितविवादानां
द्रष्टरिनिर्णेतरिप्राड्विवाकः। अक्षदर्शकः। इतिङे "न्यायाधीशइतिख्यातस्य। प्राड्वचविवाकश्चप्राड्विवाकौ। प्रश्नविवेकावस्यस्तःप्राड्विवाकः।

महामात्राःप्रधानानिपुरोधास्तुपुरोहितः॥द्रष्टरिव्यवहाराणांप्राड्वि
वाकाक्षदर्शकौ॥५॥प्रतीहारोद्वारपालद्वास्थद्वास्थितदर्शकाः॥ ७

यदुक्तं। विवादानुगतंसृष्ट्वापूर्ववाक्यंततः॥विचारयतियेनासौप्राड्विवाकस्ततस्मृतइति। अक्षाणांव्यवहाराणांदर्शकः। अक्षःकर्षेतुषे
चकेशकटव्यवहारयोरितिविश्वः।"॥प्रतीहारः।"प्रतिहारः।"द्वारपालः। द्वास्थः। द्वास्थितः। दर्शकः। पंचद्वारपालस्य। "द्वाःस्थःद्वाःस्थि
तइतिसविसर्गोपिपाठः। द्वाःस्थितदर्शकइतिसमस्तमपि।" प्रतीहारेक्षदर्शकइतिरुद्रः। द्वारयोद्वास्थितादर्शीइतिरभसः॥ ७

रक्षिवर्गः। अनीकस्थः। द्वे राजरक्षकगणस्य। अध्यक्षः। अधिकृतः। द्वे अधिकारीइतिख्यातस्य। "अधिअधिकंउपरिवाक्रियतेऽस्मात् अधिकृतः।" ६॥ एकस्मिन् ग्रामेअधिकृतःस्थायुकःस्यात्। "शेखदारदारइतिख्यातस्य।" भूरिषु बहुषु ग्रामेष्वधिकृतो गोप इत्येकं। "गोपोगोपालकेगोपाऽध्यक्षेपृथ्वीपतावपि। ग्रामस्याधिकृतेपुंसिन्नारिवारेव्योषधेस्त्रियामितिमेदिनी।" भौरिकः। कनकाध्यक्षः। द्वे स्वर्णाध्यक्षस्य। रूप्याध्यक्षः नैष्किकः। द्वे रूप्याधिकृतस्य ॥ ७॥ अंतःपुरेऽधिकृतेजनः अंतर्वेशिकःस्यात्। एकं। "अंतर्वेशेनियुक्तःअंतर्वेशि

रक्षिवर्गस्त्वनीकस्थोऽथाध्यक्षाऽधिकृतौसमौ॥ ६॥ स्थायुकोऽधिकृतेग्रामेभूरिषु॥ भौरिकःकनकाध्यक्षोरूप्याध्यक्षस्तुनैष्किकः॥ ७॥ अंतःपुरेत्वधिकृतःस्यादंतर्वेशिकोजनः॥ सोविदल्लाःकंचुकिनःस्थापत्याःसौविदाश्चते॥ ८॥

कः।" सौविदल्लाः। कंचुकिनः। स्थापत्याः। सौविदाः। चत्वारिराजसन्निधौ। "राज्ञांरूप्यगारेवा।" वेत्रधराः कंचुकिनः पुरुषास्तिष्ठंतितेषां। "रूक्षुविदंविद्वांसमपिलांतिवशंकुर्वंतिरूविदल्लास्तासामिमेरक्षकाःसौविदल्लाः। तिष्ठंत्येषुपुरुषाःतेषांस्थानांदारा णांपतयःपालकाःस्थापत्याःरूविदश्चतुरास्त्रियस्तासांरक्षकाः सौविदाः। तस्येदमित्यण्।" ॥८॥

षंढः। शंढः। वांडः। षंडः।" वर्षवरः। द्वे अंतःपुरचारिणः स्त्रीवमात्रस्य। "खोजाइतिख्यातस्य। यदुक्तं। येत्वल्पसत्वाः प्रथमाः स्त्रीवाश्चस्त्रीस्वभावि

नः। जात्यानदुष्टाः कार्येषुतेवैवर्षवराः स्मृताइति" सेवकः। अर्थी। अनुजीवी। त्रीणिसेवकस्य। विषयात्स्वदेशादनंतरोव्यवहितोराजाशत्रुःस्यात्

एकं। अंतः शत्रोः परंमित्रंराजांतरेणव्यवहितोराजामित्रंस्यादित्यर्थः। एकं॥ ९॥ परतरःशत्रुमित्राभ्यांपरोराजाउदासीनःस्यात्। अतिव्य

षंढोवर्षवरस्तुल्योसेवकार्थ्यनुजीविनः॥ विषयानंतरोराजाशत्रुर्मित्र
मतःपरं॥ ९॥ उदासीनःपरतरःपार्ष्णिग्राहस्तुपृष्ठतः॥ रिपोर्वैरिसपत्ना
रिद्विषद्वेषणदुर्हृदः॥ १०॥ द्विड्विपक्षाहितामित्रदस्वश्शात्रवशात्रवः॥ ९

वहितउदासीनइत्यर्थः। एकं। पृष्ठतःपश्चाद्देशेवर्तमानोराजापार्ष्णिग्राहः। राज्ञिशत्रुजयार्थेपुरतोगतेयस्तद्राष्ट्रंजिघृक्षतिसपृष्ठवर्तीपा

र्ष्णिग्राहइत्यर्थः। एकं। रिपुः। वैरी। सपत्नः। अरिः। द्विषः। द्वेषणः। दुर्हृदः॥ १०॥ द्विट्। विपक्षः। अहितः। अमित्रः। दस्युः। शात्रवः। शत्रुः॥ ९

अभिघाती। "अभियाती। अभियातिश्चापि। द्वेष्योभियातिरमित्र इतिरत्नकोशः।" परः। अरातिः। प्रत्यर्थी। परिपंथी। एकोनविंशतिर्नामानि शात्रोः। "सपत्नारिरिपुसमस्तमपि।" द्विषंतौ। दुर्हृदौ। द्विषौ। अभियातिनौ॥११॥ वयस्यः। स्निग्धः। सवयाः। त्रयंतुल्यवयसः। प्रियस्य। मित्रं। सखा सुहृत्। त्रीणिमित्रस्य। सखेदंतः सखायौ। सुहृदौ। सख्यं। सापत्नीनं द्वेमैत्र्यः। अनुरोधः। अनुवर्तनं। द्वेआनुकूल्यस्य॥१२॥ यथार्हवर्णः।

अभिघातिपरारातिप्रत्यर्थिपरिपंथिनः॥११॥ वयस्यः स्निग्धःसवयाश्चथमित्रंसखासुहृत्॥
सख्यंसापत्नीनंस्यादनुरोधोनुवर्तनं॥१२॥ यथार्हवर्णःप्रणिधिरपसर्पश्चरःस्पशः॥
चारश्चगूढपुरुषश्चासप्रत्ययितौसमौ॥१३॥ सांवत्सरोज्योतिषिकोदैवज्ञगणकावपि॥

प्रणिधिः। अपसर्पः। चरः। स्पशः। चारः। गूढपुरुषः। ससचारपुरुषस्य। यथार्हवर्णआकारोयस्ययथार्हवर्णः। स्पशतेबाधतेपरान्स्पशः। आसः। प्रत्ययितः। द्वेषिसंवादरहितस्य। प्रत्ययोविश्वासः संजातोस्यप्रत्ययितः॥१३॥ सांवत्सरः। ज्योतिषिकः। दैवज्ञः। गणकः।

मौहूर्तिकः। मौहूर्तः ज्ञानी। कार्तांतिकः। अहोज्योतिषिकस्य। "जोशीइतिख्यातस्य"॥१४॥ तांत्रिकः। ज्ञातसिद्धांतः। द्वेत्रास्त्रवेत्ति। "ज्ञातः सिद्धांतोयेन ज्ञातसिद्धांतः।" सत्री। गृहपतिः। द्वेगृहपतिनः। "सदान्नादिदानकर्त्तुः।" लिपिकरः। "लिविकरः लिपिकार इत्यपि। लिविंकर इतिभानुदीक्षितटीकायां।" अक्षरचणः। अक्षरचंचुः लेखकः। चत्वारिलेखकस्य। अक्षरैर्वित्तोऽक्षरचणः। तेनविन्तश्चंचुप्

स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तांतिकाअपि॥१४॥ तांत्रिको ज्ञातसिद्धांतः सत्रीगृहपतिः
समौ॥ लिपिकरोऽक्षरचणोऽक्षरचंचुश्चलेखके॥१५॥ लिखिताऽक्षरसंस्त्यानेलिपि
र्लिबिरुभेस्त्रियौ॥ स्यात्संदेशाहरोदूतोदूत्यंतद्भावे कर्मणी॥ १६॥ ७

चणौ॥१५॥ लिखितं। अक्षरसंस्त्यानं। लिपिः। "लिपी।" लिबिः। चत्वारिलिखिताऽक्षरस्य। लिखिताक्षरविन्यास इतिपाठे लिखितनामा
क्षराणांयोविन्यासस्तत्रेत्यर्थः। संदेशाहरः। दूतः। द्वेसंदिश्यतइतिसंदेशोनिरूपणंतद्धरति इतिसंदेशाहरः। तस्यदूतस्यभावे कर्म
णिच दूत्यमित्येकं। "दौत्यमपि। तद्भागकर्मणीइतित्वपपाठः।" दूतस्यभागकर्मणीइतियच्छांदसत्वात्॥१६॥ ७

अध्वनीनः।अध्वगः।अध्वन्यः।पांथः।पथिकः।पंचपांथस्य।"स्त्रियांतुपांथा।पथिकीपथष्कनू।पीत्वातूंकीषू।"स्वामी।राजा।अमात्योमंत्री।
सुहृन्मित्रं।कोशोधनागारं।राष्ट्रंजनपदवर्तिभूमिः।दुर्गंदुर्गमस्थानं।"पर्वतादि।"।बलंसेना।।१७॥ एतानिसप्तराज्यांनिस्युः।राज्ञःकर्मराज्यं
तस्यांगानिआरंभकाणि।स्वाम्यमात्यश्चराष्ट्रंचदुर्गंकोशोबलंसुहृत्।परस्परोपकारीदंसप्तांगंराज्यमुच्यतइतिकामंदकीये।एतच्चेह

अध्वनीनोध्वगोध्वन्यःपांथःपथिकइत्यपि॥स्वाम्यमात्यसुहृत्कोशा
राष्ट्रदुर्गबलानिच॥१७॥राज्यांगानिप्रकृतयःपौराणांश्रेणयोपिच॥

कृतिशब्दवाच्यानिस्युःहे"प्रकृष्टंकुर्वंतिराज्यंप्रकृतयःपौराणांश्रेणयोपिप्रकृतयस्युः।"पौरश्रेणिभिःसहाष्टांगमपिराज्यमित्यर्थः।"यस्मात्य
अमात्यश्चतथापौराःसद्भिःप्रकृतयःस्मृताइति।एकं।शिल्पोपजीविनांपक्तिरत्रश्रेणिः।मुख्यःसजातीयसमूहःश्रेणिरित्यन्ये॥ ७

संधिः।संधानं। स्वर्णादिनाद्रव्यूणांप्रीत्यासादनमिति।संधिरित्यव्ययमात्मनेपदि।परमंडलेदाहलुंठनादिग्रहणंविग्रहः।शत्रुंप्रतिविजिगीषोर्गमनंयानं शक्तिप्रतिबंधेसतिकालंप्रतीयादितिदुर्गादिकंनिर्मायतत्रावस्थानमासनं।बलिनासहसंधिः।अबलेनसहविग्रहः।इतिप्रकारंद्वयंद्वैधं।अरिणापीड्यमानस्यबलवद्भूपालाद्याश्रयणंआश्रयः।एतेषांभेदास्तुकामंदकीयादौद्रष्टव्याः॥१८॥एतेसंध्यादयःषट्गुणाःस्युः।एकंप्रभावोत्साहमं

संधिर्नाविग्रहोयानमासनंद्वैधमाश्रयः॥ १८ ॥षट्गुणाःशक्तय स्तिस्रःप्र
भावोत्साहमंत्रजाः॥ क्षयःस्थानंचवृद्धिश्चत्रिवर्गोनीतिवेदिनां॥१९॥ ७

त्रजास्तिस्रःशक्तयःस्युः।एकं।तत्रकोशदंडजंतेजःप्रभावशक्तिः।विक्रमादिनोन्नतिरुत्साहशक्तिः।संधिविग्रहादीनांमंत्रेणयथावत्स्थापनंमंत्रशक्तिः।पंचांगमंत्रोमंत्रशक्तिरित्यन्ये। क्षयस्थानंवृद्धिरितित्रयंनीतिवेदिनांत्रिवर्गस्यात्। नीतिशास्त्रोक्तस्त्रिवर्गइत्यर्थः।एकं।अष्टवर्गस्यापचयः क्षयः।तस्यैवोपचयोवृद्धिः।उपचयापचयराहित्येनावस्थानंस्थानं।अष्टवर्गस्तूक्तःविष्णुधर्मोत्तरेदुर्गंसेतुःकुंजरबंधनंरथनिर्बलंकरादानमित्यु क्तः॥१९॥

कोशः अर्थैर्यः। दंडःदमः।सेनातज्जन्यंतेजःप्रतापःप्रभावश्चस्यात्। ङे "अधिक्षेपावमानादेःप्रयुक्तःपरेणयत्। प्राणात्ययेप्यसहनंयत्तेजःस मुदाहृतमिति भरतः।" सामप्रियवचनादि। "तदुक्तं।परस्परोपकाराणांदर्शनंगुणकीर्तनं।संबंधस्यसमाख्यानमापत्याःसंप्रकाशनं॥ षाच्चापेक्षालयासाधुतवाहमितिचार्पणं।इतिसामविधानज्ञैःसामपंचविधंस्मृतमिति।" दानंधनादेःसमर्पणं।भेदस्संहतानांशाठ्यादिभेदनेना

सप्रतापःप्रभावश्चयत्तेजःकोशदंडजं॥ सामदानेभेददंडावित्कपा
यचतुष्टयं॥ २०॥ साहसंतुदमोदंडःसामसांत्वमथोसमौ॥ ७

त्मसात्करणं। दंडनंदंडः। एतच्चतुष्कंउपायचतुष्टयंस्यात्। "अन्यत्र [illegible]अयुक्ताःसामदानंचभेदश्चदंडश्चेतिचतुष्टयं। मायोपेक्षेंद्रजालंचससोपायाःप्रकीर्तिताइति।" भेदोदंडःसामदानमितिपाठांतरं॥२०॥साहसं। दमः। दंडः। त्रीणिदंडस्य। साम। सां-त्वं। "ङे सलूरवइतिख्यातस्य।" ७ ७ ७

भेदः। उपजापः। हेसंहतयोर्द्वैधीकरणस्य। धर्मार्थकामैर्भयेनचपरीक्षणं। अमात्यादीनामाज्ञान्वेषणंस्यात्। तद्यथा। भावज्ञानायराज्ञात्रारि
तेनासेनदुष्टेयंराजातदेनमुत्सृज्यान्यभिषेचयामोन्यंवा साधुंनृपंव्रजामइत्यक्तेअमात्यैर्यदितज्ञाषणंनमन्येततर्हिसत्यंधार्मिकोयमिति
निश्चयोधर्मपरीक्षणं। एवमर्थपरीक्षणादिबुद्ध्योदाहर्त्तव्यं। एकं॥२१॥ अथषडक्षीणादिनिःद्वालाकांताःपंचद्वाच्छास्त्रिषुषाच्यलिंगाःयस्तृतीया

भेदोपजापावुपधाधर्माद्यैर्यत्परीक्षणं॥२१॥ पंचत्रिष्वषडक्षीणोयस्तृतीयाद्यगोचरः॥ विविक्तविजनच्छन्ननिःद्वाला
कास्तथारहः॥२२॥ रहश्चोपांशुचालिंगे रहस्यंतद्भवेत्रिषु॥ समौविस्रंभविश्वासौ भेषोभ्यंशोयथोचितात् ॥२३॥

द्यगोचरः। तृतीयादिनाननज्ञायनेकिंतुद्वाभ्यामेवक्रियतेसमंत्रादिरषडक्षीणइत्येकं। विविक्तः। विजनः। छन्नः। निःद्वालाकः। रहः॥२२॥ रहः। उपांशु।
समविजनस्य। तत्रैकंरहःसांतंक्लीबं। द्वितीयंरहउपांशुइतिचत्रिषुअलिंगे। अव्ययेत्यर्थः। तद्भवेद्रहोभवेद्रहस्यमित्येकं। विस्रंभः। "तालव्यमध्योपि।
विश्रंभंकेलिकलहेविश्वासेप्रणयेपिचेतिमेदिनी।" विश्वासः। हयोश्चितात्स्वरूपाद्भेदः। तपनंभेषः। इत्येकं॥२३॥ ९८

अभ्येषः। न्यायः। कल्पः। देशरूपंसमंजसं। पंचकंनीतेः। "प्रशस्तंदेशंदेशरूपं। प्रशंसायांरूपप्।" युक्तं। औपयिकं। लभ्यं। भजमानं। अभिनीतं। न्याय्यं। षट्न्यायादनपेतस्यद्रव्यादेः। अभिनीतवदितिवच्छब्दोयुक्तादीनांपर्यायत्वद्योतनार्थः। एतेषडपित्रिषु। संप्रधारणा। समर्थनं। द्वे युक्तायुक्तपरीक्षायाः। अपवादः। निर्देशः। निदेशः। शासनं॥ २५॥ शिष्टिः। आज्ञा। षट्कर्माज्ञापनस्य। "कार्यमवलंब्यवदनमत्रापवादः"।

अभ्येषन्यायकल्पास्तुदेशरूपंसमंजसं ॥ युक्तमौपयिकंलभ्यंभजमानाभिनीतवत् ॥ २४॥
न्याय्यंचत्रिषुषट्संप्रधारणासमर्थनं ॥ अपवादस्तुनिर्देशोनिदेशःशासनंचसः ॥ २५॥
शिष्टिश्चाज्ञाचसंस्थातुमर्यादाधारणास्थितिः ॥ आगःपरं धोमंतुश्चसमेतूद्वानबंधने ॥ २६॥
द्विपाद्योद्विगुणोदंडोभागधेयःकरोबलिः॥ ❀ ❀ ❀

संस्था। मर्यादा। धारणा। स्थितिः। चत्वारिन्याय्यमार्गास्थितेः। आगः। अपराधः। मंतुः। त्रीण्यपराधस्य। आगःसांतंक्लीबे। मंतुःपुंसि। उद्वानं। बंधनं। द्वेबंधनस्य ॥ २६॥ द्विगुणोदंडोद्विपाद्यः स्यात्। एकं। द्वौपादौपरिमणस्यद्विपाद्यः"। भागधेयः। करः। बलिः। त्रीणिकर्षकादिभ्योराजग्राह्यभागस्य। "धारा पट्टी.बसूल इतिख्यातस्य। भागएवभागधेयः" ॥ ❀ ❀ ❀

घट्टोनदीतीरादिस्थानंकट्टाइतिख्यातं। आदिनागुल्मप्रतोल्यादि। तत्रयद्देयंनेतव्यानेतव्यवस्तुसंबंधीराजग्राह्योभागःसशुल्कःस्यात्। लमध्योयं। एकं। "जकातइतिख्यातस्य। क्लीबंशुल्कं"। प्राभृतं। प्रदेयानं॥ २७॥ उपायनं। उपग्राह्यं। उपहारः। उपदा। षट्नृपगुर्वादिदर्शनादीसमर्घ्यमाणस्य। वस्तुनः। पत्न्योपदास्त्रियां। युतकयोर्वधूवरयोरिदंयौतकं। आदिनाबंधुदेयादियद्देयंनरुक्तदायः। हरणंचस्यात्।

घट्टादिदेयंशुल्कोस्त्रीप्राभृतंतुप्रदेशानं॥२७॥ उपायनमुपग्राह्यमुपहारस्तथोपदा॥
यौतकादितुयद्देयंतुदायोहरणंचतत्॥ २८॥ तत्कालस्तुतदात्वंस्यादुत्तरःकालआयतिः॥
सांदृष्टिकंफलंसद्यउदर्कःफलमुत्तरं॥ २९॥

देयंकन्यादानकालेव्रतभीक्षादौचदीयमानद्रव्यस्य। यौतुकमपि। यौतकंयौतुकंचतादिनिपात्यस्यतिः। "सुराक्षुंसि॥ २८॥ तत्कालः। तदात्वं। हे "वर्तमानकालस्य"। सचासौकालश्चतत्कालः। उत्तरआगामीकालआयतिःस्यात्। एकं। स्त्री। यत्सद्यःफलंतत्सांदृष्टिकं। एकं। उत्तरं भाविफलंउदर्कः स्यात्। एकं॥ २९॥

वन्हिरग्न्युत्पातः तोयमतिवृष्ट्यादिः तत्कृतंयद्भयंतत् अदृष्टमित्येकं। "आधिमाहुताशनोजलंव्याधिर्दुर्भिक्षंमरणंतथा। अतिवृष्टिरना वृष्टिर्मूषकाः बालभाद्योगृह्यंते"। स्वचक्रा[illegible]जन्यंचोरादिघटितंतद्दृष्टं। एकं। राज्ञो [illegible]वंस्वसहायजन्यंभयंअहिभयंस्या त्। एकं॥२०॥ प्रक्रिया। अधिकारः। हेन्यवस्थास्थापनस्य। चामरं। "चमरमपि। चामरेत्यपि। चमरंचामरेस्त्रीतुमंजरीमृगभेदयोरि

अदृष्टंवन्हितोयादिदृष्टंस्वपरचक्रजं॥ महीभृज्जामाहेभयंस्वपक्षप्रभवंभयं॥ २०॥
प्रक्रियात्वधिकारः स्याच्चौमरंतुप्रकीर्णकं॥ नृपासनंयत्तद्भद्रासनंसिंहासनंतुतत्॥ २१॥
हैमंछत्रंचातपत्रं राज्ञस्तुनृपलक्ष्मतत्॥ भद्रकुंभः पूर्णकुंभोभृंगारः कनकालुका॥ २२॥

निमेदिनी। चामराचमरेबालव्यजनेरोम[illegible]कइतिरभसः"। प्रकीर्णकं। हे"चवरीइतिख्यातस्य"। नृपासनं। भद्रासनं। हेमण्यादिरूप राजासनस्य। तन्नृपासनंस्वर्णनिर्मितंचेत्सिंहासनंस्यात्। एकं॥ २१॥ छत्रं। आतपत्रं। हे"छत्रस्य"। राज्ञश्चेत्छत्रंतर्हिनृपलक्ष्मस्यात् एकं। भद्रकुंभः। पूर्णकुंभः। हे[illegible]स्य। भृंगारः। कनकालुका। हेस्वर्णरचितपात्रविशेषस्य। "झारीइतिख्यातस्य।"॥ २२॥ ७९

निवेशः। शिबिरं। द्वेसैन्यवासस्थानस्य। "सेनेचातऊ इतिरव्यातस्य। गोट इतिरव्यातस्येतिकेचित्"। शर्वतिगच्छंतिसैनिकाअस्मिन्निशिबिरं। सज्जनं। उपरक्षणं। द्वेसैन्यरक्षणायनियुक्तप्रहरिकादिविन्यासस्य। "पाहरा. गस्त. इतिरव्यातस्य"। हस्त्यादिचतुष्टयंसेनांगंस्यात्। एकं। अत्रपादातंपदातिसमूहः। "नाविकाटविकारीनांपदातावंतर्भावः। नौकानांरथेष्वंतर्भावः। महिषादीनांगजेषंतर्भाव इतिमुकुटः"॥३१॥ दंती। दंतावलः।

निवेशः शिबिरंषंढेसज्जनंतूपरक्षणं॥ हस्त्यश्वरथपादातंसेनांगंस्याच्चतुष्टयं ॥ ३२ ॥
दंतीदंतावलोहस्तीद्विरदोनेकपोद्विपः॥ मतंगजोगजोनागःकुंजरोवारणःकरी ॥ ३४ ॥
इभःस्तंबेरमःपद्मीयूथनाथस्तुयूथपः॥ मदोत्कटोमदकलःकलभःकरिशावकः॥ ३५॥
प्रभिन्नोगर्जितोमत्तःसमावुद्दांतनिर्मदौ ॥

हस्ती। द्विरदः। अनेकपः। द्विपः। मतंगजः। गजः। नागः। कुंजरः। वारणः। करी॥ ३४॥ इभः। स्तंबेरमः। पद्मी। पंचदशाहास्तिनः। "अतिद्यायितः कुंजोहनुरस्यकुंजरः" यूथनाथः। यूथपः। द्वेयूथमुख्यस्यगजस्य। मदोत्कटः। मदकलः। द्वेमदोन्मत्तस्य। कलभः। "करभइत्यपि"। करिशावकः। द्वेकरिपोतस्य। "छावाइतिरव्यातस्य"॥ ३५॥ प्रभिन्नः। गर्जितः। मत्तः। त्रीणिक्षरन्मदस्य। उद्दांतः। निर्मदः। द्वेगतमदस्य। उद्दामतिस्मेमदंउद्दांतः

हास्तिकं । गजता । द्वे हस्तिनांद्वंदे । करिणी । धेनुका । वशा । त्रीणिहस्तिन्याः । "वशातालव्यांताः" ॥ २६ ॥ हस्तिनोगंडःकपोलःकटः स्यात् । एकं । मदः । दानं । द्वे "मदोदकस्य" वमथुः । करशीकरः । द्वेकरिकरान्निर्गतजलकणस्य । शिरसःपिंडौकुंभौस्यातां । एकं । तयोःकुंभयोर्मध्येआकारास्थानं विदुः स्यात् । एकं ॥ २७ ॥ गजस्यललाटंअवग्रहः । "अवग्राहइत्यपि" । एकं । ईषिका । "इषीका । ईषीका । इषिका" । अक्षि

हास्तिकंगजताद्वंदेकरिणीधेनुकावशा ॥ २६ ॥ गंडःकटोमदोदानंवमथुःकरशीकरः ॥ कुंभौतुपिंडौशिरसस्तयोर्मध्येविदुःपुमान् ॥ २७ ॥ अवग्रहोललाटंस्यादीषिकात्वक्षिकूटकं ॥ अपांगदेशोनिर्याणंकर्णमूलं तुचूर्णिका ॥ २८ ॥ अधःकुंभस्यवाहित्थंप्रतिमानमधोऽस्ययत् ॥ आसनंस्कंधदेशःस्यात्पद्मकंबिंदुजालकं ॥ २९ ॥

कूटकं । द्वे नेत्रगोलकस्य । हस्तिनःअपांगदेशोनिर्याणं । एकं । कर्णस्यमूलंचूलिकास्यात् । एकं ॥ २८ ॥ कुंभस्याधोभागेवाहित्थं । इदंललाटस्याप्यधोज्ञेयं । एकं । अस्यवाहित्थस्याधोभागेदंतयोर्मध्यंप्रतिमानंस्यात् । एकं । गजस्यस्कंधदेशआसनं । एकं । बिंदुजालकंबिंदुसमूहः पद्मकंस्यात् । एकं । पद्मामिवरक्तत्वात्पद्मकं । हस्तिनोदेहेहिमायशाआरक्तबिंदवःसंति ॥ २९ ॥

गजस्यपार्श्वभागः पक्षभागःस्यात्। एकं।अग्रतोयोभागःसदंतभागःस्यात्। एकं। हस्तिनः पूर्वजंघादिदेशोगात्रंस्यात्। पश्चाज्जंघादिदेशोव
रंस्यात्। "पवर्गादिमध्यमपि।अपरंतूत्तरार्धेस्यात्पश्चाद्भागेचदंतिनामितिविश्वविश्वप्रकाशौ"। एकैकं॥ ४०॥ तोत्रं।वेणुकं।"वैणुकं।तोत्रं
तुप्राजनेवैणुकेपिचेतिमेदिनीविश्वप्रकाशौ"। द्वेतोदनदंडस्य। बंधनाधारस्तंभेआलानमित्येकं। शृंखलं। अंदुकः। निगडः।त्रीणिशृं

पार्श्वभागः पक्षभागोदंतभागस्तयोग्रतः॥ द्वेपूर्वपश्चाज्जंघादिदेशोगात्रावरेक्रमात् ॥ ४० ॥
तोत्रंवैणुकमालानंबंधस्तंभेऽथशृंखले ॥अंदुकोनिगडोऽस्त्रीस्यादंकुशोन्त्रीस्तृणिःस्त्रियां॥ ४१॥

खलस्य। शृंखलापुंस्कटीवस्त्रबंधेचनिगडेत्रिषितिमेदिनी। "अंदूरित्यप्यन्यत्र। अंदूःस्त्रियांस्यान्निगडेप्रभेदेभूषणस्यचेतिमेदि
नी"। अंकुशः। स्तृणिः। "तालव्यादिरपि। शृणिरंकुशयाचीचकाशश्चतृणवाचकइतिशाभेदः। द्वेअंकुशस्य। स्तृणिः स्त्रियां। आरक्षम
ग्नमवमत्यस्तृणिंशितात्रमितितुमाघस्यप्रमादः ॥ ४१ ॥

दूष्या। "वूष्येतिमुकुटः"। कक्ष्या। वरत्रा। त्रयंमध्यबंधनोपयोगिन्याश्वर्मरज्वाः। कक्षायांमध्यदेशेभवाकक्ष्या। कल्पना। सज्जना। ह्रेना यकारोहणार्थंगजसज्जीकरणे। प्रवेणी। आस्तरणं। वर्णः। परिस्तोमः। कुथः। पंचगजपृष्ठवर्तिनआस्तरणस्य। स्त्रियांतुकुथा। "स्त्रीप्रवेणीकुथंत्रिषितिबोपालितः।" प्रवेणीस्त्रियां। "प्रवेणिःस्त्रीकुथावेण्योरितिमेदिनी" ॥४२॥ असारंयुद्धाद्यक्षमंहस्त्यश्वंहस्तीचाश्व

दूष्याकक्ष्यावरत्रास्यात्कल्पनासज्जनासमे॥ प्रवेण्यास्तरणंवर्णःपरिस्तोमःकुथाद्वयोः॥४२॥
वीलंत्वसारंहस्त्यश्वंवारीतुगजबंधनी ॥ घोटकेवीतितुरगातुरंगाश्वतुरंगमाः ॥ ४३ ॥

श्वतद्वीतमुच्यते। सेनांगत्वात्समाहारः। गजबंधनीगजालानभूःवारीस्यात्। वार्यतेऽनयावारी। एकं। घोटकः। "ओड्ड्रघोटौ। घोटसैंधवगंधर्वाहयवाजितुरंगमाइतिरभसः"। वीतिः। "पीतिरित्यपि। पीतिर्नाश्वेस्त्रियांवानइतिमेदिनी। पीतिःपानेतुरंगेचेति विश्वप्रकाशाः। तुरगः। तुरंगः। अश्वः। तुरंगमः ॥ ४३ ॥

वाजि। वाहः। अर्वा। गंधर्वः। हयः। सैंधवः। सप्तिः। त्रयोदशघोटकस्य। वीतिरिदंतः। अर्वानकारांतः। अर्वंती। वाजिनौ। येकुलीनाः प्रशस्तजातिभवाअश्वास्तेआजानेयाः। एकं। "आजेनक्षेपेणानेयाः प्रापणीयाआजानेयाः। अश्वशास्त्रंतु। शास्त्रिभिर्भिन्नहृदयास्खलंतश्चपदेपदेआजानंतियतः संज्ञामाजानेयास्ततः स्मृताइति" येसाधुवाहिनः शोभनंवहंतितेविनीताः स्युः। एकं ॥ ४४॥ वानायुदेशोजा

वाजिवाहार्वगंधर्वहयसैंधवसप्तयः ॥ आजानेयाःकुलीनास्फर्विनीताःसाधुवाहिनः ॥ ४४ ॥
वनायुजाःपारसीकाःकांबोजावाल्हिकाहयाः ॥ ययुरश्वोश्वमेधीयोजवनस्तुजवाधिकः ॥ ४५ ॥

ताः वानायुजाः। एवंपारसीकाः। विदेशजाताःपारसीकाद्योहयभेदाः स्युः। एकैकं। "वनायुजःपारसीकउक्तइतिरत्नकोशात्। श्वेताश्वंकर्करव्यंवनायुजमपिपारसीकमितिनाममालायाश्चवनायुजपारसीकोपर्यायशब्दावपि। बाल्हीकंवाल्हिकंधीरहिंगुनोर्नाश्वदेशयोरितिविश्वकांडशेषाद्दीर्घमध्योपिबाल्हीकइति।" योश्वमेधीयः अश्वमेधायहितोऽश्वः सययुरित्येकं। योजवेनवेगेनाधिकःसजवनः। एकं ॥ ४५॥

दृष्यः। स्थौरी। द्वेजलादिभारवाहिनोऽश्वस्य। "स्थौरंबलमस्यास्तीतिस्थौरी। स्थौरीत्यपि" सितः शुक्लोऽश्वःकर्कइत्येकं। योरथस्यवोढासरथ्यइत्येकं। अस्यबालः किशोरः। एकं। "शिंगरूइतिख्यातस्य"। उपचारादन्यस्यापिप्रयोगः। वामी। अश्वा। वडवा। त्रीण्यश्वायाः। "घोडीइतिख्यातायाः"। गणे वडवानांसमूहेवाडवं। एकं॥ ४६॥ अश्वेनएकेनदिनेगम्यतेयद्दूर्मतदाश्वानंत्रिषु। एकं। अश्वानांमध्यंकश्यं। एकं। कशामर्हतिकश्यं। अश्वस्यनि

दृष्टःस्थौरीसितःकर्कोरथ्योवाढारथस्ययः॥ बालःकिशोरोवाम्यश्वावडवावाडवंगणे॥ ४६॥
त्रिषाश्वानंयदश्वेनदिनेनैकेनगम्यते॥ कश्यंतुमध्यमश्वानांहेषाहेषाचनिस्वनः॥ ४७॥
निगालस्तुगलोद्देशोवृंदेत्वश्वीयमाश्ववत्॥ ९ ९ ९

स्वनः शब्दःहेषाहेषाचस्यातांद्वे॥ ४७॥ गलोद्देशः गलजत्रुसंधिःनिगालःस्यात्। एकं। "घंटाबंधसमीपस्थोनिगालःकीर्तितोबुधैः। तस्मिन्ने वमणिर्नामरोमजःशुक्लकृष्णवर्णइत्यश्वशास्त्रं।" आश्वीयं। आश्वं। द्वेअश्वानांवृंदे। वर्णनिर्देशोद्दूयोस्तुल्यत्वद्योतनाय॥ ९ ९

अमूः आस्कंदिताद्याः अश्वानांपंचगतयः धारारव्याः एकं। यत्रवेगार्तोश्वोनशृणोतिनपश्यति। नादृशीगतिरास्कंदितं। "भरपल्ला-भरधांवचाल इतिप्रसिद्धं। केवलगत्यर्थेगृहीतेचवडचालइतिप्रसिद्धं आस्कंदितमित्यपिमतं" चातुर्थेणयुक्तासरलागतिर्धोरितकं। "धोरितकमितिहेमचंद्रः। तुरकी-गामचालइतिप्रसिद्धं" मध्यमवेगेनचक्रवद्भ्रमणंरेचितं। "दुडकीचालइतिप्रसिद्धं"। अग्रकायंसमुल्लस्यकुत्सितस्थलादौकुंचितास्यंविचलनंवलितं। "बाजीचालइतिप्रसिद्धं"। पूर्वापरोन्नमनतः क्रमादारोपणंप्लुतं। "चौकचालइतिप्रसिद्धं। अश्वस्य

आस्कंदितंधौरितकंरेचितंवलितंप्लुतं ॥ ४८ ॥ गतयोमूः पंचधाराधोणातुत्रोथ
मस्त्रियां ॥ कविकातुरवल्गीनोऽस्त्रीदाफंक्लीबेखुरःपुमान् ॥ ४९ ॥ ७ ७

गेणान॥ सेकात्रोथमित्येकं। "पुंसिक्लीबेच"। कविका। खलीना। "खलिनमित्यपि"। द्वेलोहादिनिर्मितस्यमुखमध्येनिहितस्य। कडियाली। "लगाम"। इतिख्यातस्य। "कवीत्यप्यत्र। क्लीबेखलीनं"। कवतेदंतेनशब्दार्थात्कविका। दाफं। खुरः। "क्षुरइतिभरतमालायां।" द्वे "सुंभइतिख्यातस्य"। खुरतिविलिखतिभूमिंखुरः ॥ ४९ ॥ ७ ७ ७

पुच्छः। लूमं। लांगूलं। "लांगुलमित्यपि"। त्रीणि "दांडी इतिख्यातस्य। पुच्छः अस्त्रीपुन्नपुंसकं"। लूममदंतं। बालहस्तः। बालधिः। हेकेशसमूह युक्तस्य। पुच्छाग्रभागस्य। बालधिःपुमान्। उपाहृतः। लुठितः। हेश्रमशांत्यर्थंमुहुर्भुविपार्श्वाभ्यांपरावृत्तस्याऽश्वस्य॥ ५०॥ युद्धमर्थःप्रयोजनंयस्य। तस्मिन्चक्रयुक्तेयानेशतांगः। स्यंदनः। रथः। इतित्रयं। यच्चक्रयुतंयानंसमरायुद्धार्थंनभवति असौपुष्यरथः स्यात्। एकंकी

पुच्छोऽस्त्रीलूमलांगूलेबालहस्तश्चबालधिः॥ त्रिषूपाहृतलुठितौपरावृत्तेमुहुर्भुवि॥ ५०॥ यानेचक्रिणियुद्धार्थेशतांगःस्यंदनोरथः॥ अरौपुष्यरथचक्रयानंसमरायतत्॥ ५१॥ कर्णीरथःप्रवहणंडयनंतुसमंत्रयं॥

डारथस्य। यथापुष्यनक्षत्रंसुखकरंतद्वद्रथोपीतिपुष्यरथः। अंतस्थमध्यः। "पकारमध्यपाठोपि। तत्रसुकुमाकारत्वात्पुष्पमिवरथइतिविग्रहः।"॥ ५१॥ कर्णीरथः। प्रवहणं। डयनं। "हयनमित्यपि। हयगतौ"। त्रयंस्त्रीणांवाहनार्थंकृतस्योपरिवस्त्रादिनापिहितस्यरथविशेषस्य। "वुरख्याचीगाडीइतिभाषासिद्धस्य"। यल्लक्ष्यं। कर्णीरथस्थंरघुनाथपत्नीं॥

अनः। शाकटः। द्वे। "गाडाइतिख्यातस्य। शाकटःपुंसिक्लीबेच। शक्नोतिभारंवोढुंशाकटः"। अनःसांनं। कंबलिभिर्हृषेर्वाह्यंवोढव्यंयच्छकटंसागं त्री। "गांत्रीतिसुकुटः"। एकं। "गाडीइतिख्यातस्य" स्त्रियां॥ ५२॥ शिबिका। याप्ययानं। द्वेपुरुषबाह्यस्ययानविशेषस्य। "पालखीइतिख्यातस्य"। दोला। "डोषीदोली"। प्रेंखा। द्वेदोलायाः हिंदोळाइतिख्यातायाः। "डोलीइतिख्यातायां वा"। आदिशब्दात्तूशयनखट्वाद्याद्दोला॥ कां०

क्लीबेऽनः शाकटोऽस्त्रीस्याद्द्वेत्रीकंबलबाह्यकं॥ ५२॥ शिबिकायाप्ययानंस्याद्दोलौत्रेखांदिकास्त्रियां॥
उभौतुद्वीपिवैयाघ्रौद्वीपिचर्मावृतेरथे॥ ५३॥ पांडुकंबलसंवीतःस्यंदनःपांडुकंबली॥
रथेकांबलवस्त्राद्याःकंबलादिभिरावृते॥ ५४॥ ७ ७ ७

द्वीपिव्याघ्रचर्मणावृतेरथेद्वैपः। वैयाघ्रः इतिद्वयं॥ ५३॥ पांडुकंबलेनावृतोरथः पांडुकंबलीत्येकं। कंबलादिभिरादिशब्दाद्दुकूलादिभिरावृतेरथे। कांबलः। वास्त्रः। दौकूलः। "चार्मः। क्षौमः"। इत्यादयः स्युः। एकैकं॥ ५४॥ ७ ७ १०४

द्वैपवैयाघ्रादयस्त्रिषु । वाच्यलिंगत्वात् । यद्वैपीरथ्या । द्वैपोरथः । रथ्या । रथकट्या । द्वयंरथसमूहे । धूः । यानमुखं । द्वैरथादेरग्रभाग स्य । "धूरइतिख्यातस्य" । धूः स्त्री । धुरौ । रथांगं । अपस्करः । द्वैरथावयवमात्रस्य ॥ ५५ ॥ चक्रं । रथांगं । द्वैचक्रस्य "चाकइतिख्यात स्य" । नेमिः । "नेमीत्यपि" । प्रधिः । द्वैतस्यचक्रस्यांतेभूस्पर्शीभागे । पिंडिका । "पिंडीत्यपि" नाभिः । "नाभीत्यपि" । द्वैचक्रकाष्ठाधार

त्रिषुद्वैपादयोरथ्यारथकट्यारथव्रजे ॥ धूःस्त्रीक्लीवेयानमुखंस्याद्रथांगमपस्करः ॥५५॥
चक्रंरथांगंतस्यांतेनेमिःस्त्रीस्यात्प्रधिःपुमान् ॥ पिंडिकानाभिरक्षाग्रकीलकेतुद्वयोरणिः ॥ ५६ ॥

भूतस्यमंडलाकारस्यचक्रमध्यस्य । नभ्यतेहिंस्यतेऽक्षोनयानाभिःस्त्री । अक्षस्यनाभिक्षेपस्यकाष्ठस्याग्रेचक्रधारणार्थंयत्की लकमारोप्यतेतत्रअणिरित्येकं । स्त्रीपुंसयोः । "आणिराणिवदक्षाग्रकीलाश्रीसीमसुद्वयोरितिमेदिनी" ॥ ५६ ॥ ७ ९

रथगुप्तिः। वरूथः। हिंस्राद्यभ्यः परिरक्षणार्थंरथस्य लोहादिमयंयदावरणंक्रियतेतस्य। नापुमान्। "व्रियतेरथोऽनेनवरूथः"। कूबरः। युगंधरः। द्वेयत्रस्थस्याश्वाबध्यंतेतस्यकाष्ठस्य। "दांडीइतिख्यातस्य। युगकाष्ठबंधनस्थानस्यापियुगंवोढुर्बंधनकाष्ठं। धारयतीतियुगंधरः"। रथाधःस्थंकाष्ठं। अनुकर्षः। "अनुकर्षोतिनांतोप्ययं। अनुकर्षोनाक्षतलदार्विनिबोपालिताः"। एकंरथस्याधस्थलभागदा

रथगुप्तिर्वरूथोनाकूबरस्तु युगंधरः॥ अनुकर्षोदार्वधस्थंप्रासंगोनायुगाद्युगः॥ ५७॥

रुणः"। युगेनअतियुगात्तुद्वथाश्वादिः तस्ययुगोयुगाद्युगः प्रासंगइतिस्यात्। नापुमान्। काकाक्षिवत्युगादितिविशेषणंअयमेवयुगशब्दः पुंसिनतुयुग्मादिवाचीतिप्रदर्शनार्थं। अनोयुगादितिपाठेशकटसंधियुगादन्योयुगः वृषादीनांस्कंधेआसज्जमानःसप्रासंगइत्यर्थः। एकं। "जूंजोकडइतिख्यातस्य। युगंद्वितीयंप्रासंगइतिकात्यः"॥ ५७॥

सर्वंहस्त्यश्वादिवाहनंयानादिशब्दवाच्यं। यानं। युग्यं। पत्रं। धोरणं। चत्वारियत्परंपरावाहनंनरादिवोढृपरंपरयावाह्यतेशिबिकादितद्वैनीतकंस्यात्। विनीतानांशिक्षितानामिदं। "पुंसिवैनीतकः। विनीतकमित्यपि"॥ ५८॥ आधोरणाः। हस्तिपकाः। हस्त्यारोहाः। निषादिनः। चत्वारिहस्तिपकेभ्यादयस्तइतिरभसः। द्वेद्वेभिन्नार्थेइत्येके। नराभ्यांवाह्यतेमात्रस्यपरेगजारोहस्य। नियंता। प्राजिताःयंता। सूतः।

सर्वंस्याद्वाहनंयानंयुग्यंपत्रंचधोरणं ॥ परंपरावाहनंयत्तद्वैनीतकमस्त्रियां ॥ ५८ ॥
आधोरणाहस्तिपकास्त्यारोहानिषादिनः॥ नियंताप्राजितासूतःक्षत्तासारथिः॥५९॥
सव्येष्वदक्षिणस्थौचसंज्ञारथकुटुंबिनः॥ रथिनःस्यंदनारोहाअश्वारोहास्तुसादिनः॥ ६०॥

क्षत्ता। सारथिः॥ ५९॥ सव्येष्ठः। दक्षिणस्थः। एताअष्टौसंज्ञाआख्यारथकुटुंबिनः। सारथेरित्यर्थः। प्राजितारौ। "सव्येवामेतिष्ठतिसव्येष्ठः"। सव्येष्ठेनिऋदंतइतिकेचित्। रथिनः। स्यंदनारोहाः। द्वेरथानारुह्ययुध्यतां। अश्वारोहाः। सादिनः। द्वेअश्ववारः। "स्यांर" इतिभरतादयः॥ ६०॥

भटः। योधः। योद्धा। त्रयंयोद्धुः। सेनारक्षाः। सैनिकाः। द्वे सेनारक्षकानांप्रहरिकादीनां। "पाहरेकरी. गस्तकरी" इत्यादिरव्यातानां। सेनां रक्षंतिसैनिकाः। येसेनायांसमवेताः संगतास्तेसेन्याःसैनिकादित्रिवस्युः। द्वे॥६१॥ येसहस्रेणबलिनः सैन्यवंतस्तेसाहस्राः सहस्रिणश्च स्युः। द्वे बलंसैन्यमदस्तियेषांते। सहस्रयोद्धारः संत्येषांनायकानांते। परिधिस्छः। परिचरः। द्वे सेनानियंतुर्यः समंताच्चरतितस्यदंडनायक

भटायोधाश्चयोद्धारःसेनारक्षास्तुसैनिकाः॥ सेनायांसमवेतायेसेन्यास्तेसैनिकाश्च
ते॥ ६१॥ बलिनोयेसहस्रेणसाहस्रास्तेसहस्रिणः॥ परिधिस्छःपरिचरःसेनानीर्वा
हिनीपतिः॥ ६२॥ कंचुकोवारबाणोःस्त्रीयत्तुमध्येसकंचुकाः॥ ७ ७

स्य। "तलावेदारइतिख्यातस्य"। परिधौसेनांतेनिष्ठतिपरिधस्छः। सेनानीः। वाहिनीपतिः। द्वे सेनापतेः। सेनान्यौ॥ ६२॥ कंचुकः। वारबाणः। "बाणवारइत्यपि"। द्वे सैन्याहस्यचोलकादेः। "क्लीबेतुवारबाणं"॥ ७ ७ ७

सकंचुकाः पुरुषामध्येमध्यभागेदार्द्धार्धंकंचुकोपरियद्बंधंतितत्सारसनं। अधिकांगः। द्वे "पंचांगीइतिख्यातस्य। क्वचित्सारसनाधिपांगइतिपाठः। तच्चसारसनंज्ञेयमधिपांगंनिबंधनमितिदुर्गः। अधिपांगंसारसनमितिकात्यश्च" शीर्षकं॥ ६३॥ शीर्षण्यं। शिरस्त्रं। त्रीणि टोपइतिख्यातस्य। "शीर्षेकंमुखमस्माच्छीर्षकं"। तनुत्रं। वर्म। देशनं। उरच्छदः। कंकटकः। जगरः "जागरइत्यपि" कवचः। सप्तकं

बध्नंतित्सारसनमाधेकांग॥ऽथशीर्षकं॥ ६३॥ शीर्षण्यंचशिरस्त्रेथतनुत्रंवर्मदंशनं॥
उरच्छदःकंकटकोजगरःकवचोऽस्त्रियां॥ ६४॥ आमुक्तःप्रतिमुक्तश्चपिनद्धश्चापिनद्धवत्॥
सन्नद्धोवर्मितःसज्जोदंशितोव्यूढकंकटः॥ ६५॥ त्रिषामुक्तादयोवर्मभृतांकावचिकंगणे॥

कवचस्य। "क्लीबेतुकवचं"॥ ६४॥ आमुक्तः। प्रतिमुक्तः। पिनद्धः। अपिनद्धः। चत्वारिपरिहितकंचुकादेः। आमुच्यतेबध्यतेस्मआमुक्तः। सन्नद्धः। वर्मितः। सज्जः। दंशितः। व्यूढकंकटः। पंचकवचभृतः। सन्नह्यतिस्मसन्नद्धः॥ ६५॥ आमुक्तादयस्त्रिषुयथा। आमुक्ताशादी। आमुक्तःकंचुकः। आमुक्तंवस्त्रं। एवंसन्नद्धासज्जेत्यादि। वर्मभृतांकवचिनांगणेकावचिकगणेइति॥ ७ ७

पदातिः। "पदातः। पादातिः। पादातः। पदातिपत्तिपादातपादातिकपदाजयाभित्यरमाला" पत्तिः। पदगः। पादातिकः। "पादादिगः। स्वार्थे कन्। पादातिकइत्यपिपाठः। पादाभ्यांअवतिअवरक्षणादौ"। पदाजिः॥ ६६॥ पद्धः। पदिकः। सप्तपदानेः। पादाभ्यांअतातिगच्छतितनुवाहनेन सपदातिः। पादस्यपदाज्यानीतिपदादेशः। पत्तिसंहतिः पदातिसमूहः। पादातमित्येकं। दारुजीवः। कांडपृष्ठः। कांडस्पृष्ठइतिराजमुकुटः।

पदातिपत्तिपदगपादातिकपदाजयः॥ ६६॥ पद्धश्चपदिकश्चाथपादातंपत्तिसंहतिः॥
दारुजीवेकांडपृष्ठौआयुधीयायुधिकाःसमाः॥६७॥कृतहस्तसुप्रयोगविशिखवःकृतपुंखवत्॥
अपराद्धृष्टधल्कोलक्ष्याद्यश्चुतसायकाः॥६८॥धन्वीधनुष्मान्धानुष्कोनिषंग्यस्त्रीधनुर्धरः॥

तत्रस्पृष्टंगृहीतंकांडंदारुस्पर्शेन। वाहिताग्न्यादिषु।तेपरानिपातः"। आयुधीयः। आयुधिकः। चत्वारिआयुधजीविनः॥ ६७॥ कृतहस्तः। सुप्रयोगविशिखवः। कृतपुंखः। त्रीणिद्वारानिक्षेपनिष्णातस्य। "कृतोभ्यस्तोहस्तीयस्यकृतहस्तः"। लक्ष्याद्धेधान्च्युतः सायको यस्यसोऽपराद्धृष्टधल्कःस्यात्। एकं॥ ६८॥ धन्वी। धनुष्मान्। धानुष्कः। निषंगी। अस्त्री। धनुर्धरः। षट्धनुर्धरस्य। धनुष्मतो॥ ७

कांडवान्। कांडीरः। द्वेशरधारिणः। अयंकेवलकांडवत्वादुपाधिभेदाद्धानुर्धरतोभिन्नः। शाक्तीकः। शक्तिर्हेतिकः। "द्वेशक्त्यायुधधारकस्य"। शक्तिः ग्रहरणमस्यशाक्तीकः। शक्तियष्ट्योरीकक्॥ ६९॥ यष्टिर्हेतिकोयाष्टीकः। एकं। "दांडेयाला इतिख्यातस्य"। पार्श्वधः परशुः सःहेतिर्यस्यसः पारश्वधिकः स्यात्। एकं। "फरशीकरी. गडासेकरी इतिख्यातस्य"। यष्टिस्वधितिहेतिकाविल्यपिपाठः। अ

स्यात्कांडवांस्तुकांडीरः शाक्तीकः शक्तिहेतिकः॥ ६९॥ याष्टीकपारश्वधिकौयष्टिपार्श्व
धहेतिकौ॥ नैस्त्रिंशिकोऽसिहेतिः स्यात्समौग्रासिककौंतिकौ॥ ७०॥ ७ ७

सिः खड्गहेतिः नास्त्रमस्यसनैस्त्रिंशिकः। एकं। "निमचेकरी इतिख्यातस्य"। ग्रासिकः। "एकंग्रासायुधहेतिकस्य। बल्लमकरी. बिटेकरी. सांगकरी इतिख्यातस्य" कौंतिकः। कुंतहेतिकस्य। "भालेकरी इतिख्यातस्येकं"। कुंतोभल्लः॥ ७०॥ ७ ७

७ ७ ७ ७ ७ ७

र्मी। फलकपाणिः। द्वे चर्मधारिणः। "लदाईतिख्यातस्य"। फलतिविदीर्यतेफलकश्चर्मपाणेरस्य। पताकी। वैजयंतिकः। द्वे पताकांबिभ्रतः। "निशाणकरीजरीपटकेकरीइतिख्यातस्य"। विजयंत्याचरतिवैजयंतिकः। अनुप्लवः। सहायः। अनुचरः। अभिचरः। चत्वारिअनुचरस्य॥ ७१॥ पुरोगः। अग्रेसरः। "अग्रसरोपि" अग्रधः। अग्रतः सरः। पुरः सरः। पुरोगमः। पुरोगामी। सप्तपुरोगामिनः। प्रतिष्ठ

चर्मीफलकपाणिः स्याद्वैजयंतिकः॥ अनुप्लवः सहायश्चाऽनुचरोऽभिचरः समाः॥ ७१॥
पुरोगाग्रेसरःपथ्याः अग्रतःसरःपुरःसराः॥ पुरोगमःपुरोगामीमंदगामीतुमंथरः॥ ७२॥ जंघालौ
तिजवैस्तुल्यौजंघाकरिकजांघिकौ॥ ४ ४ ४

तेष्टधः। मंदगामी। मंथरः। द्वे "शनैर्गामिनः"॥ ७२॥ जंघालः। "जांघिलः। प्रज्ञालप्रज्ञिलोतुल्यौजंघालजंघिलादयइतिवाचस्पतिः" अतिजवः। "अतिबलइत्यपि"। द्वयमतिवेगवतः। जंघाकरिकः। जांघिकः। "जंघासाध्यत्वादुष्ट्राश्वादेस्तज्जंघा"। योजंघाबलेनजीवति तत्रद्वयं॥ ४ ४ ४ ४

तरस्वी । त्वरितः । वेगी । प्रजवी । जवनः । जवः । षट्कं त्वरितमात्रस्य ॥ ७३ ॥ योजेतुंशक्यतेसजय्यः । यथारामेणरावणोजय्यः । रावणंजे
तुंरामः शक्नोत्येवेत्यर्थः । एकं । जेय इत्येकंजेतव्यमात्रे । यथाजेयंमनः । नतुजय्यं । जैत्रः । जेता । द्वेजेतुः । योविद्विषतःशत्रून्प्रतिअ

तरस्वीत्वरितोवेगीप्रजवीजवनोजवः ॥ ७३ ॥ जय्योयंःशक्यतेजेतुंजेयोजेतव्य
मात्रके ॥ जैत्रस्तुजेतायोगच्छत्पलंविद्विषतःप्रति ॥ ७४ ॥ सोभ्यमित्रोभ्यमित्री
यौप्यभ्यमित्रीणइत्यपि ॥ ऊर्जस्वलःस्यादूर्जस्वीयऊर्जातिशयान्वितः ॥ ७५ ॥

लंसामर्थ्येनयोढुंसन्मुखंगच्छतिसअभ्यमित्रः । अभ्यमित्रीयः । अभ्यमित्रीणइतिचस्यात् । त्रीणियऊर्जस्यपराक्रमस्यातिशयेन
युक्तः सऊर्जस्वलः । ऊर्जस्वीइतिचस्यात् । "द्वेऊर्जशब्दोऽदंतःसांतश्च । ऊर्जातिशयान्वितइत्यपिपाठः" ॥ ७५ ॥

उरस्वान्। उरसिलः। द्वे "विशालवक्षसः"। उरस्वंतौ। रथिनः। "रथिरथ्यपि"। रथिकः। रथी। त्रीणिरथस्वामिनः। रथोस्यास्तीतिरथिनोऽयं नः। यः कामंगामीयथेच्छंगच्छतिन-क्लीबः सोनुकामीनः स्यात्। "कामगामीत्यपि" एकं। तथेतिगामिसमुच्चये। योभृशंगामी अत्यर्थंगमनशी लः सोत्यंतीनः। एकं॥ ७६॥ शूरः। वीरः। विक्रांतः। त्रीणिशूरस्य। जेता। जिष्णुः। जित्वरः। त्रीणिजयनशीलस्य। रणेसंयुगेसाधुः सांयुगी

स्यादुरस्वानुरसिलोरथिनौरथिकोरथी॥ कामंगाम्यनुकामीनोह्यत्यंतीनस्तथाभृशं॥ ७६॥
शूरोवीरश्चविक्रांतोजेताजिष्णुश्चजित्वरः॥ सांयुगीनोरणेसाधुः शस्त्राजीवादयस्त्रिषु॥ ७७॥
ध्वजिनीवाहिनीसेनाचतनानीकिनीचमूः॥ वरूथिनीबलंसैन्यंचक्रंचानीकमस्त्रियां॥ ७८॥

नः। एकं। "युद्धकुशलस्य"। शस्त्राजीविकोऽष्टष्ठतियत्रागुक्तदादयः। "सांयुगीनांतात्रः"। त्रिषु। वाच्यलिंगत्वात्॥ ७७॥ ध्वजिनी। वाहि नी। सेना। चतना। अनीकिनी। चमूः। वरूथिनी। बलं। सैन्यं। चक्रं। अनीकं। एकारक्षसेनायाः। "पुंसिअनीकः"॥ ७८॥

बलस्यसैन्यस्यविन्यासोयुद्धार्थेरचनाविशेषेणस्थापनंव्यूहइत्येकं।"विहूइतिरव्यानस्य" युधिदंडादयोभेदाः विशेषाः व्यूहस्येतिशेषः। सैन्यस्यदंडवतिर्यगवस्थानंदंडः। आदिनाभोगमंडलादयः। यदाहकामंदकः। तिर्यग्वृत्तिः स्तुदंडः स्याद्भोगोन्वाहत्तिरेवच। मंडलः सर्वतोवृत्तिःपृथग्वृत्तिरसंहतइति।" तत्रअन्योन्यागनाऽवृतिर्भोगःसर्पशरीरवदवस्थानंमंडलः। गजादीनांविजातीयैरमिश्रितानांस्थान

व्यूहस्तुबलविन्यासोभेदादंडादयोयुधि॥ प्रत्यासारोव्यूहपार्ष्णिःसैन्यदृष्टेःप्रतिग्रहः॥७९॥

मसंहतः। एतेषांचशाकटमस्करपताकासर्वतोभद्रदुर्जयादयोभेदाः प्रत्येकंसंति"। प्रत्यासारः। व्यूहपार्ष्णिः। ह्येव्यूहपश्चाद्भागस्य। प्रत्यासारयतिभग्नान्प्रत्यासारः। "प्रत्यासारइत्यपि"। सैन्यदृष्टेः। प्रतिग्रहः। "परिग्रहः। पनद्गृहइत्यपि"। ह्येसेनायाःपश्चाद्भागस्य। प्रतिदृश्यतेऽवष्टभ्यतेसैन्यमनेनप्रतिग्रहः॥ ७९॥

एकइभोयस्यांसाएकैभा। एकोरथोयस्यांसा। त्रयोऽश्वायस्यांसा। पंचपदातयोयत्रसा। एतैर्दशभिश्चतुष्टयंविद्विष्टासेनामुखंस्यात्। यदुक्तं। एकोरथोगजश्चैकोनराःपंचपदातयः। यत्राश्वतुरगास्तज्ज्ञैःपत्तिरित्यभिधीयतइति। एकं। पत्यंगैःपत्तेरवयवैर्गजादिभिस्त्रिगुणैर्यथोत्तरं क्रमात्सेनामुखादयआख्याःस्युः ॥८०॥ तद्यथा। त्रिसृभिःपत्तिभिःसेनामुखं। त्रिभिःसेनामुखैर्गुल्मः। गुल्मत्रयेणगणः। त्रिभिर्गणैर्वाहिनी त्रिसृभिःवाहिनीभिःपृतना। पृतनात्रयेणचमूः। एतत्रयेणाऽनीकिनी। तत्त्रयेणदशानीकिनी। तत्त्रयेणअक्षौहिणी। तथाच। अक्षौहि

एकैभैकरथाश्वपत्तिःपंचपदातिका ॥ पत्यंगैस्त्रिगुणैःसर्वैःक्रमादाख्यायथोत्तरं ॥ ८० ॥
सेनामुखंगुल्मगणोवाहिनीपृतनाचमूः ॥ अनीकिनीदशानीकिन्यक्षौहिण्यथसंपदि ॥ ८१ ॥

ण्यामित्यधिकैःसप्तत्याह्यष्टभिःशतैः ॥ संयुक्तानिसहस्राणिगजानामेकविंशतिः ॥ २१८७० एवमेवरथानांतुसंख्यानंकीर्तितंबुधैः ॥ २१८७० पंचषष्टिसहस्राणिषट्शतानिदशैवतु ॥ संख्यातास्तुरगास्तज्ज्ञैर्विनारथतुरंगमैः ॥ ६५६१० नृणांशतसहस्राणिसहस्राणितथानव ॥ शतानित्रीणिचान्यानिपंचषाट्चपदातयः ॥ १०९३५० इत्येकैकं। संपतू ॥ ८१ ॥

संपत्तिः। श्रीः। लक्ष्मीः। चत्वारिसंपदः। "संपदेत्यन्यत्र"। विपत्तिः। विपत्। आपत्। त्रीणिआपदः। "आपत्तिः। आपदा। इत्यन्यत्र"। आयुधं। प्रहरणं। शस्त्रं। अस्त्रं। चत्वारि शस्त्रमात्रस्य ॥ ८२ ॥ धनुः। चापः। धन्व। शरासनं। कोदंडं। कार्मुकं। इष्वासः। सप्तधनुषः। तत्रधनुश्चापेक्लीबेपुंसिच। धन्वनांतं। धन्वनि। "धन्वमिति अदंतमपि"। धनूरूदंतोपि। "शराबापो धनुः स्त्रीस्यादिति त्रिकांडशेषात्"। कर्णस्य

संपत्तिःश्रीश्चलक्ष्मीश्चविपत्त्यांविपदापदौ ॥ आयुधंतुप्रहरणंशस्त्रमस्त्रमथास्त्रियो ॥ ८२ ॥
धनुश्चापोधन्वशरासनंकोदंडकार्मुकं ॥ इष्वासोप्यथकर्णस्यकालपृष्ठंशरासनं ॥ ८३ ॥
कपिध्वजस्यगांडीवगांडीवोपुन्नपुंसकौ ॥ कोटिरस्याटनीगोधेतलेज्याघातवारणे ॥ ८४ ॥

धनुःकालपृष्ठंस्यात्। "एकं। कालोयमइवपृष्ठमस्य" गांडीवः। गांडिवः। द्वेअर्जुनस्यधनुषि। "गांडिर्ग्रंथिरस्यास्ति। क्लींबेगांडीवं गांडिवंच"। कोटिः। "कोटी" अटनी। "अटनिः"। द्वेअस्यधनुषःग्रंथे। गोधा। तलं। द्वेज्यायौर्वीतस्य। आघातस्ताडनंतद्वारणे चर्मादिकृतबाहुबंधविशेषे। "गोधेतलेइतिव्यक्तेद्व्याद्वित्वं" ॥ ८४ ॥ ७ ७ ७

धनुषोमध्यंलस्तकइत्येकं। मौर्वी। ज्या। शिंजिनी। गुणः। चत्वारिधनुर्गुणस्य। "चिल्लाइतिख्यातस्य। शिंजिनीशब्दस्तालव्यादिः" मूर्वा रव्यस्यतृणस्यविकारोमौर्वी। प्रत्यालीढं। आलीढं। इत्यादयःपंचधनुर्धराणांस्थितिभेदाइत्यर्थः। एकैकं। आदिनासमपदंवैशाखंमंडलंच तत्रवामजंघाप्रसारपूर्वकदक्षिणजंघासंकोचेप्रत्यालीढं। दक्षिणजंघाप्रसारपूर्वकवामजंघासंकोचेआलीढं। पादयोःसमत्वेनस्थितिसम

लस्तकस्तुधनुर्मध्यंमौर्वीज्याशिंजिनीगुणः॥ स्यात्प्रत्यालीढमालीढमित्यादिस्थानपंचकं॥८५॥
लक्षंलक्ष्यंशरव्यंचशराभ्यासउपासनं॥ पृषत्कबाणविशिखाअजिह्मगखगाशुगाः॥८६॥

पदं। वितस्त्यंतरेणस्थितेपादद्वयेवैशाखं। मंडलाकारेणपादद्वयधारणंमंडलकं॥८५॥ लक्षं। लक्ष्यं। शरव्यं। त्रीणिवेधस्य। "निशाणदूतिरख्यातस्य"। शराभ्यासः। उपासनं। द्वेशरक्षेपाभ्यासस्य। "शरस्यशरमोक्षस्याभ्यासःशराभ्यासः"। पृषत्कः। बाणः। विशिखः। अजिह्मगः। खगः। आशुगः॥८६॥

कलंबः। मार्गणः। शरः। "सरः। चित्रपुंखः सरः शर इतित्रिकांडशेषात्"। पत्री। रोपः। इषुः। द्वादशबाणस्य। तत्रेषुः स्त्रीपुंसयोः। प्रक्षेदनइत्यपि"। नाराचः। ह्येलोहमयस्यबाणस्य। "नरानाचामतिनाराचः। अन्येभ्योपीतिडः। प्रज्ञाद्यण्"। पक्षः। वाजः। ह्येकंकादिपक्षस्य। उन्नरेनिरस्त्रादिलिसाकांतास्त्रिषु ॥ ८७ ॥ प्रहितेक्षिप्तेबाणेनिरस्तइत्येकं। विषाक्तः। दिग्धः। लिप्तकः। क्षीणविषाक्तेबाणे। तूणः। उपासंगः। तूणी

कलंबमार्गणशरःपत्रीरोपइषुर्द्वयोः ॥ प्रक्षेडनास्तुनाराचःपक्षोवाजास्त्रिषूत्तरे ॥ ८७ ॥
निरस्तप्रहितेबाणेविषाक्तेदिग्धलिप्तकौ ॥ तूणोपासंगतूणीरनिषंगाइषुधिर्द्वयोः ॥ ८८ ॥
तूण्यांरवड्गेतुनिस्त्रिंशश्चंद्रहासासिरिष्टयः ॥ कौक्षेयकेखंडलाग्रःकरवालःकृपाणवत् ॥ ८९ ॥

रः। निषंगः। इषुधिः ॥ ८८ ॥ तूणी। षट्कमिषुधेः। इषवोधीयंतेयस्यांभस्त्रायांसाइषुधिः स्त्रीपुंसयोः। तूणीस्त्री। "तूणेषुधीउपासंगइति रत्नकोशे"। खड्गः। निस्त्रिंशः। चंद्रहासः। असिः। रिष्टिः। "ऋष्टिरित्यपि। ऋष्टिः खड्गस्तरवारितित्रिकांडशेषः" कौक्षेयकः। खंडलाग्रः। करवालः। "करपाल इत्यपि"। कृपाणः। तरवारइतिख्यातस्य। खंडुथतिपरंखड्गः" ॥ ८९ ॥ ७ ७

स्य, स्यमुष्टौतसरुरित्येकं। "थरूं। मूठइतिरव्यातस्य" तकारादिकंपुंसि। आदिना। "कटार. खेजीरइत्यादिनामक"। क्षुरिकादिग्रहः। तस्यखड्गस्यमुष्टेः चर्मवर्धिकयानिबंधनंमेखलास्यात्। "एकं। डालीइतिरव्यातस्य"। यत्तुहरस्ताहस्तात्ननिर्यातिखड्गः। फलकः। फलं चर्म। त्रीणिढालइतिरव्यातस्यचर्मणः। "क्लीबेफलकं"। अस्यफलकस्ययोमुष्टिग्रहणस्थानंससंग्राहः। एकं। "मूठइतिरव्यातस्य"॥९०॥

तसरुःखड्गादिमुष्टौस्यान्मेखलातन्निबंधनं॥ फलकोऽस्त्रीफलंचर्मसंग्रा
होमुष्टिरस्ययः॥९०॥ घणोमुद्गरघनौस्यादीलीकरवालिका॥ ७

द्रुघणः। "द्रुघनइत्यपि"। मुद्गरः। घनः। त्रयंमुद्गरस्य। "मुद्गलइतिरव्यातस्य"। ईली "इली। ईलिः"। करवालिका। "करपालिकेत्यपि" ह्रस्वखड्गेक्षुतेरेकधारस्यशस्त्रस्य। "खांडाइतिरव्यातस्य। खुर्सीइतिकेचित्"। भिंदिपालः। मृगः। द्वेअस्त्रप्रक्षेपसाधनस्य। रज्जुमय स्ययंत्रविशेषस्य। गोफीणइतिरव्यातस्य॥ ४ ७ ६

भिंदिर्द्वौदशतालंतुदशकुंतोभिधीयतइति। तदाच्छिन्नःकालोपिभिंदिःतंपालयतीतिभिंदिपालः"। परिघः। परिघातिनः। द्वेलोहबद्धदृढ़स्त्रमाणेलगुडस्य॥९१॥कुठारः। स्वधितिः। परशुः। परश्वधः। "परश्वंदधाति। परश्वधइत्यपि"। चत्वारिकुठारस्य। "कुठाडइतिख्यातस्य"तत्र कुठारःस्त्रीपुंसयोः। "तत्रस्त्रियांकुठारी। कुठारकःपर्शुरथस्कुरिकाकीदारणाधिकेतिरभसः"। स्वधितिर्पुंसि। शस्त्री। असिपुत्री। छुरिका।

भिंदिपालःसृगस्तुल्यौपरिघःपरिघातिनः॥९१॥द्वयोःकुठारःस्वधितिःपरशुश्चपरश्वधः॥
स्याच्छस्त्रीचासिपुत्रीचछुरिकाचासिधेनुका॥९२॥वापुंसिशाल्यंशंकुर्नासर्वलातोमरोःस्त्रियां॥

असिधेनुका। चत्वारिछुरिकायाः "मुरीइतिख्यातायाः"॥९२॥शाल्यं। शंकुः। द्वेबाणाग्रस्यआयुधविशेषस्य। "फलइतिख्यातस्य। शालतिशल्यं। शालगतौ"। यच्छाश्वनः। संख्याकीलकयोः शंकुः शंकुप्रहरणंनरातिः। नापुमान्। सर्वला। "शार्वला। शार्दूलशार्वलादालाटुरितिशाभेदात्"। तोमरः। "द्वेयुरगूजइतित्रसिद्वस्यमंथदंडाकारशस्त्रभेदस्य। तोर्गतान्त्रियतेःनेनतोमरः। शाल्यादिचतुष्कमपितोमरस्येत्येके। तत्रसर्वलास्त्री॥

प्रासः। कुंतः। "दूभालाइतिख्यातस्य"। कोणः। पालिः "पाली" अश्रिः। "अश्री"। कोटिः। "कोटी"। चत्वारिखड्गादिधांतभागस्य। "टोंक इतिख्यातस्य। तत्रपाल्यादयः स्त्रियां"॥९३॥ सर्वाभिचारः। सर्वोधः। सर्वसन्नहनं। त्रीणिचतुरंगसैन्यसन्नहनस्य"। जमावइतिख्यातस्य। सर्वसन्नहनमर्थोयस्य"। सर्वेषामभिसरणंसर्वाभिसारः। अस्त्रभृतांराज्ञांमहानवम्यांदशम्यांवानीराजना। सभयेदास्त्र॥ दिसमर्पणलक्षण

कां० २

प्रासस्तुकुंतःकोणस्तुस्त्रियःपाल्यश्रिकोटयः॥ ९३॥ सर्वाभिसारःसर्वोधःसर्व
सन्नहनार्थकः॥ लोहाभिसारोऽस्त्रभृतांराज्ञांनीराजनाविधिः॥ ९४॥ ७

योविधिःसलोहाभिसारइत्युच्यते। एकं। लोहंशास्त्रंअभिसार्यतेप्रस्थाप्यतेऽत्रलोहाभिसारः। "लोहाभिहारोपि। लोहस्यशास्त्रस्याभिनो हरणं। लोहाभिहारइत्युक्तोविधिर्नीराजनोत्तरइत्यमरमाला। नीराजनोविधिरितिपाठेनिःशेषेणराजनमत्रेतिबहुव्रीहिर्बोध्यः"॥९४॥

११२

अरौशत्रुसनीपेयत्सेनयासहाभिगमनंतरभिषेणनंस्यात्। एकं। यात्रा। व्रज्या। अभिनिर्याणं। प्रस्थानं। गमनं। गमः। षट्कंप्रयाणस्य॥ ९५॥आसारः। प्रसरणं। "प्रसरणीत्यपिपाठः। प्रसरणिरित्यपि" ह्येसैन्यस्यसर्वतोव्याप्तेः। प्रचक्रं। चलितं। ह्येप्रस्थितसैन्यस्य। प्रचक्रंचलितंत्रिषित्यमरमाला। रणेअहितान्प्रतिभयरा[illegible]स्यद्रस्ययद्[illegible]भिक्रमइत्येकं। "अतिक्रमइत्यपि"॥ ९६॥

यत्सेनयाभिगमनंमरौतदभिषेणनं॥ यात्राव्रज्याऽभिनिर्याणंप्रस्थानंगमनंगमः॥ ९५॥
स्यादासारःप्रसरणंप्रचक्रंचलितार्थकं॥अहितान्प्रत्यभीतस्यरणेयानमभिक्रमः॥ ९६॥
वैतालिकाबोधकराश्चाक्रिकाघांटिकाऽर्थकाः॥ छ छ छ

वैतालिकाः। बोधकराः। ह्येयेनृपान्स्तुतिपाठेनप्रातर्बोधयंतितेषु। "विविधेनतालेनशब्देनचरंतितेवैतालिकाः।"। चाक्रिकाः। घांटिकाः। ह्येवंविधेषु। घंटाघातेनयेजीवंतितेघांटिकाः। यदाहुः। प्रबोधसमये। घंटादीत्यास्तुघांटिकाइति। "चाक्रिकाघटिकार्थकाइति क्वचित्पाठः। तत्रचक्रमस्तिवाद्यत्वेनयस्य। ठन्। घटीकायंति। कैराद्ये। ह्येघटिकावादकस्य"॥ छ छ

मागधाः। मगधाः। "मधुकाइतिमुकुटः। मधुमधुरंकायंतिइतिविग्रहः"। ह्येराजायतोवंद्याक्रमस्यस्तावकानां। यदाहुः। मागधाः सूतवं
राजाइति। बंदिनः। स्तुतिपाठकाः। ह्येराजादिस्तुतिपाठकेषु। "भाटइतिख्यातेषु। वंदतेस्तुवंतेतच्छीलावंदिनः। "यदुक्तं। वंदिनस्त्वम
लप्रज्ञाः प्रस्तावसदृशोक्तयइति"। चत्वारएकार्थाइत्येके ॥ ९७ ॥ मयाच्छपथाद्येसंग्रामादनिवर्तिनोऽपराङ्मुखास्तेसंग्रामकाः

स्युर्मागधास्तुमगधाबंदिनस्तुतिपाठकाः ॥ ९७ ॥ संग्रामकास्तुसमयात्संग्रा
मादनिवर्तिनः ॥ रेणुर्द्वयोःस्त्रियांधूलिःपांसौनद्वयोरजः ॥ ९८ ॥ ७ ७

स्युरेकं। रेणुः। धूलिः। "धूली"। पांसुः। "पांशुः"। रजः। चत्वारिधूल्याः। "धूळइतिख्यातायाः। रेणुःस्त्रियांद्वयोः"। पांसुःपुंसि।
रजःक्लीबे ॥ ९८ ॥ ७ ७ ७ ७

चूर्णे । क्षोदः । द्वे पिष्टस्यरजसः । "षडपिरजसइत्येके । चूर्णःपुल्लिंगोपि । चूर्णोधूलीक्षारभेदेचूर्णानिवासयुक्तिक्षितिमेदिनी । चूर्णानिवास योगाःस्युश्चूर्णोधूलिःसशर्करइतिशाश्वतश्च" । समुत्पिंजः । पिंजलः । द्वे अत्यंतमाकुलेसैन्यादौ । पताका । वैजयंती । केतनं । ध्वजं । च त्वारिपताकायाःकेतनादिद्वयंपताकादंडस्येत्येके । "पुंसिध्वजः" ॥ ९९ ॥ यायुद्धभूमिःखंडितैर्गजादिभिरतिभयदासावीरांसं

चूर्णेक्षोदःसमुत्पिंजपिंजलौभृशमाकुले ॥ पताकावैजयंतीस्यात्केतनंध्वजमस्त्रियां ॥९९॥
सावीरांसनंयुद्धभूमिर्यातिभयप्रदा ॥ अहंपूर्वमहंपूर्वमित्यहंपूर्विकास्त्रियां ॥ १००॥

नंस्यात् । "एकं । वीराआंसोस्यंतेऽत्रवीरांसनं । आडुःआसिद्व्छायां" । अहंपूर्वमहंपूर्वं । अहमग्रेभवामीत्याग्रहपुरःसरं पूर्वेयुद्धं अहंपूर्विकास्यात् । एकं । स्त्रियां ॥ १०० ॥

दर्पादात्मविषयेयासंभावनासानर्थ्यविष्करणंसाआहोपुरुषिकेत्युच्यते। अहंपुरुषइत्यहंकारवानहोपुरुषस्तद्भावआहोपुरुषिका। एकं। यःपरस्परमहंशब्दोहंशब्दइत्यहंकारः साअहमहमिकास्यात्। एकंषडक्षरं ॥ १०१ ॥ द्रविणं। तरः। सहः। बलं। शौर्यं। स्थाम। शुष्मं। शक्तिः। पराक्रमः। प्राणः। दशपराक्रमस्य। तरसी। सहसी। स्थामनी। शुष्मवंतं। "सहइत्यदंतोपि। सहास्त्रियांबलेनस्त्री

अहोपुरुषिकादर्पाद्यास्यात्संभावनात्मनि ॥ अहमहमिकातुसास्यात्परस्परंयोभवत्यहंकारः ॥ १०१ ॥
द्रविणंतरःसहोबलशौर्याणिस्थामशुष्मंच ॥ शक्तिःपराक्रमःप्राणोविक्रमस्त्वतिशक्तिता ॥ १०२ ॥
वीरपानंतुयत्पानंहत्तेभाविनिवारणे ॥ युद्धमायोधनंजन्यंप्रधनंप्रविदारणं ॥ १०३ ॥ छ

तिरभसः। सहोबलेनास्त्रियांस्याद्धेतिमेदिनीच"। विक्रमः। अतिशक्तिता। द्वेअतिपराक्रमस्य ॥ १०२ ॥ रणेहत्तेसतितच्छुभ्रार्थं अथवाभाविनिभविष्यतिरणेनदुत्साहदध्यर्थंयद्वीराणांमद्यपानंतद्वीरपानंस्यात्। "वीरपाणमित्यपि। वाभावकरणयोरितिणत्वं"। युद्धं। अयोधनं। जन्यं। प्रधनं। प्रविदारणं ॥ १०३ ॥ छ छ छ

मृधं। आस्कंदनं। संख्यं। समीकं। सांपरायिकं। "संपरायिकं। कन्"। समरः। अनीकः। रणः। कलहः। विग्रहः॥१०४॥ संग्रहारः। अभिसंपातः। कलिः। संस्फोटः। "संस्फेटः" संयुगः। अभ्यामर्दः। "अभिमर्दइत्यपि"। अभिमर्दस्तुपुंसिस्याद्वर्मसंघर्षयोरपि मेदिनी"। समाघातः। संग्रामः। अभ्यागमः। आहवः॥१०५॥ समुदायः। संयत्। समितिः। आजिः। समित्। युत्। एकत्रिंशद्युद्धस्य। संख्यं

मृधमास्कंदनंसंख्यंसमीकंसांपरायिकं॥ आस्त्रियांसमरानीकरणाःकलहविग्रहौ॥१०४॥
संग्रहाराभिसंपातकलिसंस्फेटसंयुगाः॥अभ्यामर्दस्तुसंघातसंग्रामाभ्यागमाहवाः॥१०५॥
समुदायःस्त्रियःसंयत्समित्याजिसमिद्युधः॥ नियुद्धंबाहुयुद्धेथतुमुलंरणसंकुले॥१०६॥
क्ष्वेडातुसिंहनादस्यात्करिणांघटनाघटा॥ ७ ७ ७

द्यनुसारं। समरादित्रयं आस्त्रियां। संयतौ। यमितौ। युधौ। नियुद्धं। बाहुयुद्धं। द्वेबाहुयुद्धस्य। तुमुलंइत्येकंरणस्यसंकुलेपरस्परसंबाधेवर्तने॥१०६॥ क्ष्वेडा। सिंहनादः। द्वेवीराणांसिंहनादतुल्यनादविशेषस्य। क्ष्वेडाडाबंता। करिणांघटनायुद्धेसंघट्टसंघटास्यात्॥ ७

योधानांसंराबःआक्रोशपूर्वकःशब्दःक्रंदनंस्यात्। एकं। करिणांगर्जितंवृंहितंस्यात्। एकं ॥१०७॥ धनुषःशब्दोविस्फारः। एकं। पटहः। आडंबरः। द्वेसंग्रामध्वनेः। प्रसभं। बलात्कारः। हठः। त्रीणिबलात्कारस्य। "प्रमतासभाविचारोःस्मात्प्रसभं। बलात्करणंबलात्कारः"। स्खलितं। छलं। द्वेयुद्धमर्यादायाश्चलनस्य ॥१०८॥ अजन्यं। उत्पातः। उपसर्गः। त्रयमुत्पातस्य। "शुभाशुभसूचकस्य। नजनेसाधु

क्रंदनंयोधसंराबावृंहितंकरिगर्जितं ॥१०७॥ विस्फारोधनुषःस्वानःपटहाडंबरौसमौ ॥ प्रसभंतुबलात्कारो हठोःथस्खलितंछलं ॥१०८॥ अजन्यंक्लीबमुत्पातउपसर्गःसमंत्रयं ॥ मूर्छातुकश्मलंमोहोःप्यवमर्दस्तुपीडनं ॥१०९॥ अभ्यवस्कंदनंत्वभ्यासादनंविजयोजयः ॥ वैरशुद्धिःप्रतीकारोवैरनिर्यातनंचसा ॥११०॥ छ

अजन्यं"। मूर्छा। कश्मलं। मोहः। त्रीणिमूर्छायाः। अवमर्दः। पीडनं। द्वेसस्यादिसंपन्नस्यदेशस्ययत्परश्चक्रेणपीडनंतत्र ॥१०९॥ अभ्यवस्कंदनं। अभ्यासादनं। द्वेछलदाक्रमणस्य। धाडइतिख्यातस्य। विजयः। जयः। द्वेशत्रुपराङ्मुखीकरणेनलब्धस्योत्कर्षस्य। वैरशुद्धिः। प्रतीकारः। वैरनिर्यातनं। त्रीणिवैरप्रतीकारस्य ॥११०॥ छ छ छ

प्रद्रावः। उद्रावः। संद्रावः। संदावः। विद्रवः। द्रवः। अपक्रमः। अपयानं। अष्टौपलायनस्य। यः रणेभंगःसपराजयइत्येकं॥१११॥ पराजितः। पराभूतः। द्वौनिर्जितस्य। नष्टः। तिरोहितः। द्वौनिलीनस्य। विधिनिकाकाक्षिवदुभयत्रयुज्यते। प्रमापणादिचथांतानिचिंशान्नामानि वधस्य॥ "तानि। प्रमापणं। प्रमापनंवा। निबर्हणं। निबर्हणंवा। निकारणं। विशारणं। निशारणंवा॥११२॥ प्रवासनं। परासनं।

प्रद्रावोद्रावसंद्रावसंदावाविद्रवोद्रवः॥अपक्रमोपयानंस्याद्रणेभंगःपराजयः॥१११॥
पराजितपराभूतौत्रिनष्टातिरोहितौ॥प्रमापणंनिबर्हणंनिकारणंविशारणं॥११२॥
प्रवासनंपरासनंनिषूदनंनिहिंसनं॥निर्वासनंसंज्ञपनंनिर्ग्रंथनमपासनं॥११३॥
निस्तर्हणंनिहननंक्षणनंपरिवर्जनं॥निर्वापणंविश्रासनंमारणंप्रतिघातनं॥११४॥

निषूदनं। निस्तूदनमितिवा। निहिंसनं। निर्वासनं। संज्ञपनं। निर्ग्रंथनं। निर्गंधनंवा। अपासनं॥११३॥ निस्तर्हणं। निहननं। क्षणनं। परिवर्जनं। निर्वापणं। विश्रासनं। मारणं। प्रतिघातनं"॥११४॥

उद्ग्रासनं । प्रमथनं । क्रथनं । उज्जासनं । आलंभः । पिंजः । विदारः । घातः । उन्माथः । "उन्मथोवा" । वधः । इति ॥ ११५ ॥ पंचता । "पंचत्वं" कालधर्मः । दिष्टांतः । प्रलयः । अत्ययः । अंतः । नाशः । मृत्युः । मरणं । निधनः । द्वयोर्मरणस्य । तत्र मृत्युर्द्वयोः । निधनमस्त्रियां ॥ ११६ ॥ परासुः । प्राप्तपंचत्वः । परेतः । प्रेतः । संस्थितः । मृतः । प्रमीतः । सप्तमृतस्य । एतेषाम्व्यलिंगाः । चिता । चित्या । चितिः । त्रयंप्रेतदाहा

उद्ग्रासनप्रमथनक्रथनोज्जासनानिच ॥ आलंभपिंजविदारघातोन्माथवधाअपि ॥ ११५ ॥
स्यात्पंचतांकालधर्मोदिष्टांतःप्रलयोऽत्ययः ॥ अंतोनाशोद्वयोर्मृत्युर्मरणंनिधनोऽस्त्रियां ॥ ११६ ॥
परासुप्राप्तपंचत्वपरेतप्रेतसंस्थिताः ॥ मृतप्रमीतोऽस्त्रियेतेचिताचित्याचितिःस्त्रियां ॥ ११७ ॥
कंबधोस्त्रीक्रियायुक्तमपमूर्धकलेवरं ॥ ७ ७ ७

धारचुल्लेः "सरणइतिख्यातस्य" ॥ ११७ ॥ अपमूर्धमस्तकहीनंनर्तकक्रियायुक्तंत्कलेवरं । "धडइतिख्यातं" सकबंधस्यात् । एकं । युद्धेसहस्रपूरणः कबंधोनृत्यति । उपचारान्नर्तनरहितेपिप्रयोगः ॥ ७ ७ ७

श्मशानं। पितृवनं। द्वे प्रेतभूमेः। "मसणवटी इतिख्यातायाः"। शावः शेतेस्मिन् श्मशानं। "हृताळव्यं। कुणपः। शवं। द्वे निर्जीवशरीरस्य। "पुंसितु शावः" ॥११८॥ ग्रग्रहः। उपग्रहः। बंदी। "बंदिरित्यपि" त्रीणि "चोरादेराकर्षणस्य। बंदी। अटकावइतिख्यातस्य"। बंधनगेहेकारेत्येकं। स्त्रियां। असवः। प्राणाः। द्वे प्राणानां। भूम्निबहुत्वे। एवंशब्दात्प्राणाअपिनित्यंपुंसिभूम्निच। प्राणोनामवायुरित्येके। तनुवायुमात्र

श्मशानंस्यात्पितृवनंकुणपः शावमस्त्रियां ॥११८॥ ग्रग्रहोपग्रहौबंद्यांकारास्याद्बंधनालये ॥पुंसिभूम्न्यसवःप्राणाश्चैवंजीवोसुधारणं ॥११९॥ आयुर्जीवितकालोनाजीवातुर्जीवभेषधं॥ ॥इतिक्षत्रियवर्गः॥ ॥ऊरव्याऊरुजाअर्यावैश्याभूमिस्पृशोविशः ॥आजीवोजीविकावार्तावृत्तिर्वर्तनजीवने ॥ १ ॥

विवक्षयाजीवः। असुधारणं। द्वे प्राणधारणस्य। जीवितावच्छिन्नःकालआयुःस्यात्। एकं। उसंतंकुंवे। जीवितस्यौषधंरक्षणोपायोजीवातुःस्यात्। नापुमान्। एकं॥ ॥ इतिक्षत्रियवर्गः॥ ॥ ऊरव्यः। ऊरुजः। अर्यः। वैश्यः। भूमिस्पृक्। विट्। द्वे वैश्यस्य। आजीवः। जीविका। वार्ता। वृत्तिः। वर्तनं। जीवनं। षट् जीविकामात्रस्य ॥ १ ॥

कृषिः कर्षणं। पशुपालस्यकर्मपाशुपाल्यं। गोरक्षणादि। वणिजांकर्मवाणिज्यं। क्रयविक्रयादि। "वणिज्यं। वणिजेत्यपि"। एवंत्रयोवृत्तयोवैश्या नांजीविकाभेदाइत्यर्थः। अथमृतामृताभ्यांजीवेतमृतेनप्रमृतेनवा। सत्यानृताभ्यामपिवानश्ववृत्त्याकथंचनेत्यादिस्मृत्युक्तान्नृतिभेदान्नु त्पादयति॥ ॥ सेवापरचित्तानुवर्तनंसाश्ववृत्तिः। "शुनोवृत्तिरिवशुनश्ववृत्तिर्वा। शुनोवृत्तिःस्मृतासेवागर्हितंतद्विजन्मनां। हिंसा दोषप्रधानत्वादनृतंकृषिरुच्यतेइत्युक्तं"। श्ववृत्तिर्नीचसेवनमितिश्रीभागवते। एकं। कृषिः कर्षणंतदृतंस्यात्। अनृतंकर्षणस्मृतमि

स्त्रियांकृषिःपाशुपाल्यं वाणिज्यंचेतिवृत्तयः॥ सेवाश्ववृत्तिरनृतंकृषिरुंछशिलंत्वृतं॥ २॥

तिस्मृतेः। "अनृतमितिक्वचित्पाठः। अनृतंकर्षणंस्मृतमितिमनूक्तेः"। एकं। उंछश्चशिलंचउंछशिलंसमाहारद्वंद्वः। आपणादौपति तकणानामेकशोग्रहणमुंछः। क्षेत्रादौस्वामित्यक्तकणिशानांग्रहणंशिलं। एतदुभयंऋतमित्युच्यते। "उंछः कणशाआदानंकणिशाद्यर्जनं शिलमितियादवः। पुमानुंछःशिलंत्वृतमितिबोपालितः"। एकं॥ २॥

माचितेप्रत्यर्हंतंदुलादियाञ्चायांमृतमित्येकं। मृतंतुनित्ययाञ्च्यास्यादित्युक्तेः। अयाचितेअजगरवर्तनवद्याञ्च्यांविनैवलब्धेअमृतमित्येकं। वणिग्भावोवाणिज्यंक्रयविक्रयादितत्सत्यानृतंस्यात्। एकं। किंचित्सत्यंकिंचिदसत्यंसत्यानृतं। ऋणं। पर्युदंचनं ॥ ३ ॥ उद्धारः। त्रयमृणस्य। "उद्धारश्चोद्धृतादृणइतिविश्वः।" अर्थप्रयोगः। कुसीदं। "कुसीदं। कुषीदंचेत्यपि"। वृद्धिजीविका। त्रीणिऋणसंबंधिका

द्वेयाचितायाचितयोर्यथासंख्यंमृतामृते ॥ सत्यानृतंवणिग्भावःस्यादृणंपर्युदंचनं ॥ ३ ॥
उद्धारोऽर्थत्रयोगस्तुकुसीदंवृद्धिजीविका ॥ याञ्च्ययासंयाचितकंनिमयादापमित्यकं ॥ ४ ॥
उत्तमर्णोऽधमर्णौहौत्रयोक्तृग्राहकौक्रमात् ॥ ७ ७ ७

लांतरद्रव्येण। "लोकेव्याजइतिख्यातेन"। जीविकायां। याञ्च्ययायदासंतद्याचितकं। "एकं। जायांआणलेला. जायजाणाजिन्नसइतिख्यातस्य" निमयासरिवर्तादासंआपमित्येकं। "अपमित्यआप्तं। अपमित्ययाचिताभ्यांकङ्कनौ। परिवर्तोविनिमयइतिमेदिनी"। निमयः परिवर्तः स्यादितिमनुः ॥ ४ ॥ त्रयोक्तारुणस्यदाताउत्तमर्णइत्येकं। "उत्तमंऋणमस्य"। ऋणस्यग्राहकोऽधमर्णइत्येकं ॥ ७

कुसीदिकः। वार्धुषिकः। वृध्याजीवः। वार्धुषिः। चत्वारिऋणंदत्वातद्वृध्याजीविनःपुरुषस्य।"कुसीदार्थंप्रयच्छतिकुसीदिकः। वृद्धिग्रहीप्रयच्छतिवार्धुषिकः"॥ ५॥ क्षेत्राजीवः। कर्षकः"कार्षकोवा" कृषिकः। कृषीवलः। चत्वारिकृषीवलस्य। कृषिरस्यास्तीतिकृषीवलः। बलेइतिदीर्घः। व्रीह्युद्भवोचितंव्रीहीणामुद्भवेयोग्यंक्षेत्रंव्रैहेयं। एकं। शाल्युद्भवोचितंक्षेत्रंशालेयं। एकं॥ ६॥ यवादीनांभवनंउद्भवोचितंयक्षेत्रंतद्यव्यादि

कुसीदिकोवार्द्धुषिकोवृद्ध्याजीवश्चवार्धुषिः॥ ५॥ क्षेत्राजीवःकर्षकश्चकृषिकश्चकृषीवलः ॥
क्षेत्रंव्रैहेयशालेयंव्रीहिशाल्युद्भवोचितं ॥ ६ ॥ यव्यंयवक्यंषष्टिक्यंयवादिभवनंहियत् ॥
तिल्यंतैलीनवन्माषोमाण्युभंगाद्विरूपता ॥ ७ ॥

यथा। यवानांभवनंक्षेत्रंयव्यं। यवकाअल्पयवास्तेषांभवनंक्षेत्रंयवक्यं। "यवकःशूकधान्योयवः"। षष्टिकाःषष्टिरात्रेणपच्यंतेतेषांभवनंक्षेत्रं षष्टिक्यं। एकेकं। तिल्यंतैलीनवन्माषादेःक्षेत्रविषयेद्विरूपतास्यात्। यथा। तिल्यं। तैलीनं। द्वे तिलानांभवनेक्षेत्रे। एवंमाष्यं। माषीणं। द्वेमाषाणांभवनेक्षेत्रे। उमा अतस्यस्तासांक्षेत्रंउम्यं। औमीनं। द्वे अणुर्धान्यभेदस्तक्षेत्रेअणव्यं। आणवीनं। द्वे। भंगामातुलानीतक्षेत्रंभंग्यं। भांगीनं। द्वे॥ ७॥

शेषाणांव्रीह्यादिभ्यउक्तेभ्योन्येषांमुद्गादीनांधान्यानामुद्भवोचितंक्षेत्रंमौद्गीनादिस्यात्। यथा। मुद्गानांभवनंक्षेत्रंमौद्गीनं। एवंकौद्रवीणं। आदिनाचाणकीनं। "गोधूमीनं। कालापीनं। कौलत्थीनं। प्रयंगवीनमित्यादि। एकैकं। "शाकशाकटं। शाकशाकिनं। द्वयंशाकक्षेत्रादिके। क्लीबं। आदौउत्तरपश्चात्कृष्टंक्षेत्रमुप्तकृष्टंतन्नबीजाकृतमित्येकं। "बीजेनसहकृतंकृष्टंबीजाकृतं। कृत्रोद्वितीयेतिडाचू"। सीत्यं। कृष्टं। हल्यं

मौद्गीनकौद्रवीणादिशेषधान्योद्भवक्षमं ॥ "शाकक्षेत्रादिकेशाकशाकटंशाकशाकिनं" ॥
बीजाकृतंतूप्तकृष्टेसीत्यंकृष्टंचहल्यवत् ॥ ८ ॥ त्रिगुणाकृतंतृतीयाकृतंत्रिहल्यंत्रिसीत्यमपितास्मिन् ॥

त्रीणिकृष्टमात्रस्य। सीतयाहलेनेत्यर्थः। प्रितंसात्यं। "सीत्यमित्यपि"। हलेनकृष्टंहल्यं ॥ ८ ॥ त्रिगुणाकृतं। तृतीयाकृतं। त्रिहल्यं। त्रिसीत्यं। चत्वारिवारत्रयकृष्टस्य। त्रिगुणं। "त्रिवारं"। कृतंकृष्टंक्षेत्रंत्रिगुणाकृतं। संख्यायाश्चेतिडाचू। तस्मिन्त्रिगुणाकृतेइत्यर्थः। द्विगुणाकृतेपिसर्वंपूर्ववद्योज्यं। यथा ॥

द्विगुणाकृतं। द्वितीयाकृतं। द्विहल्यं। द्विसीत्यं। चत्वारिवारद्व्यकृष्टस्य। इहद्विःकृष्टेशंबाकृतमित्यपिनाम। "शंबशब्दोद्वितीयकर्षणेवर्त
ते। संबाकृतमितिहृत्यादिरपि"। एवंपंच ॥ ९ ॥उप्यतेस्मिन्नितिवापः। क्षेत्रं। द्रोणादिपरिमितधान्यस्यवापादौद्रोणिकादयः स्युः। यथा
द्रोणस्यवापःक्षेत्रंद्रौणिकः। आढकस्यवापःआढकिकः। आदिशब्दात्प्रस्थस्यवापःप्रास्थिकः। "कौडविकं"। इत्यादि। वापादावित्या

द्विगुणाकृतेतुसंबाद्विःकृताकृतमर्पाह ॥ ९ ॥। द्रोणाढकप्रस्थवापादौद्रौणिकाढकिकादयः ॥
खारीवापस्तुखारीकउत्तमर्णादयस्त्रिषु ॥ १० ॥ पुन्नपुंसकयोर्वप्रःकेदारःक्षेत्रमस्यतु ॥
कैदारकंस्यात्कैदार्यंक्षेत्रंकैदारिकंगणे ॥ ११ ॥ ९ ९ ९

दिशब्दात्यचादिग्रहः। द्रोणस्यपचोद्रौणिकःकथाहः। खारीवापः। खारीपरिमितंयत्रोप्यतेसखारीकः। एकं।उत्तमर्णादयः खारीकां
ताःत्रिलिंग्यां। वाच्यलिंगत्वात् ॥ १० ॥ वप्रः। केदारः। क्षेत्रं। त्रीणिक्षेत्रस्य"क्षेत्रइतिख्यातस्य"। अस्यक्षेत्रस्यगणेसमूहेकैदारकं।कै
दार्यं।"कैदारं"। क्षेत्रं।कैदारिकं। इतिचत्वारि ॥ ११ ॥ ९ ९ ९

लोष्टं। लेष्टुः। ढेलसृत्तिकाखंडस्य। "ढेंकूळ. डिफळइतिख्यातस्य। लोष्टंपुंस्यपि। लेष्टुपंढेपिलोष्टस्यादिनिबोपालितः" कोटिद्राः। "कोदी वाइत्यपि"। लोष्टभेदनः। ढेलोष्टभंजनमुद्गरस्य। "कुळव. डिफळाइतिख्यातस्य"। प्राजनं। तोदनं। तोत्रं। वीणिद्दषादेस्ताडनोपयोगिनस्तोत्रस्य। "आंसूड. चाबूकइतिख्यातस्य" तुद्यतेनेनतोत्रं। यलुक्यं। तोत्रवेत्रैकपाणये। खनित्रं। अवदारणं। ढेकुध्दालादेः।

लोष्टानिलेष्टवःपुंसिकोटिद्वोलोष्टभेदनः॥ प्राजनंतोदनंतोत्रंखनित्र
मवदारणे॥१२॥ दात्रंलवित्रमाबंधोयोत्रंयोक्त्रमथोफलं॥ ७

"कुदळइतिख्यातस्य"॥१२॥ दात्रं। लवित्रं। ढेलुनातिछिनत्तिअनेनलवित्रं। "इका. कोयता" इतिप्रसिद्धं। आबंधः। योत्रं। योक्त्रं। वीणियुगबंधनोपयोगिन्योरज्जो। "जुंपणी. जोतेंइतिख्यातायां।" फलं। ७ ७ ७

निरीशं। "निरीषमिति"। कुटकं। "दीर्घादिरितिमुकुटः" फालः। कृषकः। "कृषिकः। कृषिकाकृषिकोफालकृषकाविति रुद्रात्स्त्रियाम्
पि"। पंचलांगलस्याधः स्थितेकाष्ठे। यस्याग्रेलोहेनप्रबध्यते। "आद्यत्रयंयत्रकाष्ठेफालोनिबध्यतेतस्य। अंत्यद्वयंफालस्येत्यपिमतं"
फलतिविशीर्यतेभूमिरनेनफालः। लांगलं। हलं। हालः। हालः फालवहः सीतेतिविक्रमादित्यः। हालोहालेपुमान्हालामदिरायांच
योषितीतिमेदिनी"॥ १३॥ गोदारणं। सीरः। "शीरइत्यपि"। चत्वारिहलस्य। शम्या। युगकीलकः। द्वेयुगस्यकीलके। खीळइतिख्या

निरीशंकुटकंफालःकृषकोलांगलंहलं॥ १३॥ गोदारणंदात्रेऽथशम्यास्त्री
युगकीलकः॥ ईषालांगलदंडस्यासीतालांगलपद्धतिः॥ १४॥ ७ ७

ते। शम्यतेहृषादिरनयाशम्या। लांगलस्यदंडईषास्यात्। "ईशा। प्रभुशंकरयोःरीशाः स्त्रियांलांगलदंडकइतिनालव्यांतेरुद्रभसौ।
ईशाः। स्वामिनिरुद्रेचस्यारीशाहलदंडकइतिशांतेषुविश्वः। एकं। ईसाडइतिख्यातस्य। लांगलपद्धतिः हलरचितारेखासीतास्यात्।
"सीता। सीतानभःसरितिलांगलपद्धतौचसीतादशाननरिपोः सहधर्मिणीच। सीतंस्मृतंहिमगुणेचतदन्विते चसीतोऽलसेचबहुवाररतौ
चदृष्टइतिनालव्यादौधरणिः। एकं। नांगराचेंतासइतिख्यातस्य"॥ १४॥ ७ ७ ७

पशुबंधनेवृषादिबंधननिमित्तंयत्काष्ठंन्यस्तंनिखातंतत्रमेधिः।"मेथिरित्यपि"। खलेदारु। इतिहे।"मेदइतिख्यातस्य"। खलेदार्वितिह्रस्वांतादितिसप्तम्याअलुक्। यद्वाखलेधान्यमर्दनस्थलेयद्दारुइतिपृथक्पदंवा। आशुः। व्रीहिः। पाटलः।"पाटलिरित्यपि। पाटलोवर्णोस्यास्तीति"। त्रयंव्रीहेः।"पाटलोव्रीहिपाटलऊच्यतेइतिना[illegible]मितिसुभूतिः"। तत्रआशुश्चासौव्रीहिश्चेति। "पुंस्यपि। आशुस्तुव्रीहिशीघ्रयोरितिहेमचं

पुंसिमेधिःखलेदारुन्यस्तंचरशुबंधने ॥
आशुव्रीहिःपाटलःस्याच्छितशूकयवे सभौ ॥१५॥

द्रः। आशुव्रीहिरित्येकंपदमितिसुभूतिः। आशुश्चासौहोपाटलोमाश्वेतरक्तेन्यलिंगवानितिरुद्रोपि"। व्रीह्यादिपुंसि। धान्यमात्रेपिव्रीहिं वक्ष्यंति। शितशूकः। यवः। हेजवइतिख्यातस्य।"शितशूकोहितालव्यः। मध्यतालव्योपि"। १५॥

तत्रयवेहरितेहरिद्वर्णेतोक्मइत्येकं। "निःशूकयवस्य"। कलायः। सतीनकः। "सातीनकइतिमाधवः। प्रज्ञाद्यण्। सतीलकइतिमेदिनी"। हरेणुः। रेणुकः। चत्वारि। "गवादणाइतिख्यातस्य"। कोरदूषः। काद्रवः। "काद्रवइत्यपि"। द्वेहरीकइतिख्यातस्य॥ १६॥ मंगल्यकः। मसूरः। मसुरा। मसूरावेश्यायांस्त्रीहिभेदेचमसूरा मसुरास्त्रियां। मसूर मसुरौपुंसिद्वावेतावपिचेत्रयोरितिरभसः। मसूरामसुरावानावेश्यास्त्रीहि

तोक्मस्तु तत्र हरितेकलायस्तु सतीनकः॥ हरेणुरेणुकोचास्मिन्कोरदूष
स्तुकाद्रवः॥ १६॥ मंगल्यकोमसूरोऽथमकुष्टकमयुष्टकौ

भेदयोरितिमेदिनीच। द्वेमसूरइतिख्यातस्य"। मकुष्टकः। "मकुष्टकः। मुकुष्टकः। विश्वमेदिन्योस्तुमुकुष्टोस्त्रीहिभेदेनीतिवर्गद्वितीयांतः"। मयुष्टकः। "मयष्टकः। मपष्टकः। मपष्ठोपि। मपुष्टकः। मपुष्ठोप्यन्यत्र"॥

वनमुद्गः। "त्रीणिमठ.मटकीइतिख्यातस्य"। सर्षपः। तंतुभः। "तुंतुभोपि"। कदंबकः। त्रयंसोसव। "शिरम"। इतिख्यातस्य। सर्षपस्यात्सरि
षपइतित्रिकांडशेषः"॥१७॥ एषसर्षपोधवलःरक्तश्चेत्सिद्धार्थइत्येके। गोधूमः। सुमनः। द्वेगहूंइतिख्यातस्य। सुमनोऽदंतः। यावकः।
कुल्माषः। "कुल्मासइतिदंत्यांतः"। द्वेअर्धसिद्धस्ययवादेः। "अर्धशिजेयवादिकघुगर्यांइतिचख्यातस्य"। धान्यभेदस्येत्येके। "शू

वनमुद्गेसर्षपेतुद्वौतंतुभकदंबकौ ॥ १७ ॥ सिद्धार्थस्त्वेषधवलोगोधूमःसुमनःसमौ ॥
स्याद्यावकस्तुकुल्माषश्चणकोहरिमंथकः॥१८॥ द्वौतिलेतिलपेजश्चतिलपिंजश्चनिष्फले ॥

कशून्ययवादेरित्यन्ये"। चणकः। हरिमंथकः। हरिमंथजइत्यपि। "द्वेहरभराइतिख्यातस्य"॥१८॥ तिलपेजः। तिलपिंजः। द्वेनि
ष्फलेतिले। "वांझेतीळ. रानतीळइतिख्याते। जर्तिलइत्यपस्यनाम। जर्तिलःकथ्यतेसद्भिररण्यप्रभवस्तिलइत्युक्तेः"॥ ७

क्षवः। क्षुताभिजननः। राजिका। कृष्णिका। आसुरी। पंचराजसर्षपाख्यस्यकृष्णसर्षपस्य। "मोहरी- राईइतिख्यातस्य" क्षुतमभिजायतेऽनेनेतिक्षुताभिजननः। "क्षुधाभिजननइत्यपि। तत्रक्षुधामभिजनयतीतिविग्रहः" ॥ १९ ॥ कंगुः। "कंगूरित्यपि"। प्रियंगुः। द्वेकांग। "राळे" इतिख्यातस्य। अतसी। उमा। क्षुमा। त्रयंजवसइतिख्यातस्य। धान्यभेदस्य। मातुलानी। भंगा। द्वेभांग-तागाचेंबीइतिचख्यातस्य। "तरंगभेदयोर्भंगोभंगासस्यशणाक्षयइतिरुद्रः"। व्रीहिभेदःआशुः स्यात्। एकं ॥ २० ॥ सस्यस्यशूकंसूक्ष्मंसूचितुल्यमग्रेकिंशारुः स्यादेकं

क्षवःक्षुताभिजननोराजिकाकृष्णिकासुरी ॥ १९ ॥ स्त्रियोकंगुप्रियंगूद्वेअतसीस्यादुमाक्षुमा ॥
मातुलानीतुभंगायांव्रीहिभेदस्त्वणुःपुमान् ॥ २० ॥ किंशारुःसस्यशूकंस्यात्कणिशंसस्यमंजरी ॥ धान्यंव्रीहिःस्तंबकरिःस्तंबोगुच्छस्तृणादिनः ॥ २१ ॥

पुंसि। "कुंसइतिख्यातस्य"। सस्यस्यमंजरीनिर्गतनूतनशिरःकणिशं। एकं। कणाः संत्यस्यकणिशं। "कणिशोधान्यशीर्षकइतिताल्व्यांतरलकोशाः। मूर्द्धन्यांतोपि"। धान्यं। व्रीहिः। स्तंबकरिः। त्रयंव्रीहियवादेः। स्तंबकरिर्द्विदंतःपुंसि। तृणयवादेर्गुच्छोनालादिपुंजःस्तंबः स्यात्। एकं। "थोंबइतिप्रसिद्धस्य" ॥ २१ ॥

अस्यगुच्छस्ययःकांडःसनाडी।नालंचस्यात्। द्वेसकांडेऽगृहीतफलत्वान्निष्फलःपलालःस्यात्। एकं।"सरमःकडवा.बाटूकइतिरव्यातस्य।क्लीबेप
लालं"।कडंगरः।"कडंकरइतिहरदत्तपाठः"।बुसं।बुषंवषतुषारतोषाइतिषभेदान्मूर्धन्यांतमपि"द्वेपलालादिक्षोदस्यभूसइतिरव्यातस्य। तुष
इत्येकंत्रीह्यादेस्त्वचि।"कोंडाइतिख्यातायां"॥२२॥ श्लक्ष्णंकृशंतीक्ष्णंनिशितंएतादृशंयदग्रंयवादेस्तनशूकइत्येकं।"कीबेशूकं।"शमी।
शिंबा।"शिंबिः।शिंबीचेत्यपि।दंत्यादिर्वा"।द्वेशिंगइतिभाषिद्वस्यमाषादिफलस्य।उत्तरेक्षुद्रादयश्चत्वारोवाच्यलिंगाः।ऋजुं।आवसितं।

नाडीनालंचकांडोऽस्यपलालोऽस्त्रीसनिष्फलः॥ कडंगरोबुसंक्लीबेधान्यत्वचितुषःपुमान्॥२२॥
शूकोस्त्रीश्लक्ष्णतीक्ष्णाग्रेशमीशिंबात्रिषूत्तरे॥ ऋजुमावसितंधान्यंपूतंतुबहुलीकृतं॥२३॥
माषादयःशमीधान्येशूकधान्येयवादयः॥

"अवसितं।अवसितमृद्वज्ञानेपीतिविश्वः।" द्वेअपनीततृणस्य। राशीकृतस्यधान्यस्य।पूतं।बहुलीकृतं।द्वेअपनीतबुसस्यधान्यस्य।शू
र्पादिनाशोधितस्येत्येके॥२३॥ शमीप्रभवंधान्यंतत्रमाषमुद्गादयोभेदाः।"यदुक्तंरत्नकोशे।मुद्गोमाषोराजमाषःकुलत्थश्चणकस्तिलः।
कलायसूनवरइतिशमीधान्यगणःस्मृतइति"। एकं। शूकसहितधान्यंशूकधान्यंतत्रयवगोधूमादयोज्ञेयाः। एकं॥

बृहन्नालोबहुलजलोत्पन्नोव्रीहिविशेषःकलमः। एतदपेक्षयाकिंचिदपकृष्टःषष्टिरात्रेणपच्यमानःषष्टिकः। आदिशब्दाद्दुक्तादिराजशाल्याद्यः एतेशालयःस्युः। एकं। अमीमाषयवशालिकलमषष्टिकाद्याःपुंसि ॥ २४ ॥ नीवारोमुन्यन्नभेदःनेर। "देवभात"। इतिप्रसिद्धः। बहुवचनात्श्यामाकादयोगृह्यंते। एतेतृणधान्यानिस्युः। एकं। गवेधुः। "गवेडुरित्यपि"। गवेधुका। द्वे मुन्यन्नविशेषस्य। "कसईचेबींइतिप्रसिद्धस्य। इदंकसाड. कसाइनिकोंकणेप्रसिद्धं। गवाजलेनतत्रचाएधते। एधवृद्धौ"। अयोग्रं। मुसलः। "द्वे मुसळइतिख्यातस्य। क्लीबेमुस

शालयःकलमाद्याश्चषष्टिकाद्याश्चपुंस्यमी ॥ २४ ॥ तृणधान्यानिनीवाराःस्त्रीगवेधुर्गवेधुका ॥
अयोग्रंमुसलोऽस्त्रीस्यादुदूखलमुलूखलं ॥ २५ ॥ प्रस्फोटनंसूर्पमस्त्रीचालनीतितउःपुमान् ॥

लं"। उदूखलं। उलूखलं। द्वे उलूखल। "उखळइतिप्रसिद्धस्य" ॥ २५ ॥ प्रस्फोटनं। सूर्पे। "सूर्पमितिदंत्यादिरपि"। द्वे "सूपइतिख्यातस्य"। चालनी। तितउः। द्वे "चाळणइतिप्रसिद्धस्य"। क्षुद्रछिद्रशतोपेतंचालनंतितउःस्त्रुतइतिकाल्यः। "चालनंतितउश्चोक्तमितिक्लीबकांडेरत्नकोशाः। नस्त्रीतितउचालनीतित्रिकांडशेषः"। तनोतिसारंतितउः ॥

स्यूतः। प्रसेवः। द्वेधान्यादिभरणार्थैकृतस्यवस्त्रभांडस्य। पिशवी.।"गोणी.थैलीइतिख्यातस्य"। सीव्यतेस्मस्यूतः। "स्योनप्रसेवावित्यपिपाठः। स्योनस्यूतप्रसेवकावितिरभसः"। कंडोलः। पिटः।"पिंडइत्यपि।पिंडोबोलेबलेमांद्रेदेहागारैकदेशयोः। देहमात्रेनिवापेचगोलसिद्धुलकयोरपीतिमेदिनी"। द्वेवेणुदलादिरचितभांडस्य।"पांटी.गणिंगइत्यादिख्यातस्य"।कटः। किलिंजकः। द्वेवंशादिविकारस्य।"करंडाइत्यादि

स्यूतप्रसेवौकंडोलपिटौकटकिलिंजकौ ॥ २६ ॥ समानोरसवत्यांतुपा
कस्थानमहानसे ॥ पौरोगवस्तदध्यक्षः सूपकारास्तुबल्लवाः ॥ २७ ॥

ख्यातस्य"। कटत्याच्छणोतिइतिकटः ॥ २६ ॥ समानावितिस्यूतादिभिर्युगलैःसंबध्यते। रसवती। पाकस्थानं। महानसं।त्रीणिपाकस्थानस्यसैंपाकघर.पाकशालाइतिख्यातस्य। तस्यपाकस्थानस्याध्यक्षःअधिकृतःपौरोगवःस्यात्। एकं।"बांकनीसइतिख्यातस्य। पुरःपूजितागौर्भूमिः। पुरोगवीतस्येदमित्यण्। पौरोगवः।" सूपकारः। बल्लवः ॥ २७ ॥

आरालिकः। आंधसिकः। सूदः। औदनिकः। गुणः। सस्पाककर्तुः। "आचारीइतिख्यातस्य। आद्यंद्व्यंव्यंजनकारस्येतिक्षीरस्वामी। आपूपिकः। कांदविकः। भक्ष्यकारः। "भक्ष्यंकारः। भक्षकारइत्यपि"। त्रीणिभक्ष्यकारस्य। भैक्ष्यंतैलपक्वादि। इमेपौरोगवाद्याः वाच्यलिंगाः॥२८॥ अश्मंतं। उद्धानं। "उध्मानमित्यपि" उत्ध्मायते। ल्युट्। उद्धारमित्यपि"। अधिश्रयणी। चुल्लिः। "चुल्लीत्यपि"। अंतिका। "अंदिकेत्यपि। अं

आरालिकाआंधसिकाःसूदाऔदनिकागुणाः॥ आपूपिकःकांदविकोभक्ष्यंकारइमेत्रिषु॥२८॥
अश्मंतमुद्धानमधिश्रयणीचुल्लिरंतिका॥ अंगारधानिकांगारशाकट्यपि हसंत्यपि॥२९॥
हसन्यप्यथनस्त्रीस्यादंगारोऽलातमुल्मुकं॥ ७ ७ ७

द्यतेः त्रअतिअदिबंधने। ण्वुल्"। पंचचुल्लेः। "चूलइतिख्यातायाः। अश्मनोप्यंतोत्राश्मंतः"। श्रीसूपाके। अधिश्रियेतास्यांअधिश्रयणी। अंगारधानिका। अंगारशाकटी। हसंती॥२९॥ हसनी। चतुष्कमंगारशाकट्याः। आगटी.।"दोगडी"इतिख्यातायाः। अंगारः। अलातं। उल्मुकं। त्रीणि प्रज्वलत्काष्ठस्य"आद्यमेकंक्षिरवाराद्यतेख्यातस्य। अग्रिमद्व्यंकोलीतइतिख्यातस्येपिमतं। अंगारमुल्मुकंनस्त्रीपुंल्लिंगमुल्मुकंहासुतइतिविश्वः॥

अंबरीषं। भ्राष्ट्रः। द्वे चणकादिभर्जनपात्रस्य। "खापरः स्यान्हे इतिरभसस्य"। भृज्यतेऽस्मिन्भ्राष्ट्रः। कंदुः। स्वेदनी। द्वे मद्यनिर्माणोपयोगिनोभाटीतिप्रसिद्धस्यपात्रस्य। कदुर्वानाविकल्पेनपुमान्। पक्षेस्त्री ॥ २० ॥ अलंजरः। "अलिंजर स्त्यपि"। मणिकः। द्वे महाकुंभस्य। "माठ डेराइतिख्यातस्य"। कर्करी। आलुः। "आलूरित्यपि"। गलंतिका। त्रयंतंडुलादिप्रक्षालनोपयोगिन्याः गलंतिकायाः। "गळतीइतिख्यातायाः

क्लीबेंबरीषंभ्राष्ट्रोनाकंदुर्वास्वेदनीस्त्रियां ॥ २० ॥ अलंजरःस्यान्मणिकःक
र्कर्यालुर्गलंतिका ॥ पिठरःस्थाल्युरवौकुंडंकलशास्तुत्रिषुद्वयोः ॥ २१ ॥ ७

वान्" गलत्यंभोस्यागलंतिका। पिठरः। स्थाली। उरवा। "उषेत्यपि"। कुंडं। चत्वारिस्थाल्याः। "पिठरःस्थाल्यांनक्लीबमितिमेदिनी। स्थालंभाजनभेदेपिस्थालीस्यात्पाटलोरवयोरितिमेदिनी। कुंडीकमंडलौजारात्यतिरत्नीसुतेपुमान्। पिठरेतुननेतिविश्वमेदिन्यौ"। कलशाः। "इत्यातोपिकेनजलेनलसतिकलसः" ॥ २१ ॥ ७ ७ ७

घटः। कुडः। निपः। चत्वारिकलशास्य। कलशं। कलशी। द्वयोरितिघटेनसंबध्यते। घटी। अस्त्रीतिशरावेणसंबध्ये। शरावः। "संरावइतिदंत्यादिरपि"। वर्धमानकः। द्वेपात्रभेदस्य। "मालतीइतिप्रसिद्धस्य"। कुजीवं। "कुचीपमित्यपि"। कुचशब्दे। बाहुलकात्कीषच्"। पिष्टपचनं। द्वेपिष्टपाकोपयोगिनःपात्रस्य। "तवाकटइतिख्यातस्य"। कंसः। पानभाजनं। "द्वेक्षीरादि"। पानपात्रस्य॥ ३२॥ कृतेश्चर्मणः कुप्यं तैला

घटःकुडनिपावस्त्रीशरावोवर्धमानकः॥ कुजीवंपिष्टपचनंकंसोऽस्त्रीपानभाजनं॥३२॥
कुतूःकृतेःस्नेहपात्रंसेवाल्याकुतुपःपुमान्॥ सर्वभावपनंभांडंपात्रामत्रंचभाजनं॥३३॥

द्याधारपात्रंकुतूःस्यात्। एकं। "बुधलाइतिख्यातस्य" स्त्रियांसेवकुतूरल्याह्रस्वाचेकुतुपः। कुलाडुपच्। सर्वं। "स्यूतादिपिडादिच" पात्रमात्रं। आवपनादिसंज्ञं। आवपनं। भांडं। पात्रं। अमत्रं। भाजनं। पंच। "भांडं। आयधणइतिख्यातस्य। पिबंत्यनेनपात्रं"॥ ३३॥

दर्विः। "दर्वी"। कंबि। "कंबी"। खजाका। त्रयंस्त्रियांदर्व्याः। "पल्लीइतिख्यातायाः"। खजतिमथ्नातिपाकंखजाका। तर्दूः। दारुहस्तकः। द्वेदर्विभेदस्य। "डवलीइतिख्यातस्य। दारुणोहस्तोऽस्येतिदारुहस्तकः"। तर्दूःपुंसि। अयंपरिवेषणाद्युपयोगी। शाकं। हरितकं। शिग्रुः। त्रयंवास्तुकादेःशाकस्य। शाक्यतेभोक्तुमनेनशाकंशिग्रुःपुंसि। सोभांजनेपिशिग्रुरुक्तः। अस्यशाकस्यनाडिकानालं॥ ३४॥ कलंबः। कडंबइतिचस्यात् द्वेदेंटइतिख्यातस्य"। वेषवारः। "वेसवारः। वेशवारइत्यपि"। उपस्करः। द्वेशाकादिसंस्कारार्थंरचितहरिद्रासर्षपमरिचादिचूर्णस्य।

दर्विःकंबिःखजाकाचस्यात्तर्दूर्दारुहस्तकः॥ अस्त्रीशाकंहरितकंशि
ग्रुरस्यतुनाडिका॥ ३४॥ कलंबश्चकडंबश्चवेषवारउपस्करः॥

"आत्रेयसंहितायामुक्तं। चित्रकंपिप्पलीमूलंपिप्पलीचव्यनागरं। धान्याकंरजनीश्वेततंडुलाश्चसमांशकाः। वेसवारइतिख्यातंशाकादिषुनियोजयेदिति। दशपलानिहरिद्रायाः। विंशतिपलानिधान्याकस्य। पंचपलानिशुद्धजीरकस्य। साईद्वयपलंमेथिकायाः। एतच्चतुष्टयंभर्जितमेवग्राह्यं। त्रीणिपलानिमरिचस्य। अर्धपलंहिंगोः। एतत्सर्वमेकत्रसंयोज्यसंमर्दितंवेसवारइत्यन्ये"॥ ७ ७

तिंतिडीकं। "तिंतिडिकमित्यपि"। चुक्रं। वृक्षाम्लं। भयंतिंतिडीकस्याम्लभेदस्य। "आमसोलइतिख्यातस्य"। वेल्लजं॥ २५॥ मरीचं। "मरिचमित्यपि" कोलकं। कृष्णं। ऊषणं। धर्मपत्तनं। षट्टंमरीचस्य। मिरींइतिख्यातस्य। ऊषणंदीर्घाद्यं। "ह्रस्वाद्यपि। उषणंमरिचेक्लीबमितिमेदिनी"। जीरकः। जरणः। अजाजी। कणा। चत्वारिजीरकस्य। अजाजीत्र्यं॥ २६॥ सुषवी। कारवी। इष्वी। इष्वुः। कालो। उपकुंचिका। षट्टंकृष्णवर्णेजीरके। "का

तिंतिडीकंचचुक्रंचवृक्षाम्लमथवेल्लजं॥ २५॥ मरीचंकोलकंकृष्णमूषणंधर्मपत्तनं॥
जीरकोजरणोजाजीकणाकृष्णेतुजीरके॥ २६॥ सुषवीकारवीइष्वीइष्वुःकालोपकुंचिका॥
आर्द्रकंशृंगबेरंस्यादथच्छत्राविषुन्नकं॥ २७॥ कुस्तुंबुरुचधान्यौकमथशुंठीमहौषधं॥

लेंजिरें. काळेरेंइतिख्याते"। आर्द्रकं। शृंगबेरं। हेआर्द्रकस्य। शुंठ्याः पूर्वरूपमिदं। "आलेंइतिख्याते"। छत्रा। विषुन्नकं॥ २७॥ कुस्तुंबुरु। "कुस्तुंबरीतिभरतमालायां"। धान्याकं। "धन्याकंह्रस्वादीतिमुकुटः। धन्याकंधान्यकंधन्यंकुस्तुंबुरुधनीयकमितिरभसः। धनेयकमित्यपि" चत्वारिकोथिंबिरी। "धणे"। इतिख्यातस्य। शुंठी। "शुंठिरितिह्रस्वांतोपि। सधन्याशुंठिसेंधवमितिवैद्यकं"। महौषधं॥ छ, छ

विश्वं। नागरं। विश्वभेषजं। पंचशुंठ्याः। स्त्रियांतुविश्वा। "विश्वम्यदोषस्यभेषजं"॥ ३७॥ आरनालकं। सौवीरं। कुल्माषाभिषुतं। अवंति। सोमं। धान्याम्लं। कुंजलं। कांजिकं। सप्तकंकांजिकस्य। कुल्माषैरर्धस्विन्नैर्यवादिभिरभिषूयतेस्मकुल्माषाभिषुतं। कुल्माषमितिदृथप्पा। कुल्माषंकांजिकेपिचेतिविश्वः। "कुलअर्धस्विन्नामाषोस्मिन्कुल्माषः"। अवंत्यासूयतेअवंतिसोमं। आहव। "अध्वंतारिः"। कांजिकंकांजिकंवीरंकुल्माषाभिषुतंतथा। अवंतिसोमंधान्याम्लमारनालंमधुरसं। सौवीरंस्यसुवीराम्लंतथातुकंतुषोदकमिति॥ ३९॥ सहस्रवेधि। जतुकं। बाह्लीकं

स्त्रीनपुंसकयोर्विश्वंनागरंविश्वभेषजं॥ ३७॥ आरनालकंसौवीरंकुल्माषाभिषुता
निच॥ अवंतिसोमधान्याम्लंकुंजलानिचकांजिके॥ ३९॥ सहस्रवेधिजतुकंबा
ह्लीकंहिंगुरामठं॥ तैत्यैत्रीकारवीदृथ्वीबाह्यिकाकबरीदृथुः॥ ४०॥ ७

"बाह्लिकं"। हिंगु। रामठं। पंचहिंगुवृक्षस्यनिर्यासे। सहस्रंविध्यतिगंधेनसहस्रवेधि। इलंतंक्लीबे। तस्यहिंगुनःपत्री। तत्पत्री "त्वक्पत्री तत्पत्रीत्वचमाख्यातंत्वक्पत्रीकारवीतिचेरुद्रः। त्वक्पत्रीतित्वकारख्यातिर्हेमः"। कारवी। दृथ्वी। बाह्यिका। "बाह्यीकेत्यपिपाठः"। कबरी। दृथुः। पंचकंहिंगुनरोःपत्र्यामित्यर्थः॥ ४०॥ ७ ७ ७

निशा। कांचनी। पीता। हरिद्रा। वरवर्णिनी। पंचहरिद्रायाः। निशाख्यानिशापर्यायवाच्येत्यर्थः। तेनरजनीरात्रिरित्याद्यपि। यत्सामुद्रंस मुद्रभवंलवणंतत्अक्षीवं। "अक्षिवमित्यपि"। वशिरं। "वसिरमित्यपि"। द्वे॥ ४१॥ सैंधवः। शीतशिवं। "सितशिवं। सितंशुभ्रंचतल्लिंगंच" माणिमंथं। सिंधुजं। चत्वारिसिंधुजेलवणे। "शेदेलोणइतिख्याते" सिंधुदेशे भवंसैंधवं। माणिमंथपर्वतेभवंमाणिमंथं। माणिबंधमित्यपि

कां० २

निशाख्याकांचनीपीताहरिद्रावरवर्णिनी ॥ सामुद्रंयत्तुलवणमक्षीवंवशिरंचतत् ॥ ४१॥
सैंधवोस्त्रीशीतशिवंमाणिमंथंचसिंधुजे ॥ रौमकंवसुकंपाक्यंबिडंचक्षुतकेक्षुयं ॥ ४२॥

पाठः। रौमकं। वसुकं। "वसूकमितिहेमचंद्रः। बस्तकं। बस्तकइवबस्तकं। अजगंधित्वात्। रौमकेबस्तकंवास्त्रितिनाममाला"। द्वे शांभरलवणस्य। शांभरिदेशेरुमानामकोलवणाकरः। तत्रभवंरौमकं। "सांभरलोणइतिख्यातं। पाक्यं। बिडं। द्वयंद्वेनामनीक्षुतकेक्षुत्रिमे लवणे। "बिडलोणइतिख्याते"। पाकेसाधुपाक्यं। क्षारमृत्तिकांहिपाचयित्वालवणंकुर्वंति ॥ ४२॥

सौवर्चलः। अक्षं। रुचकं। त्रीणिमधुरलवणस्यलवणभेदस्य। हृद्यगंधमेतत्। "सं [illegible]तिख्यातं"। तत्रसौवर्चलेमेचकेकृष्णवर्णेतिलक मित्येकं। यद्वेघाः। कृष्णसौवर्चलगुणालवणेगंधवर्जितइति। मत्स्यंडी। फाणितं। "द्वेराब.काकवीइतिख्यातस्य" खंडविकारः। शार्करा। सिता। त्रीणिशार्कराया:। "खडीसारवर.[illegible]रइतिभेदभिन्नायाः"। पंचापिशार्करशर्कराइत्येके ॥ ४२॥ दध्यादिनाक्षीरस्यविकृतिःकूर्चिकाच्यु॥ दभासहपयःपक्वंयत्तस्याद्घधिकूर्चिका। तत्क्वेणपक्वंयत्क्षीरंसाभवेत्तत्ककूर्चिकेति। एकं। रसाला। मार्जिता। द्वेदधिमधुशार्करामरीचार्द्रादि

सौवर्चलेक्षरुचकेतिलकंतत्रमेचके ॥ मत्स्यंडीफाणितंखंडविकारः
शार्करासिता ॥ ४२ ॥ कूर्चिकाक्षीरविकृतिःस्याद्रसालातुमार्जिता ॥

भिःकृतस्यलेह्यस्य। "श्रीखंडइतिख्यातस्य। यदुक्तंसूदशास्त्रे। अर्द्रादक स्त्रिरपर्युषितस्यदध्नः खंडस्यषोडशपलानिशाशित्रभस्य। सर्पिष्पलंम [illegible]पलंमरिचोद्वर्षंशुंठ्याःपलार्धमपिचाईपलंचतुर्णां। सूक्ष्मेपटेललनयाः [illegible]पाणेघृष्टाकर्पूरधूलिसुरभीकृतपात्रसंस्था।एषाष्टकोदरकृतासरसारसालायास्वादिताभगवतामधुसूदनेनेति" ॥ ७ ७ ७

नेमनं। निष्ठानं। द्वेव्यंजनस्यदध्यादेः। "कढी इतिख्यातस्य"। निमत्यार्द्रभवत्यन्नमनेननेमनं। सूपाद्यपिनेमनमुपचारात्। इतःपरंवासितोतावा
च्यलिंगाः॥ ४४॥ शूलाकृतं। भटित्रं। शूल्यं। त्रयंशूलेनसंस्कृतस्यमांसादेः। शूलेनपक्वंशूलाकृतं। शूलात्साकइतिडाचू। शूलंलोहशलाकाउच्यं
पेठरं। द्वेस्थालीसंस्कृतस्यान्नादेः। प्रणीतं। उपसंपन्नं। द्वेरसादिसंपन्नस्यव्यंजनादेः। प्रयत्नं। सुसंस्कृतं। द्वेप्रयत्ननिष्पन्नस्यघृतपक्वादेः॥४५॥

स्याद्भर्जनंतुनिष्पानंत्रिलिंगावासितावधेः॥ ४४॥ शूलाकृतंभटित्रंस्याच्छूल्यमुख्यंतुपेठरं॥
प्रणीतमुपसंपन्नंप्रयत्नंस्यात्सुसंस्कृतं॥ ४५॥ स्यात्पिच्छिलंतुविजिलंसंसृष्टंशोधितंसमे॥
चिक्कणंमसृणंस्निग्धंतुल्येभावितवासिते॥ ४६॥ छ छ छ

पिच्छिलं। विजिलं। "विज्जलं। विज्जनंचेत्यपि"। द्वेमंडयुक्तदध्यादेः। "माईसुद्दोदहीं मठ्ठाइतिख्यातस्य"। संसृष्टं। शोधितं। द्वेकेशकीटाद्यपनयने
नशोधितस्यान्नादेः॥ चिक्कणं। मसृणं। स्निग्धं। त्रीणिस्निग्धस्यचिह्नानिअव्यक्तंकणानिचिक्कणं। कणशब्देभावितं। वासितं। द्वेपुष्पादिद्रव्यांतरेण
धिवासितस्य। यथाधूपनभावितास्तिलाः। वास्यतेद्रव्यांतरेणमिश्रीक्रियतेधूपपुष्पादिनावा धिवास्यतेवासितमितिस्वामी। धूपितंवासितंविदुरिति
मुनिः॥४६॥

आपक्वं। पोलिः। अभ्यूषः। "अभ्युषः। अभ्योषश्चापि"। त्रयं अर्द्धस्विन्नयवादेर्धृतादिनाभर्जितयवादेर्वाकृतपक्वान्नस्य। पोळीइत्यादिप्रसिद्धस्य"। लाजाः भर्जितव्रीहयः पुंभूम्निपुंसिबहुत्वेच। एवमक्षताअपिपुंभूम्नि। अक्षतायवाइतिपुराणं। एकैकस्याभिधानेपुंबहुत्वविधानार्थं। "लाजः स्यादार्द्रतंडुले। नपुंसकमुशिरेऽथस्त्रियांपुंभूम्निचाक्षताइतिमेदिनी। अक्षतंनहयोःपंडेलाजेपुत्रिषाहिंसिते। यवेपिक्वचिदितिमेदिनी"। दृथुकः। चिपिटकः। ईआर्द्रभृष्टव्रीहितंडुलस्य। "पोहेइतिप्रसिद्धस्य"। धानाइत्येकंभृष्टयवेवर्तते। नित्यंस्त्रियांबहुत्वेच ॥ ४७ ॥ पूपः

आपक्वंपोलिरभ्यूषोलाजाःपुंभूम्निचाक्षताः॥ दृथुकस्याचिपिटकोधाना
भृष्टयवेस्त्रियः॥ ४७॥ पूपोऽपूपः पिष्टकःस्यात्करंभोदधिसक्तवः॥

अपूपः। पिष्टकः। त्रीणितंडुलपिष्टरचितभक्ष्यभेदस्य। "वडा_घारगाइत्यादिख्यातस्य"। अपूपः पिष्टपूपःस्यादितिमुनिः। यल्लक्ष्यं। चंद्रांशुनिर्मलाःपूपाश्शालितंडुलनिर्मिताइति। दधियुक्ताःसक्तवोदधिसक्तवः करंभःस्यात्। "करंबइत्यपि। केनजलेनरंबते। रबिशब्दे। एकंसक्तवस्तुधानाचूर्णं। नेचत्रायेणपुंभूम्नि ॥

भिःसा। भक्तं। अंधः। अन्नं। ओदनः। दीदिविः। षड्रसस्य। अंधःसंतं। ओदनोऽस्त्री। दीदिविःपुंसि॥ ४८॥ भिःसटा। दध्निका। द्वेदध्नस्य। "करपइतिख्यातस्य"। सर्वेषांरसानांद्रवद्रव्याणांअग्रे आग्रेमोद्भवःमंडःस्यात्। "क्लीबेमंडं। एकंनिवळीइतिख्यातस्य" मासरः। आचामः निस्रावः। "निस्रावइतिमुकुटः"। त्रीणिभक्तसमुद्भवेमंडे। नीसः "पेजः" इतिख्यातस्य॥ ४९॥ यवागूः। उष्णिका। श्राणा। विलेपी। तरला।

भिःसास्त्रीभक्तमंधोन्नमोदनोस्त्रीसदीदिविः॥ ४८॥ भिःसटादध्निकासर्वरसाद्येऽग्रं मस्त्रियां॥
मासराचामनिस्रावामंडेभक्तसमुद्भवे॥ ४९॥ यवागूरुष्णिकाश्राणाविलेपितरलाचसा॥
"भक्षणाभ्यंजनेतैलंकृसरस्तुतिलौदनः"। ५०॥ गव्यंत्रिषुगवांसर्वंगोविट्गोमयंस्त्रियां॥

पंचद्रवदोदनस्य "आटवल.पातळभात कण्हेरीइतिख्यातस्य"। यवागूर्दीर्घाना। "भक्षणेत्यर्द्धक्षेपकं। भक्षणं। अभ्यंजनं। द्वेतैलस्य। तिलमिश्रओदनःकृसरःस्यादेकं"। गवांसर्वं। गोरिदंगविभवंगोविकारइत्याद्यर्थेषुयत्क्षीरादितद्द्रव्यंस्यात्। एकं। "त्रिषु। दधिदुग्धादेः"। गोविट्। गोमयं। द्वेगोःपुरीषे। "शेणइतिख्याते"। गोविट्पांतास्त्री॥

नद्दोमयंशुष्कंकरीषंस्यात्। एकं।"गोवरीइतिख्यातस्य"।दुग्धं।क्षीरं।पयः।त्रीणि।"दूधइतिख्यातस्य"।पयःसांतं।पयसोविकारोयो दाज्यदध्यादितत्पयस्यं। एकं।"आदिनातकंनवनीतं"।यद्घनादितरत्स्रुथंदधितद्रप्संस्यात्।"द्रप्स्यमितिभरतमालायां।द्रप्सःपुंस्यपि"। एकंपातळदर्हीइतिप्रसिद्धस्य"॥५१॥ घृतं।आज्यं।हविः।सर्पिः।चत्वारिघृतस्य।हविषी।सर्पिषी।"हविःसर्पिषिहोतव्येइति

तत्तुशुष्कंकरीषोऽस्त्रीदुग्धंक्षीरंपयःसमं॥पयस्यमाज्यंदध्यादिद्रप्संदधिघनेतरत्॥५१॥
घृतमाज्यंहविःसर्पिर्नवनीतंनवोद्धृतं॥तत्तुहैयंगवीनंस्यात्क्षीरंगोदोहोद्भवंघृतं॥५२॥
दंडाहतंकालशेयमरिष्टमपिगोरसः॥

हैमः"। अंजनी यमाज्यं।आङ्। पूर्वादसंज्ञायांक्यप्। नवनीतं। नवोद्धृतं।द्वे"लोणीइतिख्यातस्य"। मथिताद्भोनवंतत्कालमुद्धृतं। ह्यःगोदोहोद्भवंपूर्वदिनप्रातगोक्षीरघृतंहैयंगवीनंस्यात्। एकं।"एकरात्रपर्युषिताद्भउत्पन्नस्य।घृतस्य"।ह्यःपूर्वदिनेयोगोदोहस्तस्मादुद्भवोयस्यतत्॥५२॥ दंडाहतं।कालशेयं।अरिष्टं।गोरसः।चत्वारिदंडमंथितस्यगोरसमात्रस्य॥

ताद्वीषभाह। पादांबुचतुर्थांशमुदकंयत्रतद्दंडाहतंतक्रमित्युच्यते। अर्धांबुअर्धमुदकंयत्रगोरसेतदुदश्वित। तांतं। "उदकेनश्वयतिवर्द्धते औदश्वित्कमौदश्वितिसंस्कृतइत्यईक्षेपकं।" निर्जलंजलरहितंदधिमंथनमात्रेणमथितमित्युच्यते। एकैकं ॥ ५२ ॥ दधिभवंमंडंअग्रिमं मस्तुस्यात्। एकंक्लीबे। "दध्नउपरिभागस्य। वस्त्रनिःसृतदधिजलस्येत्यपिमतं" आभ्रंदधिः नवप्रसूतायाः गोक्षीरंसप्तदिनावधिपियूषः

तक्रंह्युदश्वित्मथितंपादाम्बुर्द्वीबुनिर्जलं ॥ ५३ ॥ मंडंदधिभवंमस्तुपीयूषोऽभिनवंपयः ॥
अशानायाबुभुक्षाक्षुद्वासस्तुकवलःपुमान्॥ ५४ ॥ सपीतिःस्त्रीतुल्यपानंसग्धिःस्त्रीसहभोजनं॥

स्यात्। "पीयूषंसप्तदिवसावधिक्षीरेतथाऽमृतइतिविश्वेमेदिन्यौ। पेयूषमितिमुकुटः"। तक्रथितंसत्पीयूषशब्दवाच्यमित्येके। एकं। अशा नाया। बुभुक्षा। क्षुत्। त्रयंक्षुधः। क्षुत्स्त्री। "अशनस्यइच्छाअशानाया। क्षुधेत्यन्यत्र"। ग्रासः। कवलः। द्वे "घांसइति ख्यातस्य। कवलार्थ कइत्यपिपाठः" ॥ ५४ ॥ सपीतिः। तुल्यपानं। द्वेसहपानस्य। सग्धिः। सहभोजनं। द्वे "सहभोजनस्य"। तत्रसग्धिस्त्री ॥ ७

उदन्या । पिपासा । तृट् । तर्षः । चत्वारितृषः । तृट्षोता । तर्षःपुंसि । "तृषालिसातृषोस्त्रियामितिविश्वः" । जग्धिः । भोजनं ॥ ५५ ॥ जेमनं । "जमनमितिद्विरूपकोशः" । लेहः "लेपः । लेपस्तुलेपने । अन्नानेचसक्तव्यांचेतिहेमचंद्रः ।" आहारः । निघसः । "निघसइत्यपि" । न्यादः । सशभोजनस्य । जग्धिः स्त्री । सौहित्यं । तर्पणं । तृप्तिः । त्रीणितृप्तेःपूर्वं भुक्तेपश्चात्समुक्षितंभुक्तसमुक्षितंभुक्तोसृष्टमितियावत् । साफेलास्यात् । "फेली

उदन्यातुपिपासातृट्तर्षोजग्धिस्तुभोजनं ॥ ५५ ॥ जेमनंलेहेआहारोनिघासोन्यादइत्यपि ॥
सौहित्यंतर्पणंतृप्तिःफेलाभुक्तसमुक्षितं ॥ ५६ ॥ कामंप्रकामंपर्याप्तंनिकामेष्टंयथेप्सितं ॥
गोपेगोपालगोसंख्यगोधुगाभीरबल्लवाः ॥ ५७ ॥ ७ ७ ७

रितिजटाधरः" । एकं ॥ ५६ ॥ कामं । प्रकामं । पर्याप्तं । निकामं । इष्टं । यथेप्सितं । षट्कंयथेप्सितस्य । क्रियाविशेषणान्येतानि । यथा कामंभुंक्तेस्म । गोपः । गोपालः । गोसंख्यः । गोधुक् । "गोदुहः । गोपगोदुहबल्लवाइतित्रिकांडशेषः ।" आभीरः । अभीरइत्यपि । अभिर्ईरयतिर्ईरगत्यादौ ।" बल्लवः । षट्गोपालस्य । गोदुहो ॥ ५७ ॥ ७ ७ ७

गोमहिष्यादिकंपादबंधनमित्युच्यते। पादेनबंधनमस्येति। यादबंधनमित्येकेपेटुः। तत्रगवादियादबंधित्तमितिकोशांतरप्रमाणं। आदि नारवराजाविकादेर्ग्रहणं। गोमान्। गोमी। द्वौशब्दौगवीश्वरेगवांस्वामिनि। गोमंतौ। गोमिनौ। गोकुलं। गोधनं। द्वे गवांव्रजेगोसंबंधिसमूहे ॥ ५८ ॥ यत्रपुरागावआशिताःभोजिताःतत्स्थानंआशितंगवीनं। एकं। त्रिषुलिंगत्रये"। उक्षा। भद्रः। बलीवर्दः। "बरीवर्दः"। ऋषभः। वृष

गोमहिष्यादिकंपादबंधनद्वौगवीश्वरे ॥ गोमान्गोमीगोकुलंतुगोधनंस्याद्गवांव्रजे ॥ ५८ ॥
त्रिष्वाशितंगवीनंतद्यावोयत्राशिताःपुरा ॥ उक्षाभद्रोबलीवर्दऋषभोवृषभोवृषः ॥ ५९ ॥
अनड्वान् सौरभेयोगोरुक्ष्णांसंहतिरौक्षकं ॥ गव्यंत्रागवांवत्सधेन्वोर्वात्सकधैनुके ॥ ६० ॥

भः। वृषः ॥ ५९ ॥ अनड्वान्। सौरभेयः। गोः। नववृषभस्य। उक्षाणौ। अनड्वाहौ। गावौ। "स्त्रियांअनड्वाही। अनुड्दुहीत्यपि"। उक्ष्णांवृषभाणांसंहतिःसमूहआक्षौकंस्यात्। एकं। गवांसंहतिःगव्या। गोत्रा। द्वे। वत्सानांसंहतिर्वात्सकं। धेनूनांसंहतिर्धैनुकं। एकैकंक्रमेण ॥ ६० ॥

महान्वृषोमहोक्षः। एकं।"महावृषस्य"। अचतुरेतिसाधुः। वृद्धोक्षः।जरद्गवः। द्वे।वृद्धवृषभस्य। यन्मालायां। महोक्षः स्यादुक्षतरः स्कंधिकः स्कंधवाहकः। षोडन्षड्दशानोवत्सःकूटोभग्नविषाणकइति। उत्पन्नःबलीवर्दभावंप्राप्तउक्षाजातोक्षः स्यात्। एकं। सद्योजातोवृषस्तर्णकः स्यात्।एकं ॥ ६१॥ राकृत्करिः।वत्सः। द्वे। दम्यः। वत्सतरः। द्वेस्पष्टतारुण्यस्य।वत्सत्वंस्वल्पमस्यवत्सतरः। षंडतागोपतित्वंतद्योग्य आर्षभ्यः

वृषोमहान्महोक्षः स्याद्वृद्धोक्षस्तुजरद्गवः॥ उत्पन्नउक्षाजातोक्षःसद्योजातस्तुतर्णकः ॥ ६१॥
राकृत्करिस्तुवत्सःस्याद्दम्यवत्सतरौसमौ ॥आर्षभ्यःषंडतायोग्यःषंडोगोपतिरिट्चरः ॥ ६२॥
स्कंधदेशोवस्यवहःसास्नातुगलकंबलः ॥ ९ ९ ९

एकं। षंडः।"षडइत्यपि" गोपतिः। इट्चरः।"इडुरट्इत्यपि" त्रीणिस्वेच्छाचारिणोवृषभस्य। षण्ढोतिदर्शातिगर्भेषंडः। इषाइच्छयाचरतिइट्चरः ॥ ६२॥ अस्यवृषभस्यस्कंधदेशोवहःस्यात्। एकं।"खांदाइतिख्यातस्य" सास्ना। गलकंबलः। द्वेगोःकंठेलंबमानस्यचर्मणः।"सांकळी. कांबळइतिख्यातस्य"॥ ९ ९ ९

नस्तितः। नस्योतः।"नस्तोपदृत्यपिपाठः"।द्वेस्यूतनासिकस्य।"वेसण्याबैलइतिख्यातस्य"।नस्येनासारंध्रेऊतःस्यूत्राप्रोतःनस्योतः।प्र
ष्ठवाट्।"पष्ठवाडितिरेफरहितमितिस्वामी।"युगपार्श्वगः।द्वेदमनार्थंयुग्येनसहस्कंधेवहकाष्ठस्य।युगस्यस्कंधकाष्ठस्यपार्श्वेगच्छती
तियुगपार्श्वगः ॥६२॥ युगस्यवोढायुग्यः।वत्सानांदमनकालेस्कंधेकाष्ठमासज्यतेसप्रासंगः। तस्यवोढाप्रासंग्यः।"लोडण्याबैलइति

स्यान्नस्तितस्तुनस्योतः प्रष्ठवाड्युगपार्श्वगः ॥ ६१॥ युगादीनंवहोढारेयुग्यप्रासंग्यशाकटाः॥
रवनतितेनतद्वोढास्येदंहालिकसैरिकौ ॥ ६४ ॥ धूर्वहेधुर्यधौरेयधुरीणाः सधुरंधराः ॥

रव्यातः"। शाकटस्यवोढाशाकटः। एकैकं। नेनरवनतीत्याद्यर्थेहालिकःसैरिकश्चस्यात्। यथाहलेनरवनतिहालिकः। एवंहलस्यवोढाह
लस्यायंवाहालिकः। एवंसीरेणरवनतिसीरस्यवोढासीरस्यायंवासैरिकः। सीरोहलस्यपर्यायः। द्वे"नांगल्याबैलइतिख्यातस्य"॥ ६४ ॥
धूर्वहः। धुर्यः। धौरेयः। धुरीणः। धुरंधरः। पंचधुरंधरस्य।"धूर्वहश्चोदीर्घादिः वोरुपधायाइतिदीर्घः" ॥ ४ ४ ४

एकधुरीणः। एकधुरः। एकधुरावहः। त्रयंयएकामेवधुरंवहतितस्य। यःसर्वामपिधुरंवहतिससर्वधुरीणः। एकं। माहेयी। सौरभेयी। गोः। उस्रा। माता। शृंगिणी॥ ६५॥ अर्जुनी। अघ्न्या। रोहिणी। नवकंगवि। गावौ। मातरौ। यागोषुउत्तमासागौर्नैचिकीत्येकं। "नैचिकी। नैचिकीगौरुन्नमातुनैचिकीसाप्रकीर्तितेतिनाममाला। नैचिकानैचिकीचेतिद्विरूपकोशः" नैचेश्वरातिनैचिकी। वर्णावयव। "प्रमाणा"दीनांभेदात्। श

उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥ सतुसर्वधुरीणःस्याद्यौवैसर्वधुरावहः ॥
माहेयीसौरभेयीगौरुस्रामातास्रशृंगिणी॥ ६६॥ अर्जुन्यघ्न्यारोहिणीस्यादुत्तमागौ नैचिकी॥
वर्णादिभेदात्संज्ञाः स्युःशाबलीधवलादयः॥ ६७॥ द्विहायनीद्विवर्षागौरेकाब्दात्वेकहायनी॥
चतुरब्दाचतुर्हायण्येवंत्र्यब्दात्रिहायणी ॥ ६८॥

बलीधवलादयोगवांसंज्ञाः। शाबलीचित्रवर्णा। "शाबलापि।" धवलीशुक्लवर्णा। "धवलापि"। आदिनाकपिलापाटलेत्यादि। अवयवभेदात् लंबकर्णावक्रशृंगीत्यादि। "प्रमाणभेदात्दीर्घारघर्वावामनीत्यादि"। एकैकं॥ ६७॥ वयोभेदात्संज्ञाभेदमाह। द्विवर्षाद्विवर्षेप्रमाणमस्याःसागौ द्विहायनी। एकं। एकाब्दागोः एकाहायनी। एकं। चतुरब्दागोः चतुर्हायणी। एकं। त्रिवर्षात्रिहायणीस्यात्। एकं॥ ६८॥

वशा। वंध्या। द्वे "वांझइतिख्यातायाः"। अवतोका। "वतोकेत्यपि"। स्रवद्गर्भा। द्वेअकस्मात्पतितगर्भायाः। मृतवत्सास्रवद्गर्भेतिमाला। दृषभेणमैथुनार्थेआक्रांतासंधिनी। संधागर्भाधानमस्त्यस्याःसंधिनी। एकं। दृषोपगमनाद्गर्भोपघातिनीवेहदित्युच्यते। एकं। तांतांस्त्रियं। विहंतिगर्भंवेहत्। वेहद्दृषोपगतेतिभागुरिः॥ ६९॥ प्रजनेगर्भग्रहणेकाल्याप्राप्तकालासागोरुपसर्या। एकं। बालावासोगर्भिणीचबा

वशावंध्यावतोकातुस्रवद्गर्भाथसंधिनी॥ आक्रांतादृषभेणाथवेहद्गर्भोपघातिनी॥ ६९॥
काल्योपसर्याप्रजनेप्रष्ठौहीबालगर्भिणी॥ स्यादचंडीतुसुकराबहुसूतिःपरेष्टुका॥ ७०॥
चिरप्रसूताबष्कयणीधेनुःस्यान्नवसूतिका॥ ॐ ॐ ॐ

लगर्भिणीसाप्रष्ठौही। "पष्ठौहीत्यपिपाठः। तत्रएषोदरादित्वात्रलोपः।" एकं। अचंडी। सुकरा। द्वेअकोपानायाः। बहुसूतिः। परेष्टुका। द्वेबहुप्रसवायाः॥ ७०॥ चिरप्रसूता। बष्कयणी। "बष्कयिणीत्यपि। बष्कयस्तरुणवत्सःसोस्त्यस्याः। बष्कयस्त्वेकहायनोवत्सइतिशाकटायनः"। द्वेदीर्घकालेनप्रसूतायाः। धेनुः। नवसूतिका। द्वेनूतनप्रसूतायाः॥ ॐ ॐ ॐ

सुव्रता। सुखसंदोह्या। "सुखसंदुह्येत्यपि"। द्वेसुशीलायाः। "मिसकीनइतिख्यातायाः"। पीनोध्नी। पीवरस्तनी। द्वेस्थूलस्तन्याः॥ ७१॥ द्रोणक्षीरा। द्रोणदुग्धा। द्वेद्रोणपरिमितदुग्धदात्र्याः। बंधकेआधिस्तत्रस्थिताकरणशुद्धिपर्यंतंउत्तमर्णगृहेदोहनार्थंस्थापितेतियावत्। साधेनुष्या। एकं। बंधकस्याद्विनिमय तिविश्वः। यावर्षेवर्षेप्रसूयतेसासमांसमीनेत्येकंपंचाक्षरं॥ ७२॥ ऊधः। आपीनं। द्वेगोस्तनस्य। "कांसइतिख्या

सुव्रतासुखसंदोह्यापीनोध्नीपीवरस्तनी॥ ७१॥ द्रोणक्षीराद्रोणदुग्धाधेनुष्याबंधकेस्थिता॥
र्मांसमानासायैवप्रतिवर्षंप्रसूयते॥ ७२॥ ऊधस्तुक्लीबमापीनंसमौशिवककीलकौ॥
नपुंसदामसं नंपशुरज्जुस्तुदामनी॥ ७३॥ ❀ ❀ ❀

तस्य"। ऊधः सांतंक्लीबं। शिवकः। कीलकः। द्वेगवांबंधनार्थंनिखातस्यकाष्ठस्य। "मेढइतिख्यातस्य"। दाम। संदानं। द्वेबंधनरज्जोः। "दोवंइतिख्यातायाः"। संदीयतेबध्यतेऽनेनेतिसंदानं। दामनांतं। स्त्रियांतुदामा। दामानौ। पशुरज्जुः। दामनी। "बंधनीत्यपिपाठः"। द्वेयस्यामेकस्यांबहुग्रंथियुतायांबहवोवृषाबध्यंतेतस्यारज्जोः। "[illegible]तेरख्यातायाः"। चरणपाशस्येत्येके॥ ७३॥ ❀ ❀

वैशाखः। मंथः। मंथानः। मंथाः। मंथदंडकः। पंचमंथनस्य। "रवीइतिख्यातस्य"। मंथाः। मंथनौ। कुठरः। "कुटरइतिपाठेतुकुटकोटिल्ये। बाहुलकादरः।" दंडविष्कंभः। द्वेयत्रमंथदंडोबध्यतेतस्यस्तंभस्य। "सळखांबइतिख्यातस्य"। मंथनी। गर्गरी। द्वेमथ्यमानदधिपात्रस्य। मंथतेःस्यांमंथनी। कळशीत्यपिपाठः ॥ ७४॥ उष्ट्रः। क्रमेलकः। मयः। महांगः। चत्वारिउष्ट्रस्य। उष्ट्रस्यशिशुःकरभइत्येकं। दारवेःका

वैशारवमंथमंथानमंथानामंथदंडके ॥ कुठेरोदंडविष्कंभोमंथन[illegible]रीसमे ॥ ७४ ॥
उष्ट्रेमलकमयमहांगाःकरभःशिशुः॥ करभाःस्युःभृंरवलकाःदारवैःपादबंधनैः॥ ७५ ॥
अजाछागीशुभच्छाग[illegible]स्तच्छगलकाअजे ॥ ४ ४ ४

ष्टमयैःपादबंधनैरुपेताःकरभाःभृंरवलकाःस्युरेकं॥ ७५ ॥ अजा। छागी। द्वे "शेळीइतिख्यातायाः शुभःतिभः। स्तभः। स्तुभश्चेत्यपि"। छागः। बस्तः। छगलकः। अजः। पंचकमजस्य। "बोकडइतिख्यातस्य"॥ ४ ४ ४

मेढ्रः । उरभ्रः । उरणः । ऊर्णायुः । मेषः । वृष्णिः । एडकः । "सप्तकंमेंढरूं.एडकाइतिख्यातस्य" । अविरित्यपि । ऊर्णायुरुदंतः ॥ ७६ ॥ उष्ट्राणांवृंदेऔष्ट्रकं । उरभ्राणांवृंदेऔरभ्रकं । अजानांवृंदेआजकं । क्रमादेकैकं । चक्रीवान् । बालेयः । रासभः । गर्दभः । खरः । पंचगर्दभस्य । "गादवइतिख्यातस्य" ॥ ७७ ॥ वैदेहकः । सार्थवाहः । नैगमः । "निगमः । निगमोवाणिजेपुर्यामितिविश्वः" । वाणिजः । वणिक् । पण्याजीवः

मेढ्रोरभ्रउरणौर्णायुर्मेषवृष्ण्यडुके ॥ ७६ ॥ उष्ट्रोरभ्राजवृंदस्यौष्ट्रकौरभ्रकाजकं ॥
चक्रीवंतस्तुबालेयोरासभोगर्दभाःखराः ॥ ७७ । वैदेहकःसार्थवाहोनैगमोवाणिजोवणिक् ॥
पण्याजीवोह्यापणिकःक्रयविक्रयिकश्चसः ॥ ७८ ॥ विक्रेतास्याद्विक्रयिकःक्रायिकक्रयिकौसमौ ॥

आपणिकः । क्रयविक्रयिकः । अष्टोक्रयविक्रयाभ्यांवर्तमानस्य । "वाणीइतिख्यातस्य । वणिक्स्त्रियां । वणिज्यायांपुमान्वाणिजिकेच हरिणांतरइतिविश्वः" । वणिजौ ॥ ७८ ॥ विक्रेताविक्रयिकः । द्रव्यवस्त्रपात्रादिदत्वातन्मूल्यंगृह्णतः । "विकणाराइतिख्यातस्य । विक्रयेणजीवतिविक्रयिकः" । क्रायिकः । क्रयिकः । द्रव्यमूल्येनवस्त्रादिगृह्णतः । "विकतघेणाराइतिप्रसिद्धस्य । क्रयेणजीवतिक्रयिकः" ॥ ७९

वाणिज्यं। "वणिज्यमपि। दूतवणिग्भ्यांचेतियः"। वणिज्या। द्वेवणिजांकर्मणि। "वाणीपणाइतिख्याते। वणिजांकर्मवाणिज्यं"। मूल्यंवस्त्रा
अवक्रयः। क्रयविक्रेयवस्तूनांमूल्यस्य। "मोलइतिख्यातस्य"। वसत्यस्मिन्वस्तुप्रातिरितिवस्त्रः॥ ७९॥ नीवी। "नीविरित्यपि"। परिपण
मूलधनं। क्रयविक्रयादिव्यवहारेयन्मूलधनंतस्य। भांडवलइतिख्यातस्य। नीवीस्त्री। परिपण्यतेदृड्ध्यर्थंप्रयुज्यतेपरिपणः। मूलध
नादधिकंनिष्पन्नंकालांतरेणसलाभः स्यात्। "एकं। नफाइत्यादिख्यातस्य।" परिदानं। "प्रतिदानमित्यपि"। परिवर्तः। "प

वाणिज्यंतुवणिज्यास्यान्मूल्यंवस्त्रोप्यवक्रयः॥ ७९॥ नीवीपरिपणोमूलधनंलाभोऽधिकंफलं॥
परिदानंपरीवर्तोनैमेयोनिमयोऽपिवा॥ ८०॥ पुमानुपनिधिर्न्यासःप्रतिदानंतदर्पणं॥

रिवर्तइत्यपि"। नैमेयः। "वैमेयोपि"। निमयः। "विमयइत्यपि"। चत्वारिपरिवर्तनस्य। "मोबदलाइतिप्रसिद्धस्य" मेहःप्रणिदा
ने। निमानंनियमः॥ ८०॥ उपनिधिः। न्यासः। द्वेनिक्षेपस्य। "ठेवपुरलेलेंद्रव्यइतिप्रसिद्धस्य" स्मृतौह्येषांभेदोनास्ति। तस्यनिक्षेपस्यनि
क्षेत्रेसत्यंप्रतिदानमित्युच्यते। एकंप्रतीपंदानंप्रतिदानं॥

क्रये "क्रयविषयेग्राहकागृण्हीयुरितिबुध्या।" यदाप्येतत्प्रसारितंवस्तुनत्क्रय्यं। एकं। यत्क्रेतव्यमात्रंयत्रकापिवर्ततेतत्क्रेयं॥ ८१॥ एवंविक्रेयं। पणितव्यं। पण्यं। त्रयंविक्रेयस्यवस्तुनः। क्रय्यादयोवाच्यलिंगाः। सत्यापनं। "सत्यापना। सत्यापनासत्याकृतिरितिञिकांडेवोपालिनात्"। सत्यंकारः। सत्याकृतिः। त्रयंअवश्यंमयेतक्रेतव्यमित्यादिरूपस्यसत्यस्यकरणे। "सईकरणेइतिख्याते। सत्यंकारस्तुलोकेसत्यकार. विसारइत्यादिप्रसिद्धः"। सत्यस्याकृतिःसत्याकृतिः। सत्यादशपथइतिडाच्॥ ८२॥ विपणः। विक्रयः। द्वे "विक्रयेइतिख्यातस्य"। आदशु।

क्रयेप्रसारितंक्रय्यंक्रेयंक्रेतव्यमात्रके॥ ८१॥ विक्रेयंपणितव्यंचपण्यंक्रय्यादयस्त्रिषु॥
क्लीबेसत्यापनंसत्यंकारःसत्याकृतिःस्त्रियां॥ ८२॥ विपणोविक्रयःसंख्याःसंख्येयेद्यादशास्त्रिषु॥

"दशाशब्दमभिव्याप्य"। एकाद्याअष्टादशांताः संख्याशब्दाः संख्येयेवर्तमानास्त्रिषु। यथा। एकाशाटी। एकःपटः। एकंवस्त्रं। दशास्त्रियः। दशपुरुषाः। दशकुलानि। "नतुविंशत्येकइत्यादि" एवंअष्टादशपर्यंताः। उदाहर्तव्याः। तत्रचतुष्पर्यंतास्त्र्यलिंगाः। शेषास्त्रिषुसमानलिंगाः। द्विशब्दादयःसंख्येयेएवकिंनतुसंख्यायामितिसूचितं॥

विंशत्याद्याः विंशतिमारभ्यपरार्द्धपर्यंताः सर्वाः संख्याः सदैकत्वेनित्यमेकवचनांताः। संख्येयेसंख्यायांचवर्तंते। तत्रसंख्येयेयथा। एकोनविंशतिः पटाः। विंशत्यापुरुषैः कृतं। संतिंशतंगावइत्यादि। संख्यायांयथा। पटानांविंशतिः। गवांशतं॥ ८३॥ संख्यार्थेद्विबहुवचनेस्तः। संख्यानरार्थेवर्तमानायाविंशत्यादिसंख्यायाः द्विवचनेबहुवचनेअपिभवतइत्यर्थः। यथाद्वेविंशती। गवांशतानि। "तिस्रोविंशतयइत्यादि। तासुविंशत्यादिषुनवतिपर्यंताः स्त्रियां। पंक्तेरिति। पंक्तिर्दशासंख्यातामारभ्यदशगुणंउत्तरंयत्रतादृशंसंख्यानंक्रमात्शतसहस्रादिस्या

विंशत्याद्याः सदैकत्वेसर्वाः संख्येयसंख्ययोः॥ ८३॥ संख्यार्थेद्विबहुत्वेस्तासुचानवतेःस्त्रियः॥ पंक्तेः शतसहस्रा।देक्रमाद्दशगुणोत्तरं॥ ८४॥ ७

त्। पंक्तिर्दशाक्षरंच्छंदोदशासंख्यावाचकेघपिइतिविश्वः। यथादशगुणापंक्तिः शतंस्यात्। शतंदशगुणसहस्रंस्यात्। एवमयुतादि। यदाहुः। एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्जंखर्वनिखर्वमहापद्मशंकवस्तस्मात्। जलधिश्चांत्यंमध्यंपरार्द्धमिति दशगुणोत्तराः संज्ञाः। संख्यायाः स्थानानांव्यवहारार्थंकृताः पूर्वैरिति॥ ८४॥ ७ ७ ७

यौतवं। द्रुवयं। पाय्यं। इतित्रयंसमानार्थकं। समानमर्थोयस्यतत्। परिमाणवाचकमित्यर्थः। यौतवंओकार्यांतवर्ण। पाय्यंतालव्यसंयुक्तांतं। तन्मा
नं। तुलांगुलिप्रस्थैर्भिद्यते। तुलामानंअंगुलिमानंप्रस्थमानंचेति। त्रिविधमित्यर्थः। एतदेवोन्मानप्रमाणपरिमाणशब्दैः क्रमेणव्यवह्रियते। "य
दुक्तं। उर्ध्वमानंकिलोन्मानंपरिमाणंतुसर्वतः। आयामस्तुप्रमाणंस्यात्संख्याभिन्नातुसर्वतइति"। पंचगुंजाःआद्यमाषकः शास्त्रीयोमाषकःस्या

यौतवंद्रुवयंपाय्यमितिमानार्थकंत्रयं॥ मानंतुलांगुलिप्रस्थैर्गुंजापंचाद्यमाषकः॥ ८५॥
तेषोडशाक्षःकर्षोस्त्रीपलंकर्षचतुष्टयं॥ सुवर्णबिस्तौहेम्नोक्षेकुरुबिस्तस्तुतत्पले॥ ८६॥

त्। यथाचशास्त्रंपंचकृष्णलोमाषइति।एकं।आद्येतिविशेषणंद्विकृष्णलस्यराजतमाषस्यव्यावृत्त्यर्थं। तस्यशास्त्रेप्रायशोव्यवहाराभावात्॥ ८५॥
तेषोडशमाषाअक्षः। कर्षश्चस्यात्। अस्त्रीपुंसिक्लीबेच"। द्वे"नोळाइतिख्यातस्य"। कर्षचतुष्टयंपलंस्यात्। एकं। सुवर्णः। बिस्तः। द्वेहेम्नःसु
वर्णस्याक्षे। अशीतिगुंजाभिस्तुलितेसुवर्ण एवेत्यर्थः। "रुद्रस्तु। सुवर्णस्वर्णबिस्तयोरितिक्लीबमाह"। तस्यहेम्नःपलेकुरुबिस्तइत्येकं॥ ८६॥

पलानांबार्नतुलास्यात्। "एकं। स्त्रियां। विंशतितुला एकोभारःस्यात्। एकंभारःस्याद्वीवधेविंशोपलानांद्विसहस्रकइतिकोशांतरे"। पुरुषेणाहृद्येपल सहस्रेबोढुंशक्येते। म्रियतइतिभारः। दशभाराःआचितइतिस्युः। यःशाकटःशाकटेनवोढुंशक्ये। भारः सोप्याचितइत्येकं। "आचितः शाकटोन्मेषेपलानामयुतद्वयइतिविश्वः"॥ ८७॥कार्षापणः। कार्षिकः। द्वेराजतकर्षपरिमितरूपकस्य। "रूपयाइतिख्यातस्य। कार्षापणोःस्त्रीकार्षिकेपण षोडशिंकपिंचतिकोशांतरे"। तान्निकेतान्नसंज्ञेधकर्षप्रमाणोतस्मिन्कार्षिकेपणइत्येकं। पैसाइतिख्यातस्य। इतितुलामानमुक्तं। अंगुलिमानं

तुलास्त्रियांपलशतंभारःस्याद्विंशतिस्तुलाः॥ आचितोदशभाराःस्युःशाकटीभारआचितः॥८७॥
कार्षापणःकार्षिकःस्यात्कार्षिकेनान्निकेपणः॥ अस्त्रियामाढकद्रोणौखारीवाहोनिकुंचकः॥८८॥

हस्तादितृचर्गेउक्तं। प्रस्थमानंत्वाह। "आढकादयःशब्दाः परिमाणार्थकाः परिमाणविशेषवाचकाःपृथक्प्रत्येकंभिन्नाइत्यर्थः। तत्रआ ढकइत्येकंपायलीइतिख्यातस्य। द्रोणइत्येकंअदमणीइतिख्यातस्य। द्वेअप्यस्त्रियां। खारीइत्येकंद्वीडमणीइतिख्यातस्य। खारइतिपुंसि वा। खारिरितिह्रस्वांतोपिस्त्रियां। निकुंचइत्येकंबारामणीइतिख्यातस्य। निकुंचकइत्येकंमूटइतिख्यातस्य॥ ८८॥

कुडवइत्येकंपावशेरइतिख्यातस्य।कुटपइतिमुकुटः।कुडपोवा।प्रस्थइत्येकंशेरइतिख्यातस्य"।आद्यशब्दाच्छूर्पभारादिग्रहः। यदाहुः।पलं प्रकुंचकंमुष्टिःकुडवस्तच्चतुष्टयं। चत्वारःकुडवाःप्रस्थश्चतुष्प्रस्थंतथाढकं। अष्टाढकोभवेद्द्रोणोद्विद्रोणःशूर्पउच्यते। सार्धशूर्पोभवेत्खारीद्विशूर्पोद्रोण्युदाहृता। तमेवभारंजानीयाद्वाहोभारश्चतुष्टयमितिभन्यच्च।अष्टमुष्टिभवेत्कोचित्किंचिदष्टौतुपुष्कलंपुष्कलानितुचत्वारिआढकःपरिकी

कुडवःप्रस्थइत्याद्याःपरिमाणार्थकाःपृथक्॥ पादस्तुरीयोभागःस्या
दंशाभागोतुवंटके॥ ८९॥ द्रव्यंवित्तंस्वापतेयंरिक्थमृक्थंधनंवसु॥

र्तितः। चतुराढकोभवेद्द्रोणइत्येतन्मानलक्षणमित्युक्तं"।अत्रपलादित्रयंअभिन्नं। तत्तद्देशभेदात्संख्यान्यथात्वंच। यथामगधदेशे द्रोणस्तुखार्याः खलुषोडशांशाः स्यादाढकोद्रोणचतुर्थभागइत्यादि। रूपकादेश्चतुर्थभागःपादइत्युच्यते। एकं।"पायलीइत्यादिख्यात स्य"। अंशाः।भागः।वंटकः।त्रीणिभागमात्रस्य।"वांटाइतिख्यातस्य"॥ ८९॥ द्रव्यं। वित्तं। स्वापतेयं। रिक्थं। ऋक्थं। धनं। वसु।

हिरण्यं। द्रविणं। धुम्नं। अर्थः। राः। विभवः। त्रयोदशधनस्य। तत्रअर्थादित्रयंपुंसि। राद्योर्विभवेस्वर्णेइतिविश्वः। रायो। रायः॥ ९०॥ कोशाः

हिरण्यं। द्वेअपिघटिताघटितयोर्हेमरूप्ययोः। कोशास्तालव्यांतोमूर्द्धन्यांतोवा। ताभ्यांहेमरूप्याभ्यांयदन्यत्ताम्रादिकंतत्कुप्यंरत्नात्। एकं। कुप्यंह्रस्वादि। अर्थाद्धिरण्यमरूप्यंचकुप्यं तद्द्वयंकुप्यमकुप्यंचअर्हतेभुद्धेतंचेत्[illegible]रूप्यं। एकंनाणेइतिरभसस्य"। [illegible]न्यतेऽस्

हिरण्यंद्रविणंधुम्नमर्थराविभवाअपि ॥ ९० ॥ स्यात्कोशश्चहिरण्यंचहेमरूप्येऽमताऽमते ॥
ताभ्यां [illegible]न्यत्तत्कुप्यंरूप्यंत[illegible]यमाहतं ॥ ९१ ॥ गारुत्मतंमरकतमश्मगर्भोहरिन्मणिः ॥
शोणरत्नंलोहितकःपद्मरागोऽथमौक्तिकं ॥ ९२ ॥ ७ ७ ७

रूप्यं। रूपादाहतइतियत्। रूप्यंस्यादाहतस्वर्णरजतंरजतेपिचेतिविश्वः ॥ ९१ ॥ गारुत्मतं। मरकतं। अश्मगर्भः। हरिन्मणिः। चत्वारिपाचइतिभसित्इस्यमणेः। शोण[illegible]त्नं। लोहितकः। पद्मरागः। मौ[illegible]गस्य। "माणीकइतिख्यातस्य"। मौक्तिकं॥ ९२॥ ७

मुक्ता। द्वे "मोतींइतिप्रसिद्धस्य"। मुक्तेभ्यः कौभिर्मौक्तिकं। विद्रुमः। प्रवालः "द्वेपोवल्लेइतिख्यातस्य। क्लीबेप्रवालं"। रत्नं। मणिः। द्वे "अश्मजातौमरकतादौमुक्तादिकेपिवर्तते। तत्रमणिः स्त्रीपुंसयोः। "स्त्रियांङीषंतोपिमणी"। आदिशब्दाद्द्विद्रुमेपि। रमंतेस्मिन्रत्नं। कनकंकुलिशंनीलंपद्मरागं चमौक्तिकं। एतानिपंचरत्नानिरत्नशास्त्रविदोविदुः। सुवर्णरजतंमुक्ताराजावर्तप्रवालकं। रत्नपंचकमाख्यातंशेषंवस्तुप्रचक्षतेइतिवा। मु

मुक्ताथविद्रुमःपुंसिप्रवालंपुन्नपुंसकं॥ रत्नंमणिर्द्वयोरश्मजातौमुक्तादिकेपिच॥९३॥
स्वर्णंसुवर्णंकनकंहिरण्यंहेमहाटकं॥ तपनीयंशातकुंभंगांगेयंभर्मकर्बुरं॥९४॥
चामीकरंजातरूपंरजतंकांचने॥ रुक्मंकार्तस्वरंजांबूनदमष्टापदोस्त्रियां॥९५॥

क्ताफलंहिरण्यंचवैडूर्यपद्मरागकं। पुष्परागंचगोमेदंनीलंगारुत्मकंतथा। प्रवालमुक्तान्युक्तानिमहारत्नानिवैनवेति"॥९३॥ स्वर्णादिकोनवविंशतिः सुवर्णस्य। तत्रहेमभर्मणोः क्लीबे॥९४॥ शातकौंभमितिद्विरूपकोशः। कर्बुरमितिदीर्घमध्यंशब्दरत्नव ल्यां। कर्बूरं। कर्बूरस्यात्पुमान्शब्द्यांसुवर्णेपुनपुंसकमितिमेदिनी। भर्ममित्यदंतमपिद्विरूपकोशे"॥९५॥

यदलंकाररूपस्सुवर्णंतत्शृंगीकनकंमित्येकं। शृंगीतिपृथगपि। यन्मालाभूषणंकनकंशृंगीति।दुर्वर्णादिपंचकंरजतस्य। "तत्रस्यर्जुरंहस्वोकारमितिरामनाथः"।आपिशाब्दात्तारंकलधौतमित्यपि ॥ ९६॥ रीतिः। आरकूटः।द्वेपित्तलस्य "तत्ररीतिःस्त्रियां। रीतित्यपि। आरकूटःपुंसिक्लीबेच"। ताम्रकं। शुल्बं। म्लेछमुखं।द्व्यष्टं।"द्विष्टमपि"। वरिष्टं।उदुंबरं।"औदुंबरंभवेत्ताम्रेफलादौयज्ञशाखिन

अलंकारसुवर्णंयत्शृंगीकनकमित्यदः ॥ दुर्वर्णंरजतंरूप्यंस्यर्जूरंश्वेतमित्यपि ॥ ९६॥
रीतिःस्त्रियामारकूटोनास्त्रियामथताम्रकं ॥ शुल्बंम्लेछमुखंद्व्यष्टंवरिष्टोदुंबराणिच ॥ ९७॥
लोहोस्त्रीशास्त्रकंतीक्ष्णंपिंडंकालायसायसी ॥ अश्मसारोऽथमंडूरंसिंहाणंमपितन्मले ॥ ९८॥

इत्यजयः"। षट्ताम्रस्य ॥ ९७॥ लोहः। शास्त्रकं। तीक्ष्णं। पिंडं। कालायसं। "कृष्णायसमितिरत्नमाला।"अयः।अश्मसारः। समलोहस्य।"अश्मसारंचशास्त्रकमित्यमरमाला"। मंडूरं। सिंहाणं।"सिहानमित्यपिपाठः। सिंघाणमित्यपि"। द्वेलोहमलस्यलोह कीटइतिख्यातस्य। मंडूरंटवर्गमध्यं ॥ ९८॥

सर्वमपितेजसंसुवर्णरजतादिकंलोहमित्युच्यते। "प्रज्ञाद्यणिलोहमित्यपि"। यद्वासर्वेस्वर्णादितेजसंलोहंचस्यात्। "तेजसोविकारस्तैजसं" यदुक्तं। सुवर्णरजतंताम्रंरीतिःकांस्यंतथात्रपु॥ सीसंकालायसंचैवमष्टौलोहानिचक्षतइति। अयस्तुविशेषाल्लोहसंज्ञं। अयसोविकारः फालाख्यःकुशीस्यात्। यच्छाश्वतः। कुशीवलाकुशीफालेइति। एकंस्त्रीलिंगं। क्षारः। काचः। द्वेकाचस्य। "कांच.बांगडखारइतिख्यातस्य" क्षरतिक्षारः। चपलः। रसः। सूतः। पारदः। "पारतः। रसेंद्रःपारदःप्रोक्तः पारतोपिनिगद्यतइतितारपालः। पारतस्तुमनाक्पांडुः सूतस्तु

सर्वंचतैजसंलोहं [illegible]ःकुशी ॥ क्षारःकाचोऽथचपलोरसः
सूतश्चपारदे ॥ ९९॥ गवलंमाहिषंशृंगमभ्रकंगिरिजामले ॥ ७

रहितोमलात्। पारतस्तु [illegible]ः सर्वतुल्यगुणाःस्मृताइतिशब्दार्णवः"। चत्वारिपारदस्य। "पाराइतिख्यातस्य"॥ ९९॥ यन्माहिषं शृंगंतद्गवलमित्येकं। पारदोहिप्रायेणगवलेनिधाप्यतेतत्रतदभिधानं। अभ्रकं। गिरिजामलं। द्वे "अभ्रकंड्या[illegible]ःअभ्रस्यप्रतिकृतिरभ्रकं। गिरिजं। अमलमितिकश्चित्। तन्मतेत्रीणि। "गिरिजंगिरिजाबीजममलंगवलध्वजमितिवाग्भटः"॥ ७ ९

स्रोतोंजनं। सौवीरं। कापोतांजनं। यामुनं। चत्वारिसौवीरांजनस्य। "सुरमाइतिरव्यातस्य"। यमुनास्रोतसोजातमंजनंस्रोतोंजनं। सुवीरदेशेभवंसौवीरं। धन्वंतरिस्तु। अंजनंमेचकंकृष्णासौवीरंस्यात्सुवीरजं। कापोतकंयामुनंचस्रोतोंजनमुदाहृतमिति॥१००॥ तुत्थांजनं। शिखिग्रीवं। वितुन्नकं। मयूरकं। कर्परी। पंचतुत्थांजनस्य। मोरचूदइतिख्यातस्य। तुदत्यक्षिरोगानतुत्थं। तुत्थंचतदंजनंच। दार्विकादारुहरिद्रात

स्रोतोंजनंतुसौवीरंकापोतांजनयामुने ॥१००॥ तुत्थांजनंशिखिग्रीवंवितुन्नकमयूरके ॥
कर्परीदार्विकाक्काथोद्भवंतुत्थंरसांजनं ॥१०१॥ रसगर्भंतार्क्ष्यशैलंगंधाश्मनितुगंधिकः॥
सौगंधिकश्चचक्षुष्याकुलाल्यौतुकुलत्थिका ॥१०२॥ ९ ९ ९

क्काथोद्भवंतस्याःक्काथे। "समभागेनअजादुग्धेन"। संस्कृतंतुत्थंतुत्थांजनंरसांजनादिसंज्ञंभ्यान्। "दार्विकेत्यपि"। रसांजनं॥१०१॥ रसगर्भं। तार्क्ष्यशैलं। त्रीणि। केचित्तुत्थरसांजनमितिसमस्तंपेटुः। गंधाश्मा। गंधिकः। "गंधकइत्यपि"। सौगंधिकः। त्रीणिगंधस्य। चक्षुष्या। कुलाली। कुलत्थिका। त्रयं। "तुत्थविशेषस्य निद्वासुरमाइतिरव्यातस्य"। चक्षुषेहितचक्षुष्या। कुलेतिष्ठतितत्प्रतिकृतिःकुलत्थिका॥१०२॥

रीतिपुष्पं। पुष्पकेतु। पुष्पकं। "पौष्पकमित्यपि" कुसुमांजनं। चत्वारिंशतपित्तलादुत्पन्नस्य "अस्त्रोद्भवं फूलइतिख्यातस्य"। पुष्पकेतु। उदंतंकीबे। पिंजरं। पीतनं। तालं। आलं। "अलं। हरितालमलंतालवर्णकंनटभूषणमितिमाधवः"। हरितालकं। पंचहरितालस्य॥१०३॥ गैरेयं। अर्थ्यं। गिरिजं। अश्मजं। शिलाजतु। पंचशिलाजतुनः। "शिलाजितइतिख्यातस्य"। अर्थ्यतेरसायनार्थिभिरर्थ्यं। शिलायां

रीतिपुष्पंपुष्पकेतु पुष्पंकुसुमांजनं ॥ पिंजरं तालं मौलंचहरितालके ॥१०२॥
गैरेयमर्थ्यंगिरिजमश्मजंचशिलाजतु ॥ बोलगंधरसाःपिंडगोपरसाःसमाः ॥१०४॥

स्त्रवल्लाक्षाकृतित्वाच्छिलाजतु। बोलः। गंधरसः। "रसगंधइतिस्वामी। राजदंताद्वित्वात्।" गंधः। पिंडः। गोपरसः। पंचगंधरसस्य। "रत्न्याबोळइतिख्यातस्य"। गोपः। रसश्चेतिष्टथगपि। अभ्रगोसइतिमुकुटः। गांजलेस्यति। चौंतकर्मणि। गोपइतिस्वामी। गंधप्रधानो रसोस्यगंधरसः ॥ १०४ ॥

डिंडीरः। "हिंडीरइत्यपि"। हिंडिरइतिशब्दरत्नावल्यां। अब्धिकफः। फेनः। त्रयं। सागरमलाख्यस्य। समुद्रफेनस्य। सिंदूरं। नागसंभवं। द्वे "सेंदूरइतिख्यातस्य"। नागात्सिसात्संभवोऽस्यनागसंभवं। नागं। सीसकं। योगेष्टं। वंत्रं। "वर्द्धमितिमुकुटः। दृधुवर्द्धने। दृधिवपिभ्यांरन्"। चत्वारिसीसस्य। "शिसेंइतिख्यातस्य"। त्रपु। पिच्चटं॥ १०५॥ रंगं। वंगं। चत्वारिवंगे। "कथिलइतिख्यातं"। पिचु। तूलः। द्वेका

डिंडीरोऽब्धिकफःफेनःसिंदूरंनागसंभवं॥ नागसीसकयोगेष्टंवंत्रंत्रपुपिच्चटं॥ १०५॥
रंगवंगेअथपिचुस्तूलोऽथकमलोत्तरं॥ स्यात्कुसुंभंवन्हिशिखंमहारजनमित्यपि॥ १०६॥
मेषकंबलऊर्णायुःशशोर्णशशालोमनि॥ मधुक्षौद्रंमाक्षिकादिमधूच्छिष्टंतुसिक्थकं॥ १०७॥

र्पासस्य। कमलोत्तरं। कुसुंभं। वन्हिशिखं। महारजनं। चत्वारिकुसुंभस्य। रज्यतेवस्त्राद्यनेनरजनं। महच्चतद्रजनंचमहारजनं॥ १०६॥
मेषकंबलः। ऊर्णायुः। द्वेकंबलस्य। ऊर्णायुरुदंतःपुंसि। शशोर्ण। शशालोम। द्वेशशालोम्नः। मधु। क्षौद्रं। माक्षिकं। त्रीणिमधुनः। आदि
नात्रामरपौत्तिकादिग्रहणं। मधूच्छिष्टं। सिक्थकं। द्वे "मेणइतिख्यातस्य"। मधुनाऽवशिष्यतेमधूच्छिष्टं॥ १०७॥ ९ ५

मनःशिला। "मनःशिलइतिद्विरूपकोशः"। [illegible]। मनोव्हा। नागजिव्हिका। चत्वारिमनःशिलायाः। "मनःशब्दवाच्याशिलामनः शिला"। नैपाली। कुनटी। गोला। त्रीणिनैपालदेशोद्भवायांमनःशिलायां। सप्तैकार्थाइत्येके। यवक्षारः। यवाग्रजः॥१०८॥ पाक्यः। त्रीणिदग्धयवकुरेभ्योजायमानस्यक्षारभेदस्य। "जवखारइतिख्यातस्य। सर्जिकाक्षारः। सज्जिकाक्षारइतिरामनाथः। कापोतः। सुखवर्चकः। त्रीणिक्षारभे

मनःशिलामनोगुप्तामनोव्हानागजिव्हिका॥नैपालीकुनटीगोलायवक्षारोयवाग्रजः॥१०८॥
पाक्योथसर्जिकाक्षारःकापोतःसुखवर्चकः॥सौवर्चकंस्याद्रुचकंत्वक्क्षीरीवंशरोचना॥१०९॥

दस्य। "सजीखारइतिख्यातस्य"। सर्जिकांदग्धाक्षार्यतेयःससर्जिकाक्षारः। सौवर्चलं। रुचकं। द्वेक्षारभेदस्य। "संचळखारइतिख्यातस्य। प्रागुक्तमपिक्षारप्रसंगात्पुनरुक्तं। पंचापिसर्जिकाक्षारस्येतिसुभूत्यादयः। त्वक्क्षीरी। वंशरोचना। "वंशलोचनेतिहेमचंद्रः"। द्वेवेणुजन्यस्यौषधिविशेषस्य "वंशलोचनइतिख्यातस्य"। त्वक्क्षीरीवंशजाशुभ्रावंशक्षीरीचवैणवीतिकोशांतरं॥१०९॥ ७ ७

शिग्रुजं। श्वेतमरिचं। द्वे सौभांजनबीजस्य। "शोबग्याचेबीइतिख्यातस्य"। इक्षुसंबंधिमूलकंमोरटंस्यात्। एकं। "इक्षुमूलस्य"। ग्रंथिकं। पिप्पली मूलं। चटिकाशिरः। "चटकाशिरइतिहेमचंद्रः। चटकाशिरइव। चटका। शिरः। इतिस्थगपि। शिरोनापिप्पलीमूलइतिमेदिनी"। त्रयंपिप्पलीमूलस्य। "पिंपळमूळइतिख्यातस्य"॥ ११० ॥ गोलोमीभूतकेशाः। द्वे "जटामांसीइतिप्रसिद्धायाः"। गौरिवलोमान्यस्याः सागोलोमी। प

शिग्रुजंश्वेतमरिचंमोरटंमूलमैक्षवं ॥ ग्रंथिकंपिप्पलीमूलंचटिकाशिरइत्यपि ॥ ११० ॥
गोलोमीभूतकेशीनापत्रांगंरक्तचंदनं ॥ त्रिकटुत्र्यूषणंव्योषंत्रिफलातुफलत्रिकं ॥ १११ ॥
॥ ॥ इतिवैश्यवर्गः ॥ ॥ ७ ७ ७

त्रांगं। रक्तचंदनं। द्वे रक्तचंदनसदृशास्यरक्तसारस्य। "कृष्णत्रिंदुकवृक्षइतिख्यातस्य। पत्राण्यंगेऽस्यपत्रांगं।" त्रिकटु। त्र्यूषणं। "त्र्युषणमितिद्विरूपकोशाः"। व्योषं। त्रीणिशुंठपिप्पलीमरीचानांसमाहारः"। त्रिफला। "तृफला। तृफलात्रिफलाचेतित्रिकांडशेषः।" फलत्रिकं। द्वे हरीतक्यामलकबिभीतकफलानांसमाहारस्य॥ १११ ॥ ॥ इतिवैश्यवर्गः ॥ ॥ ७ ७ ७

शूद्रः। अवरवर्णः। वृषलः। जघन्यजः। चत्वारि शूद्रस्य। चंडालोब्राह्मण्यांशूद्राज्जातस्तमभिव्याप्यवक्ष्यमाणाअंबष्ठकरणाद्यः। "आदि नाउग्रादयः"। संकीर्णाः प्रतिलोमानुलोमजत्वान्मिश्राः। एकं॥ १॥ शूद्राशूद्रजातिरंगनाविट्वैश्यः तयोः सुतइतिवक्ष्यमाणेनान्वयः

॥ ॥ अथशूद्रवर्गः ॥ ॥ शूद्राश्चाऽवरवर्णाश्चवृषलाश्चजघन्यजाः ॥आचंडा
लात्तुसंकीर्णाअंबष्ठकरणाद्यः ॥ १ ॥ शूद्राविशोस्त्वकरणोंऽबष्ठोवैश्याद्द्विजन्मनोः ॥
शूद्रास्त्रि[illegible]धः क्षत्रियाविशोः ॥ २ ॥

सुकरणइत्येकं। सतुलेरवनद्वत्तिः। वैश्यायांब्राह्मणाज्जातःसुतोंऽबष्ठः। सतुचिकित्साद्वत्तिः। शूद्रायांक्षत्रियाज्जातःउग्रः। सतु शास्त्रवृत्तिः। क्षत्रियायांवैश्याज्जातोमागधः। सतुराजादिस्तुतिपाठवृत्तिः। एकैकं॥ २॥

अर्यावैश्या। वैश्यायांक्षत्रियाज्जातोमाहिषः। अस्यज्योतिषंशाकुनंशास्त्रंचस्वरशास्त्रंचजीविका। अर्याक्षत्रियातस्यांशूद्राज्जातः क्षत्ता। तस्यवृत्तिःसारथ्यादिः। क्षत्तारौ। ब्राह्मण्यांक्षत्रियाज्जातः सूतइत्युच्यते। तस्यगजबंधनमश्वानांवाहनंकर्मसारथेरित्यादिर्जीविका। तस्यांब्राह्मण्यांवैश्याज्जातोवैदेहकः। चतुःषष्टिकलाकर्मवैदेहकंतदुपजीविका। पण्यांगनानांराज्ञांचकुर्यात्संगंतदिच्छया॥उपजीव्यंतु

माहिष्योर्यांक्षत्रियायोःक्षत्तार्यांशूद्रयोःसुतः॥ब्राह्मण्यांक्षात्रियात्सूतस्तस्यांवैदेहकोविशः॥३॥
रथकारस्तुमाहिष्याकरण्यांयस्यसंभवः॥स्याच्चंडालस्तुजनितोब्राह्मण्यांवृषलेनयः॥४॥

तास्विवेति। एकं॥३॥ करण्यांशूद्रविशोःसुतायांमाहिष्यांवैश्याक्षत्रिययोःजाताज्जातोरथकारःस्यात्। अस्यवर्तनंतु। रथकर्मेधनादिभिः। ब्राह्मण्यांवृषलेनशूद्रेणयउत्पादितः सचंडालःस्यात्। "चांडालइत्यपि"। मृतचैलेर्निघर्मांसैःस्मशानेतस्यजीविनमित्येकेकं॥४॥

कारुः। शिल्पी। द्वे चित्रकारेऽपि शिल्पैकदेशित्वात्स्त्र्यां शिल्पी। "तक्षा चतंतुवायश्च नापितो रजकस्तथा। पंचमश्चर्मकारश्च कारवः शिल्पिनोमताइत्यपि"। तैः सजातिभिः संहतैः श्रेणिः। सजातीयशिल्पसंघः श्रेणिरित्यर्थः। सत्स्त्रीपुंसलिंगः। एकः कुलकः। "कुलिकः। कुलिकोनागभेदे स्याद्बुधे देकुलसत्तमइतिमेदिनी" कुलश्रेष्ठी। द्वे शिल्पिकुलप्रधानस्य। शिल्पिभेदानाह। मालाकारः। मालिकः। "मालीद्वितिन्यासिद्वस्य"। पुष्पमालाधरो मत्स्यमालिकः॥५॥ कुंभकारः। कुलालः। "द्वे कुंभकारइति व्यालिंग्य"। पलगंडः। लेपकः। द्वे गंडौलेपकारस्य। "गंवडीद्

कारुः शिल्पीसंहतैस्तैर्द्व्योः श्रेणिः सजातिभिः॥ कुलकः स्यात्कुलश्रेष्ठी मालाकारस्तु मालिकः॥५॥
कुंभकारः कुलालः स्यात्पलगंडस्तु लेपकः॥ तंतुवायः कुविंदः स्यात्तुन्नवायस्तु सौत्रिकः॥६॥
रंगाजीवः श्वित्रकारः शस्त्रमार्जोऽसिधावकः॥

त्यादिख्यातस्य"। तंतुवायः। "तंत्रवा"॥ तंतुवायः। तंत्रवापइतिऽमरव्याख्यातौ"। कुविंदः। "कुविदइत्यपि। कुपक्रोधे।" द्वे पटानांनिर्मातरि। "कोष्ठीइतिख्याते" तुन्नवायः। सौत्रिकः। द्वे तंतुक्यार्दनिर्मातरि। "शिंपीइतिख्याते"। सूच्याजीवानांशिल्पभेदे सौत्रिकः॥६॥ रंगाजीवः। चित्रकरः। द्वे "चितारी रंगारीइत्याद्यख्यातस्य"। रंगश्वेतपीतकादिकमाजीवतिरंगाजीवः। शस्त्रमार्जः। असिधावकः। द्वे शस्त्रघर्षणोपजीविनः। "शिकलगारइतिख्यातस्य"॥ ७

पादूकृत्। चर्मकारः द्वे "चांभारइतिख्यातस्य"। पादूः पादत्राणिकरोति। पादूकृतूतांतः। व्योकारः। लोहकारकः। द्वे "लोहारइतिख्यातस्य"। व्योइत्यव्ययंलोहबीजवाचीतिश्रीभोजः"॥ ७॥ नाडींधमः। स्वर्णकारः। कलादः। रुक्मकारकः। चत्वारिस्वर्णकारस्य। "सोनारइतिख्यातस्य"। शांखिकः। कांबविकः। द्वेशंखवलयादेःकर्तरिकंकणकार."कांसार" इतिख्याते। शौल्विकः। ताम्रकुट्टकः। द्वे "तांबटइतिख्यातस्य"

पादूकृच्चर्मकारःस्याद्व्योकारोलोहकारकः ॥ ७ ॥ नाडींधमःस्वर्णकारःकलादोरुक्मकारकः ॥
स्याच्छांखिकःकांबविकःशौल्विकस्ताम्रकुट्टकः॥ ८ ॥ तक्षातुवर्द्धकिस्त्वष्टारथकारस्तुकाष्ठतट् ॥
ग्रामाधीनोग्रामतक्षःकोटतक्षोऽनधीनकः ॥ ९ ॥ ७ ७ ७

शुल्बंताम्रंतद्घटनंशिल्पमस्यशौल्विकः॥ ८ ॥ तक्षा। वर्द्धकिः। त्वष्टा। रथकारः। काष्ठतट्। पंचवर्द्धकेः। "सुतारइतिख्यातस्य"। वर्द्धयतिछिनत्तिकाष्ठंवर्द्धकिः। तक्षाणौ। त्वष्टारौ। काष्ठंतक्ष्णोतितनूकरोतिकाष्ठतट्। काष्ठतक्षौ। ग्रामाधीनोयस्तक्षासग्रामतक्षइत्येकं। "गांवचासुतारइतिख्यातस्य"। ग्रामेऽधीनोयांचतत्क्षणइतिटच्। अनधीनकः। स्वाधीनोयस्तक्षासकोटतक्षः स्यात्। एकं॥ ९॥ ७ ७

क्षुरी। मुंडी। दिवाकीर्तिः। नापितः। अंतावसायी। पंचनापितस्य। "नाव्हावी इतिख्यातस्य"। निर्णेजकः। रजकः। देवस्त्राणांधावकस्य। "परीट इतिख्यातस्य"। शौंडिकः। मंडहारकः। द्देसुराजीविनः। "कलाल इतिख्यातस्य"। शुंडा सुरास्थानं यस्यासौ शौंडिकः॥ १०॥ जाबालः। अजाजीवः। द्देअजापालस्य। "मेढपाळ. मेंढक्या. धनगर इतिख्यातस्य"। देवाजीवः। "देवाजीवीत्यपि"। देवलः। द्देदेवसेवोपजीविनः। "गुरव.

क्षुरिमुंडिदिवाकीर्तिनापितांतावसायिनः॥ निर्णेजकः स्याद्रजकः शौंडिकोमंडहारकः॥ १०॥
जाबालः स्याद्जाजीवोदेवाजीवस्तुदेवलः॥ स्यान्मायाशांबरीमायाकारस्तुप्रतिहारकः॥ ११॥
शौलालिनस्तुशौल्यूषाजायाजीवाःक्षशाश्विनः॥ ❀ ❀ ❀

देवळीइतिख्यातस्य। देवंलक्षणयातत्खंलातीतिदेवलः।" माया। शांबरी। द्देइंद्रजालस्य। "गारूडइतिख्यातस्य" शंबरस्यायं सुरस्येयं शांबरी। मायाकारः। प्रतिहारकः। "प्रातिहारकइत्यपि। द्देमायाविनः। गारुडीख्यातस्य"। प्रतिहारोव्याजः प्रयोजनमस्य। सतथा॥ ११॥ शौलाली। शौल्यूषः। ज याजावः। क्षत्राश्वी॥ ❀ ❀ ❀

भरतः।"भारतइत्यपि।कुशाश्वनचयत्रोक्तेनटत्रमधीयते। रंगावतारीद्वौलूषेनटो भरतभारताधिनिवाचसातिः"।नटः।षट्कुं कां०२
टेषु।"नटवाइतिरव्यातेषु"।नटतिनृत्यतिनटः।चारणः।कुशीलवः।द्वेकथकानांनटविशेषाणां।"कुत्सितंशीलमस्त्यस्यकुशीलवः"
॥१२॥मार्दंगिकाः।मौरविकाः। मृदंगवादनकुशलानां।"मृदंगी.पटवाद्यादितिरव्यातानं"।पाणिवादाः।पाणिघाः।द्वेयेपाणितलेनै
वपाण्यंतरेमृदंगादध्वनिमनुकुर्वंतितेषां।"हानाचे तालधारीइतिरव्यातानां।"वेणुध्माः।वैणविकाः।द्वेवेणुवादिनां।"पांवेकरीइति

भैरताइत्यमरः।नटाश्चारणाश्च कुशीलवाः ॥१२॥ मार्दंगिकामौरविकाः पाणिवादास्तुपाणिघाः ॥
वेणुध्माश्च वैणविकावीणा वादास्तुवैणिकाः॥१३॥जीवांतकःशाकुनिकोद्वौवागुरिकजालिकौ ॥

रव्यातानां"। वेणुध्माआदंतःअनपावत्। वीणावादाः। वीणिकः। द्वेवीणावादनशिल्पिनोः।"पिणेकरीइतिरव्यातानां"॥१३॥
जीवांतकः।"जीवंतिकइत्यपि"। शाकुनिकः। द्वेपक्षिणांहंतरि।"पक्ष्यांचापारधीइतिरव्याते"। वागुरिकः। जालिकः।द्वेजालेन
मृगान्बध्नतः। वागुरा-गबंधनीतयाचरतिवागुरिकः॥ ७ ७ ७ १४६

वैतंसिकः। कौटिकः। मांसिकः। त्रयंयोमांसविक्रयेणजीवतितस्य। "रवाटकीइतिख्यातस्य। वीतंसेनजीवपक्ष्यादिवंधनोपायेनचरतिवैतंसिकः। मांसंपण्यमस्यास्तीतिमांसिकः।"॥१४॥ भृतकः। भृतिभुक्। कर्मकरः। वैतनिकः। चत्वारिवेतनोपजीविनः। "चाकर. मजूर इतिप्रसिद्धस्य"। भृतिंवेतनं। भृतिंवेतनंभुंक्तेभृतिभुक्। वार्तावहः। वैवधिकः। "विवधिकइत्यपि"। द्वेवार्तायावाहके। "कावड्याइतिख्याते"। विवधः पर्याहारः। तंवहतिवैव

वैतंसिकःकौटिकश्चमांसिकश्चत्रयंत्रयं॥ १४॥ भृतकोभृतिभुक्कर्मकरोवैतनिकोपिसः॥
वार्तावहोवैवधिकोभारवाहस्तुभारिकः॥१५॥ विवर्णःपामरोनीचःप्राकृतश्चटथक्जनः॥
निहीनोपसदोजाल्मःक्षुल्लकश्चेतरश्चसः॥ १६॥ भृत्येदासेरदासेयदासंगोप्यकचेटकाः॥

धिकः। भारवाहः। भारिकः। "द्वेओझेकरीइतिख्यातस्य। भारीतिनांनोप्यन्यत्र"॥१५॥ विवर्णः। पामरः। नीचः। प्राकृतः। टथक्जनः। निहीनः। अपसदः। "अपद्वोदइतिभरतमालायां" जाल्मः। क्षुल्लकः। "खुल्लकः। खुल्लकस्त्रिषुनीचेत्वल्पइतिरभसः"। इतरः। दग्धानीचस्य। ॥१६॥ भृत्यः। दासेरः। दासेयः। दासः। "दाशइतितालव्यांतोपि"। गोप्यकः। चेटकः। "चेडकइत्यपि"॥

नियोज्यः। किंकरः। प्रैष्यः। "प्रेष्यइत्यपि"। भुजिष्यः। परिचारकः। एकादशदासस्य। प्रेष्यः। दादूहोडेतिहाङ्गिः। पराचितः। "पराजितोपि। परै

राजीयतेस्म"। परिस्कंदः। "परिष्कंदः। परेश्चेतिषत्वं। परिष्कनः। परिष्कन्नश्चइत्यपि" परजातः। परैधितः। चत्वारिपरेणसंवर्धितस्य। परै

राचीयतेवर्ध्यतेपराचितः। मंदः। तुंदपरिमृजः। "घस्निर्तुंदपरिमार्जोपि"। आलस्यः। द्वीतकः। अलसः। अनुष्णः। षट्अलसस्य। अलसम

नियोज्यकिंकरप्रैष्यभुविष्यपरिचारकाः ॥१७॥ पराचितपरिस्कंदपरिरोधेताः ॥
मंदस्तुंदपरिमृजआलस्यः द्वीतकोऽलसोनुष्णः ॥१८॥ दक्षेतुचतुरपेशालपटवःसूत्था
नउष्णश्च ॥ चंडालप्लुवमातंगदिवाकीर्तिजनंगमाः ॥१९॥ ७ ७

स्यस्य अलसः। अर्शआद्यच्। "अलसएव आलस्यः। स्वार्थेष्यञ्। अणिआलसइत्यपि"॥१८॥ दक्षः। चतुरः। पेशलः। पटुः। सूत्थानः।
उष्णः। षट्दक्षस्य। "उष्णत्वंशीघ्रकारित्वमस्यास्तीत्युष्णः।" चंडालः। प्लुवः। मातंगः। दिवाकीर्तिः। जनंगमः। "जलंगमइत्यपि"॥१९॥

निषादः। श्वपचः। "श्वपाकइत्यपि" अंतेवासी। चांडालः। पुक्कसः। "पुक्कसः श्वपचेऽधमइतिमेदिनी" दस्राचांडालस्य। अत्रावांतरभेदोस्तिकिंचित्मोनाहृतः। किरातादयस्त्वयोम्लेछजातयश्चंडालानांभेदाः। किरतिशरान्किरातः। अरण्यचराएते। "पुलिंदः कथ्यतेम्लेछेपुलिंदोपिनिगद्यतइतितारपालः"॥ २०॥ व्याधः। मृगवधाजीवः। मृगायुः। लुब्धकः। चत्वारिव्याधस्य। विध्यतिमृगान्व्याधः। कौलेयकः। सारमेयः। कुक्कुरः

निषादश्वपचावंतेवासिचांडालपुक्कसाः ॥ भेदाःकिरातशबरपुलिंदाम्लेछजातयः ॥ २० ॥
व्याधोमृगवधाजीवोमृगयुर्लुब्धकोपिसः ॥ कौलेयकःसारमेयःकुक्कुरोमृगदंशकः ॥ २१ ॥
शुनकोभषकःश्वास्यादलर्कस्तुसयोगितः ॥ श्वाविश्वकदुर्मृगयाकुशालःसरमाशुनी ॥ २२ ॥

"कुक्कुरइत्यनादिकोशः। कुर्कुरइतिराजमुकुटः।" मृगदंशकः ॥ २१ ॥ शुनकः। भषकः। श्वा। सशुनकस्य। श्वानौ। "कुक्कुरस्तुशुनिःश्वानःकपिलोमंडलशुनइतिवाचस्पतिः"। योगितः प्रायोगेणउ[illegible]पेतः श्वाअलर्कः स्यात्। "अलकइतिमुकुटः"। एकं। मृगयाकुशालः श्वा सविश्वकदुरित्येकं। "पारधीकुत्राइतिख्यातस्य। विश्वंकंदते। कदिआह्वाने" शुनीसरमास्यात्। एकं। सरमादेवशुनी। सामान्याभिधानंसूपचारात्॥ २२॥

योग्राम्यः सूकरः सविट्चरः स्यात्। एकं। "गोवडुकरइतिख्यातस्य। यस्तरुणःपशुरजादिः सवर्करः। एकं। बकराइत्यादिख्यातस्य तरुणपशुमात्र

स्य"। आच्छोदनं। मृगव्यं। आखेटः। मृगया। चत्वारिपापर्द्धेः। "शिकारीइतिख्यातायाः। मृगयास्त्रियां"॥ २३॥ लुब्धयोगाल्लुब्धकसंबंधा

दक्षिणाऋर्क्षिणेपार्श्वेऽरुर्व्रणमस्यसकुरंगकोदक्षिणेर्मास्यात्। एकं। दक्षिणेर्मांणौ। चौरः। "पन्थाधिचोरइत्यपि"ऐकागारिकः। स्तेनद्

विट्चरःसूकरोग्राम्योबर्करस्तुरुणःपशुः॥आच्छोदनंमृगव्यंस्यादाखेटोमृगयास्त्रियां॥ २३॥
दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मोकुरंगकः॥चौरैकागारिकास्तेनदस्कृत्स्करमोषकाः॥ २४॥
प्रतिरोधिपरास्कंदिपाटच्चरमलिम्लुचाः॥चौरिकास्तैन्यचौर्यंचस्तेयंलोध्रंतुतद्भवे॥ २५॥

स्युः। तस्करः। मोषकः॥ २४॥ प्रतिरोधिः। परास्कंदिः। पाटच्चरः। "पटच्चरइत्यपि"। चोरजीर्णपटयोः पटच्चर इतिनामानुशासनं"। मलिम्लुचः।

दशाचौरस्य। चौरिका। "चोरिकेत्यपि"। स्तैन्यं। "स्तेयं। स्तेयंस्तैन्यंच चौर्येस्याच्चौरिकाचोरिकेस्त्रियामितिधाचस्पतिः"। चौर्यं। त्रीणि

स्तेयस्य। चौरस्यभावः चौरिका। चौर्यधनंगोध्रंस्यात्। "लोध्रं। लोध्रमश्रुणिचोरितद्वतिविश्वः। लोतमितिजटाधरः"। एकं॥ २५॥ ७

मृगपक्षिणांबंधननिमित्तंयदुपकरणंपाशजालादिसंवीतंसइत्येकं।"वितंसइत्यपि"उन्माथः।कूटयंत्रं।द्वेमृगपक्षिबंधनार्थंछलेनयद्यंत्रंनिवेश्यतेतत्र।"सांपळाइतिख्याते"।वागुरामृगबंधनी।द्वेजालीकृतरज्जुविशेषे।"मृगांचेंजाळेंइतिख्याते"॥२६॥शुल्बं।"शुल्बेत्यपि।ङीषंतापि"वराटकं।रज्जुः।घटी।गुणः।पंचरज्जोः।"सुंब.दोरी.चऱ्हाटइतिख्यातायाः"।तत्रवराटकोस्त्रियां।रज्जुःस्त्रियां।घटीत्रिषु।रज्जुंशुल्वा.वराटोनेतिरत्नकोशः।"शुष्पंवटाकरइतिस्वामिपाठः"।ग्रहेःकूपात्सलिलमूर्ध्वेबाह्यतेयेनतस्मिन्यंत्रे।"राहाट.ळा

वीतंसस्तूपकरणंबंधनेमृगपक्षिणां ॥उन्माथःकूटयंत्रंस्याद्वागुरामृगबंधनी ॥ २६ ॥
शुल्बंवराटकंस्त्रीतुरज्जुःस्त्रिषुघटीगुणः ॥उद्घाटनंघटीयंत्रंसलिलोद्वाहनग्रहेः ॥ २७ ॥
पुंसिवेमावायदंडःसूत्राणिनरितंतवः ॥

टइतिख्याते"।उद्घाटनंघटीयंत्रंचेतिद्वयमित्यर्थः॥२७॥वेमा।"वेमइत्यपि"।वायदंडः।"वापदंडइत्योष्ठ्यमध्योपि"।द्वेस्त्रव्यूतिदंडस्य।"कोष्ठ्याचेंधोटेंइतिख्यातस्य"।वयतितंतूननेनवेमा।वेमानौ।ऊयतेइतिवायः।वानंतर्थौवायदंडः।तालव्यमध्यः।सूत्राणि।तंतवः।द्वे"सूतइतिख्यातस्य।सूत्रंतंतुरितिसमस्तंहारावल्यां"।तंतुःपुंसि॥

वाणिः। व्यूतिः। "व्युतिरितिद्विरूपकोशः। विशिष्टाऊतिर्व्यूतिः" द्वेतंतुवानस्य। "विणणेइतिख्यातस्य"। लेप्यंमृदापुत्तालिकादिकरणं। आदिनाकाष्ठपुत्तलिकाकर्मगृह्यतेतत्रपुस्तमित्येकं। "यदुक्तं। मृदायादारुणावाथवस्त्रेणाप्यथचर्मणा। लोहरत्नैः कृतंवापिपुस्तमित्यभिधीयतइति"॥ २८॥ वस्त्रदंतादिभिः कृतापुत्रिकापांचालिकास्यात्। "पंचालिकेत्यपि"। पंचभिर्वर्णैरिच्यतेभूष्यते। घञ्। एकं। बाहुलीइ

वाणिर्व्यूतिः स्त्रियोतुल्येपुस्तंलेप्यादिकर्मणि॥२८॥पांचालिकापुत्रिकास्याद्वस्त्रदंतादिभिः कृता॥
जतुत्रपुविकारेतुजातुषंत्रापुषंत्रिषु ॥ २९॥ पिटकःपेटकःपेटामंजूषाथविहंगिका ॥

तिरव्यातस्य"। पुत्रइवेतिकन्। दंतोगजदंतः। आदिनाचर्मलेत्यादिग्रहणं। जतुलाक्षातद्विकारोजातुषं। त्रपुवंगंतद्विकारोत्रापुषं: एकेकं त्रपुजतुनोःषुक्॥२९॥ पिटकः। पेटकः। पेटः। "पेडेतिसुकुटः। "पीडेतिस्वामी"। मंजूषा। चत्वारिवस्त्रालंकारादिस्थापनार्थंकृताया मंजूषायाः। "पेटीइतिख्यातायाः"। [illegible]त्यामितिस्वामी। विहंगिका ॥

भारयष्टिः। द्वे शिक्याधारलगुडस्य। "खुंटी इत्यादिख्यातस्य"। इयंभारोद्वाहनार्थाचतुर्दंडिकेतिसंज्ञाः। शिक्याधारस्कंधग्राह्योर्लगुड इति द्रविडाः। विहंगमेत्यपिपाठः। तस्यांभारयष्ट्यामालंबतेतन्नदालंबिशिक्यंकाचः स्यात्। काचः शिक्यमणौनेत्ररोगभेदेस्फटिकरत्नतेविश्वः। द्वे आलंबमानस्यरज्जुपंजरस्य। "शींकेइतिख्यातस्य" पादुका ॥ २० ॥ पादूः। उपानत्। त्रयमपिस्त्रियांपादत्राणस्य। "जोडाइतिख्यातस्य"

भारयष्टिस्तदालंबिशिक्यंकाचोथपादुका ॥ २० ॥ पादूरुपानत्स्त्रीसेवा पदीनापदायता ॥
नध्रीवर्ध्रीवरत्रास्यादश्वादेस्ताडनीकशा ॥ २१ ॥ चांडालिकातुकंडोलवीणाचंडालवल्लकी ॥

सेवोपानत्पदायतापादायामेनबद्धाअनुपदीना। एकं। "बाहाणइतिख्यातस्य"। नध्री। वर्ध्री। वरत्रा। त्रयंचर्ममय्यारज्वाः। "वाधीइतिख्यातायाः" अश्वादेस्ताडनीरज्जुः कशास्यात्। एकं। "जेरबंददितिख्यातस्य। आदिनाउष्ट्रगर्दभचोरादिग्रहः" ॥ २१ ॥ चांडालिका। "चंडालिकेत्यपि"। कंडोलवीणा। "कंडोलवीणेत्यपि। कंडोलीतिपृथगपि"। चंडालवल्लकी। त्रयंकिन्नरीतिख्यातायाअंत्यजवीणायाः॥

नाराची। एषणिका। हेस्वर्णकाराणांनाराचाकृतिर्यालोहशलाकातच्च। "कांटा.तराजूइतिख्याते"। शाणः। निकषः। कषः। त्रीणिस्वर्णादियत्रघर्षणेनपरीक्ष्यतेतेनस्याःशिलायाः। "कसोटी.निसाणाइत्यादिख्यातायाः"॥३२॥ ब्रश्चनः। पत्रपरशुः। हेस्वर्णादिछेदनार्थस्यपरशोः। "कानसइतिख्यातस्य" ईषिका। "इषिका। इषीकाइत्यपि"। तूलिका। हेशलाकोभेदस्य। "सळईइतिख्यातस्य"। तैजसंआवर्त्यतेयत्र

नाराच्कास्यादेषणिकाशाणस्तुनिकषःकषः ॥ ३२ ॥ ब्रश्चनःपत्रपरशु
रीषिकातूलिकासमे ॥ तैजसावर्तनीमूषाभस्त्राचर्मप्रसेविका ॥ ३३ ॥

सातैजसावर्तनी। स्वर्णादिपाकार्थःपात्रविशेषःमूषास्यात्। "मूसइतिख्याता। मुषा। मूषी। मुषी। मूषात्वावर्तनीमूषीतिशब्दार्णवः। मूषस्नेयइत्यस्माद्रिदाद्यङिह्रस्वादिरपि। ह्रस्वामुषामुषी।" एके। भस्त्रा। चर्मप्रसेविका। "चर्मप्रसेवकइत्यपि"। हेअग्निज्वलनार्थस्यचर्मप्रसेवकस्य। "भाताइतिख्यातस्य"॥ ३३॥

आस्फोटनी। "आस्फोटनी। वेधनी तुलास्फोटन्यांस्फोटनीदृषदंशिकेतिवाचस्पतिः"। वेधनिका। द्वेमण्योर्वेधोपयुक्तस्यशास्त्रभेदस्य। "सामनाइतिख्यातस्य"। कृपाणी। कर्तरी। द्वेस्वर्णपात्रादिविच्छिद्यतेयेननस्यकातरइतिख्यातस्य। वृक्षादनी। वृक्षभेदी। द्वेवृक्षभेदनार्थस्यशास्त्रभेदस्य। "वांकस. नासपीइतिख्यातस्य"। टंकः। "टंकइत्यपि"। पाषाणदारणः। द्वेपाषाणदारणार्थस्यघनभेदस्य। "टांकीइतिप्रसिद्धस्य" ॥ २४ ॥ क्रकचः। करपत्रंद्विकाष्ठादिविदारणार्थस्यकरंयतइतिख्यातस्य। आरा। चर्मप्रभेदिका। द्वेचर्मखंडनार्थस्यशास्त्रभेदस्य। आरीइति

आस्फोटनीवेधनिकाकृपाणीकर्तरीसमे ॥ वृक्षादनीवृक्षभेदीटंकःपाषाणदारणः ॥ २४ ॥
क्रकचोऽस्त्रीकरपत्रमाराचर्मप्रभेदिका ॥ सूर्मीस्थूणायःप्रतिमाशिल्पंकर्मफलादिकं ॥ २५ ॥
प्रतिमानंप्रतिबिंबंप्रतिमाप्रतियातनाप्रतिच्छाया॥प्रतिकृतिरर्चापुंसिप्रतिनिधिरुपमोपमानंस्यात् ॥ २६ ॥

ख्यातस्य। सूर्मी। "सूर्मिरितिवा"। स्थूणा। अयः प्रतिमा। त्रयंलोहप्रतिमायाः। कलागीतनृत्यादिकंयत्कर्मनाच्छिल्पं। आदिनारथकारादिकर्म॥ ॥ २५ ॥ प्रतिमानं। प्रतिबिंबं। प्रतिमा। प्रतियातना। प्रतिच्छाया। प्रतिकृतिः। अर्चा। प्रतिनिधिः। अष्टौप्रतिमायाः। "प्रतिकृत्यमीयतेऽनेनप्रतिमानं। माङ्माने"। प्रतिनिधिः पुंसि। उपमा। उपमानं। द्वेउपमितकरणस्य। "भावेकरणेच। येनोपमीयतेयाचोपमितिस्तयोरेतेनामनी

इत्यर्थः। केचिन्नुपूर्वान्वितेइत्याहुः" ॥ २६ ॥

समादिसप्तकंसमांतरस्य। "सहमानेनवर्ततेसमानंमानमस्येतिवासमानः। एतेवाच्यलिंगाः" सदृक्शांतः। अमीनिभसंकाशादयःउत्तरपदे स्थिताः सदृशपर्यायावाच्यलिंगाश्चस्युः। यथापितृनिभःपुत्रः। निभसमासोयं। पित्रासदृश इत्यर्थः। मातृनिभाकन्यामातुःसदृशीइत्यर्थः। आदिनाभूतरूपकल्पादिग्रहः। "यथापितृभूतः पितृरूपः पितृकल्पः" कर्मण्या। विधा। भृत्या। भृतिः। भर्म। वेतनं॥३८॥ भरण्यं। "भरण्येत्

वाच्यलिंगाःसमस्तुल्यःसदृक्षःसदृशःसदृक्॥ साधारणःसमानश्चस्युरुत्तरपदेत्वमी॥ ३७॥
निभसंकाशानीकाशप्रतीकाशोपमादयः॥ कर्मण्यातुविधाभृत्याभृतयोभर्मवेतनं॥ ३८॥ भरण्यं
भरणंमूल्यंनिर्वेशःपणइत्यपि॥ सुराहालेप्रियाहालापरिस्रुद्वरुणात्मजा॥ ३९॥ गंधोत्तमाप्रस
न्नेराकादंबर्यपरिस्रुता॥ मादिराकश्यमद्येचाप्यवदंशास्तुभक्षणं॥ ४०॥

पि"। भरणं। मूल्यं। निर्वेशः। पणः। एकादशवेतनस्य। सुरा। हलिप्रिया। हाला। परिस्रुत्। वरुणात्मजा॥ ३९॥ गंधोत्तमा। प्रसन्ना। इरा। कादंबरी। परिस्रुता। मादिरा। कश्यं। मद्यं। त्रयोदशमद्यस्य। कदंबेजातोरसःकादंबस्तंरातिकादंबरी।" तत्रगौडीपैष्टीचमाध्वीचविज्ञेयात्रिविधासुरेतिवचनात्। सुरादिद्वयं गौड्यादित्रिविधमद्यस्य। शेषंमद्यमात्रस्येत्येके। पानरुचिजननार्थंयद्व्यंजनंभक्ष्यतेसोवदंश इत्येकं। "भर्जितचणकादिभक्षणस्य"॥ ४०॥

शुंडापानं। मदस्थानं। द्वेमद्यगृहस्य। "शुंडा। पानं। इतिशब्दरत्नावली। शुंडापानगृहेमता। अप्यंबुहस्तिनीवेश्याहस्तिहस्तसुरासुचेतिमेदिनी। शुंडा पिजलहस्तिन्यांमदिराकरिहस्तयोरितिविश्वः। पानंपातिभाजनरक्षणेइतिमेदिनी"। पीयतेस्मिन्पानं। मधुवारः। मधुक्रमः। द्वेमधुपानपरिपाट्याः "मधुनोवारः समयःमधुवारः"। मध्वासवः। माधवकः। मधु। माध्वीकं। "माद्वीकमित्यपि। मृद्वीकाद्राक्षातस्याःविकारः। तस्यविकारइत्यण्"। चतारिमधुकपुष्पोद्भवस्यमद्यस्य "द्वौद्वौपर्यायावित्यपिमतं। मा[illegible]कमिति पाठेमध्वादिद्वयंद्राक्षारसस्य"। तत्रमाध्वीकंमधुचद्वयोः किंतु

शुंडापानंमदस्थानंमधुवा[illegible]मधूत्कमाः॥ मध्वासवोमाधवकोमधुमाध्वीकमद्वयोः॥ ४१॥ मैरेयंवासवःसी[illegible]मेदकोजगलः पुं॥ ७ ७

क्लीबेएव॥ ४१॥ मैरेयं। आसवः। सीधुः। "तालव्यादिरपिसीधुरिक्षुरसैःपक्वैरपक्वैरासवोभवेत्। मैरेयंधातकीपुष्पगुडधानांबुसंहतमितिमाधवः। तथापिभरतः। त्योक्तं" त्रयमिक्षुरसाद्यासवादिजन्यस्यमद्यवि[illegible]। सीधुरस्त्रियां। आसवःपुंसि। मेदकः। जगलः। द्वेसुराकल्पस्य। मद्यभेदस्येत्येके। "जगलोमदनद्रुमे। मेदकेपिष्टमद्येचेतिकोशांतरं"॥ ७ ७

संधानं। अभिषवः। द्वे मद्यसंधानस्य। फलवंशांकुरादिकं दीर्घकालंयत्संधीयतेतत्स्येत्येके। किण्वं। "कण्वमित्यपि"। नग्नहूः। द्वे तंडुलादिद्रव्यकृत सुराबीजस्य। "मत्तनग्नकृताह्वानस्येत्यन्ये"। नग्नह्वौ ॥ ४२ ॥ सुरायामंडअग्रभागःकारोत्तरः। "कारेणक्रियायाउत्तरःकारोत्तरः। कारोत्तरइत्यपि"। एकं। आपानं। पानगोष्ठिका। द्वे पानार्थायाःसभायाः। "आसंभूयपिबंत्यत्रआपानं"। चषकः। पानपात्रं। द्वे "मद्यपात्रस्य। चषकोऽस्त्री सुरापात्रेमधुमद्यप्रभेदयोरितिमेदिनी"। सरकः। अनुतर्षणं। द्वे मद्यपानस्य। अपिशब्दात्सरकोप्यस्त्रीसरकं पानानुतर्षोनेतिरत्नकोशः।

संधानंस्यादभिषवः क्लिण्वंपुंसितुनग्नहूः ॥ ४३ ॥ कारोत्तरःसुरामंडआपानंपानगोष्ठिका ॥
चषकोऽस्त्रीपानपात्रंसरकोऽप्यनुतर्षणं ॥ ४४ ॥ धूर्तोऽक्षदेवीकितवोऽक्षधूर्तोद्यूतकृत्समाः ॥
स्युर्लग्नकाःप्रतिभुवःसभिकाद्यूतकारकाः ॥ ४५ ॥ ✿ सरकःसीधुपानेक्षुशीधुनोमद्य

भाजनइत्यजयः" ॥ ४३ ॥ धूर्तः। धिर्तइत्यपिपाठः। धावनेनआर्तः"। अक्षदेवी। कितवः। अक्षधूर्तः। द्यूतकृत्। पंचद्यूतकृतः। "सोंगटीबाज. जुवेबाजइतिख्यातस्य" अक्षैर्दीव्यतिअक्षदेवी। इन्नंतः। लग्नकः। प्रतिभूः। द्वे ऋणादौप्रतिनिधिभूतस्य। "जामीनइतिख्यातस्य। प्रतिनिधिर्भवति प्रतिभूः"। सभिकाः। द्यूतकारकाः। द्वयंयेद्यूतकारयंतितेषां। "सभाद्यूतमाश्रयत्वेनास्यास्तिसभिकः" ॥ ४४ ॥

द्यूतः। अक्षवती। कैतवं। पणः। चत्वारिद्यूतस्य। "अक्षाः पाशकाः संत्यस्यांसाअक्षवती"। पणः। ग्लहः। इतिद्वेद्यूतजयेयत्भाषाबंधेनग्राह्यंतस्य। अक्षः। देवनः। पाशुकः। चयेशारिपरिणयनेहेतुभूतस्यपाशस्य। "फांसेइतिख्यातस्य"॥ ४५॥ शारीणामितस्ततोनयनेपरिणाय इत्येकं। अस्त्रियामित्यस्य अष्टापदेनशब्देनसंबंधः। अष्टापदं। शारिफलं। द्वेशारीणामाधारस्यकोष्ठकयुक्तस्यवस्त्रादेः। "सारीपटइति

द्यूतोस्त्रियामक्षवतीकैतवंपणइत्यपि॥ पणोऽक्षेषुग्लहोक्षास्तुदेवनाःपाशकाश्चते॥४५॥
परिणायस्तुशारीणांसमंतान्नयनेस्त्रियां॥ अष्टापदंशारिफलंग्राणिद्यूतंसमाह्वयः॥४६॥

ख्यातस्य"। शास्यस्तुकाष्ठादिरचितोद्यूतोपकरणविशेषः। ग्राणिद्यूतंग्राणिनांमेषकुक्कुटादीनांद्यूतंमिथोयुद्धलक्षणः क्रीडाविशेषः समाह्वयः। अग्राणिभिःकृतंयत्तुतल्लोकेद्यूतमुच्यते। ग्राणिभिःक्रियतेयत्तुसविज्ञेयःसमाह्वयइत्युक्तेः। एकं॥ ४६॥ ७ ७

अत्रकेषांचिल्लिंगभेदविधानाभावात्सामर्थ्यंपरिहरति । उक्तादिति । अत्रशूद्रवर्गेयोगिकाःकुंभकारमालाकारप्रभृतयः शब्दाः काव्यपु
राणादिषुपुंस्येवभूरिप्रयोगत्वात्प्रचुरप्रयोगदर्शनादेकस्मिन्नेवलिंगेउक्तानिर्दिष्टास्तेन्यतोन्यत्रस्त्रीत्वादिविशिष्टेविशिष्यदृष्टोसत्यांता
दृग्म्यात् विशिष्टानांविशेष्यधर्मत्वाल्लिंगांतरेस्त्रीलिंगादावप्यूहनीयाः।अपिशब्दान्नूरूढा अपिकरणकुलालादयोजातिवचनात्पुंसिस्त्रियांचवर्तंते

उक्ताभूरिप्रयोगत्वादेकस्मिन्येत्रयोगिकाः ॥ ताद्र्म्यादन्यतोदृत्तावूह्यालिं
गांतरेपिते ॥ ४७ ॥ ॥ इतिशूद्रवर्गः ॥ ॥ इत्यमर॰सेंहकृतौना
मलिंगानुशासने ॥ द्वितीयःकांडोभूम्यादिः सांगएवसमर्थितः ॥ २ ॥ ७

इतिज्ञेयंयस्यावयवशक्त्यएवार्थोबुध्यतेसयोगिकः । यस्यावयवशक्तिमनपेक्ष्यसमुदायशक्तिमात्रेणार्थोबुध्यतेसरूढः । तत्रयोगिको
लिंगांतरेयथाकुंभकारी । स्त्री । कुंभकारंकुलं । एवंमालाकारी । मालाकारं । अर्णंतत्वात्स्त्रियांडीष् । अयोगिकोयथा । करणी । कुलाली । अ
त्रजातेरस्त्रीविषयादितिङीष् ॥ ४७ ॥ ॥ इतिशूद्रवर्गः ॥ ॥ श्रीमत्यमरविवेकंमहेश्वरेणविरचितएषायं ॥ ॥ भूम्यादिर्द्वितीयः
कांडः समाप्तः ॥ २

वर्गनामानि	मूलश्लोक	क्षेपकश्लोक
१ भूमिवर्गः	१८	१
२ पुरवर्गः	२०	·॥·
३ शैलवर्गः	८	·॥·
४ वनौषधिवर्गः	१६९॥·	०
५ सिंहादिवर्गः	४३	२॥·
	२५८॥·	४॥·

संकलनयावर्गः १० मूलश्लो० ७२३॥· क्षेपकश्लो० १२ एवं ७४५॥·

वर्गनामानि	मूलश्लो०	क्षेपकश्लो०
६ मनुष्यवर्गः	११९॥·	१
७ ब्रह्मवर्गः	५८	५
८ क्षत्रियवर्गः	११९॥·	०
९ वैश्यवर्गः	१११	१॥·
१० शूद्रवर्गः	४७	०
	४७९	७॥·

इत्यमरकोशेसटीकोद्वितीयःकांडःसमाप्तः

अथअमरकोशेसटीकतृतीयकांडःप्रारंभः

श्रीगणेशायनमः॥ ॥ अथतृतीयकांडेव्याख्यायते। तत्रवक्ष्यमाणवर्गानाह। विशेष्यनिघ्नैरिति। सामान्येसाधारणत्वात्सामान्याख्येस्मिन्कांडेविशेष्यनिघ्नैर्विशेष्यंस्त्रीदारादिपूर्वोक्तंतदधीनलिंगवचनैःसुकृत्यादिभिःशब्दैःतथासंकीर्णैःपरस्परविजातीयार्थैःकर्मपारायणादिभिःतथानानार्थैःअनेकार्थैश्चवर्तमानैर्नाकलोकादिभिःअव्ययैराडादिभिर्लिंगसंग्रहैःस्त्रियामादूदूरामेकाजित्यादिभिरादिशब्दान्नामसंग्रहैश्चलंकारोफालिकेत्यादिभिःशब्दैरुपलक्षितास्तत्तन्नामकावर्गाःवक्ष्यंतइतिशेषः। तेचवर्गाःस्वतंत्रानेत्याह। वर्गसंश्रयादिति। वर्गाःसंश्रयायेषांतेपूर्वोक्तस्वर्गादिवर्गसंबंधिनएवेत्यर्थः॥१॥ इहच्छा

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि॥ लिंगादिसंग्रहैर्वर्गाः सामान्येवर्गसंश्रयाः॥१॥
स्त्रीदारायैर्यथाद्रव्योर्व्यंयादृशोः प्रस्तुतंपदैः॥ गुणद्रव्यक्रियाशब्दास्तथास्युस्तस्यभेदकाः॥२॥

स्त्रीरूपादिभेदेनैवप्रायशोलिंगनिर्णयः नहूदेवात्रापिवर्गेस्यादितिभ्रमनिरासार्थंव्यापकंलक्षणमाह।स्त्रीदारायैरिति। यादृशोः स्त्रीलिंगत्वादियुक्तैः स्त्रीदारायैः पदैर्यद्विशेष्यंस्त्रीदारादिरूपंयथाप्रस्तुतंप्रक्रांतंतस्यविशेष्यस्यभेदकाव्यावर्तकागुणद्रव्यक्रियाविशिष्टाःशब्दास्तथास्युः। विशेष्यस्यथादृशोलिंगयचनैः॥ दृशालिंगवचनाएवभवेयुरित्यर्थः। तत्रगुणसुकृतादिशब्दाविशिष्टोयथा। सुकृतिनीस्त्री। सुकृतिनोदाराः। सुकृतिकुलं। द्रव्यंदंडादिशब्दाविशिष्टोयथा। दंडिनीस्त्री। दंडिनोदाराः। दंडिकुलं। क्रियावचनादिव्यापारशब्दाविशिष्टोयथा। पाचिकास्त्री। पाचकादाराः। पाचककुलं॥ २॥ ७ ५

सुकृती। पुण्यवान्। धन्यः। सर्वभाग्यसंपन्नस्य। "धन्याधात्र्यामलक्योः स्याद्धन्यंपुण्यवतित्रिषु। निधिनिश्वमेदिन्यौ। सुकृतमस्यास्तिसुकृती"। महेच्छः। महाशयः। हेउदारसंज्ञस्तस्यदयालोः। "आशयः स्यादभिप्रायेमानसाधारयोरपि। निमेदिनी"। हृदयालुः। सुहृदयः। "सहृदयइतिपाठः। अत्रप्रशस्यपरत्वंहृदयशब्दस्य। हृदयवान्। हृदयिकइत्यपि" हृदयस्यचित्तंप्रशस्तंतस्य। महोत्साहः। महोद्यमः। हेदुरापेपिकृत्येऽध्यवसितक्रियस्य।

सुकृतीपुण्यवान्धन्योमहेच्छस्तुमहाशयः॥ हृदयालुःसुहृदयोमहोत्साहोमहोद्यमः॥ ३॥
प्रवीणेनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः॥ वैज्ञानिकःकृतमुखःकृतीकुशलइत्यपि॥ ४॥

"महानुद्यमोऽस्यमहोद्यमः"॥ ३॥ प्रवीणः। निपुणः। अभिज्ञः। विज्ञः। निष्णातः। शिक्षितः। वैज्ञानिकः। "व्रीह्यादित्वाठञिविज्ञानिक इत्यपि" कृतमुखः। कृती। कुशलः। दक्षेप्रवीणस्य। "कृतंकर्मप्रवीणस्यकृती"॥ ४॥

पूज्यः । प्रतीक्ष्यः । हे । एतल्लक्ष्यभक्तिः प्रतीक्ष्येषुकुलोचितेतेइति । सांशयिकः । संशयापन्नमानसः । हेसंशय पन्नमानसंयत्रस्थाण्वादौनस्य । तथाचसंशयविषयीभूतोर्थः सांशयिकइतिदीक्षिताः । संशयमापन्नइतिठञ् । दक्षिणीयः । दक्षिणार्हः । दक्षिण्यः "दाक्षिण्यइत्यपि" त्रीणियोदक्षिणामर्हतितस्य ॥ ५ ॥ वदान्यः । "वदन्यइत्यपि" स्थूललक्ष्यः । "स्थूललक्षइत्यपि" दानशौंडः । बहुप्रदः । चत्वारिदानशब्दस्य "मांयाचस्वेतिव

पूज्यःप्रतीक्ष्यःसांशयिकःसंशयापन्नमानसः ॥ दक्षिणीयोदक्षिणार्हःतत्रदाक्षिण्यइत्यपि ॥ ५ ॥
स्युर्वदान्यस्थूललक्ष्यदानशौंडाबहुप्रदे ॥ जेवातृकःस्यादायुष्मानंतर्वाणिस्तुशास्त्रवित् ॥ ६ ॥

दानेवदान्यः । स्थूलैर्महद्भिर्लक्ष्यतेस्थूललक्ष्यः" । जेवातृकः । आयुष्मान् । हे । "जेवातृकः पुमानूसोमेकृषकायुष्मतोस्त्रिषितिविश्वमेदिन्यो । अतिशायितमायुरस्यायुष्मान् " । अंतर्वाणिः । शास्त्रवित् । हे शास्त्रज्ञस्य । "अंतर्वाणयति । वेणशब्दे" ॥ ६ ॥

परीक्षकः। कारणिकः। हेप्रमाणैरर्थनिश्चायकस्य। "करणेश्वरतिकारणिकः"। वरदः। समर्ईकः। हेवराणांदातरि। हर्षमाणः। विकुर्वाणः। प्रमनाः। हृष्टमानसः। चत्वारिहृष्टचेतसः। "प्रकृष्टंमनोयस्यप्रमनाः।"॥ ७॥ दुर्मनाः। विमनाः। अंतर्मनाः। त्रीणिसांतानिव्याकुलचेतसः। "दुस्थितंमनोस्यदुर्मनाः।" उत्कः। उन्मनाः। हेउत्कंठितस्य। "उद्गतंमनोऽस्यउन्मनाः" दक्षिणः। सरलः। उदारः। त्रयंसरलस्य। दक्षतिवर्द्धतेऋजुत्वाशयत्वाद्

परीक्षकःकारणिकोवरदस्तुसमर्ईकः ॥ हर्षमाणोविकुर्वाणःप्रमनाहृष्टमानसः॥ ७ ॥
दुर्मनाविमनाअंतर्मनाःस्यादुत्कउन्मनाः॥ दक्षिणेसरलोदारौसुकलोदातृभोक्तरि ॥ ८ ॥
तत्परेप्रसितासक्ताविष्टार्थोद्युक्तउत्सुकः॥ प्रतीतेप्रथितख्यातवित्तविज्ञातविश्रुताः॥ ९ ॥

क्षिणः। योदानान्वासौशीलंकाचतन्नसुकलइत्येके॥ ८॥ तत्परः। प्रसितः। आसक्तः। त्रीणि "तत्परंउत्तमंयस्यतत्परः" इष्टार्थोद्युक्तः। उत्सुकः। अभिमतार्थेसोद्योगस्य। प्रसिना। सक्ता विष्टाउक्तइतिपाठेआविष्टांतंचतुष्कमासक्ते। "पंचाशिद्वत्सर्गाइत्येके" प्रतीतः। प्रथितः। ख्यातः। वित्तः विज्ञातः। विश्रुतः। षट्ख्यातस्य "प्रथितेस्मप्रथितः। प्रथप्रख्याने"॥ ९॥

क्षतलक्षणः। आहतलक्षणः। "आहितलक्षणइत्यपि।" दृश्यौर्यादिभिख्याते। "लक्षणंनाम्निचिन्हेचेतिविश्वः। आहतमभ्यस्तंलक्षणमस्य। आहते गुणिनेपिस्यादितिविश्वः"। षड्लक्ष्यं। ककुस्थइत्याहतलक्षणोभूदिति। इभ्यः। आढ्यः। धनी। त्रीणि "इभ्योधनवतीभ्यातुकरेण्वांसल्लकीतरावितिहेमचंद्रः। बहुधनमस्यधनी"। स्वामी। ईश्वरः। पतिः। ईशिता॥ ९०॥ अधिभूः। नायकः। नेता। प्रभुः। परिवृढः। अधिपः। दशाप्रभोः। ईशि

गुणैःप्रतीतेसुकृतलक्षणाऽहतलक्षणो॥ इभ्यआढ्योधनीस्वामीत्वीश्वरःपतिरीशिता॥ १०॥
अधिभूर्नायकोनेताप्रभुःपरिवृढोधिपः॥ अधिकर्द्धिःसमृद्धःस्यात्कुटुंबव्याप्तस्तत्कयः॥ ११॥
स्याद्भ्यागारिकस्तास्मिन्नुपाधिश्चपुमानयं॥ वरांगरूपोपेतोयःसिंहसंहननोहिसः॥ १२॥

तारौ। अधिभुवौ। नेतारौ। अधिकर्द्धिः। समृद्धः। द्वैसुसंपन्नस्य। "अधिकाकर्द्धिर्यस्यअधिकर्द्धिः।" कुटुंबव्याप्तः॥ ११॥ अभ्यागारिकः। उपाधिः। त्रीणिकुटुंबपोषणादिव्यापारयुक्तस्य। "अभ्यागारेनियुक्तः अभ्यागारिकः"। उपाधिर्नित्यंपुंसि। अंगान्यवयवाःरूपंलावण्यंवरैरंग रूपेरूपेतोयः सिंहहननइत्येकं॥ १२॥

यःसत्वसंपदाव्यसनेष्यक्षुब्धमनःसत्वंतत्संपत्यासंपन्नःसत्कार्यंकरोतिसनिर्वार्यइत्येकं।"निर्धार्यइत्यपि।संपन्नइत्यत्रसंयुक्तइतिपाठः।"अवा
क्।मूकः।द्वे"मूयतेबध्यतेवागस्य"मनोजवसः।"मनोजवइत्यपि।मनोजवपितृसधर्माणइतिनाममाला।"पितृसंनिभः।द्वेपितृतुल्यस्य।
॥१३॥परिणेत्रेआदरपूर्वकमलंकृतांकन्यांयोददातिसकूकुदइत्येकं।"कुकुदइत्यपि"लक्ष्मीवान्।लक्ष्मणः।श्रीलः।"श्लीलइत्यपि"।श्रीमान्

निर्वीर्यः कार्यकर्तायः संपन्नः सत्वसंपदा ॥ अवाचिमूकोऽथमनोजवसः पितृसन्निभः ॥१३॥ सत्कृत्यालंकृतां
कन्यांयोददातिसकूकुदः ॥ लक्ष्मीवा ँल्लक्ष्मणः श्रीलःश्रीमान्स्निग्धस्तवत्सलः ॥ १४॥ स्याद्दयालुः कारुणिकः कृ
पालुः सूरतः समाः ॥ स्वतंत्रोपाहृतः स्वैरीस्वच्छंदोनिरवग्रहः ॥ १५ ॥ परतंत्रः पराधीनः परवान्नाथवानपि ॥

चत्वारिलक्ष्मीवतः।स्निग्धः।वत्सलः।द्वेस्नेहयुक्तस्य ॥ १४ ॥ दयालुः।कारुणिकः।कृपालुः।सूरतः।"सुरतइत्यपि"।चत्वारिदयाशीलस्य।
स्वतंत्रः।अपाहृतः।स्वैरी।"स्वैरइत्यपि"स्वच्छंदः।निरवग्रहः।पंचस्वच्छंदस्य।"स्वःआत्मातंत्रंप्रधानंयस्यस्वतंत्रः।"॥ १५॥ परतंत्रः।पराधीनः
परवान्।नाथवान्।चत्वारिपराधीनस्य।"परःस्वाम्यस्यास्तिपरवान्।"परवंतौ।

अधीनः। निघ्नः। आयत्तः। अस्वच्छंदः। गृह्यकः। पंचकमधीनमात्रे। "नस्वच्छंदोऽस्यास्वच्छंदः।" नवानामेकार्थत्वमित्येके ॥१६॥ खलपूः। बहुकृत् द्वेसंमार्जनादिकारिणः। खलंक्षत्वरंपुनातिमार्जयतिखलपूः। खलपूः। दीर्घसूत्रः। चिरक्रियः। द्वेयःस्वल्पकालसाध्यंचिरेणकरोतितस्यालसविशेषस्य। चिरेणक्रियाऽस्यचिरक्रियः। जाल्मः। असमीक्ष्यकारी। द्वेयोगुणदोषानविमृश्यकरोतितस्य। यःक्रियासुमंदोऽलसोमूढोवासकुं

अधीनोनिघ्नआयत्तोऽस्वच्छंदोगृह्यकोप्यसौ ॥१६॥ खलपूःस्याद्बहुकरोदीर्घसूत्रश्चिरक्रियः॥
जाल्मोऽसमीक्ष्यकारीस्यात्तुल्येऽन्यदःक्रियासुयः॥१७॥कर्मक्षमोऽलंकर्मणिःक्रियावान्कर्मसूद्यतः॥
सकर्मःकर्मशीलोयःकर्मशूरस्तत्कर्मठः ॥१८॥

ठइत्येके ॥१७॥ कर्मक्षमः। अलंकर्मणिः। द्वेकर्मणिशक्तस्य। "कर्मण्येक्रियायेअलंसमर्थेः अलंकर्मणिः।" कर्मकृयउद्युक्तःसक्रियावान्। एवं कार्मः। कर्मशीलः। द्वेनित्यंकर्मण्येवप्रवृत्तस्य। स्त्रियांतुकार्मी। कर्मशूरः। कर्मठः। द्वेप्रयत्नेनयआरब्धंकर्मपरिसमापयतितस्य। "कर्मणि घटतेकर्मठः।" ॥१८॥

भरण्यभुक्। "कर्मण्यभुगित्यपि" कर्मकरः। द्वेवेतनंगृहीत्वाकर्मकरोतिनस्य। तत्कर्मैवक्रियायस्यसः क्रियः। वेतनंविनापिक्रियावान्सकर्मकार इत्येकं। अपस्नातः। मृतस्नातः। द्वेमृतमुद्दिश्यस्नातस्य। आमिषाशी। शौष्कुलः। द्वेमत्स्यमांसभक्षकस्य। शाष्कलइतिवापाठः। "शुष्कलः। शुष्कलः शुष्कमांसस्यपणिकेपिशिताशिनीतिहैमः।" ॥ १९ ॥ बुभुक्षितः। क्षुधितः। जिघत्सुः। अशनायितः। चत्वारिबुभुक्षितस्य। "अशनस्यइच्छा अशनायासाजाताऽस्य"। परान्नः। परपिंडादः। द्वेपरान्नोपजीविनः। भक्षकः। घस्मरः। अघ्नरः। त्रीणिभक्षणशीलस्य। "अतीत्यन्न

भरण्यभुक्कर्मकरःकर्मकारस्तुतक्रियः ॥ अपस्नातोमृतस्नातआमिषाशीतुशौष्कुलः ॥ १९ ॥ बुभुक्षितस्यात्क्षुधितोजिघत्सुरशनायितः ॥ परान्नःपरपिंडादोभक्षकोघस्मरोऽघ्नरः ॥ २० ॥ आद्यूनःस्यादौदरिकोविजिगीषाविवर्जिते ॥ उभोत्वात्मंभरिःकुक्षिंभरिःस्वोदरपूरके ॥ २१ ॥ सर्वान्नीनस्तुसर्वान्नभोजीगृध्नस्तुगर्धनः ॥

रः।" ॥ २० ॥ आद्यूनः। औदरिकः। द्वेविजिगीषाविवर्जितेऽत्यर्थेच्छारहिते। बुभुक्षयाऽत्यंतपीडितेइत्यर्थः। उदरेत्रासितऔदरिकः। उदराद्ठगाद्यूनइतिठक्। आत्मंभरिः। कुक्षिंभरिः। द्वेयः स्वोदरंबिभर्तिनस्य। "पोटभरूइतिख्यातस्य।" आत्मानंबिभर्तिआत्मंभरिः ॥ २१ ॥ सर्वान्नीनः। सर्वान्नभोजी। द्वेयःसर्वेषांवर्णानांअन्नानिभुंक्तेतस्यपरान्नहंसादेः। गृध्नः। गर्धनः। द्वेआकांक्षाशीलस्य ॥

लुब्धः। अभिलाषुकः। तृष्णक्। णिनिअभिलाषशीलस्य। "लुभ्यतिस्मलुब्धः"। पंचाप्यस्यतिकेचित्। तृष्णजो। लोलुपः। लोलुभः। द्वे अतितृष्णाशीलस्य। "गार्हतंलुंपतिलोलुपः"॥ २२॥ सोन्मादः। "उन्मदइतिमून्मादइतिवापाठः। सुअतिशयितउन्मादोऽस्य"। उन्मादिष्णुः। द्वेउन्मादशीलस्य। अविनीतः। समुद्धतः। द्वेदुर्विनीतस्य। "नव्यनायिअविनीतः"। मत्तः। शौंडः। उत्कटः। क्षीबः। "क्षीबन्मिननोन्मोप्यस्ति" चत्वारि

लुब्धोभिलाषुकस्तृष्णक्समौलोलुपलोलुभौ ॥ २२॥ सोन्मादस्तून्मादिष्णुः स्यादविनीतः
समुद्धतः ॥ मत्तेशौंडोत्कटक्षीबाःकामुकेकमिताऽनुकः॥ २३॥ कम्रःकामयिताऽभीकुःक
मनःकामनोऽभिकः॥ विधेयोविनयग्राह्यवचनेस्थितआश्रवः॥ २४॥ ७, ७, ७,

मत्तस्य। "उत्कटस्तीव्रमत्तयोरितिहैमः।" कामुकः। कमिता। अनुकः॥ २३॥ कम्रः। कामयिता। अभीकः। कमनः। कामनः। अभिकः। नवकामुकस्य। अनुकामयतेअनुकः। अभिकोदीर्घमध्योह्रस्वमध्यश्च। विधेयः। विनयग्राही। वचनेस्थितः। आश्रवः। चत्वारिवचनग्राहिणि। "प्रहवनोनिहवनोवाविधानुशाक्यः विधेयः। वचनेतिष्ठतिस्मवचनेस्थितः। तत्पुरुषकृतीत्यलुक्"॥ २४॥ ५ ५ ५

वश्यः। प्रणेयः। द्वेवशंगतस्य। "प्रकर्षेणनेतुंशक्यःप्रणेयः।" अत्रविधेयादिषडपिवशंगतस्यवा। निभृतः। विनीतः। प्रश्रितः। नयेविनीतस्य। "नितरांअभारिनिभृतः। भृञ्भरणे।" धृष्टः। धृष्णक्। "धृष्णुरित्यपि" वियातः। त्रीणिअविनीतस्य। "विरुद्धंयातंचेष्टितंयस्यवियातः।" धृष्णजौ। प्रगल्भः। प्रतिभान्वितः। द्वेसप्रतिभस्य। प्रत्युत्पन्नमतित्वंप्रतिभा। "प्रज्ञानवनवोन्मेषशालिनीप्रतिभामतेतिरुद्रः ॥२५॥ अधृष्टः। शार्ङ्गिनः।

वश्यः प्रणेयोनिभृतविनीतप्रश्रिताःसमाः ॥ धृष्टेधृष्णौवियातश्चप्रगल्भः प्रतिभान्विते ॥ २५ ॥
स्यादधृष्टेतुशालीनोविलक्षोविस्मयान्विते ॥ अधीरेकातरस्त्रस्तौभीरुभीरुकभीलुकाः ॥ २६ ॥
आशंस्कराशंसितरिगृहयालुर्ग्रहीतरी ॥ ७ ७ ७ ७

द्वेसलज्जस्य। विलक्षः। विस्मयान्वितः। द्वे "परकीयधर्मशीलादेर्यत्राश्चर्यस्य"। अधीरः। कातरः। द्वेभयक्षुत्पिपासादिव्याकुलस्य। "ईषन्नरतिकातरः। ईषदर्थेचेतिकोः कादेशः"। त्रस्तः। "त्रस्तुरित्यपि"। भीरुः। "भीलुरित्यपि"। भीरुकः। भीलुकः। चत्वारिभयशीलस्य ॥ २६ ॥ आशंस्कः। आशंसिता। द्वेवांछाशीलस्य। गृहयालुः। ग्रहीता। "गृहीतेत्यपि" द्वेग्रहणशीलस्य ॥ ७ ७ ७

श्रद्धाआस्तिक्यबुद्धिस्तयायुक्तेश्रद्धालुरित्येकं। पतयालुः। पातुकः। द्वेपतनशीलस्य। "पतयतिनच्छीलः पतयालुः" ॥२७॥ लज्जाशीलः। अप त्रपिष्णुः। द्वेलोकलज्जायुक्तस्य। "लज्जाशीलमस्यलज्जाशीलः।" वंदारुः। अभिवादकः। द्वेवंदनशीलस्य। "वंदतेनच्छीलः वंदारुः।" शारारुः। घातुकः। हिंस्रः। त्रीणि हिंसाशीले। "शृणातिनच्छीलः शारारुः।" वर्धिष्णुः। वर्धनः। द्वे वर्द्धनशीलस्य। "वर्द्धतेनच्छीलः वर्द्धिष्णुः।" ॥२८॥ उत्पतिष्णुः

श्रद्धालुः श्रद्धयायुक्तेपतयालुस्तत्पातुकौ॥२७॥लज्जाशीले ऽपत्रपिष्णुर्वंदारुरभिवादके ॥
शारारुर्घातुकौ हिंस्रः स्याद्वृद्धिष्णुवर्द्धनः ॥ २८ ॥उत्पतिष्णुस्तूत्पतितालंकरिष्णुस्तुमंडनः॥
भूष्णुर्भविष्णुभवितावर्तिष्णुर्वर्तनः समौ ॥ २९ ॥

उत्पतिता। द्वेउत्पतनशीलस्य। "उत्पतितनच्छीलः उत्पतिष्णुः।" अत्रयेतृन्विष्णुच्स्नु क्रुक्मरजित्यादयः त्रत्ययास्तेतच्छीलतद्धर्मतत्साधकारिषुवो द्रष्टव्याः। नाच्छील्यप्रयोगः प्रायेण। अलंकरिष्णुः। मंडनः। द्वे अलंकरणशीले। भूष्णुः। भविष्णुः। भविता। त्रीणि भवनशीलेवर्तिष्णुः। वर्तनः। द्वेवर्तनशीले ॥ २९ ॥

निराकरिष्णुः।क्षिप्नुः।"क्षिष्णुरितिकेचित्"।द्वे निराकर्तरि। सांद्रोपनः सचासौस्निग्धश्चसांद्रस्निग्धः मेदुरः स्यात्। एकं। यल्लक्ष्यं। मेधेमेदुरमंबरमिति।ज्ञाना। विदुरः। विंदुः। त्रयंज्ञानरि।"वेदनशीलःविदुरः।" विकाशी।"तालव्यांनाम"। विकस्वरः।"विकश्वरइत्यपि"।द्वेविकासशीले ॥ ३०॥ विस्मृत्वरः। विस्मृमरः।प्रसारी। विसारी। चत्वारिप्रसरणशीले। सहिष्णुरित्यादिषट्क्षमाशीले॥ ३१॥ क्रोधनः।अमर्षणः।कोपी। त्री

निराकरिष्णुः क्षिप्नुः स्यात्सांद्रस्निग्धस्तुमेदुरः ॥ ज्ञानातुविदुरोबिंदुर्विकाशीतुविकस्वरः ॥ ३० ॥
विस्मृत्वरोविस्मृमरःप्रसारीचविसारिणि ॥ सहिष्णुःसहनः क्षंतानितिक्षुः क्षमिताक्षमी ॥ ३१ ॥
क्रोधनोमर्षणःकोपीचंडस्त्वत्यंतकोपनः ॥ जागरूकोजागरिताघूर्णितःप्रचलायितः ॥ ३२ ॥
स्वप्नकुशायालुर्निद्रालुर्निद्राणशायिनोसमौ ॥ ५ ५ ५ ५

णिकोपशीलस्य।"अवश्यंकुप्यतिकोपी।" चंडः। अत्यंतकोपनः। द्वे अतिक्रोधशीले।जागरूकः। जागरिता। द्वेजागरणशीले। घूर्णितः। प्रचलायितः। द्वे निद्राघूर्णितस्य। घूर्णभ्रमणं।"प्रचलायाजाताऽस्यतिप्रचलायितः।" ॥ ३२॥ स्वप्नक्॥ शायालुः। निद्रालुः। त्रीणिनिद्रारीलस्य।"शायालुःस्याज्जगरेनिद्रावतिचकुंजरइतिविश्वमेदिन्यौ।" स्वप्नजौ। निद्राणः। निद्रितइत्यपि"। शायितः। द्वेसुप्तस्य ॥ ५ ५

पराङ्मुखःपराचीनः। द्वे द्विमुखस्य। "परांचत्यनभिमुखीभवतिमुखमस्य।पराङ्मुखः।" अवाङ्। अधोमुखः। द्वे "अवांचत्यधोमुखीभवत्तीअवाङ्"। अवांचौ॥३३॥ योदेवानंचतिगच्छतिपूजयतिवासदेवद्यङ्। एकं। चांतं। "स्त्रियांदेवद्रीची" योविश्वंकृत्समंतादंचतिगच्छतिसविश्वद्यङ्"विश्वद्यङ् इतितालव्यमध्यापि। स्त्रियांविश्वद्रीची"। चांतंएकं। यःसहांचतितुल्यंगच्छतिससध्यङ्। एकं। सध्यंचौ। "स्त्रियांसध्रीची"। यस्तिरोवक्रमंचति

पराङ्मुखःपराचीनःस्यादवाङ्व्यधोमुखः॥३३॥देवानंचतिदेवद्यङ्विश्वंद्यङ्विश्वंगंचति॥
यःसहांचतिसध्यङ्ससतिर्यङ्यस्तिरोंचति॥३४॥वदोवदावदोवक्तावागीशोवाक्पतिःसमौ॥
वाचोयुक्तिपटुर्वाग्मीवावदूकोतिवक्तरि॥३५॥ ७ ७ ७

सतिर्यङ्। एकं॥३४॥ वदः। वदावदः। वक्ता। त्रीणिवक्तरि। वागीशः। वाक्पतिः। द्वे अनवद्योद्दामवादिनि। वाचोयुक्तिपटुः। "पटुरितिष्टथगपि। वाग्मीपटौसुराचार्यइतिविश्वमेदिन्यौ। वाग्मी। द्वेनैयायिकस्य। वाचोयुक्तीतिवाग्दिगितिषष्ठ्याअलुक्। "प्रशस्तावाग्यस्यवाग्मी"। वावदूकः। अतिवक्ता। द्वेबहुभाषिणि॥३५॥ ७ ७ ७ ७

जल्पाकः। वाचालः। वाचाटः। बहुगर्ह्यवाक्। चत्वारियोबहुअवाच्यंवक्तितस्य। "जल्पाकी। पित्वाल्लियांङीषू" दुर्मुखः। मुखरः। अबद्धमुखः। त्रयमनर्गलमुखस्य। "निंदितंमुखमस्यमुखरः। नबद्धंनियमितंमुखमस्यअबद्धमुखः।" शाक्कः। प्रियंवदः। द्वे प्रियवादिनि। शाक्नोतिवक्तुमितिशाक्कइतिस्वामी। शाक्कइतिसर्वधरः॥ ३६॥ लोहलः। अस्फुटवाक्। द्वे अस्फुटवादिनि। "नस्फुटावागस्यास्फुटवाक्"। गर्ह्यवादी। कदर्यः। द्वे कुत्सित

स्याज्जल्पाकस्तुवाचालोवाचाटोबहुगर्ह्यवाक्॥ दुर्मुखेमुखराबद्धमुखेशाक्कःप्रियंवदे॥ ३६॥
लोहलःस्यादस्फुटवाग्गर्ह्यवादीतुकदर्यः॥ समौकुवादकुचरौस्याद्घोष्यस्वरोऽस्वरः॥ ३७॥
रवणः शब्दनोनांदीवादीनांदीकरः समौ॥

भाषिणि "गर्ह्यंवदतिगर्ह्यवादि"। कुवादः। कुचरः। द्वे दोषकथनशीले। "कुत्सितंचरतिकुचरः"। असौम्यस्वरः। अस्वरः। द्वे काकादिस्वरवदपस्वरयुक्तस्य॥ ३७॥ रवणः। शब्दनः। द्वे शब्दशीलस्य। नांदीवादी। नांदीकरः। द्वे स्तुतिविशेषवादिनः। "नांदींवदतितच्छीलः नांदीवादी" आशीर्वचनसंयुक्तास्तुतिर्यस्मात्प्रवर्तते॥ देवद्विजनृपादीनांतस्मान्नांदीतिकीर्त्यतेऽमरभरतः॥

जडः। अज्ञः। द्वे अत्यंतमूढस्य। यदुक्तं। इष्टेवानिष्टेवासुखदुःखेवानचेष्टयोर्मोहात्। विंदतिपरवशागः सभवेदिहजडसंज्ञकः पुरुषइति। यो वक्तुंश्रोतुंचशिक्षितोनभवतिसएडमूकः। अनेडमूकइतिपाठेनास्त्येडोमूकोस्मादितिविग्रहः। एडोबधिरः। त्रिलिंगोनेडमूकः स्याच्छठेवाक्श्रुतिवर्जितेइतिरभसः॥ ३८॥ तूष्णींशीलः। तूष्णीकः। द्वे तूष्णींभावयुक्तस्य। "तूष्णींशीलंयस्यतूष्णींशीलः।" नग्नः। अवासाः। दिगंबरः। त्रीणि

जडोऽनएडमूकस्तूक्तवक्तुंश्रोतुमशिक्षिते॥ ३८॥ तूष्णींशीलस्तुतूष्णीकोनग्नोवासादिगंबरे॥
निष्कासितोऽवकृष्टस्यादपध्वस्तस्तुधिक्कृतः॥ ३९॥आनतगर्वोऽभिभूतःस्याद्दापितःसाधितःसमौ॥

"नग्नस्य" अवाससौ। निष्कासितः। निष्कापितइत्यपि। अव

कृष्टः। द्वे निर्भर्त्सितस्य। अपध्वस्तः। धिक्कृतः। द्वे निर्भर्त्सितस्य॥ ३९॥ आनतगर्वः। "आनतगंधः।" गंधोगंधकआमोदेशेसंबंधगर्वयोरि तिविश्वः। गंधोगर्वोलवोपिचेतित्रिकांडशेषः।" अभिभूतः। द्वे भग्नदर्पस्य। "चत्वारोपिपर्यायाइत्येके"। दापितः। "दायितइत्यपि। तत्रदयदानइतिधातुः।" साधितः। द्वे "धनादिकंप्रदापितस्य। प्रदापितस्यधनादेर्वा"। धनादिकंदापयतीति। दापितइतिराजमुकुटः॥

प्रत्यादिष्टादिचतुष्कंनिराकृतस्य ॥ ४० ॥ निकृतः । विप्रकृतः । द्वे विवर्णीकृतस्य । विप्रलब्धः । वंचितः । द्वे "वंचनप्रातस्य" । मनोहृतः । प्रतिहतः । प्रतिबद्धः । हृतः । त्वत्वारिमनसिहृतस्य । "कृतमनोभंगस्येत्यर्थः ।" ॥ ४१ ॥ अधिक्षिप्तः । प्रतिक्षिप्तः । द्वे "कृताक्षेपस्य" । कस्यचिच्छौर्यादिकेप्रतिस्पर्धमानस्य । दुर्वचनमधिक्षे पइतिराजमुकुटः । बद्धः । कीलितः । संयतः । श्रीणिरज्वादिनानिबद्धस्य । आपन्नः । आपत्प्राप्तः । द्वे आपदंगतस्य । "आपद्यतेऽस्मआपन्नः" । कोदिशीकः

प्रत्यादिष्टोनिरस्तः स्यात्प्रत्याख्यातोनिराकृतः ॥ ४० ॥ निकृतः स्याद्विप्रकृतोविप्रलब्धस्तुवंचितः ॥
मनोहृतःप्रतिहृतःप्रतिबद्धोहृतश्वसः ॥ ४१ ॥ अधिक्षिप्तःप्रतिक्षिप्तोबद्धेकीलितसंयतौ ॥
आपन्नआपत्प्राप्तःस्यात्कोदिशीकोभयद्रुतः ॥ ४२ ॥ आक्षारितःक्षारितोभिशस्तेसंकसुकोऽस्थिरे ॥
व्यसनार्तोपरक्तोद्वौविहस्तव्याकुलौसमौ ॥ ४३ ॥ ७ ७ ७

भयद्रुतः । द्वे भयात्पलायितस्य । कोदिशंगच्छामीतिचिंतयनुपलायितः कोदिशीकः ॥ ४२ ॥ आक्षारितः । क्षारितः । अभिशस्तः । त्रयंलोकापवादेनदू षितस्य । "आक्षारोमैथुनंप्रत्याकोशोजातोऽस्य आक्षारितः" । संकसुकः । अस्थिरः । द्वे चलप्रकृतेः । "संकसतीतिसंकसुकः । कसगतौ ।" व्यसनार्तः । उपरक्तः । द्वे व्यसनपीडितस्य । विहस्तः । व्याकुलः । द्वे शोकादिभिरितिकर्तव्यतामूढस्य । "विक्षिप्तोहस्तोयस्यविहस्तः" ॥ ४३ ॥ ७

विकृवः। विक्लवः। द्वेशोकादिनागात्रभंगग्लानस्य। "विक्लवतीतिविक्लवः। क्लचलने"। विवशः। अरिष्टदुष्टधीः। द्वेआसन्नमरणदूषितबुद्धेः। "आरिष्टेनदुष्टाधीर्यस्य"। कश्यः। कशार्हः। द्वेकशाघातमर्हतः। कशावेत्रं। सन्नद्वेधर्मितेजिघांसौ आततायीत्येकं। "आततंयथातथाःयितुंशीलमस्य। अयगतौ"॥ ४४॥ द्वेष्यः। आक्षिगतः। द्वेद्वेषार्हस्य। "द्वेष्टुमर्हःद्वेष्यः" वध्यः। शीर्षच्छेद्यः। द्वेवधार्हस्य। "वधमर्हतिवध्यः" योविषेणवध्यः हंत

विकृवोविक्लवःस्यात्तुविवशोऽरिष्टदुष्टधीः॥ कश्यःकशार्हेसन्नद्वेत्वाततायीवधोद्यते॥ ४४॥
द्वेष्येत्वक्षिगतोवध्यः शीर्षच्छेद्यद्वयोसमो॥ विष्योविषेणयोवध्योमुसल्योमुसलेनयः॥ ४५॥
शिश्विदानोऽकृष्णकर्माचपलश्चिकुरःसमो॥

व्यः साविष्यइत्येकं। योमुसलेनवध्यःसमुसल्यः। एकं॥ ४५॥ शिश्विदानः। अकृष्णकर्मा। द्वेपुण्यकर्मणः। "शिश्विदानः। कृष्णकर्मेतिपाठेद्वेपापकर्मणः। अत्रश्वितावर्णेइतिधातोः श्वितंदर्शनेत्यानचूदन्तश्वसनोलुकच। श्वेतितुमिच्छतिशिश्विदानः"। चपलः। चिकुरः। द्वेयोविचारमंतरेणअसदितिवधादिकार्यमाचरतितस्मिन्॥

दोषैकदृक्। पुरोभागी। द्वे दोषमात्रं पश्यतः।"दोषएकस्मिन्दृक्ज्ञानंयस्यदोषैकदृक्"। निकृतः। अनृजुः। शाठः। त्रयंयस्यांमः करणंवक्रंतस्य "निकृंतेर्निकृतः। कृतीछेदने" ॥ ४६ ॥ कर्णेजपः। सूचकः। द्वे कर्णेपरापवादंवदतः। विस्मृतबोधकस्येतिकश्चित्। पिशुनः। दुर्जनः। खलः। त्रयंपरस्परभेदनशीलस्य। पिशुनःसूचकस्यापपर्यायोवा। नृशंसः। घातुकः। क्रूरः। पापः। चत्वारिपरद्रोहशीले। "नृन्नृशंसनिनृशंसः"। धूर्तः। वंचकः। द्वे प्रतारणशी

दोषैकदृक्पुरोभागीनिकृतस्त्वनृजुःशाठः ॥ ४६ ॥ कर्णेजपःसूचकःस्यात्पिशुनोदुर्जनःखलः ॥
नृशंसोघातुकःक्रूरःपापोधूर्तस्तुवंचकः ॥ ४७ ॥ अज्ञेमूढेयथाजातमूर्खवैधेयबालिशाः ॥
कदर्यैकृपणक्षुद्रकिंपचानमितंपचाः ॥ ४८ ॥

लस्य। "धूर्वनिहिंसनिधूर्तः" ॥ ४७ ॥ अज्ञः। मूढः। "मुग्धइत्यपि" यथाजातः। मूर्खः। वैधेयः। बालिशः। षण्मूर्खस्य। "जातंजन्मकालविशेषमनतिक्रम्यवर्त्तनेतदस्यास्तियथाजातः।" कदर्यः। कृपणः। क्षुद्रः। किंपचानः। मितंपचः। पंचयोधर्मात्मपुत्रदारादिकंपीडयनूलोभार्थसंचयंकरोतितस्य। "कुत्सितोऽर्थःस्वामीकदर्यः किंपचः। अनमितंपचइतिकेचिद्दोषा। तत्रनमितंपचोऽमितंपचः नाद्विनोनमितंपचः।" ॥ ४८ ॥

निःस्वः। दुर्विधः। दीनः। दरिद्रः। दुर्गतः। पंचदरिद्रस्य। "स्यान्निष्क्रांतोनिःस्वः"। वनीयकः। "वनीपकइत्यपि" याचनकः। मार्गणः। याचकः। अर्थी। पंचयाचकस्य॥ ४९॥ अहंकारवान्। अहंयुः। द्वे अहंकारिणः। शुभंयुः। शुभान्वितः। द्वे "शुभयुक्तस्य" अकस्मादुपपद्यंतइत्युपपादुकाः। दिविभवाः दिव्याः। दिव्याश्चतेउपपादुकाश्चनारकव्यावृत्त्यर्थंदिव्यपदं। मातापित्रादिदृष्टकारणनिरपेक्षाऽदृष्टसहकृतेभ्योगुणेभ्योजातायेदेवास्तेदिव्योप

निःस्वःस्तुदुर्विधोदीनोदरिद्रोदुर्गतोपिसः॥ वनीयँकोयाचनकोमार्गणोयाचकार्थिनो॥ ४९॥
अहंकारवानहंयुःशुभंयुस्तुशुभान्वितः॥ दिव्योपपादुकादेवानृगवाद्याजरायुजाः॥ ५०॥
स्वेदजाःकृमिदंशाद्याःपक्षिसर्पादयोंडजाः॥ ॥ इतिप्राणिवर्गः॥ ॥ ७

पादुकाउच्यंते। एकं। नृगवाद्याजरायुजाः स्युः। एकं। आद्यशब्दादश्वादयः। गर्भाद्वायोजरायुस्ततोजाताजरायुजाः। कृमिदंशाद्याःस्वेदजाःस्युः। एकं। आद्यशब्दान्मत्कुणमशकादयः। स्वेदहेतुत्वादूष्मास्वेदः। ततोजाताः स्वेदजाः। पक्ष्यादयोंडजाः। एकं। अंडेभ्योजाता अंडजाः। आदिनामत्स्यादिग्रहः॥ ॥ इतिप्राणिवर्गः॥ ॥ ७ ७ ७

तरुगुल्माद्याउद्भिदः। तेहिजायमानाः-वमुद्भिदंतीत्युद्भिदः॥आद्यशब्दात्तृणादिग्रहः। एकं।उद्भित्।उद्भिज्जं।उद्भिदं।त्रयमुद्भिदि॥५१॥ सुंदरं। रुचिरं। चारु। सुषमं। साधु। शोभनं। कांतं। मनोरमं। "मनोहरमित्यपि"। रुच्यं। मनोज्ञं। मंजु। मंजुलं। हृद्यसुंदरस्य। रम्यमनोरमसौम्यभद्रकंरमणीयम मित्यपि॥५२॥ यस्यदर्शनाद्धनसो-तेरंतोनास्तियद्दुःखोद्दृष्टमप्य धिकामेवप्रीतिंजनयतीतियावत्तदासेचनकंस्यात्। "असेचनकमित्यपि"

उद्भिदम्तरुगुल्माद्याउद्भिदुद्भिज्जमुद्भिदं ॥ ५१ ॥ सुदरंरुचिरंचारुसुषमंसाधुशोभनं॥ कांतंमनोरमरु ंमनो ज्ञंमंजुमंजुलं॥ ५२॥ तदासेचनकंतृसेर्नास्त्यंतोयस्यदर्शनात्॥ अभीष्टेऽभीप्सितंहृद्यंदयितंवल्लभंप्रि यं॥ ५३॥ निकृष्टप्रतिकृष्टार्वरेफेयाप्यावमाधमाः॥ कुंपूयकुत्सितावद्यखेटगर्ह्यौणकाःसमाः॥५४॥

अभीष्टं। अभीप्सितं। हृद्यं। दयितं। वल्लभं। प्रियं। षडभीष्टस्य। "अभ्यासुमिष्यतेस्मअभीप्सितं"॥५३॥ निकृष्टः। प्रतिकृष्टः। अर्वा। रेफः "रेपः। रेपः स्यान्निंदितेक्रूरहतिनिश्चः।" याप्यः। अवमः। अधमः। कुपूयः। "कुत्सितस्यापि। दृष्टोदरादित्वादत्वं।" कुत्सितः। अवद्यः। खेटः। गर्ह्यः। अणकः। "आणकइत्यपि"। त्रयोदशाधमस्य। "खेटत्रासयतिस्वेटः"। अर्वानंतः। अर्वतौ॥ ५४ ॥ ७ ७

मलीमसं। मलिनं। कच्चरं। मलदूषितं। चत्वार्यनुज्ज्वलस्य। "कुत्सितंचरतिकच्चरं"। पूतं। पवित्रं। मेध्यं। त्रीणि। त्रीण्यमित्येकंविमलार्थकंत्वभा
वनिर्मलस्येत्यर्थः। "विमलात्मकमित्यपिपाठः"॥ ५५॥ निर्णिक्तादिपंचकमपनीतमलस्य। असारं। फल्गु। द्वेनिर्बलस्य। शून्यं। शुन्यमित्यपि। शु
न्यः संप्रसारणंवाचदीर्घत्वमितियत्"। वशिकं। तुच्छं। रिक्तकं। चत्वारि "रिक्तस्य"॥ ५६॥ प्रधानं। प्रमुखः। प्रवेकः। अनुत्तमः। उत्तमः। मुख्यः।

मलीमसंतुमलिनंकच्चरंमलदूषितं॥ पूतंपवित्रंमेध्यंचत्रीण्यंतुविमलार्थकं॥ ५५॥ निर्णिक्तंशोधितंमृष्टंनिःशोध्यमनव
स्करं॥असारंफल्गुशून्यंतुवशिकंतुच्छरिक्तके॥ ५६॥ क्लीबेप्रधानंप्रमुखप्रवेकानुत्तमोत्तमाः॥ मुख्यवर्यवरेण्याश्चप्रवरोऽ
नवरार्ध्यवत्॥ ५७॥ परार्ध्याग्र्याग्रहर[illegible]॥ श्रेयान्श्रेष्ठःपुष्कलःस्यात्सत्तमश्चातिशोभने॥ ५८॥

वर्यः। वरेण्यः। प्रवरः। अनवरार्ध्यः॥ ५७॥ परार्ध्यः। अग्र्यः। अग्रहरः। अग्र्यः। अग्र्यः। अग्रियः। अग्रियः। सतदग्रप्रधानस्य। "सुरवमिव
मुख्यः। अवरस्मिन्-ईभवःअवरार्ध्यः। नअवरार्ध्यः अनवरार्ध्यः" तत्रप्रधानंनित्यंक्लीबे। पूर्वोत्तरशब्दास्तुल्यार्थाइतिवचनाज्ज्ञापितं। श्रेयान्। श्रेष्ठः।
पुष्कलः। सत्तमः। अतिशोभनः। पंचात्यंतशोभनस्य। "अतिशायेनसन्सत्तमः"। श्रेयांसौ॥ ५८॥ ७ ७ ७

व्याघ्रादयएतेशब्दाउत्तरपदे श्रेष्ठार्थेगोचरेविषयेयेषांते। "गो [illegible] चकाइतिपाठःक्वचित्"। यथापुरुषोयंव्याघ्रइवपुरुषव्याघ्रः।पुरुषश्रेष्ठइत्यर्थः। आद्यशब्दात्सामा यः।नृसोमः।व्याघ्रादिराकृतिगणः।उपमेनं। व्याघ्रादिभिःसामान्यप्रयोगे तिविशेष्यस्यपूर्वनिपातेव्याघ्रादेरुत्तरपदत्वं ॥ ॥५९॥ अग्राग्र्यं।अग्रधानं।उपसर्जनं।त्रयमग्रधानस्य।"ग्राग्र्याद्विन्नमग्राग्र्यं"। तत्राग्रधानोपसर्जनेद्व्यहीनेद्व्यंस्त्रीपुंसोताभ्यांहीनेक्लीबेइत्य

स्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराः ॥ सिंहशार्दूलनागाद्याः पुंसिश्रेष्ठार्थगोचरैः॥ ५९॥
अग्राग्र्यंद्व्यहीनेद्वेअग्रधानोपसर्जने ॥ विशंकटंपृथुबृहद्विशालंप्रथुलंमहत् ॥ ६०॥
वड्रोरुविपुलंपीनपीन्नीतुस्थूलपीवरे॥स्तोकाल्पक्षुल्लकाःसूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु ॥६१॥

र्थः। विशंकटं। प्रथु। बृहत्। विशालं। प्रथुलं। महत्॥ ६०॥ वड्रं। उरु। विपुलं। नवविस्तीर्णस्य। पीनं। पीव। स्थूलं। पीवरं। चत्वारिस्थूलस्य। स्त्रीपुंसयोस्तुपीवा। स्तोकः। अल्पः। क्षुल्लकः। त्रयमल्पस्य। सूक्ष्मं। श्लक्ष्णं। दभ्रं। कृशं। तनु ॥ ६१ ॥

मात्रा। त्रुटिः। लवः। लेशः। कणः। अणुः। एकादशसूक्ष्मस्य। स्तोकाद्यन्तानामेकार्थाइत्येके। तत्रमात्रात्रुटीस्त्रियौ। "त्रुटीतिडीवंतोपिक्वचित्।" लवा दिपुंसि। शेषंविशेष्यनिघ्नं। अत्यल्पेऽल्पिष्ठमल्पीयः। कनीयोणीयइत्यपिइतिकोशांतरं। "एतन्मूलगतमेवार्धे। सर्वत्राःस्यमूलग्रंथएवदर्शनात्। रामाश्र म्यादिष्वपितथाग्रहणाच्च। अल्पिष्ठं। अल्पीयः। कनीयः। अणीयः। चत्वार्यल्पस्य" ॥ ६२ ॥ प्रभूतं। प्रचुरं। प्राज्यं। अदभ्रं। बहुलं। बहु। पुरुहूः "पुरु

स्त्रियांमात्रात्रुटीपुंसिलवलेशकणाऽणवः ॥ अत्यल्पेऽल्पिष्ठमल्पीयःकनीयोणीयइत्यपि ॥ ६२ ॥
प्रभूतंप्रचुरंराज्यमदभ्रंबहुलंबहु ॥ पुरुहूः पुरुभूयिष्ठंस्फारंभूयश्चभूरिच ॥ ६३ ॥ परःशता
द्यास्तेयषांपरार्ंख्याशतादिकात् ॥

हूमित्यपि"। पुरु। भूयिष्ठं। स्फारं। "स्फिरमित्यपि"। भूयः। भूरि। द्वादशबहुलस्य। पुरुहौ। स्त्रीत्वेतुपुरुहु ॥ ६३ ॥ येषांसंख्यानांसंख्याशतात्सहस्राच्च परांतेक्रमेणपरः शताःपरःसहस्राःस्युरित्यर्थः। एकैकं। राजदंतादित्वाच्छतसहस्रयोः परनिपातः। पारस्करादित्वात्सुट्। विशेष्यनिघ्नत्वाद्वाच्यलिंग ता। यल्लक्ष्यं। परः शतानांविदुषांसमाजइति ॥

गणनीयं । गणेयं । ज्ञेयं गणयितुं शक्यस्य संख्यातं । गणितं । ज्ञेयस्य संख्याकृतातस्य । समं । सर्वं ॥ ६४ ॥ विश्वं । अशेषं । कृत्स्नं । समस्तं । निखिलं । अखिलं । निःशेषं । समग्रं । सकलं । पूर्णं । "पूर्वमित्यपि पाठः । पुर्वपूरणे" अखंडं । अनूनकं । चतुर्दशसमग्रस्य ॥ ६५ ॥ घनं । निरंतरं । सांद्रं । त्रीणि निबिडस्य । निर्गतमंतरमस्मात्तन्निरंतरं" । पेलवं । विरलं । तनु । त्रीणि विरलस्य । समीपः । निकटः । आसन्नः । सन्निकृष्टः । सनीडः ॥ ६६ सदेशाः । अभ्याशः । "अ

गणनीयंतुगणेयंसंख्यातेगणितमथसमंसर्वं ॥ ६४ ॥ विश्वमशेषंकृत्स्नंसमस्तंनिखिलाखिलानिनिः
शेषं ॥ समग्रंसकलंपूर्णमखंडंस्यादनूनके ॥ ६५ ॥ घनंनिरंतरंसांद्रंपेलवंविरलंतनु ॥ समीपेनिकटास
न्नसन्निकृष्टसनीडवत् ॥ ६६ ॥ सदेशाभ्याशसविधसमर्यादसवेशवत् ॥ उपकंठांतिकाभ्यर्णाभ्यग्रा
अभ्यभितोव्ययं ॥ ६७ ॥ ❀ ❀ ❀

भ्यासइतिदंत्यांतइतिमुकुटः । " सविधः । समर्यादः । सवेशः । उपकंठः । अंतिकः । अभ्यर्णः । अभ्यग्रः । अभितः । पंचदशसमीपस्य । तत्राभित इत्यव्ययं । "समानंनीडंवासस्थानमस्यसनीडः । उपगतःकंठःसामीप्यमस्य । उपकंठः " ॥ ६७ ॥ ❀ ❀ ❀

संसक्ते। अव्यवहितं। आपदांतरं। "अपदांतरमित्यपि"। त्रीणिसंलग्नस्य। "नव्यवधीयतेस्मअव्यवहितं"। नेदिष्ठं। अंतिकतमं। द्वे अतिनिकट स्य। दूरं। विप्रकृष्टकं। द्वे ॥६८॥ द्वीयः। द्विष्ठं। सुदूरं। त्रयमत्यंतदूरस्य। द्वीयांसौ। दीर्घं। आयतं। द्वे "दीर्घस्य"। वर्तुलं। निस्तलं। वृत्तं। त्रि णिकर्तुलस्य। "यत्त्वभावादुन्नतमुपाधिवद्यादीषन्नतंचतद्धुरमित्यर्थः"। "बंधूरमित्यपि"। एकं ॥६९॥ उच्चः शृंगुः। उन्नतः। उद्ग्रः। उ

संसक्तेत्वव्यवहितमपदांतरमित्यपि ॥ नेदिष्ठमंतिकतमंस्याद्दूरंविप्रकृष्टकं ॥ ६८ ॥
द्वीयश्च्वद्विष्ठंचसुदूरंदीर्घमायतं ॥ वर्तुलंनिस्तलंवृत्तंबंधुरंतून्नतानतं ॥ ६९ ॥
उच्चश्रृंगोन्नतोद्ग्रोछ्रितास्तुंगेतुवामने ॥ न्यङ्नीचरवर्ह्रस्वाःस्युरवाग्रेऽवनतानतं ॥ ७० ॥
अरालंवृजिनंजिह्ममूर्मिमत्कुंचितंनतं ॥

छ्रितः। तुंगः। षट् उन्नतस्य। "उच्चैस्त्वमस्यउच्चः। उन्नतिस्मउन्नतः।" वामनः। न्यक्। नीचः। खर्वः। ह्रस्वः। पंचह्रस्वस्य। न्यक्रोतः। स्त्रियांतुनी ची। अवाग्रं। अवनतं। आनतं। त्रयमधोमुखस्य। "अवनतमग्रमस्यअवाग्रं"॥ ७० ॥ अरालं। वृजिनं। जिह्मं। ऊर्मिमत्। कुंचितं। नतं।

आविद्धं। कुटिलं। भुग्नं। वेल्लितं। वक्रं। एकादशवक्रस्य "कुटिंकोटिल्यंलातिकुटिलं"॥ ७१॥ ऋजुः। अजिह्मः। प्रगुणः। त्रीण्यवक्रस्य। "भिन्नो जिह्मा द्यजिह्मः"। व्यस्तः। अप्रगुणः। आकुलः। त्रयमाकुलस्य। "भिन्नः प्रगुणाद्प्रगुणः" शाश्वतः। ध्रुवः। नित्यः। सदातनः। सनातनः। पंचनित्यस्य। "शाश्वद्ध्रुवः शाश्वतः"॥ ७२॥ स्थास्नुः। स्थिरतरः। स्थेयान्। त्रीण्यतिस्थिरस्य। "स्थानशीलः स्थास्नुः"। स्थेयांसौ। यएकरूपतयाएक

आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि ॥ ७१ ॥ ऋजावजिह्मप्रगुणोव्यस्तेत्वप्रगुणाकुलौ ॥ शाश्वतस्तुध्रुवो नित्यसदातनसनातनाः ॥ ७२ ॥ स्थास्नुःस्थिरतरःस्थेयानेकरूपतयातुयः ॥ कालव्यापीसकुटस्थःस्थाव रोजंगमेतरः ॥ ७३ ॥ चरिष्णुजगमचरंत्रसमिंगंचराचरं ॥ चलनंकंपनंकंप्रं च लंलोलंचलाचलं ॥ ७४ ॥

नैवस्वभावेनकालव्यापीकालस्यव्यापकआकाशादिः सकूटस्थः। कूटोनिश्चलःसन्तिष्ठतीति। कूटोःस्त्रीनिश्चलेमूलेराशावितिमेदिनी। स्थावरः। जंगमेतरः। द्वेअचरस्य॥ ७३॥ चरिष्णु। जंगमं। चरं। त्रसं। इंगं। चराचरं। षट्चरस्य। "चरणशीलंचरिष्णु"। चलनं। कंपनं। कंप्रं। त्रयंकंपशीलस्य। चलं। लोलं। चलाचलं॥ ७४॥

चंचलं। तरलं। पारिप्लवं। सप्तकंचलस्य। "परिप्लवेपारिप्लवं। चपलंचटुलंचैवेत्यपिपाठः"। अतिरिक्तः। समधिकः। द्वे अधिकभूतस्य। "सम्यगधिकःसमधिकः"। दृढसंधिः। संहतः। द्वे दृढसंधानयुक्तस्य॥ ७५॥ कर्करं। "कक्खटं। खक्खटमितिकवर्गद्वितीयादिरपि"। कठिनं। क्रूरं। कठोरं। निष्ठुरं। दृढं। जठरं। मूर्तिमत्। मूर्ते। नवकठीनस्य। "मूर्तिःकाठिन्यमस्यास्तिमूर्तिमत्।" जठरंटवर्गद्वितीयमध्यं। प्रगृह्यं। प्रौढं। एधितं।

चंचलंतरलंचैवपारिप्लवपरिप्लवे॥ अतिरिक्तःसमधिकोदृढसंधिस्तुसंहतः॥ ७५॥ कर्कर्शंकठिनंक्रूरंकठोरं निष्ठुरंदृढं॥ जठरंमूर्तिमन्मूर्तेप्रगृह्यंप्रौढमेधितं॥ ७६॥ पुराणेप्रतनप्रत्नपुरातनचिरंतनाः॥ प्रत्यग्रोऽभिनवोनव्योनवीनोनूतनोनवः॥ ७७॥ नूत्नश्चसुकुमारंतुकोमलंमृदुलंमृदु॥ अन्वगन्वक्षमनुगोऽनुपदंक्लीबमव्ययं॥ ७८॥

त्रयंप्रगृह्यस्य॥ ७६॥ पुराणं। प्रतनं। रत्नं। पुरातनं। चिरंतनं। पंचपुरातनस्य। प्रत्यग्रः। अभिनवः। नव्यः। नवीनः। नूतनः। नवः॥ ७७॥ नूत्नमनूतनस्य। "अभिनवमग्रमस्यप्रत्यग्रः।" सुकुमारं। कोमलं। मृदुलं। मृदु। चत्वारिकोमलस्य। अन्वक्। अन्वक्षं। अनुगं। अनुपदं। चत्वारिपश्चादित्यर्थे। अव्ययीभावत्वात्क्लीबमव्ययंच। "पदस्यपश्चादनुपदं"॥ ७८॥

प्रत्यक्षं "समक्षमित्यपि" ऐंद्रियकं। द्वे इंद्रियग्राह्यस्य। इंद्रियेणानुभूतं ऐंद्रियकं। अप्रत्यक्षं। अतींद्रियं। द्वे इंद्रियैरग्राह्यस्य। धर्मादेः। अनध्यक्षमित्यपिपाठः। "अपरोक्षमैंद्रियकं परोक्षं स्यादतींद्रियमिति"। एकतानः। अनन्यवृत्तिः। एकाग्रः। एकायनः॥ ७९॥ एकसर्गः। एकाग्र्यः। एकायनगतः। सर्वैकाग्र्यस्य। "एकतानयतिएकतानः। ततुश्छद्रोपकरणयोः" आदिः। पूर्वः। पौरस्त्यः। प्रथमः। आद्यः। पंचकमाद्यस्य। "आप्रथमेरीयतेरृद्ध्यतेआदिः"

प्रत्यक्षं स्यादैंद्रियकमप्रत्यक्षमतींद्रियं ॥ एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ॥ ७९ ॥
अप्येकसर्गएकाग्र्योप्येकायनगतोपिसः॥ पुंस्यादिःपूर्वपौरस्त्यप्रथमाद्याअथास्त्रियां॥ ८० ॥
अंतोजघन्यंचरमंमेत्यपाश्चात्यपश्चिमाः॥ मोघंनिरर्थकंस्पष्टंस्फुटंप्रव्यक्तमुल्बणं॥ ८१ ॥

तत्रादिःपुंस्येव ॥ ८०॥ अंतः। जघन्यं। चरमं। अंत्यं। पाश्चात्यं। पश्चिमं। षडेत्यस्य। तत्रांतः पुंनसुंसकयोरेव। यथास्वच्छंदास्त्रीकुलस्यांतः। मोघं। निरर्थकं। द्वेव्यर्थस्य। "निर्गतोऽर्थोयस्मात्तन्निरर्थकं।" स्पष्टं। स्फुटं। प्रव्यक्तं। उल्बणं। चत्वारि "स्पष्टस्य" ॥ ८१ ॥

साधारणं। सामान्यं। द्वे एकमप्यनेकसंबंधिसाधारणं। जातिवाचिसामान्यंतुक्लीबं। एकाकी। एकः। एककः। त्रयमसहाये। भिन्नः। अन्यतरः। "एकतरइतिपाठः"। एकः। त्वः। अन्यः। इतरः। षट्भिन्नार्थकाः भिन्नस्यवाचकाइत्यर्थः। तद्शब्दः सर्ववत्। तौ। ते॥८२॥ उच्चावचं। नैकभेदं। द्वेबहुविधस्य उच्चंडं। अविलंबितं "अवलंबनमित्यक्षीरस्वामी"। द्वेतूर्णस्य। अरुंतुदः। मर्मस्पृक्। द्वेमर्मभेदिनः। मर्मस्पृशो। अबाधं। निरर्गलं। द्वेनिर्बाधस्य।

साधारणंतुसामान्यमेकाकीत्वेकएककः॥ भिन्नार्थकाअन्यैतरएकस्त्वोऽन्येतरावपि॥८२॥
उच्चावचंनैकभेदमुच्चंडमविलंबितं॥ अरुंतुदस्तुमर्मस्पृगबाधंतुनिरर्गलं॥८३॥प्रसव्यं
प्रतिकूलंस्यादपसव्यमपष्ठुच॥ वामंशरीरंसव्यंस्यादपसव्यंतुदक्षिणं॥८४॥संकटं
नातुसंबाधःकलिलंगहनंसमे॥ ४ ४ ४

"नबाधाःस्यअबाधं"॥८३॥ प्रसव्यं। प्रतिकूलं। अपसव्यं। अपष्ठु। चत्वारिविपरीतस्य। "प्रगतंसव्यात्प्रसव्यं। यद्वामंशरीरंतत्सव्यं। एकं। यद्दक्षिणंशरीरंतदपसव्यं। एकं॥८४॥ संकटं। संबाधः। द्वे अल्पावकाशेवर्त्मादौ। नापुमान्। कलिलं। गहनं। द्वेदुरधिगमस्य। यथागहनंशास्त्रं। दुर्ज्ञानमित्यर्थः॥

संकीर्णं। संकुलं। आकीर्णं। त्रीणिजनादिभिरत्यंतमिश्रस्य। "यथासंकीर्णवर्गः। केचित्तु एतान्पूर्वपथायानाः। संकीर्णमृषिपत्नीनामितिप्रयोगात्"। मुंडितं। परिवापितं। द्वेक्तनमुंडनस्य ॥८५॥ ग्रंथितं। ग्रथितमित्यपिपाठः। संदितं। "गुंफितं। गुफितं चेत्यपिपाठः"। दृब्धं। त्रीणिगुंफितस्य। विस्मृतं। विस्मृतं। ततं। त्रीणिलब्धप्रसरस्य। "विस्तीर्यतेस्मविस्तृतं"। अंतर्गतं। विस्मृतं। द्वे "विस्मृतस्य। विस्मर्यतेस्मविस्मृतं"। त्रासं। त्रीणिहितं। द्वेलब्धस्य

सकीर्णेसंकुलाकीर्णे[1]ं[2]ंडितंपरिवापितं ॥ ८५ ॥ ग्रंथितंसंदितंदृब्धंविस्मृतंविस्मृतंततं ॥
ओंतर्गतंविस्[3]तंस्यात्त्रासंत्रीणि[4]तसमे ॥ ८६ ॥ वेल्लितप्रेंखिताधूतचलिताकंपिताधुते ॥
नुत्तनुन्नास्तनिष्यूताविद्धक्षिप्तेरिताःसमाः ॥ ८७ ॥

[1] ४ [2] ४ [3] ४ [4] ४

"प्राप्यतेस्मत्रासं" ॥ ८६ ॥ वेल्लितः। प्रेंखितः। आधूतः। चलितः। आकंपितः। धुतः। षडीषत्कंपितस्य। "वेल्लयतेस्मवेल्लितः। वेल्लुचलने। प्रेंखोलितस्तरलितोल्लासितांदोलितावधीरितोद्वांतरं"। नुत्तः। नुन्नः। अस्तः। निष्यूतः। आविद्धः। क्षिप्तः। ईरितः। समप्रेरितस्य "नुद्यतेस्मनुत्तः" ॥ ८७ ॥

परिक्षिप्तं। निवृतं। द्वे आकारादिनासर्वतोवेष्टितस्य। "निव्रियतेस्मनिवृतं। वृञ्आवरणे"। मूषितं। मुषितं। द्वे चोरितस्य। "मुष्यतेस्ममूषितं"। प्रवृद्धं। प्रसृतं। द्वे प्रसरणयुक्तस्य "प्रसरतिस्मप्रसृते"। न्यस्तं। निसृष्टं। द्वे निक्षिप्तस्य। "निसृज्यतेस्मनिसृष्टं। सृजविसर्गे"। गुणितं। आहतं। द्वे अभ्यावर्तितस्य। यथापंचभिराहताश्चत्वारोविंशतिः॥८८॥ निदिग्धं। उपचितं। द्वे संमृष्टस्य। "निदिह्यतेस्मनिदिग्धं। दिहउपचये" गूढं

परिक्षिप्तंतु निवृतंमूषितंमुषितार्थकं ॥ प्रवृद्धप्रसृतेन्यस्तानिसृष्टेगुणिताहते ॥८८॥
निदिग्धोपचितेगूढगुप्तेगुंठितरूषिते ॥ द्रुतावदीर्णेउद्भूर्णोद्यतेकाचितशिक्यिते ॥८९॥

गुप्तं। द्वे गोपनयुक्तस्य। यथामंत्रोगुप्तोविधातव्यः। गुंठितं। "गुंडितमित्यपि। गुडवेष्टने"। रूषितं। द्वे धूलिलिप्तस्य। "गुंडाकलेलेंइतिख्यातस्यवा" द्रुतं। अवदीर्णं। द्वे द्रवीभूतस्य। उद्भूर्णं। उद्यतं। द्वे "उत्तोलितस्यशस्त्रादेः"। काचितं। शिक्यितं। द्वे "शिक्येस्थापितस्य"॥८९॥

घ्राणं।घ्रातं।हेनासिकयागृहीतगंधस्यपुष्पादेः।दिग्धं।लिप्तं।हे"विलिप्तस्य।"।समुदक्तं।उद्भूतं।हेउन्नीतस्य।"कूपादेर्जलादेः।"वेष्टितं।वलयितं।संवीतं।रुद्धं।आवृतं।पंचवेष्टितस्य।"नद्यादिनानगरादेः।"॥९०॥रुग्णं।भुग्नं।हेव्यथितस्य।"भग्नस्यवाकाष्ठहस्तपादादेः।"निशितं।निशातमित्यपि"।क्ष्णुतं।शातं।तेजितं।चत्वारिशाणादिनातीक्ष्णीकृतस्यशस्त्रादेः"निशायतेस्मनिशातं।शोतनूकरणे"विनाशोन्मुखं।प्रत्यासन्नविनाशंपक्वंस्या

घ्राणघ्रातेदिग्धलिप्तेसमुदक्तोद्भूतेसमे।वेष्टितंस्याद्वलयितंसंवीतंरुद्धमावृतं॥९०॥रुग्णंभुग्नेथनिशितं
क्ष्णुतशातानितेजिते॥स्याद्विनाशोन्मुखंपक्वंहीणन्हीनौतुलज्जिते॥९१॥वृत्तेतुवृतव्यावृत्तौसंयोजितउपा
हितः॥आप्यंगम्यंसमासाद्यंस्यन्नंरीणंस्रुतंस्रुतं॥९२॥ ७

तू।एक।"पच्यतेस्मपक्वं।"हीणः।हीनः।
लज्जितः।त्रयंसंजानलज्जस्य॥९१॥वृत्तः।वृतः।व्यावृत्तः।"वावृत्तइतिकेचित्।"त्रयंकृतवरणस्य।यद्भुक्तं।पौरोहित्यायभगवान्वृतःकाव्यः
किलासुरैरिति।संयोजितः।"संयोगितइतिभरतमाल्यायां।"उपाहितः।हेसंयोगंप्रापितस्य।आप्यं।गम्यं।समासाद्यं।त्रीणिप्राप्तुंशक्यस्य।"समास
द्यतेप्राप्यतेतत्समासाद्यं।"स्यन्नं।रीणं।स्रुतं।स्रुतं।चत्वारिप्रस्रुतस्य।"स्यंद्यतेस्मस्यन्नं।स्यंदूप्रस्रवणे।"॥९२॥ ७ ७

संगूढः। संकलितः। ढ्येाजितस्यांकादेः। यथाह्येात्रयः पंचवसंकलितादवाभवंति। अवगीतः। ख्यातगर्हणः। ढ्येनिंदितस्य। "अवगीयनेनिंद्यनेस्म अवगीतः।" विविधः। बहुविधः। नानारूपः। पृथग्विधः। चत्वारि "नानारूपंयस्यनानारूपः"॥९३॥ अवरीणः। धिक्कृतः। ढ्येनिंदितमात्रस्य। अवध्वस्तः। "अपध्वस्तः। अपध्वस्तंपरित्यक्तेविदितेप्यवचूर्णितइतिविश्वः।" अवचूर्णितः। ढ्येचूर्णीकृतस्य। अनायासकृतंअनायासेनकृतः कषायविशे

संगूढःस्यात्संकलितोऽवगीतःख्यातगर्हणे॥ विविधःस्याद्बहुविधोनानारूपःपृथग्विधः॥९३॥
अवरीणोऽधिक्कृतश्चाप्यवध्वस्तोऽवचूर्णितः॥ अनायासकृतंफाणटंस्वानितंध्वनितंसमे॥ ९४॥
बद्धेसंदानितंमूनंमुद्दितंसंदितंसितं॥ निष्पक्वंक्वथितंपाकेक्षीराद्यहविषांश्रृतं॥ ९५॥ ५

षःफाणटंस्यात्। एकं। क्षुभ्यस्वानेत्यादिनाऽनायासेनिपातितं। स्वानितं। ध्वनितं। ढ्येद्वादितस्य॥९४॥ बद्धं। संदानितं। मूनं। "मूर्णामिनिमुकुटः" उद्दितं। "उदितमित्यपि" संदितं। मितं। षट्बद्धस्य। मूङ्-बंधनेऽस्य। मूनं। दोअवखंडने। उत्पूर्वःसंपूर्वश्चबंधनार्थः। उद्दितं। संदितं। निष्पक्वं। क्वथितं। ढ्येसाकल्येनपक्वस्य। "कषायादेः" क्षीरादीनांपाकेश्रृतमित्येकं। यथाश्रृतंक्षीरंपक्वमित्यर्थः॥९५॥ ४ २

निर्वाण इत्येकं मुनिवत्त्र्यादौ न युज्यते न तु वाते। यथा निर्वाणो मुनिः निर्मुक्त इत्यर्थः। निर्वाणो वन्हिः निर्गत इत्यर्थः। आदिशब्दान्निर्वाणो हस्ती। "निर्मग्न इत्यर्थः।" निर्वाणो वात इति निःपूर्वाद्धातेर्निष्ठानस्य नत्वं। एकं। गते अनिले निर्वात इत्येकं। पक्वं। परिणतं। द्वे पाकं प्राप्तस्य। गूनं। हन्नं। द्वे कृत पुरीषोत्सर्गस्य। "हद्यतेस्म। हदपुरीषोत्सर्गे।" मीढं। मूत्रितं। द्वे कृतमूत्रोत्सर्गस्य॥ ९६॥ पुष्टं। पुषितं। द्वे कृतपोषणस्य।" सोढं। क्षांतं। द्वे क्षमां प्रा

निर्वाणो मुनिवत्त्र्यादौ निर्वातस्तु गतेऽनिले॥ पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते॥ ९६॥ पुष्टे तु पुषितं सोढे क्षांत मुद्धांत मुद्धृते॥ दांतस्तु दमिते शांतः शमिते प्रार्थिनेर्दितः॥ ९७॥ ज्ञप्तस्तु ज्ञपिते छन्नश्छादिते पूजितेंऽचितः॥

पितस्य।" उद्धांतः। "उद्धातमिति मुकुटः। उद्धांतमिति रामनाथः।" उद्धृतः। द्वे "वमनेनत्यक्तस्यान्नादेः" दांतः। दमितः। द्वे दमं प्रापितस्य। यथा दमितमिंद्रियं। शांतः। शमितः। द्वे शमनं प्रापितस्य। यथा शांतो रोगः निवर्तित इत्यर्थः। प्रार्थितः। अर्दितः। द्वे याचितस्य॥ ९७॥ ज्ञप्तः। ज्ञपितः। द्वे "बोधं प्रापितस्य।" छन्नः। छादितः। द्वे "आच्छादितस्य।" पूजितः। अंचितः। "अर्चित इत्यपि पाठः। अर्च पूजायां।" द्वे॥ ९

पूर्णः। पूरितः। ह्वेवार्दितश्रांतपूर्णेत्यादिनाणिचिनिष्ठांतानिपातिताः। क्लिष्टः। क्लिशितः। ह्वेक्लेशांभासस्य। अवसितः। सितः। ह्वेसमासस्य। षोंतकर्मणीत्यतोनिष्ठा॥९८॥ घुष्टः। पुष्टः। उषितः। दग्धः। चत्वारिदग्धस्य। तष्टः। त्वष्टः। तनूकृतः। त्रीणि "अतः स्तनुक्षीरतनूकृतः" यथातष्टंकाष्टंवास्त्रेणाल्पीकृतमित्यर्थः। वेधितः। छिद्रितः। विद्धः। त्रीणि यथाकर्णोविद्धो। विन्नः। विन्तः। विचारितः। त्रीणि "भासविचारस्य।"॥९९॥ निष्प्रभः। वि

पूर्णस्तुपूरितेक्लिष्टःक्लिशितेऽवसितेसितः॥ ९८॥ घुष्टपुष्टोषितादग्धेतष्ट-
त्वष्टोतनूकृते॥ वेधितच्छिद्रितोविद्धे विन्नविन्तोविचारिते॥ ९९॥ निष्प्रभेविग
तारोकोविलीनेविद्रुतद्रुतौ॥ सिद्धे निर्वृत्तनिष्पन्नोदारितेभिन्नभेदितौ॥ १००॥ छ

गतः। अरोकः। त्रयंदीप्तिहीनस्य। विगतो वीतनिष्प्रभाविति रुद्रः। विलीनः। विद्रुतः। द्रुतः। त्रीणिद्रवीभूतस्यघृतादेः। सिद्धः। निर्वृतः। निष्पन्नः। त्रयंसिद्धस्य। दारितः। भिन्नः। भेदितः। त्रीणि। "भेदंभाषितस्य।" ॥१००॥ छ

ऊतं । स्यूतं । उतं । त्रितयं । ततुसंततं । यथात्रोनः पदः ततुभिरनुस्यूतइत्यर्थः । अर्हितं । नमस्यितं । नमसितं । अपचायितं । अर्चितं । अपचितं । षडर्चित
स्य । वरिवसितं । वरिवस्यितं । उपासितं । उपचरितं । चत्वारिंशुश्रूषितस्य । संतापितं । संतप्तं । धूपितं । धूपायितं । दूनं । पंचसंतापितस्य " एभ्यः अक
र्मकेभ्यः कर्तरिक्तेभ्येतान्येवरूपाणि ॥ १०२ ॥ हृष्टः । मत्तः । तृप्तः । प्रल्हन्नः । प्रमुदितः । प्रीतः । षट्प्रमुदितस्य । छिन्नं । छातं । लूनं । कृत्तं । दातं । दितं । छितं ।

ऊतंस्यूतमुतंत्रेतित्रितयंततुसंतते ॥ स्यादर्हितेनमस्यितनमसितमपचायितार्चितापचितं ॥ १०१ ॥
वरिवसितेवरिवस्यितमुपासितंचोपचरितंच ॥ संतापितसंतप्तौधूपितधूपायितौचदूनश्च ॥ १०२ ॥
हृष्टेमत्तस्तृप्तः प्रल्हन्नः प्रमुदितः प्रीतः ॥ छिन्नंछातंलूनंकृत्तंदातंदितंछितंहृक्णं ॥ १०३ ॥ स्रस्तं
ध्वस्तंभ्रष्टंस्कन्नंपन्नंच्युतंगलितं ॥ लब्धंप्राप्तंविन्नंभावितमसादितंचभूतंच ॥ १०४ ॥ ७

हृक्णं । अष्टोखंडितस्य ॥ १०३ ॥ स्रस्तं । ध्वस्तं । भ्रष्टं । स्कन्नं । पन्नं । च्युतं । गलितं । सस्रच्युतस्य । " एभ्योगत्यर्थाकर्मकेनिकर्तरिक्तेएतान्येवरू
पाणि ।" लब्धं । प्राप्तं । विन्नं । भावितं । आसादितं । भूतं । षट्प्राप्तस्य ॥ १०४ ॥ ७ ७ ७

अन्वेषितं। गवेषितं। अन्विष्टं। मार्गितं। मृगितं। पंचगवेषितस्य। यथाइतस्ततोगवेषितोपिचोरोनदृष्टः। आर्द्रं। सार्द्रं। क्लिन्नं। तिमितं। स्तिमितं। समुन्नं। उक्तं। सप्तक्लिन्नस्य। यथास्तिमितलोचनोश्रुभिः॥१०५॥ त्रातं। त्राणं। रक्षितं। अवितं। गोपायितं। गुप्तं। षट्रक्षितस्य। अवगणितं। अवमतं। अवज्ञातं। अवमानितं। परिभूतं। पंच। "अवमानितस्य"॥१०६॥ त्यक्तं। हीनं। विधुतं। समुज्झितं। धूतं। उत्सृष्टं। षडुत्सृष्टस्य। उक्तं। भाषितं।

अन्वेषितंगवेषितमन्विष्टंमार्गितंमृगितं॥ आर्द्रंसार्द्रंक्लिन्नंतिमितंस्तिमितंसमुन्नमुक्तंच॥१०५॥
त्रातंत्राणंरक्षितमवितंगोपायितंचगुप्तंच॥अवगणितमवमतावज्ञातेवमानितंचपरिभूते॥१०६॥
त्यक्तंहीनंविधुतंसमुज्झितंधूतमुत्सृष्टे॥उक्तंभाषितमुदितंजल्पितमाख्यातमभिहितंलपितं॥१०७॥
बुद्धंबुधितंमनितंविदितंप्रतिपन्नमवसितावगते॥ ऊरीकृतमुररीकृतमंगीकृतमाश्रुतंप्रतिज्ञातं॥१०८॥

उदितं। जल्पितं। आख्यातं। अभिहितं। लपितं। षडुदितस्य॥१०७॥ बुद्धं। बुधितं। मनितं। विदितं। प्रतिपन्नं। अवसितं। अवगतं। सप्तावगतस्य। ऊरीकृतं। "उरीकृतमित्यपि" उररीकृतं। अंगीकृतं। आश्रुतं। प्रतिज्ञातं॥१०८॥

संगीर्णं। विदितं। संश्रुतं। समाहितं। उपश्रुतं। "प्रतिश्रुतमित्यपि" उपगतं। एकादशांगीकृतस्य। ईलितं। शस्तं। पणायितं। पनायितं। प्रणुतं। पणितं। पनितं॥१०९॥ गीर्णं। वर्णितं। अभिष्टुतं। ईडितं। स्तुतं। द्वादशास्तुत्यर्थानि। भक्षितं। चर्वितं। लीढं। "लिप्तमित्यपि" प्रत्यवसितं। गिलितं। स्वादितं। प्सातं॥११०॥ अभ्यवहृतं। अन्नं। जग्धं। ग्रस्तं। ग्लस्तं। अशितं। भुक्तं। चतुर्दशस्वादितस्य। प्साभक्षणेप्सातं। "अद्यतेस्तअन्नं" क्षेपिष्ठादयः क्षिप्रादीनांप्रक

संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतं॥ ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि॥१०९॥
अपिगीर्णवर्णिताभिष्टुतेडितानिस्तुत्यर्थानि॥ भक्षितचर्वितलीढप्रत्यवसितगिलितस्वादितप्सातं॥११०॥
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितंभुक्ते॥ क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः॥ १११॥ ७
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुलप्रकर्षार्थाः॥ साधिष्ठद्राधिष्ठस्फेष्ठगरिष्ठह्रसिष्ठबंदिष्ठाः॥११२॥

षार्थाः प्रकर्षोर्थोयेषांते तथा। अतिशयाविशिष्टेषुक्षिप्रादिषुक्रमेणवर्तंतइत्यर्थः। यथाऽतिशयेनक्षिप्रःक्षेपिष्ठः। अतिशयेनक्षुद्रःक्षोदिष्ठः। अत्रप्रेष्ठादिचतुष्टयेप्रियोरुस्थूलबहुलाएवेष्टनःप्रकृतयः। अभीप्सितादीनांनिर्देशस्तुतत्पर्यायत्वात्। अतिशयेनप्रियः प्रेष्ठःइत्यादि। एकैकं॥११२॥ ७

बाढादीनामतिशयेसाधिष्ठादयः स्युः। अत्रव्यायतंबहुवामनादीर्घाफिरह्रस्वानांपर्यायाः।अतिशयेनबाढः साधिष्ठः। एवंवृंदारकांतेषुअतिशय विशिष्टेषुद्राधिष्ठादिक्रमेणैकैकंज्ञेयं।"वृंदारकामुख्यः"॥ ॥ इतिविशेष्यनिघ्नवर्गः॥ ॥ पूर्वकांडद्वयेस्वर्गादिनामानिप्रकरणैःसजातीया निनिबद्धानि। अत्रापिकांडेसुकृत्यादीनिविशेष्यनिघ्नानिन्यबध्नात्। इदानींपूर्वेषांसंकीर्णत्वापत्तिभयेनयेपूर्वेनोक्तास्तसंग्रहार्थंसंकीर्णप्रकरणमार

बाढव्यायतबहुगुरुवामनवृंदारकातिशये ॥ ॥ इतिविशेष्यनिघ्नवर्गः॥ ॥
प्रकृतिप्रत्ययार्थाद्यैः संकीर्णैर्लिंगमुन्नयेत्॥ कर्मक्रियातत्सातत्येगम्येस्युरपरस्पराः ॥९॥

भते अत्रहिकर्मक्रियादयोभाववचनाःअपरस्परादिर्विशेष्यनिघ्नः।स्तंबघादिः करणवचनः। तथासमूहवचनआपूपिकादिः। एवंसंकीर्णैः संकीर्णार्थैःसंकीर्णलिंगैश्चकथनात्संकीर्णवर्गोयं। भिन्नजात्यर्थसंसर्गएवहिसंकरः। सचात्रप्रायेणविद्यतइतिहेर्वतव्यपदेशः। नन्वत्रसंकीर्णत्वेविशे षविधानाभावेचकथमत्रलिंगज्ञानंस्यादित्याकांक्षायांनदुपायमाह। प्रकृतीति। संकीर्णेसंकीर्णनाम्नि अत्रवर्गे वक्ष्यमाणलिंगसंग्रहोक्तरीत्याप्र

कृत्यर्थेनप्रत्ययार्थेनचआधशाद्वात्क्वचिद्रूपभेदादिनालिंगमुन्नयेतूऊहेत्। तत्रप्रकृत्यर्थेनयथा। अपरस्परेतिविभक्तिप्रकृतित्वात्प्रकृतिः। तस्याः सततक्रियासंबंधात्क्रियायोगः। अपरत्वादिगुणयोगश्च। एवंगुणद्रव्यक्रियायोगोपाधिभिःपरगामिनद्इत्यभिधेयलिंगत्वं। प्रत्ययार्थेनयथा। स्फातिप्रभृतीनांक्तिन्नादिप्रत्ययानांस्त्रीभावादावनिक्तिन्निनिवक्ष्यमाणत्वात्स्त्रीलिंगत्वं। तथासंधिप्रभृतीनांक्तिप्रत्ययांतानांकोघोः किरितिवक्ष्यमाणत्वात्पुंस्त्वं। रूपभेदेनकर्मादेःक्लीबत्वादि। साहचर्येणचडिंभेडमरविप्लुवाविति डिंभस्यपुंस्त्वं। संकीर्णइत्युपलक्षणं। वर्गांतरेष्वप्यनिश्चितलिंगानांमुत्त्वीतिरित्यादीनांप्रकृतिप्रत्ययादिरेवलिंगनिश्चयात्। कर्मक्रिया। हेक्रियायाः। तच्छब्देनक्रियापरामृश्यते। क्रियासातत्येगम्ये सतिअपरस्पराइत्येकंनाम। अपरस्पराः सार्थागच्छंति। अपरेचपरेचसंघाः सततंगच्छंतीत्यर्थः। सातत्यमविच्छेदः। अपरस्पराः क्रियासातत्यइतिरूढ्यनिपात्यते। सातत्येकिं। अपरपराः सकृद्गच्छंति। वाच्यलिंगत्वादपरस्परायोषितः। अपरस्पराणिकुलानि। "निर्दिष्टंकर्मसातत्यं सुधीभिरपरस्परमितिभाणुरिणोक्तत्वात्। तत्सातत्येक्रियायाः क्रियावतांचनैरंतर्येतद्यथा। क्रियासातत्येअपरस्परंगच्छंति। क्रियावतांचसातत्येतुलिंगत्रयं" ॥ १ ॥

साकल्यवचनं। वाशायणं। आसंगवचनंपरायणं। "नुशायणमित्यपिपाठः। तुरत्वरणे। तुरस्यअयनं"। वाशायणं तत्संकाल्न्यपारगतायपीतिमेदिनी
आसंगआसक्तिस्तद्वचनं। क्रमेणैकैकं। यदृच्छा। स्वैरिता। हेत्वच्छंदतायाः। हेतुभूत्याकारणरहिताभ्यास्थितिर्विलक्षणंस्यात्। एकं॥२॥ शमथः।
शमः। शांतिः। चयंचित्तोपशमस्य। दांतिः। दमथः। दमः। चयमिंद्रियनिग्रहस्य। वृत्तंकर्मभूतपूर्वंचरित्रंतदवदानं। एकं। "प्रवास्तकर्मणोवा"। अपदान

साकल्यासंगवचनेपारायणपरायणे॥ यदृच्छास्वैरिताहेतुभूत्यालास्याविलक्षणं॥२॥
शमथस्तुशमः शांतिर्दांतिस्तुदमथोदमः॥ अवदानंकर्मवृत्तंकाम्यदानंप्रवारणं॥३॥
वशाक्रियासंवननंमूलकर्मतुकार्मणं॥ ७ ७ ७

मित्यपिपाठः। काम्यदानं। कामस्यतुलापुरुषादेर्दानंतत्प्रवारणं। एकं। "प्रहारणमितिभरतमालायां। प्रवारणंमहादानमितित्रिकांडशेषः।"॥ ३॥
वशाक्रिया। संवननं। "संवदनं"। स्यात्संवदनमालोचेवशीकारेनपुंसकमितिमेदिनी"। हेर्मणिमंत्रादिनावशीकरणस्य। मूलकर्म। ओषधीनांमूले
रुच्चाटनादियत्कर्मतत्कार्मणमेकं॥ ७ ७ ७ ७

विधूनन। विधुवनं। "विधुननमित्यपिजयाधरः।" द्वे कंपनस्य। तर्पणं। प्रीणनं। अवनं। त्रीणितृप्तेः॥ ४॥ पर्याप्तिः। परित्राणं। हस्तधारणं। "हस्त
धारणमित्यपि" त्रीणिवधोद्यतनिवारणस्य। सेवनं। सीवनं। स्तुतिः। त्रयंसूचीक्रियायाः। "सेवस्तुसेवनंस्तुतिरितिपाठोवा"। विदरः। स्फुटनं "स्फोट
नमितिभरतमाल्लायां" भिधा। द्वयंद्विधाभावस्य॥ ५॥ आक्रोशनं। अभीषंगः। "अभिषिंगइत्यपि। उपसर्गस्येतिदीर्घत्वविकल्पात्।" द्वे गालिप्रदा

विधूननंविधुवनंतर्पणंप्रीणनावनं ॥ ४ ॥ पर्याप्तिःस्यात्परित्राणंहस्तधारणमित्यपि ॥
सेवनंसीवनंस्तुतिर्विदरःस्फुटनंभिदा॥ ५॥ आक्रोशनमभीषंगःसंवेदोवेदनाननना ॥
संमूर्छनमभिव्याप्तिर्याञ्चाभिक्षार्थनार्दना॥ ६॥

नस्य। संवेदः। वेदनः। द्वे अनुभवस्य। तत्रवेदनानपुमान्। "अतोवेदनमित्यपि"। संमूर्छनं। अभिव्याप्तिः। द्वे सर्वतोव्याप्तेः। याञ्चाभिक्षा। अर्थना।
अर्दना। चत्वारियाचनस्य। याञ्चेतियजयाचेतिनङ्॥ ६॥

वर्धने। छेदने। द्वे कर्तनस्य। आनंदने। "आमंत्रणमिति क्वचित्पाठः"। सभाजने। "स्वभाजनमिति राजमुकुटः"। आम्रच्छने। त्रीणि स्वागतसंभ्रमादिनाभिहितस्यानंदस्य। आम्नायः। संप्रदायः। द्वे गुरुपरंपरागतस्य समुपदेशस्य। क्षयः। क्षिया। द्वे अपचयस्य ॥ ७ ॥ ग्रहः। ग्राहः। द्वे ग्रहणस्य। वशाः। कांतिः। द्वे छायाः। रक्षणः। "रक्षा"। त्राणः। द्वे रक्षणस्य। रणः। क्वणः। द्वे शब्दकरणस्य। व्यधः। वेधः। द्वे वेधनस्य। पचा। पाकः। द्वे "पचनस्य"। हवः। हूतिः। द्वे आह्वा

वर्धनछेदनेऽथ द्वे आनंदनसभाजने ॥ आम्रच्छन्नमथाम्नायः संप्रदायः क्षयेक्षिया ॥ ७ ॥
ग्रहे ग्राहो वशाः कांतौ रक्षणे त्राणरणौ क्वणे ॥ व्यधो वेधे पचा पाके द्वे हवो हूतौ वरो हृतौ ॥ ८ ॥
ओषः प्लोषे नयो नाये ज्यानिर्जीर्णेऽभ्रमोऽभ्रमौ ॥ छ छ छ

नस्य। वरः। हृतिः। द्वे वेष्टनसंभक्तौ च। "तपोभिरिष्यंते यस्तु देवेभ्यः सवरोमनइति" ॥ ८ ॥ ओषः। प्लोषः। "ओषइत्यपिशब्दार्थकोशे"। द्वे दाहस्य। नयः। नायः। द्वे यंत्रणेः। ज्यानिः। जीर्णिः। द्वे जीर्णतायाः। भ्रमः। भ्रमिः। द्वे भ्रांतेः ॥ छ छ छ छ

स्फातिः। वृद्धिः। दृ"वृद्धेः" प्रथा। ख्यातिः। दृ"प्रख्यातेः" स्पृष्टिः। पृक्तिः। [illegible]स्य। स्नवः। स्रवः। दृ"स्रवणस्य"॥ ९॥ एधा। "विधेत्यपि"। विधा जलासने ऋद्धौ प्रकारेवेतसेविधावितिमेदिनी"। समृद्धिः। दृ"उपचयस्य। स्फुरणं। स्फुरणा। "स्फुलनंस्फोरणंस्फारणंचेत्यपि" दृ"स्फुरणस्य" प्रमितिः। प्रमा। दृ"यथार्थज्ञानस्य। प्रसूतिः। प्रसवः। दृ"गर्भाविमोचनस्य। श्च्योतः। प्राघारः। दृ"घृतादेःक्षरणे। क्रुमथः। क्रुमः। दृ"म्लानेः॥ १०॥ उत्कर्षः

स्फातिर्वृद्धौप्रथाख्यातौस्पृष्टिःपृक्तौस्रवःस्रवे॥ ९॥ एधैधावृद्धौस्फुरणेस्फुरणाप्रमितौप्रमा॥
प्रसूतिःप्रसवेश्च्योतेप्राघारःक्रुमथःक्रुमे॥ १०॥ उत्कर्षोऽतिशयेसंधिःश्लेषेविषयआश्रये॥
क्षिपायांक्षेपणंगीर्णिर्गिरौगुरणमुद्यमे॥ ११॥ उन्नायउन्नयेश्रायःश्रयणेजयनेजयः॥

अनिद्रायः। दृ"प्रकर्षस्य। संधिः। श्लेषः। दृ"संधानस्य। विषयः। आश्रयः। "आश्रायइत्यपि" दृ"आश्रयस्य" क्षिपा। क्षेपणं। दृ"प्रेरणस्य" गीर्णिः। गिरिः। दृ"निगरणस्य "गिळणेइतिख्यातस्य" गुरणं। "गूरणमितिमुकुटः" उद्यमः। दृ"भाराद्युद्यमनस्य"॥ ११॥ उन्नायः। उन्नयः। दृ"ऊर्ध्वनयनस्य। ऊहस्यच। श्रायः। श्रयणं। दृ"सेवायाः। जयनं। जयः। दृ"जयस्य"॥

निगादः। निगदः। द्वे कथनस्य। मादः। मदः। द्वे हर्षस्य। उद्वेगः। उद्भमः। द्वे उद्वेजनस्य॥ १२॥ विमर्दनं। परिमलः। द्वे कुंकुमादिमर्दनस्य। परिमलोविमर्दे पीतिविश्वः। अभ्युपपत्तिः। अनुग्रहः। द्वे अंगीकारस्य। ततोऽनुग्रहाद्विरुद्धोनिग्रहः स्यात्। "विग्रहस्तुविरोधः स्यादिति क्वचित्पाठः"। एकं। अभियोगः। अभिग्रहः। द्वे कलहाह्वानस्य॥ १३॥ मुष्टिबंधः। संग्राहः। द्वे मुष्टिनादृढग्रहणस्य। डिंभः। डमरः। विप्लवः। त्रयं नरलुंठनादेरुपसर्गविशेष

निगादोनिगदेमादोमदउद्वेगउद्भमे ॥ १२॥ विमर्दनंपरिमलोऽभ्युपपत्तिरनुग्रहः ॥
निग्रहस्तद्विरुद्धः स्यादभियोगस्त्वभिग्रहः॥ १३॥ मुष्टिबंधस्तुसंग्राहोडिंबेडमरविप्लवौ ॥
बंधनंप्रसितिश्चारःस्पर्शःस्पृष्टोपतप्तयोः॥ १४॥ निकारोविप्रकारःस्यादाकारस्त्विंगइंगितं ॥

स्य। प्रलयस्यथा। बंधनं। प्रसितिः। चारः। त्रीणिबंधनस्य। "चारस्थानेस्वारंपठित्वास्वारादीनांचतुर्णांपर्यायनामाहस्वामी। स्पृशाद्योपनापयोः। अच्। प्रज्ञाद्यण्। स्वारः"। स्पर्शः। "स्पशइतिरेफहीनोपि" स्पृष्टा। "स्पृष्टेत्यपि" उपतप्ता। त्रयंउपतापाल्परोगविशेषस्य। "संतप्तस्यथा" स्पृशतीतिस्पर्शः। स्पर्शोरुजायांदानेचेति विश्वः॥ १४॥ निकारः। विप्रकारः। द्वे अपकारस्य। आकारः। इंगः। इंगितं। त्रयं "अभिप्रायानुरूपचेष्टितस्य"।

परिणामः। विकारः। द्वे प्रकृतेरन्यथाभावे। यथामृद्विकारो घटः विकृतिः। विक्रिया। द्वे विरूपक्रियायाः। परिणामस्यैवपर्यायाविमावपिवा। यथाकुंडलंकनकस्यैवविकृतिः। परिणामइत्यर्थः ॥ १५ ॥ अपहारः। अपचयः। द्वे अपहरणस्य। समाहारः। समुच्चयः। द्वे राशीकरणस्य। प्रत्याहारः। उपादानं। द्वे इंद्रियाकर्षणस्य। विहारः। परिक्रमः। द्वे पद्भ्यांगतेः। यल्लक्ष्यं। सुरांगनानामवनौपरिक्रमइति ॥ १६ ॥ अभिहारः। "अभ्याहारइत्यपि"।

परिणामोविकारोद्वेसमेविकृतिविक्रिये ॥ १५ ॥ अपहारस्त्वपचयःसमाहारः समुच्चयः ॥
प्रत्याहारउपादानंविहारस्तुपरिक्रमः ॥ १६ ॥ अभिहारोऽभिग्रहणंनिर्हारोऽभ्यवकर्षणं ॥
अनुहारोऽनुकारःस्यादर्थस्यापगमेव्ययः ॥ १७ ॥ प्रवाहस्तुप्रवृत्तिःस्यात्प्रवहोगमनंबहिः ॥
वियामोवियमोयामोयमःसंयामसंयमौ ॥ १८ ॥ ७ ७ ७

अभिग्रहणंद्वे चौर्यकरणस्य। निर्हारः। अभ्यवकर्षणं द्वे राल्यादेर्निष्काशनस्य। अनुहारः। अनुकारः द्वे विडंबनस्य। यथारणत्कणेतिनूपुरध्वनेरनुकारः। अर्थस्यधनादेरपगमेव्ययइत्येकं ॥ १७ ॥ प्रवाहः। प्रवृत्तिः। द्वे जलादीनांनिरंतरगतेः। यद्बहिर्गमनंसप्रवहइत्येकं। वियामः। वियमः। यामः। यमः। संयामः। संयमः। षट् संयमस्ययोगांगस्य ॥ १८ ॥ ७ ७ ७

हिंसाकर्माहिंसाफलकंकर्मजारणमारणादिअभिचारःस्यात्। एकं। जागर्या।"अग्रिया।जागर्तिश्वेतिराजमुकुटः"। जागरा।द्वेजागरणस्य। तत्रजागरास्त्रीपुंस

योः।विघ्नः।अंतरायः। प्रत्यूहः। त्रीणिविघ्नस्य। समीपभूतआश्रयेउपघ्नइत्येकं।"आश्रयणस्यवा"॥ १९॥ निर्वेशः।उपभोगः।द्वे"उपभोगस्य"। परिसर्पः। परिक्रिया।द्वेपरिजनादिवेष्टनस्य। विधुरं। प्रविश्लेषः।द्वेअत्यंतवियोगस्य।"वैकल्येपिचविश्लेषेविधुरंविकलेत्रिषितिमेदिनी" अभिप्रायः।छंदः।आशयः

हिंसाकर्माविचारःस्याज्जागर्यौजागराद्वयोः॥ विघ्नांतरायःप्रत्यूहःस्यादुपघ्नोंतिकाश्रये ॥ १९॥
निर्वेशउपभोगः स्यात्परिसर्पः परिक्रिया ॥ विधुरंतुप्रविश्लेषोऽभिप्रायश्छंदआशयः ॥ २०॥
संक्षेपणंसमसनंपर्यवस्थाविरोधनं ॥ परिसर्यापरीसारःस्यादास्यात्वासनास्थितिः॥ २१॥
विस्तारोविग्रहोव्यासःसचशब्दस्यविस्तरः॥ ७ ७ ७

त्रीणि "अभिप्रायस्य" छंदोऽंतः ॥ २० ॥ संक्षेपणं। समसनं।द्वेअविस्तारस्य। पर्यवस्थाविरोधनं।द्वेविरोधस्य। परिसर्या। परीसारः।"परिसारइतिशब्दार्थकौवाः"।द्वेपरितःसरणस्य। आस्या। आसना। स्थितिः।त्रीणि"आसनस्य" ॥ २१ ॥ विस्तारः। विग्रहः। व्यासः। त्रयंविस्तृतेः। विस्तारःशब्दसंबधीचेद्विस्तरइत्येकं ॥ ७ ७ ७ ७

संवाहनं। मर्दनं। द्वे अंगमर्दनस्य। यथापादसंवाहनं। विनाशः। अदर्शनं। द्वे निरोधानस्य ॥ २२ ॥ संस्तवः। परिचयः। द्वयंपरिचितौ। प्रसरः। विसर्पणं। द्वे "वृणादिप्रसारणस्य।" नीवाकः। प्रयामः। द्वे धनधान्यादिषुजनानामादरातिशयस्य। नितरामुच्यतेनीवाकः। संनिधिः। "संनिधं" सन्निकर्षणं। द्वे नैकट्यस्य। संनिधिःपुंसि ॥ २३ ॥ लवः। अभिलावः। लवनं। त्रयंधान्यादिच्छेदनस्य। निष्यावः। पवनं। पवः। त्रीणिधान्यादीनांपूतीकरणस्य। सं

संवाहनंमर्दनंस्याद्विनाशःस्याद्दर्शनं ॥ २२ ॥ संस्तवःस्यात्परिचयःप्रसरस्तुविसर्पणं ॥
नीवाकस्तुप्रयामःस्यात्संनिधिःसंनिकर्षणं ॥ २३ ॥ लवोभिलावोलवनेनिष्यावःपवनेपवः ॥
प्रस्तावःस्यादवसरःप्रसरःसूत्रवेष्टनं ॥ २४ ॥ प्रजनःस्यादुपसरःप्रश्रयप्रणयोसमौ ॥

कीर्णत्वाल्लिंगसंकरः। प्रस्तारः। अवसरः। द्वे प्रसंगस्य। यथा। अवसरपठितावाणीत्यादि। त्रसरः। "तसरइतिवापाठः" सूत्रवेष्टनं। द्वे तंतुवायकृत सूत्रवेष्टनभेदस्यतसरीइतिप्रसिद्धस्य ॥ २४ ॥ प्रजनः। उपसरः। द्वे गर्भग्रहणस्य। प्रश्रयः। प्रणयः। द्वे प्रेम्णः। प्रसरइतिवापाठः। प्रसरः। प्रणये वेगे इतिमेदिनी ॥

धीशक्तिः। निष्क्रमः। ह्वबुद्धिसामर्थ्ये। निष्क्रमोबुद्धिसंपन्नाविनिविश्वः। "शुश्रूषाश्रवणंचैवग्रहणंधारणंतथा। ऊहापोहोऽर्थविज्ञानंतत्त्वज्ञानंचधीगुणाइति" संक्रमः। दुर्गसंचरः। ह्वदुर्गभागस्य। "दुर्गादिभ्रवेद्राक्रियायाघा" संक्रमनेसंक्रन्यतेवा ऽनेनसंक्रमः। सनास्त्रियां। "दुर्गसंचार इत्यन्यत्र"॥ २५॥ प्रत्युक्रमः। "प्रत्युक्रांतिरित्यपि"। प्रयोगः। ह्वयुङ्प्रार्थमतिद्रायिनोद्योगस्य। प्रयोगोर्थोयस्यसः। "प्रयुङ्प्रार्थइत्यपिपाठः। प्रत्युक्रमः प्रयुङ्प्रार्थइतिभागुरी"

धीशक्तिर्निष्क्रमोऽस्त्रीतुसंक्रमोदुर्गसंचरः ॥२५॥ प्रत्युक्रमः प्रयोगार्थःप्रक्रमस्यादुपक्रमः ॥
स्यादभ्यादानमुद्घातआरंभःमंत्रमस्त्वरा॥२६॥ प्रतिबंधःप्रतिष्टंभोऽनायस्तुनिपातनं ॥
उपलंभः स्त्वनुभवः समालंभोविलेपनं ॥२७॥

प्रक्रमः। उपक्रमः। ह्वप्रथमारंभस्य। अभ्यादानं। उद्घातः। आरंभः। त्रयमारंभमात्रस्य। यल्लक्ष्यं। उद्घातःप्रणवोयामामिति। प्रक्रमादिपंचाप्येकार्थावा। संभ्रमः। त्वरा। ह्वसंवेगस्य। आवेगस्तुत्वरात्वरिरिनियाचस्पतिः॥ २६॥ प्रतिबंधः। प्रतिष्टंभः। ह्वकार्यप्रतिघातस्य। यथामणिमंत्रादिप्रतिबंधादग्नेरनुष्णतेति। अवनायः। निपातनं। "नियातनमित्यपिपाठः" ह्वअधोनयनस्य। उपलंभः। अनुभवः। ह्वसाक्षात्कारस्य। समालंभः। विलेपनं। ह्वकुंकुमादिनाविलेपने॥ २७॥

विप्रलंभः। विप्रयोगः। द्वेरागिणोर्विच्छेदस्य। विलंभः। अतिसर्जनं। द्वेअतिदानस्य। विश्रावः। प्रतिख्यातिः। "प्रतिख्यानिरित्यपि" द्वेअतिप्रसिद्धेः। अवेक्षा। प्रतिजागरः। द्यूतवस्तूनांअवेक्षणस्य ॥ २८ ॥ निपाठः। निपठः। पाठः। त्रीणि "पठनस्य" नेमः। स्तेमः। समुंदनं। त्रयमार्द्रीभावस्य। आदीनवः। आस्रवः। क्लेशः। त्रीणि क्लेशस्य। आस्रवंतीं द्रियाण्यनेनेति। आश्रवोबालक्यमध्यद्रुमिकेचित्। मेलकः। संगः। संगमः। त्रीणि "संगमस्य। नामेलःसंगोनावित्यमरः।

विप्रलंभोविप्रयोगोविलंभस्त्वतिसर्जनं ॥ विश्रावस्तुप्रतिख्यातिरवेक्षाप्रतिजागरः ॥ २७ ॥
निपाठनिपठौपाठेतेमस्तेमोसमुंदने ॥ आदीनवास्रवौक्लेशेमेलकेसंगसंगमौ ॥ २९ ॥
संवीक्षणंविचयनंमार्गणंमृगणामृगः ॥ परिरंभःपरिष्वंगःसंश्लेषउपगूहनं ॥ ३० ॥
निर्वर्णनंतुनिध्यानंदर्शनालोकनेक्षणं ॥ प्रत्याख्यानंनिरसनंप्रत्यादेशोनिराकृतिः ॥ ३१ ॥

लाः" ॥ २८ ॥ संवीक्षणं। "अन्वीक्षणं। अन्वेषणं। गवेषणंचेत्यपि"। विचयनं। मार्गणं। मृगणा। मृगः। पंचतात्पर्येणवस्तूनांगवेषणस्य। परिरंभः। "परीरंभइत्यपि" परिष्वंगः। संश्लेषः। उपगूहनं। चत्वारिआलिंगनस्य ॥ ३० ॥ निर्वर्णनं। निध्यानं। दर्शनं। आलोकनं। ईक्षणं। पंचनिरीक्षणस्य। "दर्शनालोकलक्षणमित्यपिपाठः।" प्रत्याख्यानं। निरसनं। प्रत्यादेशः। निराकृतिः। चत्वारिनिराकरणस्य ॥ ३१ ॥

उपज्ञायः। विज्ञायः। द्वौपर्यायेणा क्रमेणयत्रहरकादीनांज्ञायनंतदेवार्थोययोस्तौतथा। अर्तनं। ऋतीया। हृणीया। "हृणिया। मोहेवीज्याजुगुप्साच हृणीयाहृणियाघृणेतिवाचस्पतिः। हृणीयाहृणियाचेतिहिरूपकोशामरमालयोः"। घृणा। चत्वारिजुगुप्सायाः। करुणायाइतिकश्चित्। ऋतिः सौत्रोधातुः। जुगुप्सायामितिबहवः। कृपायामितिकेचित्। घृणाजुगुप्साकृपयोरितिविश्वः॥३२॥ व्यत्यासः। विपर्यासः। व्यत्ययः। विपर्ययः। "विपर्यायइति

उपज्ञायोविज्ञायश्चपर्यायज्ञायनार्थकौ ॥ अर्तनंचऋतीयाचहृणीयाचघृणार्थकाः ॥३२॥
स्याद्व्यत्यासोविपर्यासोव्यत्ययश्चविपर्यये ॥ पर्यायोतिक्रमस्तस्मिन्नतिपातउपात्ययः ॥३३॥
प्रेषणंयत्समाहूयतत्रस्यात्प्रतिज्ञासनं ॥ ससंस्तावऋतुष्वस्तुतेभूमिहिजन्मना ॥३४॥
निधायतक्ष्यतेयत्रकाष्ठेकाष्ठंसउद्घनः॥ छ छ छ

भरतमालायां"। चत्वारिव्यतिक्रमस्य। पर्ययः। अतिक्रमः। अतिपातः। उपात्ययः। चत्वारिअतिक्रमस्य ॥३३॥ समाहूययदुत्यादौ प्रेषणंतत्रत्र तिज्ञासनंस्यात्। एकं। ऋतुषुहिजन्मनांछंदोगानांस्तुतिभूमिःस्तवनदेवाःसंस्तावः। एकं। समेत्यस्तुवंत्यत्रसंस्तावः। यज्ञेसमिस्तुवइतिघञ्॥३४॥ यस्मिन्काष्ठेकाष्ठंनिधायतक्ष्यतेतनूक्रियतेसकाष्ठरूपआधारउद्घनः। एकं॥ छ छ छ

स्तंबस्तृणगुच्छोयेननिहन्यतेसरवनित्रविशेषःस्तंबघ्नः।स्तंबघनः।द्वे॥३५॥येनविध्यतेतत्रइत्यादौआविधइत्येकं।"भ्रमरसूच्यादेः।विंधणेइत्यादिरव्यानस्य"विधक्सेमेसर्वतःसमानेइक्षेनिघइत्येकं।"तुल्योरोहपरिणाहवृक्षादेः"उत्कारः।निकारः।द्वौधान्यस्यउत्क्षेपणमर्थोययोस्तौतथा॥३६॥निगारादयोगरणादिषु।यथारगणेअभ्यवहारेनिगारइत्यकं।"गिळणेंइतिरव्यातस्य।उद्गरणे"।वमनेउद्गारः।"विक्षवणे"शब्देविक्षावः।"इत्येकंशि

स्तंबघ्नस्तुस्तंबघनःस्तंबोयेननिहन्यते॥३५॥आविधोविध्यतेयेनतत्रविषक्समेनिघः॥
उत्कारश्चनिकारश्चद्वौधान्योत्क्षेपणार्थकौ॥३६॥निगारोद्गारविक्षावाद्रुतस्तुगरणादिषु॥३७॥
आरत्यवरतिविरतयउपरामेथास्त्रियांतुनिष्ठेवः॥निष्ठ्यूतिर्निष्ठेवनंनिष्ठीवनमित्यभिन्नानि॥३८॥जवनेजूतिःसातिस्त्ववसानेस्यादथज्वरेजूर्तिः॥

कइतिरव्यातायाः।उद्गरणे"।ऊर्ध्वीकृत्यग्रहणेउद्गारः।"ढेंकरइतिरव्यानः"।एकैकं॥३७॥आरतिः।अवरतिः।विरतिः।उपरामः।उपरमइत्यपि।चत्वार्युपरतेर्नामैकं।निष्ठ्यूतिःनिष्ठेवनंनिष्ठीवनं।चत्वारिमुखेनश्लेष्मोत्सर्गस्य।"क्लीबेनिष्ठेवं"।अभिन्नानिएकार्थानीत्यर्थः॥३८॥जवनं।जूतिः।द्वेवेगस्य।सातिः।अवसानं।द्वेअंतस्य।ज्वरः।जूर्तिः।द्वेज्वरस्य॥

पशूनांगवादीनांप्रेरणंउदजः स्यात्। एकं। ज्ञापेआक्रोशेद्योत्येअकरणिरित्यादयः। आक्रोशेनज्ञातिभावेकरोतेरनिः। आदिशब्दादजीवनिः। "अजन निः। अवग्राहः। निग्राहइति।" यथाआः पापकथनकरण्यानलंज्ञसे। अजीवनिस्तेशठभूयात्॥ ३९॥ गोत्रांतेभ्यःअपत्यार्थप्रत्ययांतेभ्यःऔपगवादिश ब्देभ्यस्तस्यइदंमित्यर्थेऔपगवादिकंस्यात्। यथाउपगोरपत्यानिपुमांसःऔपगवास्तेषांसमूहऔपगवकं। आदिशब्दाद्गार्गकं। दाक्षकमित्यादिएकैकं इनः परमावर्गसमासेइदंमित्यधिकारः। अचेतसांजडानांअपूपादीनांइदं। आपूपिकं। शाष्कुलिकं। सांकुकं। इत्यादिएकैकं॥ ४०॥ माणवानांसमूहो

उदजस्तुपशुप्रेरणमकरणिरित्यादयः ज्ञापे॥ ३९॥ गोत्रांतेभ्यस्तस्येदमित्यौपगवकादिकं॥ आपूपिकंशाष्कुलिक मेवमाद्यमचेतसां॥ ४०॥ माणवानांतुमाणव्यंसहायानांसहायता॥ हल्याहलानांब्राह्मण्यवाडव्येतुद्विजन्मनां॥ ४१॥ द्वेपर्शुकानांपृष्ठानांपार्श्वंदृष्ट्यमनुक्रमात्॥ खलानांखलिनीखल्याप्यथमानुष्यकंनृणां॥ ४२॥

माणव्यं। माणवाबालाः। सहायाःसखायस्तेषांसमूहोसहायता। हलानांसमूहोहल्या। एकैकं। ब्राह्मण्यं। वाडव्यं। द्वेब्राह्मणानांसमूहस्य॥ ४१॥ पर्शुका अस्थिविशेषास्तासांसमूहःपार्श्वं। दृष्टानांसमूहःदृष्ट्यं। "यज्ञविषयेऽदः स्मरंति"। खलिनी। खल्या। द्वेखलानांसमूहस्य। नृणांमनुष्याणांसमूहो मानुष्यकं॥ ४२॥

ग्रामाणांसमूहोग्रामता।जनानांसमूहोजनता।धूमानांसमूहोधूम्या।पाशानांसमूहःपाश्या।गलाद्दृत्कोशास्तेषांसमूहोगल्या।सहस्राणांसमूहःसाहस्रा
करीषाणांसमूहःकारीषं।कारीषंशुष्कगोमयं।वर्मणांसमूहःवार्मणं।वर्मकवचं।अथर्वणांसमूहः आथर्वणं।एकैकं।आदिशब्दाच्चार्मण।"भांगारंचा
र्मिणमित्यादि।चर्मिणांसमूहश्चार्मिणं"॥ ॥ इतिसंकीर्णवर्गः॥ ॥अथानेकार्थवर्गः॥ ननुकिमर्थमनेकार्थआरभ्यंतेतेषांप्रागुक्तवर्गेष्वभिहित
त्वात्। यद्यत्रवक्ष्यंतेतर्हिकुतःप्रागुक्ताइत्यत्रआह। नानार्थाइति। अत्रवक्ष्यमाणेषुकांतादिवर्गेष्वेव केपिनानार्थाउक्तानतुप्रागुक्तपर्यायेषु। यथा।

ग्रामताजनताधूम्यापाश्यागल्याष्टथक्ष्टथक्॥अपिसाहस्रकारीषवार्मणाःथर्वणादिकं॥४२॥ ॥इतिसं
कीर्णवर्गः॥ ॥नानार्थाःकेपिकांतादिवर्गेष्वेवात्रकीर्तिताः॥ भूरिप्रयोगायेयेषुपर्यायेषुपितेषुते॥ १॥ ७

मारुतेवेधसिब्रह्मेपुंसिकः कंशिरोंबुनोरिति। भूरिप्रयोगायत्रकुत्रापिकाव्यादिषुकविभिःप्राचुर्येणप्रयुक्तायेनाकलोकादयः शब्दास्तेपूर्वोक्तेषुयेषु
पर्यायेषुदृश्यंतेतेषुपर्यायेषुअपिशब्दात्त्रापिकांतादिषुकीर्तिताः। यथानाकशब्दः प्रचुरप्रयोगत्वात्प्राक्स्वर्गाकाशयोरुक्तोपिपुनरिहोक्तः। जंबुक
शब्दःशृगालपर्यायेषेवोक्तोनतुवरुणपर्यायेषुभूरिप्रयोगत्वाभावात्। इहतुजंबुकौकोष्टुवरुणावित्युभयत्रोच्यते॥ १॥ ७ ७

नाकइत्येकंनामककारांतं। आकाशेस्वर्गेचवर्तते। "नअकंदुःखमत्रनाकः"। भुवनेस्वर्गौजनेचलोकइत्येकं। "लोक्यतेलोकः"। पद्येअनुष्टुवादौदृष्टे यशासिकीर्तौश्लोकइत्येकं। "श्लोक्यतेश्लोकः। श्लोकसंघाते"। यशासियया। उत्तमश्लोकोहरिः। हारेबाणेखड्गेचसायकः॥ २॥ क्रोष्टासृगालः। वरुणः प्रसिद्धः। उभौजंबुकशब्दवाच्यौ। "जंबुकःफेरवेनीचेपश्चिमाशापतावपी"ति मेदिनी"। चिपिटोभ्रष्टव्रीहितंडुलः। अर्भकः शिशुः। तावुभौष्टथुकौ।

आकाशेत्रिदिवेनाकोलोकस्तुभुवनेजने ॥ पद्ययशासिचश्लोकःहारेखड्गेचसायकः॥ २॥
जंबुकौक्रोष्टुवरुणौष्टथुकौचिपिटार्भकौ ॥ आलोकौदर्शनप्रकाशौतेरीपटहमानकौ ॥ ३॥
उत्संगचिन्हयोरंकः कलंकोंकापवादयोः॥ छ छ छ

दर्शनंप्रकाशश्चालोकौ। "आलोकस्तुपुमान्द्योतेदर्शनेबंदिभेदयो"। तेमेदिनी"। भेरीपटहंवाद्यविशेषौ। तुर्यांगत्वादेकवद्भावः। उभावानकौ। "आनकःपटहेभेर्यांमृदंगेध्वनदंबुदइतिमेदिनी"॥ ३॥ उत्संगःक्रोडः। तत्रचिन्हेचांकः "अंकोरूपकभेदोंगचिन्हरेखाजिभूषणे। रूपकाशांतिकोत्संगस्थानेकंपापदुःखयोरितिमेदिनी"। चिन्हेदोषारोपेचकलंकः। "कलंकोंकेऽपवादेचकालायसमलेपिचेतिमेदिनी"॥

नागविशेषेत्वष्टरिचतक्षकः। स्फटिकसूर्ययोरर्कशब्दोवर्तते। "अर्कोर्कपर्णेस्फटिकेरवौताम्रेद्विवस्तावितिमेदिनी ॥ ४ ॥ मारुतेवायौवेधसिब्रह्मणि ब्रध्नेसूर्येकइत्येकाक्षरंनाम। तद्युंपुं। कः। कौ। काः। इत्यादिदेववत्। सिरसिजलेचकमितिक्लीबं। सुखेपिकं। "कोब्रह्मणिसमीरात्मयमर्कभेषुभास्करे॥ मयूराग्नोचपुंसिस्यात्सुखशीर्षजलेषुकमितिमेदिनी"। तुच्छधान्येतंडुलशून्येधान्येसंक्षेपेअविस्तारेभक्तसिक्थकेअन्नावयवेपुलाकइत्येकं ॥ ५ ॥ क

तक्षकोनागवर्द्धक्योरर्कः स्फटिकसूर्ययोः ॥ ४ ॥ मारुतेवेधसिब्रध्नेपुंसिकः कंशिरोंबुनोः ॥
स्यात्पुलाकस्तुच्छधान्येसंक्षेपेभक्तसिक्थके ॥ ५ ॥ उलूकेकरिणःपुच्छमूलोपांतेचपेचकः ॥
कमंडलौचकरकःसुगतेचविनायकः ॥ ६ ॥ किष्कुर्हस्तेवितस्तौचशूककीटेचवृश्चिकः ॥

रिणोगजस्यपुच्छमूलोपांतेगुदावलादकमांसपिंडे। उलूकःपक्षिभेदस्तत्रचपेचकः। कमंडलौचकाराद्धर्षोपलेदाडिमादौचकरकः। सुगतेबुधेचकाराद्विघ्नराजेगरुडेचविनायकः ॥ ६ ॥ हस्तेहस्तप्रमाणेवितस्तौचकिष्कुःप्रकोष्ठेप्यनपुंसकइतिरुद्रः। शूककीटेशूकसदृशरोमव्याप्तेकीटविशेषे। चकारादलौकर्कटेवृक्षविशेषेष्टमराशौचवृश्चिकः ॥

प्रतिकूलेचप्रतीकः। तन्त्रप्रतिकूलेत्रिषुअवयवेनपुंसि ॥ ७ ॥ भूनिंबेकिरातातिक्तेकृतृणंभूस्तृणंचगंधतृणविशेषौतत्रभूतिकं। ज्योत्स्निकायांपटोल्यां "घोषापामार्गेच" कोशातकी। कोशातकःकचेपुंसिपटोल्यांघोषकेस्त्रियामितिमेदिनी ॥ ८ ॥ कट्फलेकायफलइतिख्यातेवृक्षभेदेशुक्लखदिरेचसोमवल्कः। सिल्हकेपण्यभेदेतिलकल्केनिःस्नेहतिलचूर्णेचपिण्याकः। रामठेहिंगुनि। चकाराद्बाल्हिकेदेशेश्वेधीरेच। ह्रस्वमध्यंचबाल्हिकमिति। "बाल्हीकमितौ

प्रतिकूलेप्रतीकस्त्रिष्वेकदेशेतुपुंस्ययं ॥ ७ ॥ स्याद्भूतिकंतुभूनिंबेकृतृणेभूस्तृणेपिच ॥
ज्योत्स्निकायांचघोषेचकोशातक्यथकट्फले ॥ ८ ॥ सिते चखदिरेसोमवल्कःस्यादथसिल्हके ॥
तिलकल्केचपिण्याकोबाल्हीकंरामठेपिच ॥ ९ ॥ महेंद्रगुग्गुलूलूकव्यालग्राहिषुकौशिकः ॥
रुक्तापशंकास्वातंकः स्वल्पेपिक्षुल्लकस्त्रिषु ॥ १० ॥ ७ ७ ७

पि" ॥ ९ ॥ व्यालग्राह्याहितुंडिकः। कौशिकोनकुलेव्यालग्राहेगुग्गुलुशुक्रयोः। विश्वामित्रेचकौशिकइतिविश्वः। रुक्रोगः। तापः संतापः। शंकाभयंअत्रातंकइतिनाम। स्वल्पेअपिशब्दान्नीचकनिष्ठदरिद्रेषपिक्षुल्लकः ॥ १० ॥ ७ ७

जेवातृकःपुमान्सोमेदीर्घायुःकुशयोस्त्रिषु।अपिशब्दात्पक्षिभेदेचवर्तकः।अपिशब्दाद्गौदिग्गजादौचपुंसिपुंडरीकः। सितांभोजादौक्लीबेच। यवानीओषधी भेदःअजमोदाख्यः। अपिशब्दाद्धूर्त्तिचूडेपिदीपकः। नकाशेपि।"दीप्यकइत्यपि"॥११॥ कप्यारयःशालावृकाःस्युः।अपिशब्दाद्वेरूइतिख्याते।धातौच गैरिकं।"गैरिकंधातुरुक्मेचरीतिमेदिनी"।व्यलीकमप्रियाकार्यवैलक्ष्येषपिपीडनेइतिविश्वः॥१२॥ शीलंस्वभावोन्वयोवंशःतत्रानूकमिति।"अनूकं

जेवातृकःशशांकेपिरुरेप्यश्वस्यवर्तकः॥ व्याघ्रेपिपुंडरीकोनायवान्यामपिदीपकः ॥११॥
शालावृकाःकपिक्रोष्टुश्वानःस्वर्णेपिगैरिकं॥पीडार्थेपिव्यलीकंस्यादलीकंत्वप्रियेऽनृते॥१२॥
शीलान्वयावनूकेद्वेशाल्केशकलवल्कले॥साष्टेशतेसुवर्णानांहेम्न्युरोभूषणेपले ॥ १३॥

तुकुलेशीलेपुंसिस्याद्वृत्तजन्मनीतिमेदिनी"।शाकलंखंडं।वल्कलंत्वक्। द्वेशाल्केइति।सुवर्णानांहेम्नःकर्षाणांसाष्टेशतेऽष्टाधिकशतकेनिष्कः। सहाष्ट भिर्वर्ततइतिसाष्टंसराजदंतत्वयमितिवत्। तथाहेम्निसुवर्णमात्रेउरसोवक्षसोभूषणेहेमपलेचदीनारेसांव्यवहारिकेद्रव्यभेदेनिष्कः। पलंकर्षचतुष्टयं। गुंजानामशीतिःकर्षः॥१३॥

रामलंपुरीषं। एनःपापं। "त्रिषुपापशाये कल्को ऽस्त्रीविट्किट्टेभदंतयोरितिविश्वः। कल्को ऽस्त्रीघृततैलादिशोषेदंभेबिभीतकइतिमेदिनी" पिनाको ऽस्त्रीरुद्रचापेपांसुवर्षत्रिशूलयोरितिमेदिनी ॥ १४ ॥ करेण्वांहास्तिन्यांचकारान्नवप्रसूतायांगविधेनुका। मेघजालेमघवृंदेचकारादेवताविशेषेपिका लिका। वृत्तिर्विवरणश्लोकः। यथागृह्यकारिका। "यातनाकृत्योरित्यपिपाठः। कारिकानटयोषिति। कृतोविवरणश्लोकेशिल्पयातनयोरपि। नटु

दीनारेपिचनिष्को ऽस्त्रीकल्को ऽस्त्रीरामलेनसोः॥ दंभेप्यथपिनाको ऽस्त्रीशूलशंकरधन्वनोः॥१४॥
धेनुकातुकरेण्वांचमेघजालेचकालिका ॥ कारिकायातनाकृत्योःकर्णिकाकर्णभूषणे ॥ १५॥
करिहस्तांगुलौपद्मबीजकोश्यांत्रिषूत्तरे ॥ वृंदारकोरूपिमुख्यावेकेमुख्यान्यकेवलाः ॥ १६॥

सकंतुकर्मादौकारकेकर्त्तरित्रिषुक्षितिमेदिनी" ॥ १५ ॥ करिहस्तांगुलौगजशुंडाग्रेकमलांतर्गतकोशेचकर्णिका। "कर्णिकाकरिहस्ताग्रेकरमध्यांगुलावपि। ऋमुकादिच्छटांशेक्तवराटेकर्णभूषणइतिमेदिनी"। उत्तरे अतःपरंवांतेभ्यः प्राक्शब्दास्त्रिषुत्रिलिंगाइत्यर्थः। "वृंदारकः सुरेपुंसि मनोज्ञश्रेष्ठयोस्त्रिषुक्षितिमेदिनी" मुख्यश्चान्यश्चकेवलश्चेतिएकेस्युः ॥ १६ ॥

दांभिकोमायावी। योदूरेरितेक्षणः सचकौक्कुटिकइत्यच्यते ॥ योभृत्यः कोपप्रसादचिन्हज्ञानायप्रभोर्भालंललाटमेवपश्यति। भावदर्शीत्यपिपाठः यश्चकार्याक्षमःप्रभोः कार्यकर्तुमशक्तःताबुभौलालाटिकौ। लालाटिकःसदालस्येप्रभुभावनिदर्शीनीत्यजयः। इतोभूभृन्नितंबेत्यादयः केचिद्

स्याद्दांभिकः कौक्कुटिकोयश्चदूरेरितेक्षणः॥ लालाटिकः प्रभोर्भालंदर्शीकार्याक्षमश्चयः॥१७॥"भूभृन्नितंबवलयचक्रेषुकटकोः स्त्रियां॥ सूच्यग्रेक्षुद्रशक्तौचरोमहर्षेचकंटकः॥१॥ पाकोपाक्तिशिरूमध्यरत्नेनेतरिनायकः॥ पर्यंकःस्यात्परिकरेस्याद्व्याघ्रेपिचलुब्धकः॥२॥आर्द्रायामपिलुब्धकइत्यपिपाठः॥ पेटकःस्त्रिषुपेटेपिपुरोदेश्येचदेशिकः॥ खेटकोग्रामफलकोधीवरेपिचजालिकः॥३॥ पुष्परेणोचकिंजल्कःशुल्कोस्त्रीस्त्रीधनेपिच॥स्यात्कल्लोलेष्वुत्कलिकावार्द्रकंभावहृदयोः॥४॥ करिण्यांचापिगणिकादारकोबालभेदको॥ अंधेष्वनेडमूकः स्यान्नटंकोदर्पाश्मदारणो॥५॥" ॥ इतिपंचक्षेपकाः॥ ॥ इतिकांनाः॥ ॥ मयूरवस्त्विट्करज्वाला स्वलिबाणोशिलीमुखो॥

मूलकाएवश्लोकाः। अतस्तेषांव्याख्यानाभावः॥१७॥ ॥इतिकांनाः॥ ॥"स्त्रीतानाह" त्विट्करज्वालासुमयूरवः। अत्रत्विट्शोभा। करःकिरणः भ्रमरशरोशिलीमुखो॥

निधौनिधिभेदे। कंबौचद्वारवः। अपिशब्दादाकाशेपिशून्येरवं। "खमिंद्रियेपुरेक्षेत्रेशून्यविंदौविहायसि॥ संवेदनेदेवलोकेरामण्यपिनपुंसकमितिमेदिनी" ॥१८॥ घृणिः किरणः। अपिशब्दाच्चूडायांप्रपदेवह्निचूडायांचशिरवा ॥ ॥ इतिरवांताः॥ ॥ शीलतेस्मौनगसंज्ञकावगसंज्ञकौच। विशि खोबाणः। बाणार्कपक्षिणः खगशब्दवाच्याः। अर्केतिग्रहणमुपलक्षणं ॥ १९ ॥ चकाराच्छालिभेदेपतंगः। क्रमुकोवृक्षभेदः। तत्फलेतुक्लीबंपूगं। वृं

कां० ३

वृंरवोनिधौललाटास्थ्निकंबौनस्त्रींद्रियेपिरवं ॥ १८ ॥ घृणिज्वालेअपिशिरवे ॥ खांताः॥ शीलतेस्मौन गावगौ ॥ आशुगोवायुविशिरवोशराकेविहगाःखगाः ॥ १९ ॥ पतंगोपक्षिसूर्यौचपूगः क्रमुकवृंद योः॥ पशवोऽपिमृगावेगःप्रवाहजवयोरपि ॥ २० ॥ परागःकोसुमेरेणोस्त्रानीयादौरजस्यपि ॥ ७

दंसमूहः। पशवोहरिणाद्याः। अपिशब्दान्मृगशीर्षेमार्गणायांचमृगः। जवोरंहः। अपिशब्दाद्विष्ठादेर्बहिर्निर्गमेपि ॥ २० ॥ कुसुमसंबधिनिरेणो। स्त्र। त्यनेनस्त्रानीयंगंधचूर्णविशेषः। आदिनासुरतादिश्रमशांतयेकामशास्त्रोक्तंयत्कर्पूरादिचूर्णतद्ग्रहः। अपिशब्दादुपरागेपिपरागः। रजसिधूलौ ॥

लग्नयोर्मध्यमंतरेचाधमेविधितिरभसः"। सोमदैवतेयथा। सोमश्चंद्रोदेवतमस्यसौम्यंहविः। "सौम्योज्ञेनात्रिषुनुग्रेमनोज्ञेसोमदैवत इतिमेदिनी"॥१६०॥ सर्वज्ञाभिषजौवैद्योकुल्याकुलवधूसरिव्। फलकल्याणयोभव्ययोग्यंसांप्रतिकेत्रिषु॥ १ ॥ क्रियाचारातिक्रमेपि जलाधारेपिचाशयः॥ दैत्याचार्येपिधिष्ण्योनाकषायःसुरभावपि॥ २ ॥ चंद्रोदयेवितानेपिस्यादाम्नायोन्वयेश्रुतौ॥ ॥ इतियांताः

निवहोत्तरः अवसरः । प्रस्तावः । उभौवारौ । वारः सूर्यादिदिवसेवारोऽवसरोत्तरयोरिति । मस्तरोदर्भमुष्टिर्दर्भशाख्यावा । अध्वरःक्रतुरुभौसं
स्तरौ । आद्यशब्दाद्वेदशास्त्राध्यापकश्चगुरुः ॥ १६१ ॥ भेदोविशेषोयथा । पलांडुभेदागृंजनादयः । सादृश्यंयथा । मर्कटप्रकारंकरोति । इंगि

निवहावसरौवारौसंस्तरौप्रस्तराऽध्वरौ ॥ गुरूगीष्पतिपिचाद्यौद्वापरौयुगसंज्ञयो ॥ १६१ ॥
भेदसादृश्येआकारावितिंगिताकृती ॥ किंशारूसस्यशूकेपुमरूधन्वधराधरौ ॥ १६२ ॥
अद्र्योद्रुमश्लोलार्काःस्त्रीस्तनाब्दौपयोधरौ ॥ ७ ७ ७

तंचेष्टितं । किंशारुर्नासस्यशूकेविशिखेवाकंकपक्षिणीतिमेदिनी । धन्वानिर्जलदेशः । धराधरःपर्वतः । सोपिमरुस्थलीसंबंधान्मरुः ॥ १६२ ॥
स्त्रियाः स्तनःकुचः । अब्दोमेघः । उभौपयोधरौ । "पयोधरःकोशाकारेनालिकेरेस्तनेपिच ॥ करीरुमेघयोः पुंसीतिमेदिनी" ॥ ७ ७

अरिः शत्रुः। दानवोदनुजभेदः। "वृत्रोमेघेरिपौध्वांतेदानवेवासवेगिरौतिहेमः" राज्ञाग्राह्योभागोबलिः। अंशूराश्मिः॥ १६३॥ नारीरुकूस्त्री णांरोगभेदः। प्रदरोरोगभेदेस्याद्विदारेशरभंगयोरिति। कचाःकेशाः। अपिशब्दात्कोणेप्यस्रः। नजातेश्रृंगेयस्य। सएवंभूतोगौः। कालेश्मश्रूत्था नसमयेपियोनापुरुषोऽश्मश्रुः श्मश्रुरहितस्तावुभावपितूबरौ। "कालइत्युभाभ्यांसंबध्यते। तूबरोश्मश्रुपुरुषेप्रौढाश्रृंगारकेपिच॥ पुरुषध्वं

ध्वांक्षारिदानवावृत्राबलिहस्तांशवःकराः॥ १६३॥ प्रदराभंगनारीरुकूबाणाअस्राःकचाअपि॥
अजातश्रृंगोगौःकालेप्यश्मश्रुर्नाचतूबरौ॥ १६४॥ स्वर्णेपिराःपरिकरःपर्यंकपरिवारयोः॥

जनत्यनकेस्यात्कषायरसेपिचेतिमेदिनी"॥ १६४॥ अपिशब्दाद्वित्तमात्रेराइत्येकाक्षरं। "भवेत्परिकरोव्रातेपर्यंकपरिवारयोः॥ प्रगाढ गात्रिकाबंधेविवेकारंभयोरपीतिविश्वः। यत्नारंभोपरिकरावितित्रिकांडशेषः॥"

तारोमुक्तादिसंशुद्धेतरणेशुद्धमौक्तिके। तारंचरजतेतुच स्वरेप्यन्यवदीरितमितिविश्वः। सतु। शारशब्दः। कर्बुरः शबलवर्णः। शारः स्याच्छ

बलेयाव्यलिंगः पुंसिसमीरणे ॥ १६५॥ आजिर्युद्धं। संविक्रियाकारः। प्रतिज्ञायांयथा। सत्यसंगरः। "संगरोयुधिचापदि। क्रियाकारेविवे

चांगीकारेक्षीबंशमीफलइतिमेदिनी" ॥ गुप्तवादेरहसिकर्तव्यावधारणेमंत्रः। "मंत्रोदेवादिसाधने ॥ वेदांदेोगुप्तवादेचेतिहैमः"। अपिशब्दा

मुक्तारशुद्धौचतारः स्याच्छारोवायौसतुत्रिषु ॥ १६५॥ कर्बुरेऽथप्रतिज्ञाजिसंविदापत्सुसंगरः ॥
वेदभेदेगुप्तवादेमंत्रोमित्रोरवावपि ॥ १६६॥ मखेषुयूपरवंडेपिस्वरुर्गुह्येवस्करः ॥

त्सर्व्योमित्रंक्षीबं ॥ १६६॥ यूपेतस्थमाणेप्रथमपतितंवाकलंयूपरवंडं"। अपिशब्दाद्गुह्योलौचस्वरुः। स्वरुर्वज्रध्वनौबाणेयूपरवंडेपिचस्व

रुः। गुह्येउपस्थे। अपिशब्दाद्गूथेप्यवस्करः। तूर्यरवोवाद्यध्वनिः ॥

आडंबरःसमारंभेगजगर्जिततूर्ययोरितिकोशांतरं ॥ १६७ ॥ अभियोगेऽभिग्रहणं । वीरस्यकर्मवीर्यं । सन्नहनंकवचादिग्रहणं । एतेष्वभिहारः । जंगमेजंगमविशेषेपरिजनइतियावत् । खड्गकोशेऽसिपिधायकेचर्मादीयपरिच्छदउपकरणेपरीवारः ॥ १६८ ॥ विटपीवृक्षःदर्भमुष्टिपरिमाणंतु । पंचाशताभवेद्दूर्म्लातदर्धेनतुविष्टरइत्यादि । पीठमाद्येयस्य तदासनंचविष्टरः । आद्यशब्दात्कृष्णाजिनादि । अत्रपीठं

आडंबरस्तूर्यरवःखड्गेऽभ्यंचार्जिते ॥ १६७ ॥ अभिहारोऽभियोगेचवीर्येसन्नहनेपिच ॥
स्याज्जंगमेपरीवारःखड्गकोशेपरिच्छदे ॥ १६८ ॥ विष्टरोविटपीदर्भमुष्टिःपीठाद्यमासनं ॥
द्वारिद्वास्थेप्रतीहारःप्रतीहार्यप्यनंतरे ॥ १६९ ॥ ९ ९ ९

काष्ठादिमयमासनं । द्वास्थेद्वारपालेप्रतीहारः । अनंतरेऽप्रतीहारेप्रतीहारीत्यपिशब्दः । सतुपुंव्यक्तावपिस्त्रियां । गौरादित्वान्ङीप् । अपिशब्दान्नूहाः स्थितायांवयोधिनीतिमेदिनी । अयमिन्नंतइतिनभ्रमितव्यं । रांतेपुनस्यपाठायोगात् ॥ १६९ ॥ ९ ९

विपुलइतिनकुलविशेषणं। नेनविशालनकुलेविष्णोचबभ्रुःपुंसि। पिंगलेत्रिषु। "बभ्रुःपिंगोऽग्निभूलिषु॥ मुनौविशालेनकुलेविष्णावितिहैमः"। स्थिरांशोदृक्षादेःकठोरभागः। तत्रयथा। शिरापासारः। न्याय्येन्यायादनपेते। वरेश्रेष्ठे। "सारोबलेस्थिरांशेचमज्जिपुंसिजलेधने॥ न्याय्येक्लीबंत्रिषुवरइतिमेदिनी"॥१७०॥ "द्यूतकारेपणेच"। दुरोरश्चतुरक्षरः। द्यूतेदुरोदरंक्लीबं। दुर्गपथेदुर्गमवर्त्मनि। "कांतारोऽस्त्रीमहारण्येबिलेदुर्गमवर्त्मनि। पुंसिस्यादिक्षुभेदइतिमेदिनी"॥ १७१॥ अन्यशुभद्वेषेपरसंपत्यसहनेमत्सरःपुंसि। तद्वतिमात्सर्यं

विपुलेनकुलेविष्णोबभ्रुर्नापिंगलेत्रिषु॥ सारोबलेस्थिरांशेचन्याय्येक्लीबंवरेत्रिषु॥१७०॥
दुरोदरोद्यूतकारेपणे द्यूतेदुरोदरं॥ महारण्येदुर्गपथेकांतारंपुंन्नपुंसकं॥ १७१॥
मत्सरोऽन्यशुभद्वेषितद्वत्कृपणयोस्त्रिषु॥ देवाद्दृत्तेवरःश्रेष्ठेत्रिषुक्लीबंमनाक्त्रिये॥ १७२॥

युक्ते। कृपणेचमत्सरोऽभिधेयलिंगकः। देवाद्देवसकाशाद्दृतेऽभीप्सितेवरःपुंसि। श्रेष्ठेत्रिषु। मनाक्त्रिये ईषदिष्टेक्लीबं। "वरोजामातरिष्टौदेघतादेरभीप्सिते॥ षिंगेपुंसित्रिषुश्रेष्ठेकुंकुमेतुनपुंसकं। वरीत्रोक्तशतावर्यांवराचस्यात्फलत्रिके॥ मनागिष्टेवरंक्लीबंकेचिदाहुरनव्ययमितिमेदिनी"॥१७२॥

वंशास्यवेणोरंकुरेकरीरः पुन्नपुंसकयोः। नापुमान्। चमूजघनेसेनापश्चाद्भागेप्रतिसरोनापुलिंगः। हस्तसूत्रेमंगलार्थमंत्रैरभिमंत्रितंसूत्रंयत्करेबध्य
तेतत्र। "भवेत्प्रतिसरोमंत्रभेदेमाल्येचकंकणे ॥ व्रणशुद्धौचमूष्टष्टेपुंसिनस्त्रीतुमंडले ॥आरक्षेकरसूत्रेचनियोज्येत्वन्यलिंगकइतिमेदिनी

वंशांकुरेकरीरोऽस्त्रीतरुभेदेघटेचना ॥ नाचमूजघनेहस्तसूत्रेप्रतिसरोऽस्त्रियां ॥ १७३ ॥
यमानिलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषु ॥ शुकाहिकपिभेदेऽहरिर्नाकपिलेत्रिषु ॥ १७४ ॥

॥ १७३ ॥ यमादिषुचनुर्दशसुहरिशब्दोवर्तते। तत्रत्रयोदशसु नपुंसकं। कपिलवर्णेत्रिलिंगः। अनिलोवायुः। अंशुः किरणः। वाजीह
यः। शुकः पक्षिभेदः। अहिः सर्पः। "लोकांतरहरिद्वर्णयोश्चहरिः"। १७४ ॥

कर्परांशोसिकतासु। अपिशब्दात्खंडविकृत्यादौ शार्करांशब्दः। "शार्करांखंडविकृतावुपलाकर्परांशयोः। शार्कराान्वितदेशेपिरूढ्यभेदेऽकलेपिनेतिगोदिनी"। याप्यतेऽनेनयापनंतस्मिन्। यात्रातुयापनोपायेगतौदेवार्चनोत्सवइतिविश्वः। भ्वादिषुचतुर्षुद्राशब्दः। सुरामद्ये। आपोजले। श्रमादिनासर्वेंद्रियापटुत्वंग्रमीला। "तंद्रेतिटाबंतोपि"॥१७५॥ "उपमात्रादिषुधात्रीशब्दः। उपमातास्त्रीरम्रदा। क्षितिस्त्रस्त्री।

शार्करांकर्परांशोपियात्रास्याद्यापनेगतौ ॥ द्वराभूवारुणेराज्ञुस्यात्तंद्रीनिद्राग्रमीलयोः ॥१७५॥
धात्रीस्यादुपमातापिक्षितिरप्यामलक्यपि ॥ क्षुद्राव्यंगानटीवेश्यासरघाकंटकारिका ॥ १७६॥

आमलकीवृक्षभेदः। अपिनाजननन्यपिधात्री"। व्यंगादिषुक्षुद्रा। व्यंगाहीनांगी। नटीनर्तनशीला। सरघामधुमक्षिका। कंटकारिकावृहती। "क्षुद्राव्याघ्रीनटीव्यंगावृहतीसरघासुच ॥ चांगेरिकायांहिंसायांमक्षिकामात्रवेश्ययोरितिहेमः।"॥ १७६॥

क्रूरादित्रयेक्षुद्रत्रिषु। "क्षुद्रोहरिद्रेकृपणेनृकृष्टेऽल्पनृशंयोरिनिहेमः"। परिच्छदादित्रयेमात्रास्त्रियां। कात्स्न्यादिद्वयेक्लीबं। परिच्छदेयथा। महामात्रः। अल्पेयथा। शाकमात्रा। परिमाणेयथा। किंहस्तिमात्रोंकुशः। कात्स्न्र्येयथा। जीवमात्रंनहिंस्यात्। अवधारणेतु। पयोमात्रंभुंक्ते। धनेकर्णभूषायांवर्णावयवेचमात्रा। "मात्रंत्ववधृतौस्वार्थेकात्स्न्र्येमात्रापरिच्छदे॥ अक्षराऽवयवेद्रव्येमानेऽल्पेकर्णभूषणे॥

त्रिषुक्रूरेऽधमेल्पेपिक्षुद्रमात्रापरिच्छदे ॥ अल्पेचपरिमाणेसामात्रंकात्स्न्र्येऽवधारणे॥१७७॥
आलेख्याश्वर्ययोश्चित्रंकलत्रंश्रोणिभार्ययोः॥ योग्यभाजनयोःपात्रंपत्रंवाहनपक्षयोः॥१७८॥

कालेहृनेचेतिहेमः"॥१७७॥आलेख्यंभित्त्यादौनानावर्णलेखनं। "चित्रंरेवतिलकेद्भुते॥आलेख्येकर्बुरेऽतिहेमः।" श्रोणिः कटिः "दुर्गेस्थानेनृपादीनांकलत्रंश्रोणिभार्ययोरितिरभसः।" योग्येयथा। दानपात्रंश्रोत्रियः। "पात्रंतुभाजनेयोग्येपात्रंनीरङ्ध्यांतरे। पात्रंस्रुवादौपर्णेचराजमंत्रिणिचेष्यतइतिविश्वः। पर्णेचपत्रं। पत्रंतुवाहनेपर्णेपक्षेचशरपक्षिणोरितिविश्वः"॥१७८॥ ७

निदेशआज्ञा। ग्रंथोव्याकरणादिः। तन्त्रंशास्त्रं। जटाद्रुक्षमूलं। अंशुकंवस्त्रभेदः। नेत्रंवस्त्रविशेषः स्यादितिमंजरी। "नेत्रंमणिगुणेवस्त्रभेदमूलेद्रुमस्य च। रथेचक्षुषिनद्यांतुनेत्रीनेतरिवाच्यवदितिमेदिनी"। पत्न्यांदेहेचक्षेत्रं "क्षेत्रंशरीरेकेदारेसिद्धस्थानकलत्रयोरितिमेदिनीविश्वप्रकाशौ"॥

निदेशाग्रंथयोः शास्त्रंशस्त्रमायुधलोहयोः॥ स्याज्जटांशुकयोर्नेत्रंक्षेत्रंपत्नीशरीरयोः॥१७९॥
मुखाग्रेक्रोडहलयोःपोत्रंगोत्रंतुनाम्निच॥ सत्रमाच्छादनेयज्ञेसदादानेधनेऽपिच॥१८०॥

॥१७९॥ क्रोडःसूकरः। तस्यहलस्यचमुखाग्रेपोत्रं। पोत्रंवस्त्रेमुखाग्रेचसूकरस्यहलस्यचेतिविश्वः। चकाराद्गोत्रंशैलकुलेपिच॥ "गोत्रंकुलाख्ययोः। संभावनीयेबोधेचकाननक्षेत्रवर्त्मस्वितिमेदिनी"। आच्छादनंवस्त्रं। सदादानंनित्यत्यागः। "अपिशब्दाद्यज्ञेकेनवेचसत्रशब्दः"॥ १८०॥

विषयेरूपादौअपिनाचत्वरेअजिरं।"अजिरंद्वंद्वरेकायेविषयेप्रांगणेऽनिलइतिहेमः"। व्योम्न्याकाशे। वाससिवस्त्रे।"अंबरंवाससिव्योम्निकापर्यासेचसुगंधकइतिविश्वः"। अपिशब्दात्सैन्यरथांगयोश्चक्रं।"चक्रंप्रहरणेगणे। कुलालाद्युपकरणेराष्ट्रेसैन्यरथांगयोः। जलावर्तेदंभइतिहेमः" अपिशब्दाद्वर्णब्रह्मणोरव्यक्षरं।"अक्षरंस्यादपवर्गेपरमब्रह्मवर्णयोः॥ गगनेधर्मतपसोरंबरेमूलकारणइतिहेमः"। क्षीरादुग्धेक्षीरं॥

अजिरंविषयेकायेप्यंबरंव्योम्निवाससि॥ चक्रंराष्ट्रेप्यक्षरंतुमोक्षेऽपिक्षीरमप्सुच॥१८१॥
स्वर्णेपिभूरिचंद्रौद्वौद्वारमात्रेपिगोपुरं॥

॥१८१॥ भूरिशब्दश्चंद्रशब्दश्चैतौद्वौशब्दौस्वर्णेपिवर्तेते। तत्रस्वर्णेभूरिरूपभेदात्क्लीबं।"अपिशब्दात्। भूरिर्नीवासुदेवेचहरेचपरमेष्ठिनि। नपुंसकंसुवर्णेचत्राज्येस्याद्वाच्यलिंगकइतिमेदिनी"। कर्पूरादौचचंद्रः।"चंद्रःकर्पूरकांपिल्लसुधांशुस्वर्णवारिषुतिमेदिनी"॥ ७

नकेवलंपूर्वद्वारेकिंतुद्वारमात्रेपिगोपुरं।"गोपुरंद्वारिपूर्द्वारिकैवर्तीमुस्तकेपिचेतिमेदिनी ॥ गह्वरस्तुगुहादंभनिकुंजगहनेषपीतिविश्वः"। रहो विजनं।अंतिकंसमीपं।द्वेउपक्करसंज्ञे॥१८२॥ पुरइत्यादीनित्रीणिअग्रशब्दवाच्यानि। तत्रपुरःपुरस्तात्। यथाअग्रगामी।अधिकंयथा। साग्रं शतं।उपरियथा। वृक्षाग्रं।"अग्रंपुरस्तादुपरिपरिमाणेपलस्यच ॥ आलंबनेसमूहेचभांतेचस्यान्नपुसकं॥ आधिकेचप्रधानेचप्रथमेचाभिधे

गुहादंभौगह्वरेद्वेरहोंतिकमुपक्करे ॥१८२॥ पुरोधिकमुपर्यग्राण्यगारेनगरेपुरं ॥
मंदिरंचाऽथराष्ट्रोऽस्त्रीविषयेस्यादुपद्रवे ॥१८३॥ ७ ७

यथादितिमेदिनी"। पुरंमंदिरंचेतिह्यमगारेगृहेनगरेचवर्तते। गृहोपरिगृहंपुरमितिधरणिः। "पुरंदारीरेनगरेगृहपाटलिपुत्रयोरितिहैमः मंदिरंनगरेक्लीबमितिमेदिनी। विषयेजनपदेउपद्रवेमरणादौचराष्ट्रः। "सचपुन्नपुंसकः" ॥१८३॥ ७ ७

श्वभ्रेगर्ते। हीरकेमणिभेदे। पवौभिदुरे। प्रधानेयथा। स्वतंत्रः। सिद्धांतेयथा। तांत्रिकः। सूत्रवायपरिच्छदयोश्चतंत्रशब्दः। "तंत्रंकुटुंबशास्त्रयोः स्यात्सिद्धांतेचौषधोत्तमे॥ प्रधानेतंतुवायेचशास्त्रभेदेपरिच्छदे॥ श्रुतिशास्त्रांतरेहेतावुभयार्थप्रयोजने॥ इतिकर्तव्यतायांचेतिमेदिनी"॥१८४॥ चामरइतिदंडविशेषणं। चमरस्यायंचामरस्तत्र। [illegible]ः समुदितयोरौशीरसंज्ञेतिस्वामी। सुभूतिस्तुपृथगेव

दरोऽस्त्रियांभयेश्वभ्रेवज्रोऽस्त्रीहीरकेपवौ॥ तंत्रंप्रधानेसिद्धांतेसूत्रवायेपरिच्छदे॥१८४॥
औशीरश्चामरेदंडेप्यौशीरेशयनासने॥ पुष्करंकरिहस्ताग्रेवाद्यभांडमुरवेजले॥१८५॥
व्योम्निरवड्गफलेपद्मेतीर्थौषधिविशेषयोः॥ ॐ ॐ ॐ

व्यारव्यत्। गजशुंडाग्रादिघष्टसुपुष्करं। वाद्यभांडंवादनीयपात्रंतन्मुरवे। खड्गफलेखड्गमध्ये। पद्मनालिने। तीर्थविशेषेकुष्ठारव्यओषधिविशेषेच। "पुष्करंद्वीपतीर्थाहिखगराजौषधांतरे॥ तूर्यास्येऽसिफलेकांडेशुंडाग्रेखेजलेऽब्जइतिहैमः"॥१८५॥ ॐ

अवकाशादिषुत्रयोदशसुअंतरशब्दः। अवकाशेयथा। अंतरेहिमं। अवधौयथा। मासांतरेदेयं। परिधानेयथा। अंतरेशाटकाः परिधानीयाइत्यर्थः। अंतर्धौयथा। पर्वतांतरितोरविः। भेदेयथा। यदंतरंसर्षपशैलराजयोः। तादर्थ्येयथा। त्वदंतरेणऋणमेतत्। छिद्रेयथा। परांतरेग्रहर्तव्यं। आत्मीयेयथा। अयमत्यंतरोमम। विनार्थेयथा। अंतरेणपुरुषाकारमिति। बहिर्यथा। अंतरेचंडालगृहाः। बाह्याइत्यर्थः। अवसरेयथा। अंतरंग-

अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये ॥ छिद्रात्मीयविनाबहिरवसरमध्येंतरात्मनिच ॥ १८६ ॥ मुस्तेपिपिठरंराजकशेरुण्यपिनागरं ॥ ७ ७

सेवकः। मध्येयथा। आवयोरंतरेजातःपर्वतः। अंतरात्मनियथा। दृष्टोऽंतरेज्योतीरूपः। चकारात्सादृश्येयथा। हकारस्यघकारोऽंतरतमः ॥ १८६ ॥ पिठरशब्दःमुस्तेमुस्तके। अपिशब्दान्मंथाने। पिठरस्थाल्यान्नाक्षीवंमुस्तमंथानदंड्योरितिमेदिनी। राजकशेरुजलजतृणमूलं। "नागरमोथाहृतिख्यातं"। नागरंमुस्तकेशाव्यां। वेदग्धेनगरोद्भवइतिमेदिनी ॥ ७ ७ ७

अंधतमसेगाढांधकारे। घातुकेहिंस्रेशार्बरशब्दः।"घातुकेभेनृलिंगमित्यपिपाठः। घातुकश्वासाविभश्चतत्रपुल्लिंगमित्यर्थः"॥१८७॥
"गौरःपीतेऽरुणेश्वेतेविद्युद्धेचाभिधेयवत्। नाश्वेतसर्षपेचंद्रेनद्योःपद्मकेसरइतिमेदिनी"। भल्लातकफलेप्यरुष्करः।"अरुष्करोव्रणङ्कृति त्रिषुभल्लातकेपुमानितिमेदिनी"।उदरेपिजठरः। "जठरःकुक्षिहड्डयोरितिहेमः।" अधस्तादनूर्ध्वे।ओष्ठेपि। "हीनेऽपिच" अ

शार्बरंत्वंधतमसेघातुकेभेद्यलिंगकं ॥१८७॥ गौरोऽरुणेसितेपीतेव्रणकार्यप्यरुष्करः॥
जठरःकठिनेऽपिस्यादधस्तादपिचाधरः॥१८८॥अनाकुलेपिश्वैकाग्र्योव्यग्र्योव्यासक्तआकुले॥
उपर्युदीच्यश्रेष्ठेष्वप्युत्तरःस्यादनुत्तरः॥१८९॥

धरः॥१८८॥ अनाकुलेस्वस्थे। अपिशब्दादेकतानेपि। व्यासक्तेद्विधाव्याप्टते। आकुलेनेकार्थन्यस्तचित्तेव्यग्रः। उपर्यादित्येउत्तरः। उपरियथा। इतउत्तरं।उदीच्येयथा। नर्मदोत्तरेविक्रमशाकः। श्रेष्ठेयथा। मुनिष्वुत्तरोवसिष्ठः। "उत्तरंप्रतिवाक्येस्यादूर्ध्वोदीच्योत्तमे ऽन्यवत्।उत्तरस्तुविराटस्यतनयेदिग्विचोत्तरइतिमेदिनी।"॥१८९॥

एषामुपर्यादीनांविपर्ययेवैपरीत्येश्रेष्ठेचानुत्तरःश्रेष्ठतुनविद्यमानउत्तरःश्रेष्ठोयस्मादितिविग्रहः॥ ॥दूरादयस्त्रयःपराः।अनात्माआत्मनो
ऽन्यः। "परःश्रेष्ठारिदूरान्योत्तरेक्लीबंतुकेवलइतिमेदिनी। रसेचमधुरः। क्रूरस्तुकठिणेघोरेनृशंसेत्वभिधेयवदितिविश्वः॥१९०॥ दक्षि
णेचोदारस्त्रिषु" नीचःपामरः। स्वच्छंदःस्वाधीनः। भद्रंसेशुक्लेचशुभ्रं। "शुभ्रंस्याद्भद्रकेक्लीबमुद्दीप्तशुक्लयोस्त्रिषितिमेदिनी" ॥१९१॥

एषांविपर्ययेश्रेष्ठेदूरात्मानोत्तमाःपराः ॥ स्वादुप्रियोतुमधुरोक्रूरोकठीनानिर्दयो ॥१९०॥
उदारोदातृमहतोरितरस्त्वन्यनीचयोः ॥ मंदस्वच्छंदयोःस्वैरःशुभ्रमुद्दीप्तशुक्लयोः ॥१९१॥
॥ ॥ इतिरांताः॥ ॥ चुडाकिरीटंकेशाश्चसंयतामौलयस्त्रयः ॥ ७ ७

॥ ॥ इतिरांताः॥ ॥चूडाशिखा। किरीटंमुकुटं। संयताबद्धायेचकेशास्तेत्रयोमौलयः। त्रयइतिमौलेःपुंस्त्वसूचनायोक्तं।
"मौलिःकिरीटे। धम्मिल्लेचूडायामनपुंसकं॥ ना ऽशोकद्रौस्त्रियांभूमावितितुमेदिनी" ॥ ७ ७ ७

पीलुः पुमान्त्रसूतेस्म्यात्परमाणौमतंगजे ॥ अस्थिखंडेचनालस्यकांडपादप्रभेदयोरितिमेदिनी । मातंगजोगजः । "कांडोबाणः" ॥ १९२ ॥ अनेहाः समयःकालोमृत्युर्महाकालेसमयेयमकृष्णयोरितिमेदिनी । "कलहेपिकलिः । "कलिः स्त्रीकलिकायांनाद्यूराजिकलहेयुगइतिमेदिनी" । अपिवाब्दा लकमलंसलिलेतांम्रेजलजेव्योम्निभेषजे । प्राग्वियतइतिप्रावारः । सात्वायानागराजेपि । "द्रुमावपिच" कंबलः ॥ १९३ ॥ करोराजदेयभागः । उपहार

द्रुमप्रभेदमलंगकांडपुंसिणेपीलवः ॥ १९२ ॥ कृतांतानहसोःकालश्चतुर्थेपियुगेकलिः ॥
स्यात्कुरंगेपिकमलः प्रावारेपिचकंबलः ॥ १९३ ॥ करोपहारयोःपुंसिबलिःप्राण्यंगजेस्त्रियां ॥
स्थौल्यसामर्थ्यसैन्येषुबलंनाकाकसीरिणोः ॥ १९४ ॥

उपचारः । तत्रबलिःपुंसि । "दैत्यप्रभेदेचबलिः" । प्राण्यंगजेत्वक्संकोचेबलिःस्त्रियां । स्थौल्यादित्रयेबलं । "बलंगंधरसेरूपेस्थामनिस्थौल्य सैन्ययोरितिमेदिनी" । कालेहलायुधेचबलोनापुमान् । "बलिस्तुबलिनिकाकेदैत्यहलायुधइतिहैमः" ॥ १९४ ॥

वात्यायांवातसमूहे। वातविकारसहेप्राणिनिवातूलस्त्रिषु। "वातूलोवातुलोपिस्यादितिद्विरूपकोशात्-ह्रस्वमध्योपि"। शठेव्यालोवाच्यलिंगः। दुष्टगजे। "सिंहे" पिचव्यालः॥१९५॥ विड्विष्ठा। किट्टंस्वेदादिजन्यंमले। "क्लीबे-वेश्योष्यलिंगं। शूलोऽस्त्रीरोगआयुधे। मृत्युकेतनयोगेषितिमेदिनी"। शंकोलोहादिमयकीलके। अपिशब्दाज्वालापिकीलः। स्त्रियांतुकीला। "कीलोऽग्नितेजसि। कफणिस्तंभयोः शंका

वातूलःपुंसिवात्यायामपिवातासहेत्रिषु ॥ भेद्यलिंगःशठेव्यालःपुंसिश्वापदसर्पयोः॥१९५॥
मलोऽस्त्रीपापविड्विट्टान्यस्त्रीशूलंरुगायुधं॥ शंकावपिद्वयोःकीलःपालिःस्त्र्यश्रेयंकपंक्तिषु॥१९६॥

वितितुहेमः"। पालिःस्त्रीलिंगा। अतःपालीच। अश्रिर्धर्मतटेवा। अंकउत्संगः। चिन्हंवा। पंक्तिःश्रेणिः। "पालिःकर्णलतायांस्यात्प्रदेशे पंक्तिचिन्हयोरित्यजयः। सश्मश्रुयुवतीपालिःपंक्तिःकर्णलतापिचेतित्रिकांडशेषः। पालिःकर्णलतायेऽश्रौपंक्तावंकप्रभेदयोः। छात्रादिदेयेस्त्रीपाली यूकासश्मश्रुयोषितोरितिमेदिनी"॥१९६॥

शिल्पेगीतवाद्यादिनैपुण्ये। कालभेदेत्रिवात्का। धात्मकेकालेकला। "अपिना। कलास्यान्मूलरेवृद्धौशिल्पादावंशमात्रके। षोडशांशेचचंद्रस्यकलनाकालमानयोरितिमेदिनी"। सख्यांपंक्तौचालिः। "आलिर्विशराशाये। स्त्रिषुस्त्रियांवयस्यायांसेतौपंक्तौचकीर्तितेतिमेदिनी। अब्ध्यंबुविकृतौचंद्रोदयादिनाजलधिजलवृद्धौ। काले। मर्यादायांचवेला। "वेलाकालेचजलधेस्तीरनीरविकारयोः। आक्षिप्तमरणेरोग

कलाशिल्पेकालभेदेप्यालीसख्यावलीअपि॥ अब्ध्यंबुविकृतौवेलाकालमर्यादयोरपि॥ १९७॥ बहुलाःकृत्तिकागावोबहुलाग्नौशितौत्रिषु॥

सीम्निवाचिबुधस्त्रियां। भोजनेपीश्वराणांस्यादितिविश्वप्रकाशः"॥ १९७॥ कृत्तिकाःतारावहुत्वात्बहुत्वं। गावोधेनवोबहुलारव्याः। अग्नौचबहुलःपुंसि। शितौकृष्णवर्णेत्रिषु। "बहुलानीलिकायांस्यादेलायांगवियोषिति॥ कृत्तिकायांस्त्रियांभूम्निविहायसिनपुंसकं। पुंस्यग्नौकृष्णपक्षेचवाच्यवलाज्यकृष्णयोरितिमेदिनी"॥

विलासेक्रियायांचलीला "लीलांविदुःकेलिविलासरंभाशृंगारभावप्रभवक्रियास्विति विश्वप्रकाशः"। शार्कराःसिकताःखंडाविकृतिर्वा। अश्मनिपुंसि। उपलःप्रस्तरेरत्नेशार्करायांस्मृतोपला ॥१९८॥ शोणितेक्लीबेअंभसिजले। कीलालंनाम। आद्येशिफायांवृक्षजटायांभेनक्षत्रविशेषेमूलं। आद्येयथा। मूलप्रकृतिः "मूलंपार्श्वाद्ययोरुडौ। विकुंजशिफयोःस्त्रीयेशीलायांचवशीकृतौ। प्रतिष्ठायामितिहेमः"। अर्थयोरि

कां० २

६६

लीलाविलासक्रिययोरुपलाशार्करापिच ॥१९८॥ शोणितेंभसिकीलालंमूलमाद्येशिफाभैयोः॥
जालंसमूहआनायगवाक्षक्षारकावपि ॥ १९९ ॥ शीलंस्वभावेसद्वृत्तेसस्येहेतुकृतेफलं ॥

तिपाठेमूलंधनं। समूहोजालं। यथाजनजालं। आनायःव्राणसूत्रादिकृतोरज्जुसंघः। गवाक्षोवातायनं। क्षारकोःस्फुटकलिका। एतेषुजालं। "दंभेपिजालं" ॥१९९॥ स्वभावेप्रकृतौ। सद्वृत्तेसच्चरिते। शीलंतस्यधान्यदारीनांफलेसस्यमित्युक्ते। हेतुकृतेहेतुनासाधिते। यथायागस्यफलंस्वर्गः। बाणाग्रेपिफलं। "फलंहेतुकृतेजातीफलेफलकसस्ययोः। त्रिफलायांचकंकोलेशस्त्राग्रेव्युष्टिलाभयोरितिहेमः"।

६६

छदिश्चनेत्ररुक्छदिर्नेत्ररुजोर्नयोः। छादिपिगृहाच्छादने। समूहेननेत्युक्तेपटलंपटलेतिच। "अथपटलंपिटकेचपरिच्छदे ॥ छदिर्दंत्रोग
तिलकक्लीबेदंपुनर्ननेतिमेदिनी" ॥ २०० ॥ अधोयथा। रसातलं। स्वरूपेयथा। वक्षस्तलं। तलंस्वरूपाधारयोःखड्गमुष्टिचपेटयोरिति।
"तलस्वरूपेऽनूर्ध्वेऽस्त्रीक्लीबेज्याघातवारणे। काननेकार्यबीजेचपुंसितालमहीरुहे ॥ चपेटचत्सरौतंत्रीघातेसव्येनपाणिनेतिमेदिनी"

छदिर्नेत्ररुजोःक्लीबंसमूहेपटलंननना ॥ २०० ॥ अधःस्वरूपयोरस्त्रीतलं
स्याच्चामिषेपलं ॥ और्वानलेपिपातालंचैलंवस्त्रेऽधमेत्रिषु ॥ २०१ ॥

पलमुन्मानमांसयोरितिरुद्रः। और्वानलेवाडवाग्नौ। "विवरेपातालं"। पातालंनागलोकेस्यात्पातालंवडवानले ॥ वस्त्रेचैलंक्लीबेऽ
धमत्रिषु। स्त्रीत्वेनुचेलं। "चेलमित्यपिपाठः" ॥ २०१ ॥

शंकुभिःकीर्णेकीलव्याप्तेश्वभ्रेगर्तेकुकूलं। तुषाग्नौकुकूलः। निर्णीतेनिश्चितेयथा। केवलंमूरखैः। एकस्मिन्यथा। केवलोयंब्रजति। कृत्स्नेय
था। केवलाभिक्षवः। स्त्रीलिंगेकेवली। "केवलःकुहने पुमानितिमेदिनी"॥२०२॥ पर्याप्तिःसामर्थ्ये। शिक्षितेकुशलेत्रिषु। यथाकुशलाकुलवधूः
प्रवालोस्त्रीकिसलयेवीणादंडेचविद्रुमइतिमेदिनी। स्थूलंजीवरेपित्रिषु। "स्थूलंकूटेऽथनिःसारेपीवरेचान्यलिंगकइतिमेदिनी"॥२०३॥ दंतुरे

कुकूलंशंकुभिःकीर्णेश्वभ्रेनातुतुषानले॥ निर्णीतेकेवलमितित्रिलिंगंतेकृत्स्नयोः॥२०२॥ पर्या
प्तिःक्षेमपुण्येषुकुशलंशिक्षितेत्रिषु॥ प्रवालमंकुरेप्यस्त्रीत्रिषुस्थूलंजडेपिच॥२०३॥ करालोदंतुरेतुंगे
चारौदक्षेचपेशलः॥ मूरर्खेऽर्भकेपिबालःस्याल्लोलश्चलसतृष्णयोः॥२०४॥ ॥इतिलोनाः॥ ॥

उन्नतदंतयुक्ते। यथादंष्ट्राकरालः। तुंगेउन्नते "करालोदंतुरेतुंगेभीषणेचाभिधेयवत्। नम्रजीरसंतेलेनाक्षीबेकृष्णकुठेरकइतिमेदिनी"।
चारुदक्षयोःपेशलः। "बालोऽज्ञेऽर्भेपुच्छयोः। शिशोर्जीवरकचयोरितिहैमः।" सतृष्णः साकांक्षः॥२०४॥ ॥इतिलोनाः॥ ॥

वनेकानने। अरण्यवह्निःवनाग्निः। तत्रवांतौदवदावौ। भवःक्षेमे[illegible]तायांप्राप्तिजन्मनोरितिमेदिनी। मंत्रीप्रधाने। सहायःसखा। पतिर्भर्ता। शाखीवृक्षभेदः। नरोमनुष्यः। एतेधवाः। "धवोधूर्तेनरेपवोद्रुभेदइतिहैमः"॥२०५॥आविर्नायेरवौमेषेशैलेमूषिकंबलइतिमेदिनी"। आज्ञाद्यस्त्रयोहवसंज्ञाः। आह्वानंहूतिः। अध्वरोयज्ञः। सत्तादिषट्कंभावः। सत्तायांयथा। घटभावःपटभावः। आत्मनियथा। स्व

दवदावौवनारण्यवन्हीजन्महरोभवौ ॥ मंत्रीसहायःसचिवौपतिश्शाखिनराधवाः ॥२०५॥
अवयःशैलमेषार्काआज्ञाह्वानाध्वराहवाः ॥ भावःसत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥२०६॥
स्यादुत्पादेफलेपुष्पेप्रसवोगर्भमोचने ॥ अविश्वासेऽपन्हवेपिनिह्नुतावपिनिन्हवः ॥२०७॥

भावेभावयेद्योगी। "क्रियालीलापदार्थेषुविभूतिबुधजंतुपुरत्वादौचभावः।"॥२०६॥ उत्पादेउत्पन्नौ। गर्भमोचनेप्रसूतौप्रसवः। "अपत्येचप्रसवः"। अपन्हवेअपलापे। निह्नुतौवाच्ये॥२०७॥

उत्सेकउद्भूतिः।अमर्षःकोपः।इच्छायाःप्रसरोवेगः। महःक्षणआनंदावसरइतियावत्। एतेषुउत्सवः। सतांमतेर्ज्ञानस्यनिश्चयेयथा। महानुभावा इति।"भावसूचनेचानुभावः" ॥ २०८ ॥ आद्योपलब्धयेप्रथमज्ञानायययत्स्थानं।"यश्चजन्महेतुस्तत्रप्रभवः। जन्महेतुःपित्रादिः। स्थानंयथा। गंगाप्रभावोहिमवान्। गंगाज्ञानस्यप्रथमस्थानंहिमवानित्यर्थः।जन्ममूलमपिप्रभवः। यथावाल्मीकिःकाव्यप्रभवः"। प्रभवोजन्ममूलेस्या

कां०२

उत्सेकामर्षयोरिच्छाप्रसरेमहउत्सवः ॥ अनुभावःप्रभावेचसतांचमतिनिश्चिये ॥ २०८ ॥
स्याज्जन्महेतुःप्रभवःस्थानंचाद्योपलब्धये ॥ शूद्रायांविप्रतनयेशास्त्रेपारवशोमतः ॥ २०९ ॥
ध्रुवोभभेदेक्लीबंतुनिश्चितेशाश्वतेत्रिषु ॥ ७ ७ ७

ज्जन्महेतोपरावक्रमे। ज्ञानस्यचादिमस्थानइतिमेदिनी। शूद्रायांविप्राज्जातेतनये। शास्त्रेपरश्वधारव्येपारवशः ॥ २०९ ॥ भभेदेनक्षत्रविशेषेध्रुवः पुंसि। निश्चितेअवधारितेध्रुवंक्लीबं। यथाध्रुवंमृत्युर्ध्रुवः। शाश्वतेनित्येध्रुवस्त्रिषु। यथाजातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यचेति। "ध्रुवः शंकाहरेविष्णौवटेचोत्तानपादजे ॥ वसुयोगभिदोःपुंसिक्लीबंनिश्चिततर्कयोरितिमेदिनी" ७ ७

ज्ञातौसगोत्रेआत्मनिक्षेत्रज्ञेस्वःपुंसि। आत्मीयेस्वसंबंधिनि।"स्वंत्रिलिंगं"। धनेस्वःपुन्नपुंसके॥२१०॥ स्त्रीकट्यांयोवस्त्रस्यबंधस्तत्र परिपणे। "राजपुत्रादेर्बंधके। आपिना"। वणिजांमूलधनेनीवी। "नीवीस्त्रीकटिवस्त्रबंधने। मूलद्रव्येपरिपण"इतिहेमः"। फेरवःसृगालः। "शिवाझाटामलौमयोः। फेरौशाम्यांपथ्याधाव्योरितिहेमचंद्रः"। युग्मेद्वये। "द्वंद्वंरहस्येकलहेतथामिथुनयुग्मयोरितिविश्वः"॥

स्वोज्ञातावात्मनिस्वंत्रिषात्मीयेस्वोःस्त्रियांधने॥२१०॥ स्त्रीकटीवस्त्रबंधेपिनीवीपरिपणेपिच॥
शिवागौरीफेरवयोर्द्वंद्वंकलहयुग्मयोः॥ २११॥ द्रव्यासुव्यवसायेषुसत्वमस्त्रीतुजंतुषु॥

॥२११॥ द्रव्येवस्तुनि। असुषुप्राणेषु। व्यवसायेवीर्यातिशये। यथासत्ववान्। जंतुषुसत्वमस्त्रियां॥ "सत्वंद्रव्येगुणेचित्तेव्यवसायस्वभावयोः॥ पिशाचादावात्मभावेबलेप्राणेषुजंतुषिति हेमचंद्रः॥ ७ ७ ७

पंदेतृतीयप्रकृतौक्लीबमितिबकारांतंनामनपुंसकंनपुंसकलिंगे । अविक्रमेऽलसोक्लीबे । "वाच्यलिंगः" बवयोः सावर्ण्यादस्यायंपाठः । "अस्त्रीन पुंसकंक्लीबंवाच्यलिंगमविक्रमइतिरुद्रः ॥ क्लीबोऽपौरुषषंढयोरितिहैमः । क्लीबंस्यात्पंडकेनस्त्रीवाच्यलिंगस्त्वविक्रमइतिमेदिनी ॥ २१२ ॥ ॥ इतिवांताः ॥ ॥ मनुजोमनुष्यः । "विदूस्मृतौवेद्यमनुजप्रवेशेपुमनीषिभिरितिविश्वः ।" चरोगूढपुरुषः । अभिमरोयुद्धं । तत्रस्पशोऽदंतः । आ

क्लीबंनसुंसकंषंढेवाच्यलिंगमविक्रमे ॥ २१२ ॥ ॥ इतिवांताः ॥ ॥ द्वौविशोवे
श्यमनुजोद्वौचराभिमरौस्पशौ ॥ द्वौरात्री जंभषाद्यौद्वौवंशोकुलमस्करौ ॥ २१३ ॥
रहःप्रकाशोवीकाशोनिर्वेशोभृतिभोगयोः ॥ ७ ७ ७

द्यवाव्याडुषभादिरपिराशिः । मस्करोवेणुः । "वंशासंघेन्वयेवेणोष्टष्ठाद्यवयवेपिचेतिहैमः" ॥ २१३ ॥ रहोविजनः । "विकाशाइत्यपिविकाशोरहसिव्यक्तइतिहैमः ।" भृतिर्वेतनं । "भोगउपभोगः । मूर्छनेचनिर्वेशः" ॥ ७ ७ ७

कृतांतोयमः। क्षुद्रःकृपणः। कर्षकःकृषीवलः। "कीनाशःकर्षकक्षुद्रेपांसुलेषुवाच्यवत्। यमेनेतिमेदिनी"॥ २१४॥ पदेव्याजे। अपदेशः। स्मृतौलक्ष्येनिमित्तव्याजयोरपीतिविश्वः। कुशोरामसुतेदर्भे। "योक्लेह्नीपेच"पुंसि। जलेक्लीबं। अनेकविधबाल्यादिरूपादशा। अपिशब्दाद्बस्त्रांतेपिदशाः स्त्रियांबहुत्वे। दशावर्तावबवस्थायांवस्त्रांतेस्युर्दशाअपि। आयतादीर्घायातृष्णास्पृहासाआशाचकाराद्विगप्याशा॥ २१५॥

कृतांतेपुंसिकीनाशःक्षुद्रकर्षकयोस्त्रिषु॥ २१४॥ पदेलक्ष्येनिमित्तेऽपदेशस्यात्कुशमय्यपि॥
दशावस्थानेकविधाप्याशातृष्णापिबाणवत्॥ २१५॥ वशास्त्रीकरिणीचस्यात्दृग्ज्ञानेज्ञातरित्रिषु॥
स्यात्कर्कशःसाहसिकःकठोरामसृणावपि॥ २१६॥

योषाहस्तिन्योर्वशा। "वशावंध्यासुतायोषास्त्रीगवीकरिणीषु-चेतिमेदिनी"। ज्ञानेबुद्धौ। दृक्स्त्रियांदर्शनेनेत्रेबुद्धौचत्रिषुवीक्षकइतिमेदिनी। साहसिकोविवेकरहितः। अमसृणोदुःस्पर्शः। "कर्कशःसरुषेक्रूरेकृपणेनिर्दयेदृढे। इक्षौसाहसिकेकासमर्दकांपिल्ययोरपीतिविश्वः॥ २१६॥

अपिशब्दादानपेपिप्रकाशाः। "प्रकाशोऽतिप्रसिद्धेस्याप्रहासातपयोः स्फुटइतिविश्वः। कुड्मलेमुकुले। खड्गस्यपिधानआच्छादने। अर्थौ धेधनसमूहे। दिव्येशपथभेदेकोशाः कोषश्च।"॥२१७॥ ॥ इतिशांताः॥ ॥आत्माक्षेत्रज्ञः। "पुरुषश्चात्मनिनरेपुन्नागेचेतिहेमचंद्रः।" मत्स्यमत्तिरवादतिमत्स्यात्तु योबकादिःखगः सचध्वांक्षः। "ध्वांक्षस्तुकाकबकयोस्तुर्कुटेभिक्षुकेगृहइतिविश्वप्रकाशाः। कार्पासबी

प्रकाशोतिप्रसिद्धेपि शिशावङ्गेचबालिशाः॥ कोशोऽस्त्रीकुड्मलेखड्गपिधानेर्थौघदिव्ययोः॥२१७॥
॥ ॥ इतिशांताः॥ ॥ सुरमत्स्यावनिमिषौपुरुषावात्ममानवौ॥ काकमत्स्यात्खगोध्वांक्षौकक्षौतुतृणवीरुधौ॥ २१८॥ अभीषुःग्रग्रहेरश्मौप्रेषःप्रेषणमर्दने॥ ७ ७

जनिष्कासनयंत्रंतर्कुटं"। वीरुल्लता। "कक्षोवीरुधिदोर्मूलेकच्छेशुष्कतृणेवनइतिहेमः।"॥२१८॥ ग्रग्रहेःश्वादिरज्जौ। रश्मोकिरणे। मर्दनंपीडा। प्रेषःप्रेषणपीडयोरिति। "प्रेषःस्यात्प्रेषणेक्लेशेमर्दनोन्मादयोरपीतिविश्वः"॥ ७ ७ ७

अपिशब्दान्मासार्धादौपक्षः "पक्षोमासाङ्गकेपार्श्वेग्रहेसाध्यविरोधयोः। केशादेःपरतोष्टंदेबलेसखिसहाययोः॥ चुल्लीरंध्रेपतत्रेचराजकुंजरपार्श्वयोरितिमेदिनी"। वस्त्रकृतंशिरसोवेष्टनंशिरोवेष्टः। किरीटंमुकुटं। "उष्णीषंलक्षणांतरे। शिरोवेष्टेकिरीटेस्यादितिहैमः॥२१९॥ शुक्लंलातीतिशुक्लोवृषणः।मूषिकेउंदुरे। सुकृतेधर्मे। "वृषोगव्याखुधर्मयोः॥ पुंराशिभेदयोःभृंग्यांवासकेशुक्लेपिच॥ श्रेष्ठेस्यादुत्तरस्थ

पक्षःसहायेप्युष्णीषः शिरोवेष्टकिरीटयोः॥ २१९॥ शुक्लेमूषिकेश्रेष्ठेसुकृतेवृषभे वृषः॥ द्यूतेऽक्षेशारिफलकेप्याकर्षोथाक्षमिंद्रिये॥ २२०॥ छ छ

श्वेतिहैमः।" द्यूतादित्रयेआकर्षः। अक्षेपाशके। शारिफलकंशारीणांद्यूतोपकरणानांफलकंपीठिका। "नाकर्षोद्यूतइंद्रिये। पाशेशारिफलेचैव कोदंडाभ्यामवस्तुनि। आकर्षणेपिपुंसिस्यादितिमेदिनी"। इंद्रियेऽक्षंक्लीबं। "अक्षंसौवर्चलेतुत्थेदृष्टौकेइतिहैमः।अक्षोज्ञातार्थशकटव्यवहारेषुपाशके॥ रुद्राक्षेद्राक्षयोःसर्पेबिभीतकतरावपि॥ चक्रेकर्षेपुमानितिमेदिनी"। द्यूतांगादोपुंसि॥ २२०॥ छ

द्यूतांगेपाशके । कर्षेमानभेदे । चक्रेरथावयवे । कलिद्रुमेबिभीतके । वार्ताजीविका । करीषाग्निः शुष्कगोमयानलः । करीषाग्निःपुमान्कर्षूः कुल्यायामपिचस्त्रियां । कुल्यानदीभेदः ॥ २२१ ॥ पुंभावेपुरुषस्यभावेतत्क्रियायांपुरुषस्यकर्मणिपौरुषं । "पौरुषंपुरुषस्यस्याद्भावेकर्मणितेजसि । उर्ध्वविस्तृतदोःपाणिप्रमानेत्वधिधेयवदितिमेदिनी" । चकाराद्वरलेपिविषं । उपादानेउत्कोचेप्यामिषं । "आमिषंपुन्नपुं

नाद्यूतांगेकर्षचक्रेव्यवहारेकलिद्रुमे ॥ कर्षूर्वार्ताकरीषाग्निः कर्षूः कूल्याभिधायिनी ॥ २२१ ॥
पुंभावेतत्क्रियायांचपौरुषंविषमस्रुच ॥ उपादानेष्यामिषंस्यादपराधेपिकिल्मिषं ॥ २२२ ॥
स्याद्वृष्टौलोकधात्वंशोवत्सरेवर्षमस्त्रियां ॥ ७ ७ ५

सकं । भोग्यवस्तुनिसंभोगेप्युत्कोचेपललेपिचेतिमेदिनी" । पापेपिकिल्मिषं । "रोगेपिच" ॥ २२२ ॥ वृष्टौमेघवर्षणे । लोकंधत्तेलो
कधातुर्जंबुद्वीपस्थलो शोभारतादिखंडे । वत्सरेऽब्दे ॥ ७ ७ ६

नृत्येक्षणं। प्रज्ञाचेतिद्वयंप्रेक्षासंज्ञं। "प्रेक्षाधीरीक्षणंनृत्तमिनिर्देमादीक्षणंनृत्यंचेतिष्टथगपि"। अर्थनायाञ्ज्ञा। भृतिर्वेतनं। "भिक्षितवस्तु निचभिक्षा" ॥२२३॥ अपिशब्दात्कांतौवाचिरुचौत्विट्स्त्रीतिरभसः। परेवक्ष्यमाणास्त्रयःशब्दास्त्रिषु। वाच्यलिंगाइत्यर्थः। कात्स्न्र्येसाकल्येनिकृष्टेऽधने। परशुरामोपिन्यक्षः। "नियतानिअक्षाणिहृषीकाणियस्मिन्न्यक्षः"। प्रत्यक्षेसाक्षात्समितेअधिकृतेनियुक्तेऽध्यक्षः।

प्रेक्षानृत्येक्षणंप्रज्ञाभिक्षार्थनाभृतिः ॥ २२३ ॥ त्विड्शोभापित्रि परेन्यक्षंका
त्स्न्र्यनिकृष्टयोः ॥ प्रत्यक्षेऽधिकृतेऽध्यक्षोरूक्षस्तु प्रभ्यचिक्कणे ॥ २२४ ॥ ॥ इति
षांताः ॥ ॥ रविश्चेतच्छदोहंसोसूर्यवन्हीविभावसू ॥ छ छ

"अधिकृतान्यक्षाण्यसाध्यक्षः"। अप्रेमिस्नेहाभावेअचिक्कणेअमसृणे ॥ २२४ ॥ ॥ इतिषांताः ॥ ॥ श्वेतच्छदोविहगभेदः
"हंसःस्यान्मानसौकसि। निर्लोभनृपविष्ण्वर्कपरमात्मनिमत्सरे ॥ योगिभेदेमंत्रभेदेशरीरमरुदंतरइतिमेदिनी" ॥ छ

तर्णकोगोवत्सः। "वत्सःपुत्रादिवर्षयोः। तर्णकेनोरसिक्लीबमितिमेदिनी"। सारंगाश्वातकाः। देवाअपिदिवौकसः। "दिवौकाश्वदिवौकाश्वपुंसिदेवेचचातकइतिद्विरूपकोशाः।" ॥ २२५ ॥ शृंगारादौशृंगारवीरकरुणादौनवविधोविषेगरले। वीर्यतेजसि। गुणेस्वाद्वम्लादौरागेयथा। रसिकोयुवा। "रसोगंधरसेजले। शृंगारादौवीर्येवीर्यतिक्तोद्वेरागयोः। देहधातुषभेदेचपारदस्वादयोः

वत्सोतर्णकवर्षौद्वौसारंगाश्वदिवौकसः॥२२५॥शृंगारादौविषेवीर्येगुणेरागेद्वयेरसः॥
पुंस्युत्तंसावतंसौद्वौकर्णपूरेचशेखरे॥ २२६॥देवभेदेनलेरश्मौवसूरत्नेधनेवसु॥

पुमानितिमेदिनी"। उत्तंसश्चावतंसश्चेतिसांतद्वयंकर्णपूरेकर्णाभरणविशेषेशेखरे॥ शिरोभूषणेचवर्तते॥२२६॥देवभेदेयथा। अष्टौवसवः। धनरत्नयोर्वसुक्लीबं। "वसुर्नादेवभेदाग्निभायोश्चबकराजसु॥ क्लीवंस्याद्धौषधेश्यालरेरत्नमधुरेत्रिषितिमेदिनी"॥

चकागाद्रिंचोपिवेधाः। "वेधाधातृज्ञविष्णुषितिहेमः"। हितस्याहिंसाहिताहिंसा। अहेःसर्पस्यदंष्ट्राचतयोरवीरितिसांतेनानवर्तते। "नास्त्रियां"॥ २२७॥ प्रार्थनायाज्ञा। औत्सुक्यमुद्युक्तता। उभेलालसे। "तृष्णातिरेकेचलालसा। लालसौत्सुक्यतृष्णातिरेकयाज्ञासुचद्वयोरितिमेदिनी"। चराद्धाद्वधेपिहिंसा। आदिनाद्वत्तिनाशादिकर्म। अश्वावडवा। जनन्यामपिप्रसूः। "प्रसूरश्वाजनन्योश्चकंदलीवीरुधोःस्त्रिया

विष्णोश्चवेधाःस्त्रीत्वावीर्हिताहिंसाहिदंष्ट्रयोः॥ २७॥ लालसेप्रार्थनौत्सुक्येहिंसाचौर्यादिकर्मच॥ प्रसूरश्वापिभूधावौरोदस्योरोदसीचते॥ २२८॥ छ छ

मितिमेदिनी"। रोदसी। रोदस्यौ। इतिसांताद्विवचनांतेस्यातामेकयोक्त्याभूमिद्यावौद्वेअप्युच्यते। पृथगपिप्रयोगोस्ति। यदुक्तं। रोदश्चरोदसीचापिद्विविभूमौपृथक्पृथक्॥ सहप्रयोगेप्यनयोरोदस्यावपिरोदसीइति। "रोदसीत्यव्ययमप्यस्ति। यदुक्तं। द्यावापृथिव्योरोदस्योरोदसीरोदसीतिचेति"॥ २२८॥ छ छ छ

ज्वालार्चाभासिचदीप्तौअर्चिः। भादित्रयेज्योतिः। भंनक्षत्रं। द्योतःप्रकाशः। दृष्टिःकनीनिकामध्यभागः। "अग्नौदिवाकरेचज्योतिःपुंसि"। आगः पापेपराधेच। "आगःस्यादेनोवद्यमंतावितिहेमः"। आदिनायौवनादिवयः॥ २२९॥ पुरीषंगूनं। "वर्चोनपुंसकंरूपेविष्ठायामपितेजसि। पुंसिचंद्रस्यतनयइतिमेदिनी"। उत्सवेतेजसिचमहः। "गुणेगुणभेदे।" स्त्रीणांपुष्पेआनर्वेच। "रेणुपरागयोश्चरजः। अदंतोच्च

ज्वालाभासोनपुंस्यर्चिर्ज्योतिर्भद्योतदृष्टिषु॥ पापापराधयोरागः खगबाल्यादिनो
र्वयः॥ २२९॥ तेजःपुरीषयोर्वर्चोमहस्तूत्सवतेजसोः॥ रजोगुणेचस्त्रीपुष्पेश
ब्दौध्वांतेगुणेतमः॥ २३०॥ छंदःपद्येऽभिलाषेचतपःकृच्छ्रादिकर्मच॥

यं। रजोयंरजसासार्द्धंस्त्रीपुष्पगुणधूलिषित्यजयः"। रक्षादित्रयेचतमः। "पापेशोकेच"॥ २३०॥ पद्येगायत्र्यादिवृत्ते। अभिलाषे इच्छायां। "छंदःपद्येऽभिलाषेचस्वेरचाराभिलाषयोरितिमेदिनी"। कृच्छ्रं चांद्रायणादि। आदिनाचांद्रायणादि। नपोलोकांतरेपिच। "धर्मे चतपः"।

बलेसहः क्लीबं । मार्गोमार्गशीर्षः । अत्रपुंसि । "सहोबलेज्योतिषिचपुंसिहेमंतमार्गशीर्षयोरतिमेदिनी" । रवमाकाशः । तत्रनभः क्लीबे । श्रावणेपुंसि । "नभोव्योम्निनभाघ्राणेबिसतंतौपतद्ग्रहे । प्रावृषिश्रावणेइतिहैमः" ॥ २३१ ॥ सद्मगृहं । "ओकः अदंतोप्ययं । ओकउचः कइतिनिपातनात् ।" आश्रयेआश्रयमात्रे । "ओकास्त्वाश्रयमात्रेस्यादितिहैमः । ओजोदीप्तिप्रकाशयोः । अवष्टंभेबलेधातुतेजसीति

सहोबलंसहामार्गोनभःखंश्रावणोनभाः ॥ २३१ ॥ ओकःसद्माश्रयश्चौकाःपयःक्षीरंपयोंबुच ॥ ओजोदीप्तौबलेस्रोतइंद्रियेनिम्नगारये ॥ २३२ ॥ तेजःप्रभावेदीप्तौचबलेशुक्रेप्यतन्त्रिषु ॥ विद्वान्विदंश्चबीभत्सोर्हिंस्रोप्यतिज्ञायेत्वमी ॥ २३३ ॥ ७ ७

हैमः" । इंद्रियनदीवेगयोः स्रोतः ॥ २३२ ॥ प्रभावादिचतुष्केतेजः । "तेजास्त्विड्रेतसोर्बले । नवनीतेप्रभावेग्नाविति हैमः" । अतःपरं सांतसमासिपर्यंतावाच्यलिंगाः । विद्वान्ज्ञाता । चकारादात्मज्ञोपिविद्वान् । विद्वानात्मविदिप्राज्ञेपंडितेचाभिधेयवदितिविश्वः । हिंस्रेक्रूरे । अपिशब्दाद्भक्षणेपिबीभत्सः । "बीभत्सोविकृतेक्रूररसेपार्थेघृणात्मनीतिहैमः" ॥ २३३ ॥ ७ ७

अमीवक्ष्यमाणाज्यायआदयः साधीयःपर्यंताःसांताद्दृढादीनांबाढपर्यंतानांअतिशयेज्ञेयाः। अतिशयेनदृढेदृढप्रशास्त्यस्तुत्येचज्यायान्। अतिशायितयोर्युवाल्पयोः कनीयान्। ऊरुर्महान्वरः श्रेष्ठस्तयोरतिशायितयोर्वरीयान्। अतिशयेनसाधुः साधीयान्। अतिशायितंबाढंसाधीयः॥ २३४॥ ॥ इतिसांताः॥ ॥ दलेपत्रेअपिशब्दात्तिक्तेपिबर्हं।"बर्हंपर्णेपरीवारेकलापेइतिहैमः"। नि

दृढूप्रशास्ययोर्ज्यायान्कनीयांस्तुयुवाल्पयोः॥ वरीयांस्तूरुवरयोः साधियान्साधुबाढयोः॥ २३४॥
॥ ॥ इतिसांताः॥ ॥ दलेपिबर्हंनिर्बंधोपरागार्कादयोग्रहाः॥ द्वार्यापीडेक्काथरसेनिर्व्यूहोनागदंतके॥ २३५॥

र्बंधाग्रयोग्रहाः निर्बंधआग्रहविशेषः। उपरागश्चंद्रार्कग्रहणं। ग्रहोनिग्रहनिर्बंधग्रहणेषुरणोद्यमे॥ सूर्यादीपूतनादौचर्सोहकेयोपरागयोः। द्वारिद्वारे। अपीडेशेखरे। क्काथरसेक्काथितद्रव्यरसे॥ नागदंतकेदृढादिभित्तिस्थकीलद्वयेनिर्व्यूहः॥ २३५॥

हस्तेयद्गृहीत्वातुलयाद्रव्यमुन्मीयतेतत्तुलासूत्रंतत्र। अश्वदृषादिरश्मौचग्राह्यग्रहौ। "ग्राह्यः स्यात्तुलासूत्रेदृषादीनांचबंधने॥ ग्रहःकिरणेभुजे॥ तूलासूत्रेश्मादिरश्मौसुवर्णेहरिपादपे। बंधेबंध्यामितिहैमः"। परिजनःपरिवारः। आदानंस्वीकारः। "परिग्रहः कलत्रेचमूलस्वीकारयोरपि। शपथेपरिवारेचराहुवल्कलेछभास्करइत्यजयः"॥२३६॥ दारेषुपत्न्यां। चकारात्सद्मनिगृह्यःपुंभू

तुलासूत्रेश्वादिरश्मौग्राह्यःग्रहोपिच॥ पत्नीपरिजनादानमूलश्चापाःपरिग्रहाः॥२३६॥
दारेषुचगृहाःश्रोण्यामप्यारोहोवरस्त्रियाः॥ व्यूहोर्दैदेप्यहिर्दैत्रेप्यग्नींदूर्कास्तमोपहाः॥२३७॥

म्नि। यावरस्त्रीउत्तमास्त्रीतस्याःश्रोण्यांकट्यामारोहः। यथावरारोहा। अपिशब्दादवरोहेगजारोहेच। "आरोहोदैर्घ्यउच्छ्राये स्त्रीकट्यांमानभिद्यपि। आरोहणेगजारोहेइतिहेमचंद्रः"। अपिशब्दाद्व्यूहःस्याद्बलविन्यासे। अहिर्दैत्यासुरेसर्पे। "निर्माणतर्कयोश्च"। वह्निचंद्रसूर्यास्तमोपहाः। "जिनेचनमोपहः॥ २३७॥

नृपार्हेर्थेराजयोग्यद्रव्येसितच्छत्रादौ। परिबर्हस्तुराजार्हवस्तुन्यपिपरिच्छदइति। "परिबर्हःपरिवारः"। परेतऊर्ध्ववक्ष्यमाणाआङादिशब्दा अव्ययाउच्यंते। अव्ययलक्षणंतु। सदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषु॥ वचनेषुसर्वेषुयन्नव्येतितदव्ययमिति॥ तेषामत्रवर्गेउपन्या सस्तुपूर्ववन्नानार्थत्वात्॥ ॥इतिहांताः॥ ॥आङित्यव्ययमीषदर्थादिचतुष्के। तस्यङकारोऽनुबंधः। ईषदर्थेयथाआपिंगलं

परिच्छदेनृपार्हेर्थेपरिबर्हो॥ ॥इतिहांताः॥ ॥ऽव्ययाःपरे॥
आङीषदर्थेभिव्याप्तौसीमार्थेधातुयोगजे॥२७८॥ ७ ७

ईषत्पिंगलइत्यर्थः।अभिव्याप्तौयथा।आसत्यलोकादापातालात्। सीमार्थेयथा। आसमुद्रंराजदंडः। धातुयोगजेक्रियायोगजेऽर्थेयथा॥ आहरेति। "आक्रामतीत्यादि।"॥२७८॥ ७ ७ ७

यः प्रगृह्यसंज्ञकःआइतिनिपातः। सस्मृतौस्मरणे वाक्येवाक्यपूरणेचवर्तते। प्रगृह्यस्त्वचिनित्यंप्रकृत्यावर्ततेतत्र। स्मृतौयथा। आएवंकिलतत्। वाक्येतुआएवंमन्यसे। "आप्रगृह्यःस्मृतौवाक्येऽनुकंपायांसमुच्चयइतिमेदिनी"। सविसर्गस्त्वाइतियोनिपातः सर्वत्रवाक्यालंकारे चवर्तते। तत्रपीडायांयथा। आःशीतं। कोपेयथा। आःपापकिंविकत्थसे। "आःस्मरणेऽपाकरणेकोपसंताप

आप्रगृह्यःस्मृतौवाक्यप्यात् स्यात्क्षेपेऽनुकंपयोः॥ पापकुत्सेषदर्थेकुधिङ्निर्भर्त्सननिंदयोः॥२३९॥

योरपीतिकोशांतरं"। पापाद्यर्थत्रयेकुशब्दः। पापेयथा। कुकर्म। कुत्सायांयथा। कापथः। ईषदर्थेयथा। कवोष्णं। "कुपापीयसिकुत्सायामीषदर्थेनिवारणइतिहैमः॥ कुत्सायांनिवारणइतिविश्वः"। अपकारशब्देभर्त्सनोत्पादनंनिर्भर्त्सनं। दोषाख्यानमात्रं निंदा। निर्भर्त्सनेयथा। धिक्त्वांताडनार्हमनध्ययनशीलं। निंदायांयथा। धिक्परस्त्रीगामिनंपुरुषं॥२३९॥

अन्वाचयाद्यर्थचतुष्केचशब्दः। अन्यतरस्यानुषंगिकत्वेऽन्वाचयः। तत्रयथा। भिक्षामटगांचानय। समाहारःसमूहः। तत्रयथा। संज्ञाचपरिभाषाचसंज्ञापरिभाषं। मिलितानामन्वयइतरेतरयोगः। यथाधवश्वखदिरश्वधवखदिरौ। परस्परंनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयःसमुच्चयः। तत्रयथा। ईश्वरंगुरुंचभजस्वेति। "चपाद्पूरणेपक्षांतरेहेतौविनिश्चयइतित्रिकांडशेषः"। आशीराशीर्वादः। तत्रय

चान्वाचयसमाहारेतरेतरसमुच्चये ॥ स्वस्त्याशीःक्षेमशब्दादीप्रकर्षेलंघनेप्यति ॥ २४० ॥

था। स्वस्तिभूयात्। क्षेमेनिरुपद्रवेयथा। स्वस्तिगच्छ। "पुण्येयथा। स्वस्तिमान्स्वर्गमश्नुते। आदिना। स्वस्तिस्यान्मंगलेपुण्येप्यात्मसायामपिक्वचिदितिमेदिनी। प्रकर्षेअतियथा। अत्युत्तमोविष्णुः। अतिप्रकर्षेलंघनेभूत्वा। स्तुतावसंप्रतिक्षेपेपीतिहेमः"। अतिचलंजलधितलं ॥ २४० ॥

प्रश्नवितर्कयोःस्वित्। प्रश्नेयथा। किंस्वित्कुशलमस्ति। वितर्केऽन्यपक्षविमर्शः। यथासर्वेश्वरत्वंविष्णोराहोस्विच्छिवस्य। "स्वित्प्रश्नेचवितर्केचतथैवपदपूरणइतिमेदिनी।" भेदावधारणयोस्तुशब्दोयथा। क्षीरान्नांसंतुपुष्टिकृत्। शिष्टैर्मतंनतुतद्युक्तं। "तुपादपूरणे। भेदेसमुच्चयेऽवधारणे। पक्षांतरेनियोगेचप्रशंसायांविनिग्रहइतिमेदिनी।" सहार्थेएकवारेचसकृद्यथा। सकृद्यांति। सकृदपिकुर्याद्दयाश्राद्धं।

स्वित्प्रश्नेचवितर्केचतुस्याद्भेदेवधारणे ॥ सकृत्सहैकवारेचाप्याराद्दूरसमीपयोः ॥ २४१ ॥ प्रतीच्यांचरमेपश्चादुताप्यर्थविकल्पयोः ॥ ७ ७

दूरे "आरात्" यथाआरात्कुत्रोःसदावसेत्। समीपेतु। सरवार्यंस्थापयेदारात्॥ २४१ ॥ प्रतीच्यांपश्चिमदिशि। चरमेत्ये "चपश्चाद्यथा। पश्चादस्तंगतोरविः। पश्चिमेवयसिनेमिषंवयौ।" अपिशब्दस्यार्थःसमुच्चयस्तत्रविकल्पेचोतशब्दोयथा। उतभीमउतार्जुनः। विष्णुरुतशिवःसेव्यः। "उतप्रश्नवितर्कयोः। समुच्चयेविकल्पेचेतिहेमः। अजयस्तुउतापीद्योचबादार्थावितिं" ॥ ७ ७

पुनरर्थेपौनःपुन्येसहार्थेचशाश्वत्। यथाशाश्वद्विष्णुंस्मरेत्। शिष्यैःशाश्वद्गुरोगुरुः।"शाश्वस्त्यादात्मब्रह्मेचमंगले।पुराकल्पेसदार्थेचपुनरर्थेचदृश्यतइतिमेदिनी।अजयस्तुशाश्वत्सहसदार्थयोरित्याह। शाश्वत्सहपुनर्नित्यइतिहेमश्च"। प्रत्यक्षेतुल्येचसाक्षाद्यथा।साक्षाद्दृष्टोमयाहरिः। साक्षाल्लक्ष्मीरियंवधूः॥ २४२॥ खेदाद्यर्थपंचकेवतयथा। अहोबतमहत्कष्टमिति। बतनिःस्वोसि। बतपतिशालं

पुनःसहार्थयोःशाश्वत्साक्षात्प्रत्यक्षतुल्ययोः॥ २४२॥ खेदानुकंपासंतोषविस्मयामंत्रणेबत॥ हंतहर्षेनुकंपायांवाक्यारंभविषादयोः॥ २४३॥ छ

गितः अहोबतायंध्रुवआपदेवं। एहिबतमरव।"बतेत्यव्ययंदंत्योक्त्यादीत्यजयः।"हर्षादिचनुकंपेहंतशब्दः।"हर्षेयथा।हंतलाभःशातगुणः। अनुकंपायांयथा। हंतदीनोरक्षितव्यः"। वाक्यारंभेयथा। हंतनेकथयिष्यामि।"विषादेयथा। हंतजातमजानतारःप्रथमेनत्वयारिणा। हंतदानेनुकंपायांवाक्यारंभविषादयोः। निश्चयेचप्रमोदेचेतिहेमः"॥ २४३॥ ॐ छ

योमुख्येनसदृशःप्रतिनिधिस्तत्रप्रतिशब्दोयथा। अभिमन्युंप्रतिपरीक्षित्। वीप्साव्याप्तुमिच्छातत्रयथा। तीर्थेतीर्थेप्रतिगच्छति। लक्षणायांयथा। वृक्षशारवांप्रतिविद्योतनेविद्युत्। आदिनाइत्थंभूतारव्यानादौ। प्रयोगतइतिशिष्टप्रयोगानुसारेणप्रतिशब्दस्यप्रक्षेपः। "प्रतीत्थंभूतभागयोः। प्रतिदानेप्रतिनिधौवीप्सालक्षणयोरपीतिहेमः।" हेत्वर्थेइतिशब्दोयथा। रामोहंतीतिरावणःपलायते। प्रकरणंप्र

प्रतिप्रतिनिधौवीप्सालक्षणादौप्रयोगतः ॥ इतिहेतुप्रकरणप्रकाशा
दिसमाप्तिषु ॥ २४४ ॥

कारः। यथाविप्रक्षत्रियविट्शूद्राइतिवर्णाः। प्रकारोयथा। इतिपाणिनिः। पाणिनिशब्दोलोकेप्रकाशतेइत्यर्थः। "प्रकर्षइतिपाठः" आदिशब्दादेवमर्थेयथा। क्रमादमुंनारदइत्यबोधि। समाप्ताववसानेयथा। धर्ममाचरेदिति "इतिस्वरूपेसान्निध्येविवक्षानियमेपि च। हेतौप्रकारप्रत्यक्षप्रकर्षेष्ववधारणे। एवमर्थेसमाप्तौस्यादितिहेमः"॥ २४४ ॥

प्राच्याद्यर्थवतुष्केपुरस्तात्। प्राच्यांपूर्वदिशि। प्रथमेयथा। पुरस्ताद्भुक्ते। पुरार्थेऽतीतेयथा। पुरस्ताद्हासोभूत। अग्रतोग्रेयथा। पुरस्तात्पुरस्तकं। यद्वाग्रतइति। अपिशब्दःप्राच्याद्यर्थेस्यात्। साकल्यादौयावत्तावच्छब्दौयथा। यावद्दत्तंतावद्भुक्तं। अवधौयथा। मूलाकांसो यावत्त्रकांडः। मानेपरिच्छेदेयथा। यावत्स्वर्णंतावद्व्रजतं। अवधारणेनिश्चयेयथा। श्रोत्रियंतावदामंत्रयस्व। "यावत्कात्स्न्यैवधारणे।

प्राच्यांपुरस्तात्प्रथमेपुरार्थेऽग्रतइत्यपि ॥ यावत्तावच्चसाकल्येवधौमाने
वधारणे ॥ २४५ ॥ मंगलानंतरारंभप्रश्नकात्स्न्यैष्वथोअथ ॥ छ

प्रदर्शनायांपरिच्छेदेमानाधिकारसंभ्रमे। पक्षांतरेचेतिमेदिनी" ॥ २४५ ॥ अथोअथइमौशब्दौमंगलादिषु। मंगलेयथा। अथातोब्रह्म जिज्ञासा। अनंतरंयथा। स्नानंकृत्वाऽथभुंजीत। आरंभेयथा। अथशब्दानुशासनंलिख्यते। प्रश्नेयथा। अथवकुंसमर्थोसि। कात्स्न्यैयथा। अथधात्वूहः। "अथोअथसमुच्चये ॥ मंगलेसंशयारंभाधिकारानंतरेषुच। अन्वादेशेप्रतिज्ञायांप्रश्नसाकल्ययोरर्थातिहर्षे

निरर्थकेवृथायथा। वृथादुग्धोनड्वान्। अविधौविधिहीनेवृथायथा। वृथादानं। "वृथानिष्कारणेवंध्येवृथास्याद्विधिवर्जितइतिविश्वः"। अनेकार्थेनानाशब्दोयथा। नानाविधाजनाः। उभयार्थेयथा। नानाविधंनसज्जेत। "नानाविनोभयानेकार्थेषितिहेमचंद्रः"॥ २४६॥ इच्छायांयथा। कोनुधावति। विकल्पेयथा। अयंभीमोनुधर्मोनु। "नुप्रश्नेऽनुनयेऽतीतार्थेविकल्पवितर्कयोरितिहेमः। पश्चादर्थेसादृश्यार्थेचानु"। पश्चादर्थेयथा। रथमनुगच्छति। सादृश्ये। ज्येष्ठंअनुकरोति। "अनुलक्षणाप्तीप्सेत्थंभूतभागेषुसन्निधौ। सा

वृथानिरर्थकाविध्योर्नानाऽनेकोभयार्थयोः॥ २४६॥ नुइच्छायांविकल्पेचप
श्चात्सादृश्ययोरनु॥ प्रश्नावधारणाऽनुज्ञानुनयामंत्रणेननु॥ २४७॥ छ

दृश्यायानहानेषुपश्चादर्थसहार्थयोरितिहेमः॥ प्रश्नादिपंचकेननुयथा।" प्रश्नेयथा। ननुकिमेतन्। अवधारणे। नन्वयंयोगी। "अनुज्ञायांयथा। ननुगच्छ।" अनुनयःसांत्वनं। ननुमेमुंचदयांकुरु। आमंत्रणंसंबोधनं। ननुराजन्। "नन्वाक्षेपेपरिप्रश्नेप्रत्युक्तावववधारणे। वाक्यारंभेष्वनुनयामंत्रणानुज्ञयोरपीतिहेमः"॥ २४७॥ छ छ छ

गर्हादिपंचकेक्रमादपिशब्दोयथा। अपिसिंचेत्पलांडुं। स्त्रियंपालय नमपि। अपिजानासिकिंचित्वं। अपिचोरोभवेत्। अपिस्था णुंजयेद्रामः। "युक्तपदार्थेकामचारक्रियासुचअपिशब्दः"। उपमायांयथा। आशीविषोवासंक्रुद्धः। विकल्पेयथा। शिवंवायदि वाविष्णुं। "वास्याद्विकल्पोपमयोरेवार्थेचसमुच्चयइतिविश्वः"। अर्थेसामियथा। सामिसंमितास्ती। जुगुप्सितेयथा। सामिरु तमकल्याणकारि॥ २४८॥ सहार्थेयथा। पुत्रेणमाभुंक्ते। समीपेयथा। अमात्यः समीपवर्तीत्यर्थः। कंशिरः सुखवारिषिति

गर्हासमुच्चयप्रश्नशंकासंभावनास्वपि॥ उपमायांविकल्पेवासामित्वर्थेजुगुप्सिते॥ २४८॥
अमासहसमीपेचकंवारिणिचमूर्द्धनि॥ इवेत्थमर्थयोरेवंनूनंतर्केर्थनिश्चये॥ २४९॥ ७

मेदिनी। इवार्थेइत्थमर्थेचएवंशब्दोयथा। अग्निरेवंद्विजः। अग्निरिवेत्यर्थः। इत्थमर्थेप्रकारे। एवंवादिनिदेवर्षौ। "एवंप्रकारो पमयोरंगीकारेऽवधारणे इतिधरणिहेमचंद्रौ। तर्केनूनंयथा। नूनमयमतियज्वनांप्रियः। अर्थेनिश्चयेयथा। द्वेपिनूनंशरणं प्रपन्ने"। नूनंनिश्चितनर्कयोरितिविश्वः॥ २४९॥ ७ ७ ७

तूष्णीमर्थे। मौनेयथा। जोषंतिष्ठ। "सुखेयथा। जोषमासीत वर्षासु। जे ब्रूञ्स्तुतौ। मौनलंघनयोश्चापीतिहैमः। इच्छायांकिंयथा। किं माद्रयेरन्नसिकाःकृतिंते"। जुगुप्सनेकिंयथा। सकिंराजायः प्रजानरक्षति। "किंवितर्कपरिप्रश्नक्षेपनिंदाप्रकारयोरितिविश्वः"। प्राकाश्यादिपंचकेनामशब्दः। प्राकाश्यंप्रसिद्धिः। यथाहिमालये। नामनगाधिराजः। संभाव्येकथंचिदर्थेयथा। भविष्यतियुद्धंनाम। को

तूष्णीमर्थेसुखेजोषंकिंपृच्छायांजुगुप्सने ॥
नामप्राकाश्यसंभाव्यकोधोपगमकुत्सने ॥२५०॥

धेमभवैरीरावणोनाममापः। उपगमःसद्वेषांगीकारः। "यथा। शत्रोः सकाशाद्गृह्णातिनाम। कुत्सने। कोनामायंप्रलपतिमेवि शतः सभाया। नामकोपेभ्युपगमेविस्मयेस्मरणेपिच ॥ संभाव्यकुत्साप्राकाश्यविकत्थनेषु पिदृश्यतइतमेदिनी" ॥ २५० ॥ ७

भूषणमलंकारः। पर्याप्तिः परिपूर्णता। शक्तिः सामर्थ्यं। वारणेचैतदर्थेऽलंशब्दःक्रमेणयथा। अलंकृतःशिशुः। अलंभुक्तवान्। अलं मल्लोमल्लाय। अलंमहीपालतवश्रमेण। "अलंनिरर्थकेइतिहेमः"। वितर्कपरिप्रश्नयोर्हुंकारः। "वितर्के। हुंजलंमृगतृष्णाहुं। परिप्रश्ने। हुंदेवदत्तोयं। हुंवितर्केचानुमताविति त्रिकांडशेषः"। हुंवितर्कपरिप्रश्नेहुं रुषोक्त्यनुनीतिषिति विश्वः। "हुंवितर्कपरिप्रश्नेहुंल

अलंभूष[illegible]र्याप्तेशक्तिवारणवाचकं ॥ हुंवितर्कपरिप्रश्ने[illegible]तकमध्ययोः ॥ २५१ ॥
पुनरप्रथमेभेदेनिर्निश्चयनिषेधयोः ॥ ७ ७ ७

ज्जायांनिवारणेइतिहेमः।" समीपमध्ययोःसमया। "समीपेयथा। समयापत्तनंनंदी। मध्येयथा। समयाशैलयोर्ग्रामः"॥ २५१ ॥ प्रथमाभावेयथा। पुनरुक्तं। भेदेयथा। किंपुनर्ब्राह्मणाःपुण्याः। "पुनरप्रथमेमतं। अधिकारेचभेदेचतथापक्षांतरेपिचेतिमेदिनी" निश्चियेनिर्यथा। निरुक्तं। निषेधे। निर्धनोराजा। "निर्निश्चयेक्रांताद्यर्थेनिःशेषप्रतिषेधयोरितिहेमः" ७ ७ ८०

कां० २

प्रबंधादिषुपुराशब्दः । प्रबंधेयथा । पुराधीते । अविरतमपाठीदित्यर्थः । चिरंतने । पुराणमितियावत् । तत्रयथा । पुरातनंअतीतंभूतं । निकटःसन्निहितः । आगामिकंभावि । पुरापुराणेनिकटेप्रबंधातीतभाविचिरंतनविश्वमेदिन्यौ ॥ २५२ ॥ ऊररीत्येकोदीर्घादिः शब्दः । ऊर्यूरीत्येकोह्रस्वादिरितिभेदाद्विरुक्तिः । "विस्तारेरंगीकृतौचऊर्यादित्रयंयथा । ऊररीकरोतीत्यादि । स्वःस्वर्गेयथा । स्वर्णद्यांस्नातिना

स्यात्प्रबंधेचिरातीतेनिकटागामिकेपुरा ॥ २५२ ॥ ऊर्यूरीचोररीचविस्तारैरंगीकृतौत्रयं ॥ स्वर्गेपरेचलोकेस्ववार्तासंभाव्ययोः किल ॥ २५३ ॥

रदः" । परइतिलोकविशेषणं । "परलोकेयथा । स्वर्गतस्यक्रियाकार्यापुत्रैःपरमभक्तितः ।" स्वःस्वर्गेपरलोकेचेतिविश्वः । वार्तायांयथा । जघानकंसंकिलवासुदेवः । संभाव्यंसंभावनीयं । "तत्रयथा । गुरूंकिलातिशेतेशिष्यः । किलशब्दस्तुवातार्यसंभाव्यमुनयार्थेचेतिविश्वः । किलसंभाव्यहेत्वरुच्योरलोकेचेतिहैमः" ॥ २५३ ॥

निषेधेरवलुयथा। रवलुरुदित्वा। वाक्यालंकारेवाक्यभूषायां। एतस्वल्वाहुः। जिज्ञासायांखलुजानासि। अनुनये। देहिखलुवाचकं। "खलुस्याद्वाक्यभूषायांजिज्ञासायांचसांत्वने॥ वीप्सामाननिषेधेषुपूरणेपद्वाक्ययोरितिमेदिनी" समीपादिपंचकेऽभितः। "समीपेयथा। वाराणसीमभितःभागीरथी"। उभयतइत्युभयार्थेयथा। अभितःकुरुचामरौ। क्षिप्रार्थे। अभितोधीच। साकल्ये। अभितोवनदा

निषेधवाक्यालंकारजिज्ञासानुनयेरवलु॥ समीपोभयतःक्षिप्रसाकल्या
ऽभिमुखेभितः॥ २५४॥ नाम्नाकाख्ययोःप्रादुर्मिथोन्योन्यंरहस्यपि॥ ७

हः। "अभिमुखेयथा। अभितोहिंस्रकोहंतिमामेवपरिधावति।"॥ २५४॥ नाम्निप्राकाख्येचप्रादुः। "नाम्नियथा। प्रादुरासीच्चक्रपाणिः"। प्राकाख्येयथा। प्रादुर्बुद्धिर्भविष्यति। "अन्योन्यार्थेमिथोयथा। वासिष्ठकौंडिन्यमैत्रावरुणानांमिथोनविवाहः" रहसिमिथोयथा। मिथोमंत्रयते। मिथोन्योन्यंमिथोरहइतिविश्वः॥ ७ ७ ७ ७

अंतर्धानेतिर्यगर्थेचतिरः। "अंतर्धानेतिरोभूयास्ते। तिर्यगर्थेतिरोवर्ततेचंद्रः"। विषादाद्यर्थत्रयेहाकारः। [illegible]था। हारमणीयोगतःकालः। शुचिहेत्थथा। हारामवनंगतोसि। अर्तौपीडार्थो। हाहतोऽस्मीति। "कुत्सार्थेचहाशब्दः" ॥ २५५ ॥ अद्भुतेयथा। अहहबुद्धिरक्षकैर्वीराज्ञः। खेदेयथा। अहहनीतोधूतेनमयाकालः। "अहहादीर्घांतमपि। अत्रक्विप्। अहहेत्यद्भुतेखेदेपरिक्लेशात्मकर्षयोः। संबोधने

तिरोंतर्द्धौतिर्यगर्थेहाविषादशुगर्तिषु ॥ २५५ ॥ अहहेत्यद्भुते
खेदेहिहेताववधारणे ॥ ॥ इतिनानार्थवर्गः ॥ ॥ ७

पीतिमेदिनी" हेतौकारणेहियथा। अग्निरत्रास्तिधूमोहिदृश्यते। अवधारणेनिश्चये। "चंद्रोहिशीतः। हिपादपूरणेहेतौविशेषेप्यवधारणे। त्रस्त्रेहेत्पदेशेचसंभ्रमासूययोरपि। दीर्घांतपाठोप्यस्ति। हिदुःखेहेत्याख्यातौविषादेविस्मयेपिचेति" ॥ ॥ इतिनानार्थवर्गः ॥

चिराय । चिररात्राय । चिरस्य । एतेनिपाताआद्यायेषांतेतथा । आद्यद्राद्याचिरेण । चिरात् । चिरं । इतिषट्चिरार्थकाः । दीर्घकालस्यवाचका दूत्यर्थः । "क्रमेणोदाहरणानियथा । चिरायसंतर्थसमिद्धोरग्निं । चिररात्रायसंचितं । चिरस्यदृष्टेवमृतोत्थितेव । चिरेणनाभिंप्रथमोदबिंदवः चिरात्सुतस्पर्शरसज्ञतांययौ । सचिरंतपसिस्थितः" मुहुः । पुनःपुनः । शश्वत् । अभीक्ष्णं । असकृत् । एतेपंचसमाः । अर्थतस्तुल्याः । "यथासु

चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः ॥ मुहुःपुनःपुनःशश्वदभीक्ष्णमसकृत्समाः ॥ ९ ॥

हुःपश्यसिकौंतेय । आगच्छति । पुनःपुनःपश्यदृतिमिमांद्राश्वत् । अभीक्ष्णमक्ष्णालया ःतिदुर्गमे । असकृज्जलपानाचसकृत्तांबूलचर्वणा त् । अजयस्तु । अभीक्ष्णशब्दमनव्ययमप्याह । अभीक्ष्णंतुपौनःपुन्येसर्वदार्थेचदृश्यतइत्यनव्ययप्रकरणेपाठात्" ॥ १ ॥ ७

स्वाक्। झटिति। अंजसा। अन्हाय। द्राक्। मंक्षु। सपदि। एतेसमद्रुतेशीघ्रे। "यथा। स्वाक्ययोयातिदेहिनां। हृसंझटित्यारुरोह। अंजसा यातितुरगः। अन्हायसूर्येणतमोनिरस्तं। द्राक्भविष्यतिसुरवंतवप्रिये। मंक्षुह्यपाहिसरितःपटलैरलीनां। वचस्तथाहि। किंकियाकेवलमुत्तर" बलवत्। सुष्ठु। किमुत्। सु। अति। अतीव। षट्निर्भरेअतिशये। "यथापुनर्वसित्वाबलवन्निगृह्य। सुष्ठुपीतंमयाहृतं। किमुता

स्वाक्झटित्यंजसान्हायद्राङ्मंक्षुसपदेद्रुतंबलवत्सुष्ठुकिमुतस्व
त्यतीवनिर्भरे॥ २॥ पृथग्विनांतरेणर्तेहिरुङ्नानाचवर्जने॥

वर्द्धतक्षेत्रं। अतिवृष्टिः। अतीवशोभतेराजा"॥ २॥ पृथक्। विना। अंतरेण। ऋते। हिरुक्। नाना। एतेषड्वर्जने। "विनार्थेयथा। किं चिद्दत्वा पृथक्क्रिया। क्षणमच्युतसंहतेनमांविना। अंतरेणसुतंनास्तिसुखंसंसारिणांभुवि। ऋतेपुण्यात्स्वर्गतिर्न। हिरुक्कर्मनमोक्षः स्यात्। विष्णुंनानामोक्षदोनास्तिदेवः"॥

यत्। तत्। यतः। ततः। चत्वारिहेतौकारणे। "यथा। यन्नरम्येतरस्त्रिभ्यः। तद्दिंपरिरक्षशोभने। यतोगंगांभसिस्नातः। ततोनिष्कल्म षोनरः"। चित्। चन। द्वयंसाकल्ये। यथाकश्चित्। कंचन॥ ३॥ कदाचित्। जातु। इकस्मिंश्चित्काले। "स्मृतिःकदाचित्भवति। ज्ञान तेजातुसूत्तमं।" सार्धं। साकं। सत्रा। समं। सद्। पंचकंसहेत्यर्थे। "यथा। सार्धंदानववैरिणा। पत्न्यासाकंपतिर्भुंक्ते। सत्राकल

यत्तद्यतस्ततोहेतावसाकल्येतुचिच्चन ॥ ३ ॥ कदाचिज्जातुभ[illegible]साकंसत्रासमंसह ॥
अनुकूल्यार्थकंप्राग्वंव्यर्थकेतुवृथामुधा ॥ ४ ॥ अहोउताहोकिंकिमुतच ॥

णसुरवंसमश्नुते। समंबधूभिस्तरुणारमंते। विश्वासधूंसहरत्नभाभिः"। प्राग्वंनित्येकमानुकूल्ये। वृथा। मुधा। हेत्यर्थके "य था। वृथायुष्टःबुधानुधाश्रमंत्यत्र"॥ ४॥ अहो। उताहो। किमुत। किं। किमु। उत। षट्विकल्पे। "यथा। देवअहोगंधर्वः। उताहो ब्रह्मखोच्यते। किमुतलंक्ष्मीवोब्रह्मा। स्थाणुरयंकिंपुरुषः। गृहंकिमुवनंगतः। विष्णुरुतशिवःसेव्यः"॥

तु। हि। च। स्म। ह। वै। षट्श्लोकचरणपूर्णतायां। "यथारामस्तुलक्ष्मणंब्राह। अहंहियास्येनगरं। सचब्राह्चराजानं। मयास्मभुक्तं। सह लत्राहलक्ष्मणः। तेनवैहनः"। सु। अति। द्वेपूजने। "सुस्तुतं। अत्युत्तमः"॥ ५॥ अह्नीत्यर्थेदिवाशब्दः। दोषा। नक्तं। द्वेराचावित्यर्थे। "यथा। चौराश्चदोषाययुः। नक्तंगृहस्थोभुंजीत"। साचि। तिरः। द्वेतिर्यगर्थे। "कृतंसाचिधनुस्तेन। तिरोगत्वासमीक्षेत"॥ ६॥ प्याट्।

तुहिचस्महवैपादपूरणेपूजनेस्वति ॥ ५ ॥ दिवाह्नीत्यथदोषाचनक्तंचरजनाविति ॥
तिर्यगर्थेसाचितिरोप्यथसंबोधनार्थकाः॥ ६ ॥ स्यु प्याट्पाडंगहेहेभोः समयानिकषाहिरुक्॥

पाट्। अंग। हे। हे। भोः। एतेषट्संबोधनार्थकास्युः। "यथा। प्याट्भीमजहरक्षस्य। एवंपादित्यादि"। समय। निकषा। हिरु क्। समयेसामीप्ये। यथाग्रामंसमया। निकषाग्रामंनिकाग्रामंनिकषाग्रामं। "

सहसेत्येकमतर्किते । अकस्मादित्यर्थे । यथा । दिवः प्रसूनंसहसापपात । सहसाविदधीतनक्रियां । पुरः । पुरतः । अग्रतः । अयमग्रेइत्यर्थे । "यथा । पुरःपश्यसिकिंबाले । पुरतःस्थाप्यसर्वेषां । लेखः प्रत्यर्थिनोऽग्रतः" ॥ ७ ॥ स्वाहा । श्रौषट् । वौषट् । वषट् । स्वधा । पंचैतेदेवेभ्योह

अतर्किते तुसहसास्यात्पुरः पुरतोऽग्रतः ॥ ७ ॥ स्वाहादेवहविर्दानेश्रौ
षट्वौषट्वषट्स्वधा ॥ किंचिदीषन्ननागत्येप्रेत्यामुत्रभवांतरे ॥ ८ ॥

विर्दानविशेषेप्रयुज्यंते । तत्रपितृदानेस्वधावाद्यः प्रसिद्धः । किंचित् । ईषत् । मनाक् । अयमल्पे । "यथाकिंचिद्धिकसितंसुमं । ईषदुष्णंपयः
पिब । मनाक्विहस्यसंतुष्टः" । प्रेत्य । अमुत्र । द्व्यंजन्मांतरे । "यथा । प्रेत्यस्वर्गेमहीयते । इहचामुत्रचफलं ।" ॥ ८ ॥ ७

व । वा । यथा । तथा । इव । एवं । षट्साम्ये । तत्रवशब्दोयथा । शाक्षवंववपुर्यशः । "मणीवोष्ट्रस्यलंबेते । यथाबुभुक्षितस्यान्नंतथेवा
र्तस्यचौषधं । इंदुरिंदुरिवश्रीमान् । अग्निरेवंह्विजः । वंत्रचेतसिजानीयादिवार्थेतुतद्व्ययमितिमेदिन्यादिः । अतोववायथातथेत्यादिम
नोरमोक्तःपाठःसाधुः ।" ननुवह्यायथेत्यादिः । अपत्यादिपर्यायमध्येऽण्फिञादीनामनुक्तेश्च । अहो । ही । द्वेविस्मये । यथा । अहोरू
पमहोसत्वं । हीविस्मयविषादयोरितिविश्वः । तूष्णीं । तूष्णीकां । "यथातूष्णींस्थित्वाक्षणंभूयः । तूष्णीकांजलमध्यगः" । म

ववायथातथेवैवंसाम्येह्योहीचविस्मये ॥ मौनेतुतूष्णींतूष्णीकांसद्यःसपदितक्षणे ॥ ९ ॥
दिष्ट्यासमुपजोषंचेत्यानंदेथांतरेंतरा ॥ अंतरेणचमध्येस्युः प्रसह्यतुहठार्थकं ॥ १० ॥

द्यः । सपदि । द्वेतत्काले । "यथा । सद्योहतःसमुत्तस्थौ । शत्रुंजघ्नेसपदि" ॥ ९ ॥ दिष्ट्या । समुपजोषं । द्वेआनंदे । यथा । दिष्ट्याते
दर्शनंकांते । समुपजोषंभूयात् । अंतरे । अंतरा । अंतरेण । त्रीणिमध्येस्युः । यथा । अनयोरंतरेतिष्ठ । त्वांमांचांतरा अंतरेणवा
कमंडलुः । प्रसह्येत्येकंहठार्थकं ॥ १० ॥

सांप्रतं। स्थाने। द्वयंयुक्ते। यथास्वयंहेतुमसांप्रतं। "कमशोवच्मिसांप्रतमितिवा"। स्थानेहृषीकेशतवप्रकीर्त्या। अभीक्ष्णं। शश्वत्। द्वयं अनारते। अजस्रे "अभीक्ष्णमुष्णैरपितस्यसोष्मण। शश्वत्कालः"। नहि। अ। नो। न। चत्वारि अभावे। "यथा। नद्दिस्वात्वारामविषयमृगतृष्णाभ्रमयति। अराजंदविकंनष्टं। नोचक्रीकिंकुलालः। नमेकिंचनदह्यति"। अस्यार्थः। मास्म। मा। अ

युक्तेद्वेसांप्रतंस्थानेभीक्ष्णंशश्वदनारते ॥ अभावेनह्यनोनापिमा
स्मभालंचवारणे ॥ ११ ॥ पक्षांतरेचेद्यदिचतत्वेत्वङ्जांजसाद्वयं ॥

लं। त्रयंवारणे। यथा। मास्मकार्षीरिदंपुत्र। माकुरु। अलंमहीपालतवश्रमेण ॥ ११ ॥ चेत्। यदि। द्वयंपक्षांतरे। "यथा। सत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिं"। अङ्ग। अंजसा। इतिवार्थे। यदिस्त्रैणंदेवीयमनिरतदेहार्धघटनादवैतित्वामङ्ग। "अंजसेतिरुरुधुःकुचग्रहैः" ॥

प्रादुः। आविः। इत्यंप्राकाश्येस्पष्टत्वे। यथाप्रादुरासीत्। "आविर्बभूव"। ओं। एवं। परमं। त्वयमनेअंगीकारे। "यथा। ओमित्युक्त्वतोऽथशार्ङ्गिणः। एवंयदाहभगवान्। परममित्यक्त्वा"। ओमित्यनुमतौप्रोक्तंप्रवणेचाङ्गीकृतिविश्वः। एवंप्रकारोपमयोरंगीकारेऽवधारणइतिच ॥१२॥ समंततः। परितः। सर्वतः। विष्वक्। चत्वारिसर्वतइत्यर्थे। "समंततोवर्षतिमेघः। आयांतिपरितःश्रियः॥

प्राकाश्ये प्रादुराविःस्यादोमेवंपरमंसते ॥ १२ ॥ समंततस्तुपरितः
सर्वतोविष्वगित्यपि ॥ अकामानुमतौकाममसूयोपगमेस्तुच ॥१३॥

सर्वतोवातिपवनः। विष्वक्पतंतिकिरणाः"। अकामानुमतौअनिच्छयानुमतौकाममित्येकं। "त्वंहनिष्यसिचेत्कामं। कामंप्रकामेनुमतावसूयानुगमेपिचेतिहैमविश्वप्रकाशौ"। असूयापूर्वकस्वीकारेअस्त्वित्येकं। "यथा। तथाविधस्तायदशोषमस्तुनः"। चकारात्कामंमित्यपि। "अस्तुस्यादभ्यनुज्ञानेऽसूयांगीकारयोरपीतिमेदिनी"॥ १३॥

नन्वित्येकंविरोधोक्तौ। "यथानलुएवंमन्यसेतर्हिकिमपिनस्यात्" कञ्चिदित्येकंकामप्रवेदनेइष्टपरिप्रश्ने। इच्छांगाआख्यामेत्या। यथा। क

श्चिज्जीवतिमेमाता। निःषमं। दुषमं। द्वेनिंद्ये। "यथा। निःषमंवक्तिमेमूर्खः। दुःषमंवर्ततेवधूः" यथास्वं। यथायथं। द्वेयथायोग्यमित्यर्थे। "यथास्वमाश्रमेचक्रे। यथायथंफलायंते?"॥१४॥ मृषा। मिथ्या। द्वेवितथेऽसत्ये। "उच्चायसौंदर्यगुणामृषोद्याः। मिथ्योक्तवया" यथार्थं

ननुचस्याद्विरोधोक्तौकञ्चित्कामप्रवेदने ॥ निःषमंदुःषमंगर्ह्ययथास्वंतुयथायथं ॥१४॥
मृषामिथ्याचवितथेयथार्थंतुयथायथं ॥ स्युरेवंतुपुनर्वैवेत्यवधारणवाचकाः॥१५॥

यथातथं। द्वयंसत्ये। "यथा। यथार्थमुक्तंनान्यत्। गुरुर्यथातथंवक्ति। तथाशब्दस्तथाशब्दोयाथार्थ्यार्थः"। एवं। तु। पुनः। वै। वा। पंचानि श्चयार्थकाःस्युः। "यथा। एवमेवयथाप्राह। रावणंतुदुरात्मानमवधीद्राघवःप्रभुः। पुनर्न्यायंवेधर्मज्ञ"। "वैवेत्यत्रवाएवेतिवाछेदः॥ ॥१५॥

प्रागित्येकमतीतार्थकं। यथाप्राक्कर्म। नूनं। अवश्यं। द्वयंनिश्चिते। "नूनंशरणंप्रपन्ना। अवश्ययेयातारः श्चिरतरमुषित्वापिविषयाः"। नूनं निश्चिततर्कयोरितिविश्वः। संवदित्येकंवर्षे। यथा। प्रभवाख्यसंवत्। अर्वागित्येकंअवरे। "कुलेऋतुत्रयाद्वाकुमंडनान्नतुमुंडने"। अं एवं। द्वयंअंगीकारे। यथा। आंकुर्मः। "एवंकुर्मः।" स्वयमित्येकंआत्मनेत्यर्थे ॥ १६ ॥ नीचैरित्येकमल्पे। "तथापिनीचैर्विनयादहृयत"।

प्रागतीतार्थकंनूनमवश्यंनिश्चयेद्वयं ॥ संवद्वर्षेऽवरेत्वर्वागामेवंस्वयमात्मना ॥ १६ ॥
अल्पेनीचैर्महत्युच्चैः प्रायोभूम्न्यद्रुतेद्वानैः ॥ सनानित्येबहिर्बाह्येस्मातीतेस्तमदर्शने ॥ १७ ॥

उच्चैरित्येकंमहति। "यथाशृंगारमुच्चैर्गिरेरिदं" प्रायइतिभूम्निबाहुल्ये। यथा। प्रायोनवबधूः कोनं। द्वानैरिति। अद्रुतेमांद्ये। यथा। द्वा नैर्यातिपिपीलिका। सनेत्येकंनित्ये। यथासनातनः। बहिरितिबाह्ये। "यथा। निष्कासितोबहिर्ग्रामात्"। स्मेत्यतीते। यथा। वाक्यस्मथा सः। अस्तमितिदर्शनाभावे। यथा। सायमस्तमितोरविः ॥ १७ ॥

अस्तीतिसत्वे। यथा। अस्तिपरलोकइतिमतिर्यस्यसआस्तिकः। "रुषोक्तोकोपेनोक्तौउ। यथा। उआगतःवायुः। उसंबोधनरोषोक्त्योरनुकंपानियोगयोःपदपूरणेच। पादपूरणेऽपिचदृश्यतइतिमेदिनी"। ऊमितिप्रश्ने। ऊंगच्छसिबहिर्धव। "ह्रस्वपाठेउमित्यपि"। अथोत्यनुनयेसांत्वने। "यथा। अथक्रियार्थंसुलभंसमित्कुरां"। हुमितितर्के। "स्याच्चेत्किंहुंप्रपद्यते"। उषेतिरात्रेरवसाने। यथा।

अस्तिसत्वेरुषोक्तावूंप्रश्नेऽनुनयेत्वयि॥ हुंतर्केस्यादुषारात्रेरवसानेनमोनतौ ॥१८॥
पुनरर्थेगर्हितायांदुष्टुसुष्टुप्रशंसने॥ सायंसायेप्रगेप्रातःप्रभातेनिकषांतिके ॥१९॥

उषातनोवायुः। नमःप्रणामे। "नमोब्रह्मण्यदेवाय"॥१८॥अंगेतिपुनरर्थे। यथा। मूर्खोपिनावमन्यतेकिमंगविद्वान्। किंपुनरित्यर्थः। दुष्टुनिंदायां। यथा। दुष्टुखलत्वं। सुष्टुप्रशंसने। यथा। सुष्टुकाव्यं। सायमितिसायेदिनांतरे। यथा। सायंसंध्यामुपासीथ्ये। प्रगेप्रातः। हेप्रभाते। "यथा। प्रगेनृपाणामथतोरणाद्गृहिः। यःपठेत्प्रातरुत्थाय"। निकषेतिसमीपार्थे ॥ १९ ॥

पूर्वेद्युरागतेवर्षेपरुदित्येकं। पूर्वतरेगतवर्षात्पूर्ववर्षेपरारीत्येकं। यतिवर्तमानेब्देएषमइत्येकं। त्रयाणांयथा। परारिगतः कांतः परुन्नाग तएषमापिनागतः"। यतीतिद्यात्रंतस्येणः सप्तम्यांरूपं। अत्रान्हिअस्मिन्नहनीत्यर्थेअधशब्दः। "यथा। अद्यगंतुंनशक्नोमि"। अथपूर्वेन्हीत्यादिशब्देनउत्तरेन्हीत्यादिषट्कस्यग्रहणं। पूर्वेन्हीत्याद्यर्थेपूर्वादिशब्देभ्यएद्युस्त्रत्ययेपूर्वेद्युरित्यादयः सप्तशब्दाभवंति। क्रमेणयथा। पूर्वस्मिन्नहनीत्यर्थेपूर्वेद्युः। पूर्वेद्युरिष्यतेभ्रातःपूर्वेद्युः पूर्ववासरइतिरुद्रः"। उत्तरस्मिन्नहनिउत्तरेद्युः। "नांदीमुखाउत्तरेद्यु

परुत्परार्येषमोब्दपूर्वेपूर्वतरेयति ॥ अद्याद्यत्र्यथपूर्वेन्हीत्यादौपूर्वोत्तरापरात् ॥ २० ॥

र्विवाहःपरिकीर्तितः।" अपरस्मिन्नहनिअपरेद्युः। "आगतानपरेद्युस्तान्"। अधरस्मिन्नहनिअधरेद्युः। "अधरेद्युः प्रसूतासा। अधरस्तुपुमानोष्ठेहीनेऽमूर्द्धन्यवाच्यवत्।" अन्यस्मिन्नहनिअन्येद्युः। "अन्येद्युरात्मानुचरस्यभावं"। अन्यतरस्मिन्नहनिअन्यतरेद्युः। "अन्यतरेद्युः पितरंद्रक्ष्यसि"। इतरस्मिन्नहनीतरेद्युश्च "कश्चादिनादितरेद्युरियेोद्रष्टव्यः"॥ २०॥ ४ ५

उभयेद्युः। उभयद्युः। द्वेउभयस्मिन्नहनीत्यर्थे। "उभयद्युरुपोषणं"। परेद्यवीत्येकंपरेहनि। "मित्रंदृष्टंपरेद्यवि"॥ २१ ॥ ह्यइत्येकंग तेहनि। "ह्यः सर्वमभवत्कार्यं"। श्वइत्येकमनागते। आगामिन्यहनि। ततःपरेहनिपरश्वइत्येकं। "श्वःपरश्वश्चयथा। अद्यश्वोवापर श्वोवासर्वंकर्मभविष्यति"। तदा। तदानीं। द्वेतस्मिन्कालइत्यर्थे। "यथा। तदाचक्षुष्मतांप्रीतिः। यदास्यात्क्रियमाणं। तदानीमेवमेसु

तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः ॥ उभयद्युश्चोभयेद्युःपरेत्वह्निपरेद्यवि ॥ २१ ॥
ह्योगतेऽनागतेऽह्निश्वःपरश्वस्तुपरेहनि ॥ तदातदानींयुगपदेकदासर्वदासदा ॥ २२ ॥

रवं"। युगपत्। एकदा। एकस्मिन्कालइत्यर्थे। "यथा। शत्रुमित्रोदासीनायुगपदागताः। गवांशतमेकदादत्तं"। सर्वदा। सदा। द्वे। "स र्वदासर्वदासीतियाचतेयाचकः सदा" ॥ २२ ॥

एतर्हि । संप्रति । इदानीं । अधुना । सांप्रतं । पंचकमस्मिन्काल इत्यर्थे । "यथा । एतर्हि क्रियतेकार्यं । संप्रत्यासौगृह्यति । इदानीमस्मिंसंवृत्तः । बलाबलेपादधुना । तत्रास्तेसांप्रतंमुनिः" । तथेतिसमुच्चये । पूर्वादौदिशि । पूर्वादौदेशे । पूर्वादौकालेवाप्रागादयः स्युः । "दिशिप्राग्दिगित्यादि । देशेप्राग्देशइत्यादि । कालेप्राक्कालइत्यादि" । पूर्वादौइत्यादिशब्देनोत्तरपश्चिमदक्षिणाधरोर्ध्वादीनांग्रह

एतर्हिसंप्रतीदानीमधुनासांप्रतंतथा ॥ दिग्देशाकालेपू
र्वादौप्रागुदक्प्रत्यगादयः ॥ २२ ॥ ॥ इत्यव्ययवर्गः ॥ ॥

णं । प्रत्यगादय इत्यादिशब्देनत्वदागित्यादिग्रहः । "उत्तरात् । अधरात् । दक्षिणात् । उत्तरेण । अधरेण । दक्षिणेन । दक्षिणा । दक्षिणाहि । दक्षिणतः । उत्तरश्चसंगृह्यते । "ऊर्ध्वंतूपरिउपरिष्टादिति ॥ २३ ॥ ॥ इत्यव्ययवर्गः ॥ ॥

अथलिंगसंग्रहवर्गमाह ॥ सलिंगशास्त्रैः पाणिन्याद्युक्तलिंगानुशासनसहितैः सन्नादिप्रत्ययजैश्विकीर्षादिशब्दैः कृज्जैः श्वपाकादिभिः तद्धितप्रत्ययजैः अणाद्यंतैः समासजैरदंतोत्तरपदोद्विगुरित्यादिनोक्तैः बाहुल्येनपूर्वमनुक्तैः शब्दैरयंसंग्रहः क्रियतइतिशेषः। इहास्मिन्संग्रहवर्गेलिंगमुन्नयेद्धेतुं। कथमित्याकांक्षायासंकीर्णवदिति। यथासंकीर्णवर्गेप्रकृत्यादिभिरुन्नेयतथात्राप्युन्नयेत्। तत्रप्रकृत्यर्थेनयथा। अर्धर्चादिपुंसिचेति। प्रत्ययार्थेनयथा। स्त्रियांक्तिन्। प्रकृतिप्रत्ययार्थाद्यैरित्याद्यशब्दात्क्रियाविशेषणानांनपुंसकत्वंएकत्वं

सलिंगशास्त्रैः सन्नादिकृत्तद्धितसमासजैः॥ अनुक्तैःसंग्रहेलिंगंसंकीर्णवदिहोन्नयेत् ॥ १॥

चयथा। शोभनंपचतीत्यादि ॥ १ ॥ सन्नादिकृत्तद्धितसमासजविषयंपूर्वोक्तशब्दलिंगादन्यल्लिंगंलिंगशेषः। तस्यविधिः व्यापीस्वविषयस्यव्यापकोभवति। यदिप्रागुक्तैरिहोक्तैश्चविशेषविधिभिः नबाधितस्यात्। तर्ह्येवव्यापीभवेदित्यर्थः। एतेनास्यलिंगविशेषविधेरुत्सर्गभूतस्यस्वर्गादिवर्गोपवादावेदितव्याः। तत्रप्रागुक्तानांविशेषणानांपुनरुक्तिदोषप्रसंगाद्विस्तरभयाच्चनपुनरिहविधानं।

तथाहि स्त्रियामित्यधिकारइहपुंसिवक्ष्यते । तस्यद्योदिवौद्वेस्त्रियांक्लीबेत्रिविष्टपमितिपूर्वोक्तमपवादः । नीप्रभृतीनांतुकृतःकर्तरीत्यादिनावक्ष्यते । यद्यपिपूर्वलिंगमुक्तं। तथाप्यप्राप्तप्रापणार्थतयालिंगानुशासनमिहापिप्रधानमेव । स्त्रियामित्यधिकारोयंमसीशब्दपर्यंतंज्ञेयः। ईदूतौईकारोकारौविरामोअवसानस्थोयस्यतदीदूद्विरामंतच्चतदेकाच्चईदूद्विरामैकाच्॥ ईदंतमूदंतंवायदेकस्वरंशब्दरूपंतास्त्रियामि

लिंगशेषविधिर्व्यापीविशेषैर्यद्यबाधितः॥ स्त्रियामीदूद्विरामैका[illegible]स्योनिप्राणिनामच ॥ २ ॥

त्यर्थः । यथा । धीः । श्रीः । भूः । भ्रूः । नयनीतिनीरित्यादौकृतः कर्तरीतिबाधितत्वाद्वाच्यलिंगत्वं । योनिर्भगंतत्सहितानांप्राणिनांनामस्त्रियां । यथा । मातादुहितागौरित्यादि । दारशब्दादौतुदाराःपुंभूम्नीतिबाधकंप्रागुक्तं । कलत्रशब्दस्य । कलत्रंश्रोणिभार्ययोरितिक्लीबपाठोबाधकः । एवमुन्नेयमन्यत्रापि ॥ २॥

विद्युदादिह्रीपर्यंतानांअष्टानांयन्नामतत्स्त्रियां । यथा । विद्युत् । तडित् । रात्रिः रजनिः । वल्लीव्रततिः । वीरुत् । वीणाविपंचीत्यादि । "वीणादिग्भूनदीधियामितिपाठः क्वचित् ।" अदंतैर्मूलादिशब्दैर्यएकार्थःसमाहारार्थोद्विगुसमासःस्त्रियांस्यात् । यथा । पंचानांमूलानांसमाहारः पंचमूली । एवंत्रिलोकीषडध्यायीत्यादि । अदंतैरितिकिं । पंचानांकुमारीणांसमाहारः पंचकुमारि । पंचराजमित्या

कां० ३

नामविद्युन्निशावल्लीवीणादिग्भूनदीह्रियां ॥ अदंतैर्द्विगुरेकार्थोनसपात्रयुगादिभिः ॥ ३ ॥

दौदचिअदंतत्वेसत्यपिपात्रादित्वान्नपुंसकत्वमित्येके । एकार्थइतिकिं । पंचमुकपालेषुसंस्कृतःपुरोडाशःपंचकपालः । नसइति पात्रयुगाद्युत्तरपदैःअदंतैः एकार्थोद्विगुःस्त्रियांनस्यात् । यथा । पंचपात्रं । चतुर्युगं । त्रिभुवनं ॥ ३ ॥ ९ ७ ९०

तल्प्रत्ययःस्त्रियांसतुभावाद्यर्थेविहितः। तत्रभावेयथा। शुक्लता। कर्मणिब्राह्मणता। समूहेग्रामता। स्वार्थेदेवता। इंदइति। इंदेसमूहे यइनिकट्यत्रएतेचत्वारःप्रत्ययाःस्त्रियां। यथा। पाशादिभ्योयः। पाशानांसमूहःपाश्या। वात्या। खलादिभ्यइनिः। खलिनी। पद्मिनी। रथादिभ्यःकट्यच्। रथकट्या। एवंगोत्रा। इंदेर्किं। मुखेभवोमुख्यः। दंडोस्त्यस्यदंडी। वैरेति। मिथुनस्यकर्ममैथुनिका। वैरमिथुनादौचयोवुन्प्रत्ययःस्त्रियां। तत्रवैरेविरोधार्थेयथा। अश्वमहिषिका। अश्वमहिषस्येदंवैरमित्यर्थः। एवंकाकोलू

तल्इंदेयेनिकट्यत्रावैरमिथुनिकादिवुन्॥

किका। मैथुनिकायांयथा। अत्रिभरद्वाजिका। अत्रिभरद्वाजयोरियंमैथुनिका। विवाहरूपसंबंधइत्यर्थः। एवंकुत्सश्वकुत्सिका चतयोर्मैथुनिका कुत्सकुत्सिकिका। "वुन्ग्रहणंवुन्उपलक्षणं। यथाकात्सिका। गार्गिकयाश्लाघते॥ क्वचित्वैरमैथुनिकादिवुरितिपाठः"। आदिनावीप्सादौवुनोग्रहणं॥

स्त्रीयांभावादिः स्त्रीभावादिस्तस्मिन्। स्त्रियामित्यधिकृत्यभावादौयेविहिताः प्रत्ययाअनिक्किण्भाद्यस्तेस्त्रियांस्युरित्यर्थः। अ
निर्यथा। आक्रोशेनञ्यनिः अकरणिः। अजीवनिः। क्तिन्यथा। कृतिः। गतिः। ण्वुल्यथा। प्रच्छर्दिका। प्रवाहिका। आसिका।
ण्वुच्यथा। व्यावक्रोशी। ण्वुच्यथा। ज्ञायिका। इक्षुभक्षिका। क्यप्यथा। व्रज्या। इज्या। "स्त्रीभावादौकिं। वदः क्यपिक्यप्

स्त्रीभावाद्यनिक्तिण्ण्वुल्णच्ण्वुच्क्यव्युजिञ्ङ्निशाः॥ ४॥

च। मृषोद्यं। ब्रह्मभूयं।" युच्यथा। कारणा। आसना। इञ्यथा। वापिः। वासिः। कांकारिमकार्षीः। इञ्उपलक्षणार्थत्वादि
ण्ड्कुच्यथा। आजिः। कृषिः। अङ्यथा। पचा। त्रपा। भिदा। निर्यथा। ग्लानिः। म्लानिः। हानिः। इत्यत्रयथा। क्रिया।
इच्छा॥४॥

उणादिषुयेनिः ऊः। ईः। एतेत्रयः स्त्रियांस्युः। तत्रन्यंतोयथा। श्रेणिः। "श्रोणिः। द्रोणिः। उणादिष्वनिरितिपाठेअनिर्यथा। धरणिः धमनिः। सरणिः।" ऊदंतोयथा। चमूः। कर्मूः। ईदंतोयथा। तंत्रीः। "तरीः"। ङ्यंतंआबंतंऊङंतंचयच्चलंजगमंस्थिरंस्थावरं वातल्लिंगंस्यात्। जंगमंयथा। नारी। शिवा। ब्रह्मवधूः। स्थावरंयथा। कदली। माला। कर्कंधूः। तच्छब्देनान्यमुच्यादि

उणादिषुनिरूरीङ्जाम्बूकुंतंचलंस्थिरं॥ तत्क्रीडायांग्रहरणंचेत्तेनाख्यायां॥ ३।२।६॥ ५॥

कमिर्दिश्यते। तेनायमर्थः। तत्र आङ्किं ग्रहणंयदि ... तेनाहृतेतेनार्थे... करण्यः... । ... स्त्रीग्रहणोद्देशाः। तेनक्रीडामोलेतिचोदाहर्तव्यं। मुष्टिग्रहणमस्यांक्रीडा। गंभीष्टा। पल्लवग्रहणमस्यांक्रीडा। गंपाल्ल वा॥ ५॥

साधञंतवाच्यादंडपातादिक्रियाऽस्यांफाल्गुन्यादिकायामित्यर्थेघञंताद्धितोयोऽप्रत्ययः। सःस्त्रियांस्यात्। उदाहरति। दंडपातोऽस्यांफाल्गुन्यांदांडपाताफाल्गुनी॥ एवंश्येनपातोस्यांद्यौर्नपातामृगया। तिलपातोऽस्यांस्वधाक्रियायांतैलंपाता। श्येनतिलस्येतिमुम्। "पितृदानेस्वधामतामित्यमरमाला। वररुचिनातुस्वधाक्रियायामवश्यंनित्यस्त्रीलिंगत्वोक्ता"। इतिशब्देनमुसल

घञोयःसाक्रियास्यांचेद्दांडपाताद्फाल्गुनी॥ श्येनंपाताच्च तथातैलंपातास्वधेतिदिक्॥६॥

पातोऽस्यांमौसलपाता। भूरित्यादिसिद्धिः। क्वचिद्द्योफाल्गुनपौर्णमास्यांदंडपातक्रीडाभवतीतिदिगित्यनेनदांडपातादिकं उदाहरणमितिसूचितं॥६॥

यदिअपचयेऽल्पत्वेविवक्षावक्तुमिच्छास्यात्तर्हिमृणाल्यादयःस्त्रीलिंगाःस्युः । यथा । अल्पंमृणालंमृणाली । आदिशब्दाद्यथा । ह्रस्वो वंशोवंशी । गौरादित्वान्ङीष् । एवंकुंभ प्रणालोछत्रीपटीतटीमटीत्यादयः । ह्रस्वार्थेकन्प्रत्ययःस्त्रियां । यथापेटिका । काचिदिति किं । अल्पोह्रस्वोह्रस्वकइत्यादिनास्त्रियां । अथडुयाबूडुंनमित्यादिनोक्तलिंगानामपिकेषांचिन्नाभ्नांसंज्ञेनलिंगज्ञानायह्रस्वाद्यर्थकां

स्त्रीस्यात्काचिन्मृणाल्यादिर्विवक्षाऽपचयेयदि ॥ लंक शोफालंकाटीकाधातकीपंजिकाढकी ॥ ७ ॥

नादिक्रमेणाह । लंकेति । लंकाराक्षसपुरी । शोफालिकापुष्पभेदःवृक्षभेदश्च । " सतुनिर्गुंडीइतिप्रसिद्धः । " टीकाविषमपदव्याख्या। धातकीवृक्षभेदः । " धायटीइतिप्रसिद्धा " । पंजिकानिःशेषपदव्याख्या । आढकीतुवरी । " तूरइतिप्रसिद्धा " ॥ ७ ॥

सिध्रकावृक्षभेदः। सारिकापक्षिभेदः। "साळंकीइतिप्रसिद्धा"। हिक्कास्वरभेदः। ऊर्ध्ववातप्रवृत्तौशब्दविशेषःउच्चकीइतिप्रसिद्धः
प्राचिकावनमक्षिका। "पक्षिभेदइतिस्वामी"। उल्कातेजःपुंजः। पिपीलिकाकीटभेदः। मुंगीइतिप्रसिद्धा। शनैर्यातिपिपीलिकइति
पुंस्त्वमपीतिस्वामी"। तिंदुकीवृक्षभेदः। "टेंभुरणीइतिप्रसिद्धा"। कणिकारमाणुः। भंगिःकौटिल्यभेदः। "विच्छित्तिर्वा। व्याजश्छ

सिध्रकासारिकाहिक्काप्राचिकोल्कापिपीलिका॥ तिंदुकीकणिकाभंगिःसुरंगासूचिमाढयः॥ ८॥

निभेभंगिर्विदिर्भीतिर्निर्मोलिकेतिरभसः"। सुरंगाविवरभेदः। "सुरंगइतिख्यातः"। सूचिर्व्यधनी। स्त्रीसूचिनृत्यभेदेचव्यधनीशि
खयोरपीतिरत्नकोशः"। माढिःपत्रशिरा। "माढिर्दैन्यंपत्रशिरेतिहैमः"॥ ८॥

पिच्छा । शाल्मलिः । "निर्यासः । पिच्छाशाल्मलिवेष्टके । पंकिपूगच्छटाकोशमंडेषश्वपदामये ॥ मोचायांपिच्छलइतिहेमः" । वितंडा वादभेदः । काकिणीपणचतुर्थांशः । "काकिणीपणतुर्यांशोमानदंडेचदृश्यते ॥ कृष्णलेकवराट्योःस्यादुन्मानस्यांशकेपिचेतिमेदिनी । रभसस्तुनांतेष्वप्याह । पणोदमानदंडानांतुर्यांशोपिचकाकिनीति । आढकस्यपंचांशानमोभागउद्मानं । उक्तंचगणिनावल्ल्यां । कुल्यास्याद्दृष्टभिद्रोणेद्रोणपादेनचाढकः । अतोर्धशातिकोभागउदामानमुदाहृतमिति । चूर्णिः चूर्णिका । शाणीशाणपटविशेषः ।

पिच्छावितंडाकाकिण्यश्चूर्णिःशाणीद्रुणीदरत् ॥ सातिःकंथातथाऽसंदीनाभीराजसभापिच ॥ ९ ॥

"निकषइतिस्वामी" । द्रुणीकर्णजलौका । "द्रुणीकूर्म्यांजलद्रोण्यांमितिहेमः" । दरत् । म्लेंछजातिः । सातिर्दानावसानयोः । कंथापावरणांतरं । "कंथामृन्मयभित्तौचतथाप्रावरणांतरइतिमेदिनी" । आसंदीआसनभेदः । "वेत्रासनमितित्रसिद्धं । अंगविशेषोनाभिः । राज्ञांसभेतितत्पुरुषः । सभाराजेत्यस्यापवादोयं ॥ ९ ॥

झल्लरीवाद्यभेदः। "झलरीझल्लरीचेहेहुडुके बालचक्रकइतिमेदिनी"। चर्चरीकरशब्दः हर्षक्रीडावा। "चर्चरीगीतभेदेचकेशभिल्लकर शब्दयोरितिकोशांतरं"। पारीहस्तिपादरज्जुः। "पारीपूरापरागयोः। पात्र्यांकर्पूरिकायांचपादबंधेचहस्तिनामितिहेमः"। होरालग्नार्धं। "होरातुलग्नेराद्यर्द्धेशास्त्ररेखाप्रभेदयोरितिहेमः। लट्वाग्रामचटकः। "लट्वाकरंजभेदेस्यात्फलेबाद्येरांतरइतिमेदिनी"। सिध्मलामत्यविकृताविति मेदिनी। सिध्मलाशुक्रमांसस्त्रीत्रिलिंग्यांतुकिलासिनीतित्रिकांडशेषः।" लाक्षाजतु। लिक्षायूकांडं। गंडूषाज

झल्लरीचर्चरीपारीहोरालट्वाचसिध्मला ॥ लाक्षालिक्षाचगंडूषा
गृध्रसी मसामसी ॥ १० ॥ ॥ इतिस्त्रीलिंगसंग्रहः ॥ ॥

लादिनामुखपूरणं। "पुंस्यपि"। गंडूषोमुखपूर्तौस्याद्रजहस्तांगुलावपि। अमरः। मेदःपित्तादितिहेमः। उन्नतनाभिस्तुगंडूषा नापिमुखपूर्तिरितिबोपालितः" गृध्रसीवातरोगभेदः। सतुऊरुसंधौभवति। चमसीयज्ञपात्रभेदः। "त्रणीतेतिप्रसिद्धा। माषपि ष्टपोलिकाविशेषः इतिवैद्यकग्रंथे। [illegible]ज्ञपात्रस्यभेदेस्त्रीपिष्टकेस्त्रियामितिमेदिनी" मसीकज्जलं। "मेलामसीजलंपत्रांजनं चस्यान्मसिर्द्वयोरितित्रिकांडशेषः" ॥ १० ॥ ॥ इतिस्त्रीलिंगसंग्रहः ॥ ॥ ७ ७

अथपुलिंगसंग्रहः ॥ ॥ पुंस्त्वेइतिपद्मद्रुहशब्दपर्यंतमधिकारः । भेदास्तुषितसाध्यादयः । अनुचराःसुनंदादयः । तैः सहिताःसुरा सुराद्देवदैत्याःपर्यायैःसहपुंसि । सुरपर्यायायथा । अमरादित्यादेवामरइत्यादयः । तद्भेदायथा । तुषिताः साध्याः । इंद्रोमरुत्वा न्मघवासूरःसूर्योर्यमा । हाहाहूहूःतुंबरुरित्यादि । अनुचरायथा । विष्णोरनुचराजयविजयप्रभृतयः । रुद्रानुचरानंदिके

पुंस्त्वसभेदानुचराःसपर्यायाःसुरासुराः ॥

श्वरादयः । एवंअसुरपर्यायादैत्यादानवाइत्यादयः । तद्भेदाबलिनमुच्यादयः । असुरानुचराः कूष्मांडमुंडादयः । एवमुभयंस र्त्र । एतेषामपिदैवतानिपुंसिवादेवतास्त्रियामित्यादिबाधकंस्मारयिष्यति । अबाधिताइतिवक्ष्यमाणेन । स्वर्गादयश्चोनविंश तिः सभेदाःसपर्यायाश्चपुंसिस्युः ॥

स्वर्गपर्यायोयथा। स्वर्गोनाकस्त्रिदिवइत्यादिः। द्योदिवोद्वेस्त्रियांक्लीबेत्रिविष्टपमितिबाधकंबलवत्तरंतद्विनापुंस्त्वं। यागोयज्ञः। मखः क्रतुः। तद्भेदाअग्निष्टोमाद्यः। इष्ट्यादेर्बाधितत्वंवक्ष्यति। अद्रिःगिरिःपर्वतः। तद्भेदामेरुसह्याद्यः। एषांमध्येःपवादःचेदुक्तःशैलवर्गे। मेघोघनइत्यादिःपर्यायः। भेदआवर्तादिः। अभ्रस्यतुअभ्रंमेघइतिक्लीबपाठोबाधकः। अब्धिः समुद्रइत्याद्यःसमुद्रपर्या

स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशारारब्धः ॥ ११ ॥

याः। क्षीरोदादिर्भेदः। द्रुर्वृक्षः। शारवीत्यादिपर्यायः। वटादिर्भेदः। अत्राप्यिक्वचिद्रूपभेदादिना। "पाटलाशिंशपादौ"। अपवादाउक्ताः। कालोदिष्टःसमयःएवंपर्यायः। मासादयोभेदाः। असिःखड्गः। नंदकादयोभेदाः। "इत्यादौबाधः"। शारोबाणः। भेदोनाराचादिः। इषुर्द्वयोरिति विशेषोदर्शितः। अरिःशत्रुः। भेदआततायाद्यिः ॥ ११ ॥

करोराजग्राह्यभागोरश्मिःपाणिश्च । दीधित्यादीनांतुपुंस्त्वंबाधितं । गंडःकपोलः । ओष्ठोदंतच्छदः । दशानवसनादित्वरूपभेदात्बाधितं । दोःप्रवेष्टः । भुजबाह्वोस्तुह्योरितिविशेषः । दंतोरदः । भेदोजंभः । कंठोगलः । "समीपगलभेदेषुकंठंत्रिषुविदुर्बुधाइतिशाश्वतः ।" केशःकचः । नखःकरुहः । नखोऽस्त्रीत्यादिनाबाधितं । स्तनःकुचः । एतेयथासंभवंसभेदपर्यायाः पुंसि । अन्हःअहश्चएतदंताः पुंसिस्युः । यथा । अन्हःपूर्वेपूर्वाण्हः । "अन्हःअपरंअपराह्णः" । हेअहनीसमाहृतेद्व्यहः । क्ष्वेडभेदाविषविशेषाः पुंस्त्वेस्युः । यथा ।

करगंडोष्ठदोर्दंतकंठकेशनखस्तनाः ॥ अन्हाहांताः
क्ष्वेडभेदारात्रांताः प्राक्संख्यकाः ॥ १२ ॥ ७

सौराष्ट्रिकः । अत्रगरलंविषंपुंसिक्लीबेच । काकोलंइत्यादिबाधितं । रात्रांताइतिसमासांतस्यैकदेशानुकरणं । एवमुत्तरत्रापि । रात्रशब्दोंतेयेषांते यदिप्राक्असंख्याद्यावाचकशब्दरहितास्तहिपुंसि । यथा । अहश्चरात्रिश्चाहोरात्रः । सर्वरात्रः । पूर्वरात्रः । अपररात्रः । प्राक्संख्यकाइतिकिं । पंचरात्रं । गणरात्रः । पुण्यरात्रस्यार्धर्चादिपाठात्क्लीबत्वंच ॥ १२ ॥ ७ ७

श्रीवेष्टाद्योयेनिर्यासाःद्रवसारवाचकास्तेपुंसिस्युः। श्रीवेष्टःसरलः। "श्रीपिण्डइतिक्वचित्पाठः"। आद्येनश्रीवासहकधूपार्यः। चकाराद्गुग्गुलु सिल्हकादयः। असुचअनृचतावंतोयेषांतेअसन्नंताः। अच्चमसिसुसन्नंतमित्यादिनावक्ष्यमाणेनअप्सरआदीनांपूर्वोक्तेनचनाधकेनाबाधिता श्चेत्पुंसिस्युस्तत्रअसंतायथा। अंगिराः। वेधाः। चंद्रमाः। अन्नंतायथा। कृष्णवर्त्मा। मघवा। अबाधिताइतिकिं। इदंवयः। इदंलोम। तु

श्रीवेष्टाद्याश्चनिर्यासाअसन्नंताअबाधिता॥ कक्षोरुजतुवस्तूनिहित्वातुरुविरामकाः॥ १२॥

श्चरुश्चतुरुतौविरामेयेषांतेतुरुविरामकाः। कक्षोरुजतुवस्तूनिहित्वातुशब्दांताश्चपुंसिस्युरित्यर्थः। यथा। हेतुः। सेतुः। धातुः। मंतुस्तं तुरित्यादि। कुरुः। मेरुः। किंशारुरित्यादि। कक्षोर्वाद्युपलक्षणं। दारुश्मश्रुप्रभृतीनां। तत्रकक्षोरुअस्थिविशेषः। तृणविशेषोवा। जतुला क्षा॥ १२॥

कषणादयः षट्पुंसिउपांतेअंत्यसमीपेयेषांतेतथा। यदीति। यदिएतेकादिवर्णषट्कोपांताअदंताः स्युस्तर्हिपुंसिभवंति। यथा। अंकः। लोकः। स्फटिकः। शुल्कवल्कादिस्तुबाधितंपूर्वे। ओषठोषमाषपुरुषादयःषोपांताः। वर्षादयस्तुपूर्ववाधिताः। भक्षभक्षकेरणादयोणोपांताः विषाणादिबाधितं। कौस्तुभदर्भशालभाद्यिर्भोपांतः। कुसुंभादिबाधितं। होमग्रामगुल्मव्यामादयोमोपांताः। पद्मादेर्वापुंसीत्यादिनाबाधितत्वं। झर्झरसीकरसीरप्रभृतिःरोपांतः। अजिरादेर्बाधः। पकारादिवर्णषट्कोपांताः अबाधिताश्चेत्पुंसिस्युः। अत्रयदंताइतिपूर्वोक्तंनसंबध्यते। अथादित्वात्। पकारोपांतायथा। यूपबाष्पकलापादयः। कुतपादिर्बाधितः। थकारोपांतावेपथुरोमंथादयः। नोपांताइनघनभान्वादयः। वनादि

कषणभमरोपांताद्यदंताअमी अथ ॥ पथनयसटोपांतागोत्राख्याश्चरणाख्याः ॥ १४ ॥

स्तुबाधितः। योपांताआयव्ययजायुतंतुवायादयः। मृगयादिस्तुबाधितः। सोपांतारसहासादयः। बिसादिर्बाधितः। टोपांताःपटादयः। किरीटादेर्बाधकमुक्तं। गोत्रेति। गोत्रंवंशः। तस्मिन्नाख्यासंज्ञायेषांतेगोत्राख्याऋषिसंज्ञकाः गोत्रस्थादिपुरुषाः येप्रवराध्यायपठिताःयेप्यन्येऽपत्यप्रत्ययंविनागोत्रवाचित्वेनलोकेप्रसिद्धास्तेपुंसिस्युः। यथा। भरद्वाजः गोत्रमस्माकं। एवंकश्यपवत्सभृतयः। चरणाख्या वेदशाखायाआख्याः संज्ञाःपुंसिस्युः। यथा। कठः बह्वृचइत्यादि ॥ १४ ॥

नाम्निसंज्ञायांअकर्तरिचकारकेभावमात्रेचविहितास्तेघञादयःसप्तप्रत्ययाःपुंसिस्युः। भावेचेतिचकारादसंज्ञायांचघञ्गृहीतः। घञंता यथा। प्रास्यतइतिप्रासः। विदंतिअनेनवेदः। प्रपतत्यस्मात्प्रपातः। भावमाघः। पाकः। त्यागः। अचूयथा। जयः। चयः। नयः। अपूयथा। कर गरः। लवः। प्लवः। नङ्यथा। यज्ञः। प्रश्नः। याङ्ग्येत्यत्रतुपुंस्त्वंबाधितं। नङ्उपलक्षणार्थत्वात्। स्वपोनन्। स्वप्नः। स्वप्नःसवेशइत्यपीतिवा पुंस्त्वसिद्धिर्बोध्या"। णप्रत्ययोयथा। न्यादः। घप्रत्ययोयथा। उरच्छदः। अथुच्यथा। वेपथुः। ल्युरिति। कर्तरिनंद्यादिल्युः पुंसिस्यात्।

नाम्न्यकर्तरिभावेचघञजङ्नङ्णघाथुच ॥ ल्युःकर्तरीमनिच्थुभावेकोघोः किः प्रादितोऽन्यतः ॥ १५ ॥

यथानंदनः। रमणः। मधुसूदनः। भावेष्ट्यादिभ्योयङ्मनिच्थुसपुंसिस्यात्। यथा। ष्टथोर्भावः प्रथिमा। महिमा। भावइतिकिं। स्तृणोतीति वरिमाष्टथा। अत्रभावेइतिशब्दोदेहलीदीपन्यायेनपूर्वत्रपरत्रचसंबध्यते। "भावेकोयथा। आरब्धृस्थः। प्रस्थः।" प्रादितः। अन्यतश्च परोयोघुसंज्ञोधातुस्तस्माद्धितः किप्रत्ययःपुंसिस्यात्। दापूदैपोर्विनाशार्थोधारूपश्चधातुर्घुसंज्ञकः। प्रादितोयथा। प्रधिः निधिः। आदिः। अन्यतोयथा। जलधिः। इडुधेरूहद्योरितिबाधितत्वं ॥ १५ ॥

द्वंद्वेसमाहारादन्यत्रद्वंद्वसमासेश्ववडवौपुंसि। स्वयमेवोदाहरति। अश्वाश्चवडवाश्चाश्ववडवाः। एवमश्ववडवान्। अश्ववडवैरित्यादिप्रयोगः। समाहारेत्वश्ववडवमितिक्लीबं। सूर्यचंद्रपर्यायपूर्वकः कांतशब्दः पुंसियथा। सूर्यकांतः। चंद्रकांतः। इंदुकांतः। सोमकांतः। अथोवाचकपूर्वकोपिकांतःपुंसियथा। अयस्कांतः। लोहकांतः॥ १६॥ इदानींपुंल्लिंगविशेषपर्यंतमनुक्रम्यकांतादिकममनतिक्रम्याह। वटकः पिष्टकभेदः। अनुवाकोवेदावयवः। रज्जुकः कंबलः। कुडंगकोदक्षलतागहनं। "कुटंगकइत्यपि"। पुंस्वोबाणावयवः। न्यूंखः सामवेदेनिपातितओकारः। "न्युंखइति

द्वंद्वेश्ववडवावश्ववडवानसमाहृते ॥ कांतः सूर्येंदुपर्यायपूर्वोयः पूर्वकोपिच ॥ १६॥ वटकश्चानुवाकश्चरज्जुकश्चकुडंगकः ॥ पुंस्वोन्यूंखः समुद्गश्चेपिटपट्टधटाःखटाः ॥ १७ ॥ ७ ७

ह्रस्वोकारोपि। न्युंखःसम्यग्मनोज्ञेचसाम्नः सद्प्रवणेपिचेतिमेदिनी"। समुद्गःसंपुटकः। विटोधूर्तः। "विटोद्गोखदिरेषिंगेमूषिकेखदिरेपिचेतिमेदिनी"। पट्टःकाष्ठादिरचितआसनविशेषः। "पट्टश्चतुष्पथेपीठेराजादेःशासनांतरे। व्रणादिबंधनेपेषाभ्रनीतिहेमः।" धटस्तुल्या "धटादिर्न्यतुलायांस्याद्धटीचीरेश्ववाससइतिमेदिनी"। अंधकूपादयःखटाः। "खटस्तूलोकफे। टंकेंधकूपेप्रहारइतिहेमः"॥ १७ ॥ ५

कोट्टोदुर्गपुरं। अरघट्टःकूपभेदः। "अरेश्चक्रावयवसदृशैःकाष्ठविशेषैर्घट्यतेरच्यतेसोरघट्टः। राहाटइतिप्रसिद्धइत्यन्ये"। कस्यचिन्म
तेटकारांतेष्वपिभट्टग्रामइतिन्यायेनरेफांतोपिकोट्टारइतिन्यक्षरोनिबद्धः। "कोट्टारोनागरेकूपेपुष्करिण्याश्चपाटकइतिमेदिनी। घट्टःघा
टइतिप्रसिद्धः। हट्टःक्रयविक्रयस्थानं। पिंडोमृदादिसंघातः। गोंडोनाभिः। "गोंडोपामरजातौचनाभौचसंततौतरुद्रुः।" पिचंड
उदरं। "पिचिंडइत्यपि। पिचिंडउदरेपशोरव[illegible]नेतिमेदिनी"। पिचंडवत्गड्वादयोपिपुंसिस्युरितिबतानिर्दिश्यते। गडुर्गल्गं

कोट्टारयट्टहट्टाश्चपिंडगोंडपिचंडवत्॥ गडुःकरंडोलगुडोवरंडश्चकिणोघुणः॥१८॥

डः। "गडुःष्टघगुडेकुजइतिविश्वः"। करंडोवंशादिकृतभांडभेदः। "करंडोमधुकोशेसौकारंडवेदलाटकइतिहेमः"। लगुडोवंशादिदंडः
वरंडोमुखरोगः। "वरंडोवदनव्यस्था। अंतरावेदिसंघोचेतिहेमः"। किणोमांसग्रंथिभेदः। सतुरवनिनदंडादिसंघर्षणात्करतलादौस्यष्टः
"व्रणजेचिन्हंचकिणः।" घुणः [illegible]मः। "घुणःस्यात्काष्ठवेधकइतिरत्नकोशाः"॥१८॥

इतिः चर्मपुटकः। "इतिश्चर्मपुटेमत्स्येनेतिमेदिनी"। सीमंतः केशवेशः। हरित्यालाश्यावर्णः। "हरिद्दिशिस्त्रियांपुंसिहयवर्णेविद्रोषयोः। अस्त्रियांस्यात्तृणेचेतिमेदिनी" रोमंथः पशूनांचर्वितचर्वणं। उद्गीतःसामभेदः। "उद्गीथःप्रणवःसामवेदध्वनिरित्यरुणः" बुद्बुदोजलविकारः। कासमर्दोगुल्मभेदः। अर्बुदोदशकोटयः। अर्बुदोमांसकीलेस्यात्पुरुषेदशकोटिषुइतिमेदिनी" अर्दनिरग्निः। कुंदः शिल्पभांडं। "कुंदोस्यु

इतिसीमंतहरितोरोमंथोद्गीथबुद्बुदाः॥ कासमर्दोर्बुदःकुंदःफेन
स्तूपौसयूपकौ ॥ १९ ॥ आतपः क्षत्रियेनाभिःकुणपक्षुरकेदराः॥

नेनिधौ। चक्रभ्रमोचमाध्येचेतिहेमः"। फेनोजलविकारः। स्तूपोघटकादिः। एतौयूपश्च। "यूपइत्यापे"॥ १९॥ आतपःसूर्यालोकः। क्षत्रियोनाभिः। क्षत्रियवाचीनाभिशब्दःपुंसीत्यर्थः। कुणपः शवभेदः। "कुणपः पूतिगंधोशवेपिचेतिमेदिनी"। क्षुरोवपनशस्त्रं। क्षुरःस्याच्छेदनेद्रव्येकोकिलाक्षेचगोक्षुर इतिमेदिनी"। केदरोव्यवहारपदार्थः॥

पूरोजलप्रवाहः। "पूरः स्यादंभसांवृद्धौव्रणसंशुद्धिरित्यपि"। क्षुरस्तोबाणभेदः। "क्षुरस्त्रइतिकवर्गद्वितीयादिरपि" चुक्रशाकभेदः। "चुक्रः स्त्वम्लेऽम्लवेतसइतिहैमः"। गोलोवर्तुलपिंडः। हिंगुलोरागद्रव्यभेदः। क्लीबेचोक्तोवैश्यवर्गे। "हिंगुलोवर्णकद्रव्येनाभंटाक्यांतुहिंगुलीतिमेदिनी। हिंगुलुःस्यात्तुहिंगुलमितिमुकुटः"। पुद्गलःआत्मा। "पुद्गलःसुंदराकारेत्रिषुपुंस्यात्मदेहयो

पूरक्षुरत्रचुक्राश्चगोलहिंगुलपुद्गलाः॥ २० ॥ वेतालभल्लमल्लाश्चपुरोडाशोपिपट्टीशाः॥

रितिमेदिनी" ॥ २० ॥ वेतालोभूताधिष्ठितशवः। भल्लुस्यात्पुंसिभल्लूकइतिमेदिनी। मल्लोबाहुयुद्धकुशलः। पुरोडाशोहविर्भेदः। "पुरोडाशोहविर्भेदेचमस्यांपिष्टकस्यचरसेसोमलतायाश्चहुलहोपेचकीर्तितइतिविश्वः"। पट्टीशोऽस्त्रभेदः। "पटिसइतिदंत्यसांत्यइतिमुकुटः" ॥

कुल्माषोऽर्धस्विन्नोयवः कुत्सितमाषोवा । "कुल्माषंकांजिकेयावकेपुमानितिमेदिनी" । रभसःहर्षः । "रभसोहर्षवेगयोरितिविश्वः" । सकटाहःकटाहसहितःकटाहशब्दश्चपुंसीत्यर्थः । कटाहोवटकादिपाकपात्रं । "कटाहोघृततैलादिपाकपात्रेपिकर्परे । कटाहः कूर्मपृष्ठेचस्यात्पैत्यमहिषीक्षीरावितिविश्वः । कटाहःकूर्मकपरे । द्वीपस्यचप्रभेदेचेतिमेदिनीच" । सनिष्ठीवतांबूलादिचर्वणनिक्षेपपात्रंपतद्ग्रहः ॥ २१ ॥
॥ ॥ इतिपुल्लिंगदोषः ॥ ॥ द्विहीनेद्वाभ्यांस्त्रीपुंसाभ्यांहीनेनपुंसके । अधिकारोयमाबाङ्किकात् । श्लोकद्वयेप्राधान्येननिर्दिष्टावा

कुल्माषोरभसश्चैवसकटाहःपतद्ग्रहः ॥ २१ ॥ ॥ इतिपुल्लिंग
दोषः ॥ ॥ द्विहीनेन्यच्चखवारण्यपर्णंश्वभ्रंहिमोदकं ॥ ७

दिशब्दषड्भिर्जातिःपर्यायैःस्त्रीक्लीबे । अचान्यदितिबाधितत्वादन्यत्तदेवक्लीबमितिसावधानार्थमुक्तं । चकाराद्वस्त्राभरणादिसंग्रहः । खमिंद्रियंव्योमच । तद्यथा । छिद्रंनभः क्रियदित्यादि । अरण्यंविपिनंकाननमित्यादि । पर्णंपत्रंदलं । "पर्णंपत्रेकिंशुकेचेतिमेदिनी" । श्वभ्रंतुपातालामित्यादि । हिमंतुप्राग्येलमित्यादि । "हिमंतुषारमलयोर्द्वयोःस्यान्नपुंसकमितिमेदिनी" । उदकंतुजलंनीरं ॥ ७ ७

शीतंशीतलमित्यादि। उष्णंनिग्नमित्यादि। शीतोष्णंगुणेक्लीबंतद्वतित्रिषु। "शीतंहिमगुणेक्लीबंशीतलालसयोस्त्रिषितिमेदिनी॥ उष्णो ग्रीष्मेपुमान्दक्षाशीतयोरन्यलिंगकइतिमेदिनी"। मांसंशितंतरसमित्यादि। रुधिरंशोणितंरक्तं। "रुधिरंशोणारकेपुंसिक्लीबंतुकुंकुमा सृजोरितिमेदिनी"। सुरवंतुवदनंबलं। "सुरवंनिःसरणंबलेभारंभोपाययोरपिसंध्यंतरेनाटकादेः शब्देपिचनपुंसकमितिमेदिनी"।

शीतोष्णमांसरुधिरसुरवाक्षिद्रविणंबलं ॥ २२ ॥

अक्षितुनयनंनेत्रं। द्रविणंधनमित्यादि। "द्रविणंकांचनेधने। पराक्रमेबलेपिस्यादितिहैमः"। बलशब्देनशक्तिसैन्यग्रहणं। शक्तौ यथा। बलंशुष्मामित्यादि। सैन्यंचक्रमित्यादि ॥ २२ ॥

फलंफलमात्रंकपित्थमित्यादि। "हलमित्यपिकचित्पाठः"। हेमसुवर्णंकनकमित्यादि। शुल्बंनाम्नमित्यादि। "शुल्बंतान्त्रेयज्ञकर्मण्या चारेजलसंन्निधावितिमेदिनी"। लोहंकालायसमित्यादि। सुखंशर्मशातामित्यादि। दुःखंतुकृच्छ्रंकष्टं। शुभंकल्याणंकुशलमित्यादि। अशुभमकल्याणमित्यादि। जलपुष्पाणि। कुमुदकमलकल्हारोत्पलादीनि। लवणंसैंधवमित्यादि। व्यंजनंलेमनंनिष्ठानमित्यादि। "व्यं

फलहेमशुल्बलोहसुखदुःखशुभाशुभं॥ जलपुष्पाणिलवणव्यंजनान्यनुलेपनं॥ २२॥

जनंश्मश्रुचिन्हयोः। लेमने ऽवयवेंकादावितिहेमः"। व्यंजनविशेषाणामपिदधितक्रादीनांग्रहणं। अनुलेपनंकुंकुमादि। अथवा धितादन्यत्तुहलिकिं। आकाशोवि[illegible]याधोः। अटवीअरण्यानीत्यादिकं एवमन्यदप्यूह्यं॥ २२॥

कोट्याअन्यकोटिशब्दंविनायाशतादिसंख्यासाक्लीबेस्यात्। लक्षशब्दोवाक्लीबे। पक्षेस्त्रियां।"लक्षानपुंसिसंख्यायांक्लीबंव्याजशरव्ययो रितिमेदिनी"। तदितिलक्षस्यपर्यायोनियुतमित्यर्थः। उदाहरणंच। नियुतंशतंसहस्रंसयुतमित्यादि।"शतंसहस्रमयुतंनियुतंप्रयुतंमतं स्त्रीकोटिरर्बुदमितिक्रमाद्दशगुणोत्तरमितिरत्नकोशः"। असंतमिसंतमुसंतमन्नंतंचयत्द्यच्कंद्विस्वरंतत्क्लीबे। असंतंयथा।

कोट्याः शतादिसंख्याश्चालक्षानियुतंचयत्॥ द्यच्कमसिनुसन्नंतंयदनांतमकर्तरि॥२४॥

पयः। मनः। इसंतंयथा। सर्पिः। ज्योतिः। उसंतंयथा। वपुः यजुरित्यादि। अन्नंतंयथा। चर्म। शर्म। सामेत्यादि। अनेनैवक्लीबत्वे सिद्धेपरतोयन्मर्मशब्दोपादानंतदस्यानित्यत्वज्ञापनार्थं। तेनगुणोधकारशोकेषुतमोरागोपुमानयमित्याद्यपिसिद्धं। अकर्तरिकर्तुरन्यत्र यदनांतंअनेत्यंतंयस्यतत्क्लीबे। यथा। गमनं। मरणं। दानं। करणं। वरणं। अकर्तरीतिकिं। इध्मप्रश्चनः कुठारः। नंदयतीति नंदनः॥२४॥

यांतंद्वीपेयथा। पात्रंवहित्रंवस्त्रंगात्रमित्यादि। सकारोलकारोवाऽपधाअंत्यात्पूर्वोयस्यतत्। सोपधंयथा। बिसं। अंधतमसं। लोपधं यथा। कुलंमूलमित्यादि। शिष्टमितियदधिकृत्यानुक्तादन्यत्। तच्चभगुक्तंयदबाधितंतदपित्रांतादिकंद्वीपेइत्यर्थः। शिष्टमितिकिं। पुन्नः। वृत्रः। हंसः। कंसः। पनंसः। शिला। कालः। गलः। संख्यापूर्वोरात्र।द्वीपे। रात्रान्हाहाःपुंसीतिपुंस्त्वप्राप्तेरपवादोयं।

त्रांतंसलोपधंशिष्टंरात्रंप्राक्संख्ययान्वितं॥ पात्राद्यदंतैरेकार्थोद्विगुर्लक्ष्यानुसारतः॥२५॥

त्रिरात्रं। पंचरात्रं। संख्ययेतिकिं। अर्धरात्रः। मध्यरात्रः। पात्रादिभिरदंतैरेकार्थोयोद्विगुःसद्वीपे। पंचरात्रे। आदिनाचतुर्युगं। लक्ष्यानुसारतः शिष्टप्रयोगानुगमेनेत्यर्थः। अनेनपंचमूली। त्रिलोकीत्यादिरपवादः। एकार्थः किं। पंचकपालः। पुरोडाशः। द्विगुरयंतद्धितार्थः॥ २५॥

द्वंद्वसमासस्यैकत्वं। अव्ययीभावश्चक्लीबे। द्वंद्वैक्यंयथा। पाणिपादं। शिरोग्रीवं। मार्दंगिकपाणविकं। अव्ययीभावोयथा। अधिस्त्रि। उपगंगं। संख्याव्ययाच्चपरःपथःक्लीबे। यथा। द्विपथं। त्रयाणांपथांसमाहारस्त्रिपथं। चतुष्पथं। अव्ययाद्यथा। विपथं। कापथं। संख्याव्ययादितिकिं। धर्मपथः। योगपथः। पथइतिसमासानानुकरणं। समासेषष्ठीविभक्त्यंतात्परश्छायाक्लीबे। स्याच्चेद्द्वंद्वनांसंबंधिनीतर्ह्यं

द्वंद्वैकत्वाव्ययीभावौपथः संख्याव्ययात्परः॥ षष्ठ्याश्छायाबहूनांचेच्छायंसंहतौसना॥ २६॥

च। तदुदाहरति। द्वीनांपक्षिणांछायाविच्छायमिति। इक्षुच्छायं। बहूनामितिकिं। कुड्यस्यछायाकुड्यछायमिति। वास्त्रियांवक्ष्यते। संहतौसमूहविषयेसभाशब्दःक्लीबे। अत्रापिषष्ठ्याइत्यनुवर्तते। यथादासीनांसभादासीसभं। स्त्रीसभमित्यादि। संहताविति किं। दासीनांसभादासीसभा। दासीगृहमित्यर्थः॥ २६॥

शालार्थाद्गृहार्थाअपिशब्दात्संहत्यर्थाच्चयासभासाअराजकात्राजशब्दविवर्जितात्राजामनुष्यार्थात्राजार्थात्राजपर्यायात्अमनुष्यार्थात्रक्ष आदिशब्दात्षष्ठ्यंतात्पराच्चेनङ्ङीबे । शालागृहं । अर्थोऽभिधेयोयस्याः साशालार्था । अराजकराजपर्यायात्तु यथा । इनसभं । प्रभुसभं । अमनुष्यार्थाद्यथा । रक्षःसभं । पिशाचसभं । अराजकात्किं । राजसभा । "राजन्यर्थाच्चयङ्णाम्नेङ् । चंद्रगुप्तसभा ।

शालार्थाद्विपराराजामनुष्यार्थादराजकात् ॥ दासीसभंनृपसभंरक्षःसभमिमादिशः ॥ २७ ॥

राजविशेषोयं" । षष्ठ्याइतिकिं । नृपतिविषयेसभानृपतिसभा । नृणांपतिर्यस्यांसाचासौसभाचेतिवानृपतिसभा । अमनुष्यार्थादितिकीं । दासीसभा । दासीनांशालेत्यर्थः । इमादिशइतिदासीसभमित्यादीनिक्रमेणत्रीण्युदाहरणानीत्यर्थः । तत्रदासीसभमित्यादितुसंहतावित्यस्यैवइतरेतुशालासंहतिसाधारणे ॥ २७ ॥

तयोरुपज्ञोपक्रमयोरादिर्माथर्म्यंतस्यप्रकाशनेद्योतनउप [illegible] समासःक्लीबेस्यात्। उदाहरणमाह। उपज्ञायतइत्यु
पज्ञा। कोब्रह्मातस्योपज्ञाकोपज्ञंप्रजा। कस्योपक्रमःकोपक्रमंलोकः। प्रजापतिनाप्रथमंसृष्टत्वात्तेनादा[illegible]पज्ञाताप्रजेत्यर्थः। तदा
दित्वेतिकिं। देवदत्तोपज्ञामृन्मयःघटकारः। मृत्कारस्यानेकक रणात्तात्[illegible]देवदत्तेतिसामान्यशब्देनचनदादित्वप्रतिपादनाभावेक्लीब

उपज्ञोपक्रमांतश्चतदादित्वप्रकाशने ॥ कोपज्ञकोपक्रमादिकंथोशीनरनामसु ॥ २८ ॥

त्वाभावः। एवंदेवदत्तोपक्रमोरथः। अत्रापिषष्ठ्याइत्यनुवर्तते। उशीनराणांनामसुमध्येषष्ठ्यंतात्परा कंथाक्लीबे। सोशीनां
कंथासौशामिकंथं। उशीनरादन्यत्रदाक्षिकंथा। नामसुइतिकिं। वीरणकंथा ॥ २८ ॥

चकारइत्अनुबंधोयस्यसः चत् । नञ्श्वणश्चकञ्चचि [illegible]णकाचेतः । तेभ्योऽन्येयेतव्यदादयोऽंताधातुप्रत्ययाःभावेविहितास्तेस्त्रीबे । तत्रथा तुप्रत्ययायथा । भवितव्यं । भाव्यं । सहितं । भुक्तं । नणकाचिद्योन्यइतिकिं । प्रश्नः । न्यादः । आखूत्थः । वेपथुः । नणकेतिघञउपलक्षणं । पाकः । भावेकिं । कर्तव्योधर्मसंग्रहः । मृतोवैरी । समूहार्थेयथा । भिक्षाणांसमूहोभैक्षं । गार्भिणं । औपगवकं । काकमित्यादि । भावेदंता

भावेनणकाचिद्योन्येसमूहेभावकर्मणोः ॥ अदंतप्रत्ययाःपुण्यसुदिनाभ्यांतहःपरः ॥ २९ ॥

यथा । गोर्भावःगोत्वं । शुचेर्भावःशौचं । कर्मणियथा । शौल्कं । राज्ञःकर्मराज्यं । चौर्यं । तलप्रत्ययस्यतुस्त्रीत्वमुक्तं । पुण्यसुदिनाभ्यां परोविहितसमासांतोहन्शब्दःस्त्रीबे । अन्हाहांताइतिपुंस्त्वस्यापवादोयं । पुण्याहं । सुदिनाहं सुदिनशब्दः [illegible]र्थः ॥ २९ ॥ ७

क्रियाणामव्ययानांचभेदकानिविशेषणानिक्लीवेएकवचनेचस्युः। क्रियाविशेषणंयथा। मंदंपचति। सुखंतिष्ठंतियोगिनः।सलिलंनृत्यतिबाला। अव्ययविशेषणंयथा। रम्यंस्वः। सुखंघ्राणः। अथकानिचिल्लिङ्गानि। उक्थंसामभेदः। नोटकंवृत्तभेदः।चो

कां०३

क्रियाविशेषणानांभेदकान्येकतेप्युक्थनोटके॥ चोचंपिच्छंगृहस्थूणंतिरीटंमर्मयोजनं॥३०॥

चमुपभुक्तफलावशिष्टंतालफलंवा। कदल्याःफलमितिकश्चित्। पिच्छंबर्हं। गृहस्थूणंगेहस्तंभः। तिरीटंवेष्टनं।"शिरोभूषणमितिकेचित्।"मर्मसंधिस्थानं। योजनंक्रोशाचतुष्टयं।"योजनंपरमात्मनि"। चतुष्क्रोश्यांचयोगेइतिमेदिनी"॥३०॥

राजसूयवाजपेये यागभेदौ। "राज्ञालतात्मकः सोमः सूयतेत्रराजसूयं। वाजंपेयीसुरापेयमत्रवाजपेयं"। कवेः क्रतौवर्तमानंगद्यं। पदसमूहः। पद्यंश्लोकः। "पद्यंश्लोकेपुमान्छूद्रेपद्यावर्त्मनिकीर्तितेतिमेदिनी"। कवेःकृतावितिकिं। गद्यावाक्। पद्यापद्धतिः। माणिक्यंरत्नभेदः। "माणिकेमणिपूरारव्येनगरेभवंमाणिक्यं"। भाष्यंपदार्थविवृति "सूत्रार्थोवर्ण्यतेयत्रवाक्यैःसूत्रानुकारिभिः। स्वपदानिचवर्ण्यंतेभाष्यंभाष्यविदोविदुरिति"। सिंदूरंरक्तचूर्णभेदः। "सिंदूरस्तरुभेदेस्यात्सिंदूरंरक्तचूर्णके॥ सिंदूरारोचनारक्तवे

राजसूयंवाजपेयंगद्यपद्येक्रतौकवेः॥ माणिक्यभाष्यसिंदूरचीरचीवरपिंजरं॥ ३१॥

ल्लिकाधातकीपुष्पेतिविश्वप्रकाशः। "चीरंवस्त्रभेदः। "चीरीशिल्क्यांनपुंसकं। गोस्तनेवस्त्रभेदेचेरेखालिखनभेदयोरितिमेदिनी"। चीवरंमुनिवासः। "शाक्यभिक्षुप्रावरणमितिसुभूतिः।" पिंजरंपक्ष्यादिबंधनागारं। "पिंजरोऽभ्रांतरेपीनेक्लीबंस्वर्णेचपीतकइतिकोशांतरं। पंजरमित्यपिपाठः"॥ ३१॥

लोकायतंचार्वाकशास्त्रं। हरितालंधातुभेदः।"हरितालंधातुभेदेस्त्रीदूर्वाकाशरेखयोरितिमेदिनी"। विदलंवंशादलकृतपात्रभेदः। स्थालंभांडभेदः। बाल्हिकंकुंकुमादि ।"बाल्हवमित्यपि। बल्हुदेशेभवंबाल्हवं"॥ ॥ इतिनपुंसकसंग्रहः॥ ॥ अथाचिक्कसपर्यंताःपुंसिस्त्रीबेचस्युः।उक्तादन्यःशेषः। यथाशरवपद्मोनिधिवाचकोपुंसि । कंबुनालिनवाचिनोतुपुंन्नपुंसकयोः। तथाऽत्यशब्दोपियत्पर्यायेबाधित

लोकायतंहरितालंविदलस्थालबाह्लिकं॥ ॥ इतिनपुंसकसं
ग्रहः॥ ॥ पुन्नपुंसकयोःशेषार्धंचैपिण्याककंटकाः॥ ३२॥

स्तत्पर्यायाद्विन्नश्चेत्पुन्नपुंसकयोरित्यर्थः। ऋचोर्धमर्धर्चः। पिण्याकंतिलकल्कं।"पिण्याकोऽस्त्रीतिलकल्केहिंगुबाह्लीकसिंहुकइतिमेदिनी"। कंटकंरोमहर्षादि।"कंटकःक्षुद्रशत्रौचकर्मस्थानिकदोषयोः। रोमांचेचद्रुमांगेचकंटकोमस्करेपिचेतिविश्वप्रकाशः। कंटकोनास्त्रियांक्षुद्रशत्रौमत्स्यादिकीकसे।नेयोगिकादिदोषेक्लीस्याद्रोमांचद्रुमांगयोरितिमेदिनी"॥ ३२॥ ७ ७

मोदकंभक्ष्यभेदः।"मोदकः खाद्यभेदेऽस्त्रीहर्षुकेपुनरन्यवदितिमेदिनी। मोदकोहर्षुलेखाद्यइतिहैमः"। तंडकः उपतापविशेषः।"तंडकःखंजनेफेनेसमासप्राग्यवाचिच॥ गृहदारुतरुस्कंधमायाबहुलकेषपीतिमेदिनी। दंडकइत्यपि"। टंकोऽमदारुणः।"टंकोनीलकपित्थेचरवनित्रेटंकनेस्त्रियां। जंघायांस्त्रीपुमानूकोपेकोशाजिग्राबदारणइतिमेदिनी"। शाटकः पटभेदः। कर्पटंस्थानभेदः। वस्त्रभेदोवा।"खर्वटमित्य

मोदकस्तुंडकष्टंकः शाटकःकर्पटोऽर्बुदः॥ पातकोद्योगचरकतमालामलकानडुः॥ ३३॥

पि। यत्रैकतोभवेद्ग्रामोनगरंचैकतःस्मृतं। मिश्रंतुखर्वटंनामनदीगिरिसमाश्रयमिति"। अर्बुदंसंख्याभेदः। पातकंब्रह्महत्यादि। उद्योग उत्साहः। चरकंवैद्यशास्त्रभेदः।"करकइत्यपिपाठस्तत्रस्यूतवस्त्रं"। तमालोवृक्षभेदः।"तमालस्तिलकेखड्गेतापिच्छेवरुणद्रुमइतिमेदिनी"। आमलकोधात्रीफलं। नडोंतर्बिवरं।"तृणभेदश्च"॥ ३३॥

कुष्ठंरोगभेदः। "कुष्ठंरोगेपुष्करेऽस्त्रीतिमेदिनी॥ कुष्ठंभेषजरोगयोरितिहेमः। मुंडंशिरः। शीधुमद्यं। बुस्तंभृष्टमांसंपनसादिफलासारभागश्च। क्वचित्पुस्तमितिपाठः। क्वचित्श्वस्तमपि। क्ष्वेडितंवीरकृतसिंहनादः।" क्षेमंकुशलं। "क्षेमोऽस्त्रीलब्धरक्षणे॥ चंडायांनाभुभेनस्त्री कात्यायन्यांतुयोषितीतिमेदिनी। मोक्षेपिक्षेमः। कुट्टिमंभित्तिभेदः। "कुट्टिमोऽस्त्रीनिबद्धाभूरितिकोशांतरं"। संगमंसंयोगः। ज्ञातमा

कुष्टंमुंडंशीधुबुस्तंक्ष्वेडितंक्षेमकुट्टिमं॥ संगमंज्ञातमानार्मशंबलाव्ययतांडवं॥ ३४॥

नंमानभेदः। अर्मअक्षिरोगभेदः। शंबलंवर्णभेदः। "पाथेयंचशबलोऽस्त्रीसंबलवत्कूलपाथेयमत्सरइतिमेदिनी"। अव्ययंस्वरादिनिपातवाचकं। "अव्ययोस्त्रीशब्दभेदेनाविक्रीनिर्व्ययेत्रिषितिमेदिनी"। तांडवंनृत्यभेदः॥ ३४॥

कवियंमहाराष्ट्रभाषयाकडियाळीतिप्रसिद्धं। "नार्योकवीखलीनंकवियंवानातुरंगमुखभांडामितिबोपालितः"। कंदंपद्मिनीमूलादि
"कंदोऽस्त्रीसूरणेसस्यमूलेजलधरेपुमानितिमेदिनी। क्वचित्कर्मेतिपाठः"। कार्पासंवस्त्रयोनिभेदः। "पारावारःपयोराशौपारावारं

कवियंकंदंकार्पासंपारावारंयुगंधरं॥ यूपंग्रग्रावपात्रीवि[illegible]चेक्कसो॥ ३५॥

तटद्वयमितिहैमः। युगंधरंकूबरं"। यूपंयज्ञांगभेदः। ग्रग्रीवंद्रुमशीर्षकं। "वातायनंमुखज्ञालावा"। पात्रीवंयज्ञपात्रभेदः।
यूषंमंडइतिप्रसिद्धं। "मुद्गामलकयूषस्तु ग्राहीपित्तकफेहितइत्यक्रूरेवैद्यके"। चमसाचिक्कसोपात्रभेदौ॥ ३५॥ ७ ५

अर्धर्चादौअस्मिन्वर्गेपुन्नपुंसकाधिकारेइतियावत्। घृतादीनांपुंस्त्वाद्यंपाणिन्यादिभिरुक्तंतनुवेदिकं। वेदेप्रसिद्धमित्यर्थः। अतस्तदिह नोक्तंलोकेप्यस्तिचेत्तद्दोषवत्तूक्तादन्यः दोषस्तद्दस्तुशिष्टप्रयोगतोग्राह्यमित्यर्थः॥ ३६॥ ॥ इतिपुन्नपुंसकसंग्रहवर्गः॥ ॥

अर्धर्चादौघृतादीनांपुंस्त्वाद्यंवैदिकंध्रुवं॥तन्नोक्तमिहलोकेपितच्चेदस्त्यस्तुसेव
वत्तू॥ ३६॥ इतिपुन्नपुंसकसंग्रहवर्गः॥ स्त्रीपुंसयोरपत्यांताःद्विचतुःषट्पदोरगाः॥

अपत्यांताअपत्यप्रत्ययांताः स्त्रीपुंसयोः स्युः। यथा। उपगोःअपत्यंपुमान्औपगवः। उपगोरपत्यंस्त्रीऔपगवी। वैदेहः। वैदेही। गा
र्ग्यः। गार्गी। द्विचतुःषट्पदोरगाः। द्विपदचतुष्पदषट्पदवाचिनोभुजगवाचिनश्चजातिभेदाः स्त्रीपुंसयोः॥ ७ ७

तत्राद्विपदजातिभेदोयथा। मानुषःपुमान्। मानुषीस्त्री। ब्राह्मणः। ब्राह्मणी। "शूद्रः। शूद्रा। अजादित्वाट्टाप्"। चतुष्पदोभेदोयथा। मृगः। मृगी। हयः। हयी। षट्पदभेदोयथा। भृंगः। भृंगी। उरगोयथा। उरगः। उरगी। नागः। नागी। स्त्रीयोगेसहपूर्वाख्याः पुन्नामानिस्त्रीपुंसयोः। यथा। इंद्रः। इंद्राणी। मातुर्भ्रातामातुलः। तस्यस्त्रीमातुली। पुंसिवर्तमानोमातुलः। स्त्रीयोगात्स्त्रीत्वेपिवर्तते। शूद्रस्यस्त्रीशूद्री। मल्लकादयश्चस्त्रीपुंसयोः। मल्लकःपुष्पवल्लीभेदः। स्त्रियांतुमल्लिका॥ २७॥ऊर्मिस्तरंगः। "मुनिरितिपाठः। मुनिर्यतौंगुदीबुद्

जातिभेदाःपुमाख्याश्चस्त्रीयोगेःसहमल्लकः॥ २७॥ऊर्मिर्वराटकःस्वातिर्वर्णकोझाटलीर्मनुः॥
मूषास्तूपाटीकर्कंधूर्यष्टिःशाटीकटीकुटी॥ २८॥ ॥इतिस्त्रीपुंसशब्दद्विवर्गः॥ ॥

पिलक्षागस्तेकिंशुकइतिविश्वप्रकाशाः"। वराटकःकपर्दकः। स्त्रियांतुवराटिका। स्वातिर्नक्षत्रं"वर्णकश्चंदनं। विलेपनेचंदनेचवर्णकंपुन्नपुंसकमितिरभसः। वर्णकश्चारणेस्त्रीतुचंदनेचविलेपने। द्यूयोर्नाल्यादिषुस्त्रीस्यादुत्कर्षेकांचनस्यचेतिमेदिनी। झाटलिः। किंशुकवृक्षसद्वाः। मोरखाइतिरभसिद्धः। मनुःस्वायंभुवादिः। मंत्रोवा। मूषातेजसावर्तनी। सूपाटीपरिमाणभेदः। कर्कंधूःबदरी। शाटी पटभेदः। कटीदेहावयवः। कुटीगृहंकोणकः। अत्रषूणलकारांतः॥ २८॥ इतिस्त्रीपुंससंग्रहवर्गः॥ ५

भावक्रिययोः भावेकर्मणि च वर्तमानः ष्यञ्प्रत्ययो वुञ्प्रत्ययश्च क्वचित्स्त्रीनपुंसकयोर्वर्त्तते । तत्र ष्यञ्प्रत्ययमुदाहरति । औचित्यमिति । उचितस्यभावः औचित्यं । औचिती च । मित्रस्यकर्ममैत्र्यं मैत्री वा । "एवंसाम्यं सामग्री वा । आर्हत्यं आर्हती"

स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ्क्वचिच्च वुञ् ॥ औचित्यमौचिती
मैत्रीमैत्र्यं वुञ्प्रागुदाहृतः ॥ ३९ ॥ ७ ७ ७

वुञ्प्रत्ययस्तुवैरमैथुनिकादिवुन्नित्यं प्रागुदाहृतः । तत्रामिथुनस्यभावः कर्मवामैथुनिका । मैथुनकं च ॥ ३९ ॥ ७
७ ७ ७ ७ ७ ७

तत्पुरुषेषष्ठ्यंतंषष्ठीविभक्त्यंतंप्राक्पदंयासांनाः षष्ठ्यंतप्राक्पदाः सेनाद्याः स्त्रियांङीबेचस्युः । उदाहरति । नृणांसेनानृसेनं । वेतिविकल्पान्नृसेनापि । इतरइतिएवमन्यत्राप्युदाहर्तव्यमित्यर्थः । यवसूरंयुवसुरा । कुड्यस्थच्छायाकुड्यच्छायंकुड्यच्छायावा । षष्ठीबहुव्रीहिनांतप्राक्पदाचेच्छायाङीबएवेतिप्राग्दर्शितं ॥ ४० ॥ आबंतोत्तरपदोनंतोत्तरपदश्चाद्विगुसमासःपुंसिनस्यात् । किंतुस्त्रीनपुंसक

षष्ठ्यंतप्राक्पदाःसेनाछायाशालासुरानिशा ॥ स्याद्नृसेनंश्वनिशंगोशालमितरे
त्रादिक् ॥ ४० ॥ आबंन्नतोत्तरपदोद्विगुश्चापुंसिनश्चलुप् ॥ त्रिखट्वंचत्रिखट्वीच
त्रितक्षंचत्रितक्ष्यपि ॥ ४१ ॥ ॥ इतिस्त्रीनपुंसकशेषः ॥ ॥ ७ ७

योः । अन्नंतोत्तरपदस्ययोऽत्यनकारस्तस्यलुप्स्त्रीपश्चस्यात् । आबंतांत्यपदमुदाहरति । त्रिखट्वमिति । तिस्रःखट्वःसमाहृताःत्रिखट्वं । त्रिखट्वीच । अन्नंतोत्तरपदोयथा । त्रयस्तक्षाणःसमाहृतात्रितक्षं । त्रितक्षीच । तक्षन्शब्दस्यांत्यनकारोलुप्तः ॥ ४१ ॥
॥ ॥ इतिस्त्रीनपुंसकसंग्रहः ॥ ॥ ७ ७ ७

पात्राद्योदाडिमांतास्त्रिषुत्रिलिंगाः । पात्रंपात्रः । इत्यादि । पात्र्यमत्रेत्रिष्वितिमेदिनी । पात्रंतुकूलयोर्मध्येपर्णेनृपतिमंत्रिणि । योग्यभाजनयो र्यज्ञभांडेनाट्यानुकर्तरीतिहैमः । वाटःपथिवृतौवाटंवरंडेगात्रभेदयोः ॥ वाटीवास्तौगृहोद्यानकट्योरितिहैमः" । कुवलंबदरीफलं । "कु वलंचोत्पलेमुक्ताफलेपिबदरीफले । कुड्मलेमुकुरेपुंसिनद्वयोर्नरकांतरइतिमेदिनी" ॥ ॥ इतित्रिलिंगशेषः ॥ ॥ द्वंद्वैकत्व

त्रिषुपात्रीपुटीवाटीपेटीकुवलदाडिमौ ॥ इतित्रिलिंगशेषसंग्रहः ॥

परंलिंगंस्वप्रधानेद्वंद्वेतत्पुरुषेपितत् ॥ ४२ ॥ ७ ७

स्याव्ययीभावस्यचलिंगंप्रागुक्तं । स्वप्रधानेउभयपदप्रधानेइतरेतरास्ख्येद्वंद्वसमासेचतत्पुरुषेचयत्परमवि[illegible]स्तंलिंगंतदेवलिंगं स्यात् । तत्रद्वंद्वेयथा । कुक्कुटमयूर्यौविमे । मयूरीकुक्कुटावि[illegible] । तत्पुरुषेयथा । धान्येनार्थोधान्यार्थः । सर्पाद्भीतिः सर्पभीतिः । सर्पभ यं । वाप्यश्वः ॥ ४२ ॥ ७ ७ ७ ७ ७

उक्तस्यतत्पुरुषलिंगस्यापवादमाह। अर्थेति। अर्थांतशब्दाःपरोपगाःपरगामिनःवाच्यलिंगाइत्यर्थः। यथाद्विजायायंद्विजार्थःसूपः। द्विजार्थायवागूः। द्विजार्थंपयः। अर्थेनानित्यसमासोविशेष्यलिंगताचेतिवक्तव्यमितिवार्तिकं। प्रेति। प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः। "परंविशेष्यमुपगच्छंतीत्यर्थः"। तत्रप्रादिपूर्वोयथा। अतिक्रांतोमालामतिमालोहरः। अतिक्रांतामालामतिमालेयं। अतिमालमिदं। अवकृष्टःकोकिलयाअवकोकिलः। अलंपूर्वोयथा। अलंकुमार्यैइत्यलंकुमारिरयं। अलंकुमारिदियं। अलंकुमारेदं। प्राप्तजीविकोद्विजः। प्राप्त

अर्थांताःप्राद्यलंप्राप्तापन्नपूर्वाःपरोपगाः॥ तद्धितार्थोद्विगुःसंख्यासर्वनामतदंतकाः॥ ४२॥

जीविकास्त्री। प्राप्तजीविकमिदं। एवमापन्नजीविकः। तद्धितार्थोद्विगुर्वाच्यलिंगः। पंचकपालःपुरोडाशः। पंचकपालंहविः। संख्याशब्दाःसर्वनामसंज्ञकास्तदंतकाश्चपरलिंगभाजः। संख्यायथा। एकःपुमान्। एकंकुलं। द्वौपुमांसौ। द्वेस्त्रियौ। कुलेच। "त्रयःपुरुषाः। तिस्रःस्त्रियः। त्रीणिकुलानि। एवंचत्वारः। चतस्रः। चत्वारि।" षट्संज्ञकान्वक्ष्यति। विंशत्यादीनांलिंगंद्वितीयकांडेउक्तं। शतादिकानांतुनपुंसकसंग्रहे। सर्वनामयथा। सर्वोदेशः। सर्वानदी। सर्वेजलं। एवंपरःपुमान्। "संख्यांतकोयथा। ऊनत्रयः। ऊनतिस्रः। ऊनत्रीणि"। सर्वनामांतकोयथा। परमसर्वः। परमसर्वा। परमसर्वं॥ ४२॥ ७

अदिङ्नाम्नोबहुव्रीहिरन्यलिंगभाक्। तदुदाहरणंस्वयमूह्यं। यथा। दृढुभार्योयस्यसदृढुभार्यः। "बहुधनः। बहुधना। बहुधनमित्यादि"। अदिङ्नाम्नामितिकिं। दक्षिणस्याःपूर्वस्याश्चादिशोरंतरालंदक्षिणपूर्वा। गुणयोगेनद्रव्ययोगेनक्रियायोगेनचयउपाधिर्विशेषणंतेनधर्मिणिप्रवृत्तास्तेधर्मिलिंगभाजः। गुणयोगेनयथा। गंधवतीपृथ्वी। गंधवानयमा। गंधवत्कुसुमं। द्रव्ययोगेनयथा। दंडिनीस्त्री। किं

बहुव्रीहिरदिङ्नाम्नामुन्नेयंतदुदाहृतं ॥ गुणद्रव्यक्रियायोगोपाधिभिःपरगामिनः ॥ ४४ ॥ कृतः कर्तर्यसंज्ञायांकृत्याः कर्तरिकर्मणि ॥

यायोगेनयथा। पाचिकास्त्री ॥ ४४ ॥असंज्ञायांकर्तरिकृत्प्रत्ययाःपरोपगायथा। करोतीतिकर्त्री। कर्तापुमान्। कृत्कलत्रं। असंज्ञायांकिं। ऋजा। हरिः। कर्तरिकिं। कृतिः। कर्मणिकर्तरिचवर्तमानाःकृत्यप्रत्ययाःपरगामिनः। कर्मणियथा। कर्तव्याभक्तिः। कर्तव्योधर्मस्त्वया। कर्तरियथा। वसतीतिवास्तव्योयं। वास्तव्यासा। वास्तव्यंतत्। कर्तरिकर्मणीतिकिं। भावेतुएधितव्यंत्वया ॥ ७

तेनरक्तमित्याद्यर्थेअणादित्यर्थातोनानार्थभेदकाअनेकार्थविशेषणभूताःविशिष्टत्वाद्धीत्यालिंगाइत्यर्थः। यथाकुसुंभेनरक्ताशारीकौसुंभी। कौसुंभःपटः। कौसुंभंवासः। तेनरक्तंरागादित्यण्। रक्ताद्यर्थइत्यादिशब्दान्मथुरायाआगतोमाथुरोयं। इयंमाथुरी। अणाद्यंता इत्यादिशब्दाद्ग्रामेभवाग्राम्यास्त्री। ग्राम्यःपुमान्। अत्रयत्प्रत्ययः॥ ४५॥ षट्संज्ञकाःषांतन्नांतसंख्याकतिशब्दश्चत्रिलिंग्यांसमाः सरूपाणित्यंबहुषुवर्तमानाअतोबहुवचनांताइत्यर्थः। यथा। षडिमे। षडिमाः। षडिमानि। पंचभिरेताभिः। कतिपुमांसः। कतिस्त्रि

अणाद्यंतास्तेनरक्ताद्यर्थेनानार्थभेदकाः॥षट्संज्ञकास्त्रिषुसमायुष्मदस्मत्तिङ्व्ययं॥

यः। कतिकुलानि। युष्मदस्मच्छब्दौतिङ्व्ययं व्ययानिचत्रिषुसमानि। युष्मच्छब्दोयथा। त्वंस्त्री। त्वंपुमान्। त्वंकलत्रं। अस्मच्छब्दोयथा। आवांपुमांसौ। आवांस्त्रियौ। आवांकलत्रे। तिङ्यथा। स्थालीभवतिघटोभवतिपात्रंभवति। एवंदाराभवंतीत्यादि। अव्ययंयथा। उच्चैःदाराः। उच्चैःस्त्री। उच्चैःकलत्रं। उच्चैःप्रासादइत्यादि॥

परमिति। विरोधेविप्रतिषेधेसतिपरंलिंगानुशासनंप्रवर्तते। यथामानुषशब्दस्यकषणमभरोपांताद्इतिप्रागुक्तविधिनापुंस्त्वेएवप्राप्तेसति द्विचतुःषट्पदेत्यनेनोत्तरत्रोक्तेनस्त्रीपुंसविधिनिश्चेयः। यथामानुषीयं। मानुषोयमिति। शेषमत्रानुक्तं। अभिधानादिकं शिष्टानांमहाकवीनांभाष्यकारादीनांप्रयोगतोज्ञेयं। यद्वा अनुक्तंशब्दलिंगंशिष्टप्रयोगतोबोद्धव्यं। लिंगमाश्रित्यंलोकाश्रयत्वाल्लिंगस्येतिभाष्योक्तेरित्यर्थः॥ ४६॥ उक्तमुपसंहरति। इतीति। इत्येवंप्रकारेणामरसिंहस्यकृतौनामलिंगशास्त्रेसामान्यनामातृतीयः कांडः।

परंविरोधेशेषंतुज्ञेयंशिष्टप्रयोगतः॥ ४६॥ ॥इतिलिंगादिसंग्रहवर्गः॥ ॥इत्य
मरसिंहकृतौनामलिंगानुशासने॥सामान्यकांडस्तृतीयः सांग एवसमर्थितः॥ ४७॥

प्रस्तावोवर्गसमूहोवाअंगैःसहितःसमर्थितोनिरूपितइत्यर्थः॥ ४७॥ ॥श्रीमत्यमरविवेकेमहेश्वरेणविरचितइत्थं। सामान्यकांडएषोऽतिमः समाप्तः॥ रवनागसप्तेंदुमितेशाकेपुण्याख्यपत्तने॥ यत्नतःपाठशालायामंकितेयंशिलाक्षरैः॥ शाके १७८० अधिकज्येष्ठकृष्णपक्षेप्रतिपद्यांतिथौभृगुवासरेसमाप्तं॥ विशेष्यनिघ्नवर्गस्यमूलश्लोक ११ क्षेपकश्लोक० संकीर्णवर्गमूल ४३ क्षेपक० नाना

र्थवर्ग २५७ क्षे० ७॥ अव्ययवर्गमूल २१ क्षेपक० लिंगादिसंग्रहवर्गमूल ४७ क्षे० एवंसर्वेमूलश्लोक ४८ क्षेपक ७॥ सर्वेमिलित्वा ४९०

इतिअमरकोशटीकातृतीयकांडःसमाप्तः